Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

## जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आ.श्री
कैलाससागरसूरि
ज्ञानमंदिर
कोबा, गांधीनगर
P
1448

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# ॥ श्री व्यवहारसूत्रम् ॥

## भाग-४ - उद्देश ६-७



संपादकः आचार्य विजय मुनिचन्द्रसूरिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



પ.પૂ આચાર્યદેવશ્રી ૐકારસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



પ.પૂ આચાર્યદેવશ્રી ભદ્રસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



આરાધનારત પ.પૂ. મુનિરાજશ્રી જિનચન્દ્રવિજયજી મ.સા.ના
કર કરમળમાં સમર્પિત

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

आ. श्रीॐकारसूरिज्ञानमंदिर ग्रंथावली - ५०/१

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम् - भाग ४

## (उद्देशः ६-७)

आगमप्रभाकर मुनिश्री पुण्यविजयजी सज्जीकृत सामग्रीसहायेन

संपादकः

आचार्य विजय मुनिचन्द्रसूरिः

सहायकः मुनि दिव्यरत्नविजयः

प्रकाशक

आचार्यश्री ॐकारसूरिज्ञानमंदिर, सुभाषचोक, गोपीपुरा, सूरत.

For Private And Personal Use Only

Vyavahara Sootraṁ part - 4
Editor Ac. Munichandrasoori

प्रथम संस्करण
वि. सं. २०६६, ई. स. २०१०
नकल : २५०

**प्राप्तिस्थान**

आचार्य श्रीॐकारसूरिज्ञानमंदिर
आचार्य श्रीॐकारसूरिआराधनाभवन
सुभाषचोक, गोपीपुरा, सूरत.
फोन : ९८२४१५२७२७
E-Mali : omkarsuri@rediffmail.com
mehta_sevantilal@yahco.co.in

आचार्य श्रीॐकारसूरिगुरुमंदिर
वावपथकनी वाडी,
दशापोरवाड सोसायटी,
पालडी चाररस्ता, अमदावाद-७
फोन : ( ०७९ ) २६५८६२१३

विजयभद्रचेरिटेबल ट्रस्ट
पार्श्वभक्तिनगर, नेशनल हाईवे १४,
भीलडीयाजी जि. बनासकांठा. पीन-३८५५३५.
फोन : ०२७४४-२३३१२९, २३४१२९

मुद्रक :-
किरीट ग्राफिक्स २०९, आनंद शोपींग सेन्टर, रतनपोल, गोलवाड, अहमदाबाद-०१ फोन : २५३५४९०९



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## પ્રકાશનના લાભાર્થી

સુવિશાલગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય

રામચન્દ્ર - ભદ્રંકર - કુંદકુંદસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન

વર્ધમાનતપોનિધિ ૧૦૦ + ૬૭ ઓળીના આરાધક

પૂ. ગણિવર્યશ્રી નયભદ્ર વિ.મ.સા.ની પ્રેરણાથી

શ્રી દેવકીનગર જૈન સંઘ બોરીવલી વેસ્ટ મુંબઈ.

શ્રી વર્ધમાનભક્તિ શ્વે.મૂ. ઈરાનીવાડી જૈન સંઘ કાંદીવલી, (વેસ્ટ) મુંબઈ.

શ્રી ધર્મવર્ધક શ્વે.મૂ.પૂ. જૈન સંઘ મધુપાર્ક

કાર્ટરરોડ નં. ૧ બોરીવલી ઇસ્ટ મુંબઈ આદિએ

જ્ઞાનદ્રવ્યમાંથી સુંદર લાભ લીધો છે.

**અનુમોદના....અનુમોદના....અનુમોદના....**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# પ્રકાશકીય

પૂ.આ.ભ. **શ્રીઅરવિંદસૂરિ** મ.સા. અને પૂ.આ.ભ.શ્રી **યશોવિજયસૂરિ** મ.સા.ના આશીર્વાદ અને માર્ગદર્શન પૂર્વક આ ગ્રંથમાળામાં નવા નવા ગ્રંથો પ્રગટ થતા રહે છે.

વ્યવહારસૂત્ર નિર્યુક્તિ-ભાષ્ય અને પૂ.આ.શ્રી મલયગિરિસૂરિ મ.સા.ની ટીકા સાથે ઘણાં વર્ષો બાદ પ્રગટ થઈ રહ્યું છે.

તાડપત્રીય વગેરે વિવિધ પ્રતો અને આગમપ્રભાકર મુનિશ્રી પુણ્યવિજયજી મ.સા.એ તૈયાર કરાવેલ સામગ્રીના આધારે પૂ.આ.ભ. શ્રીમુનિચન્દ્રસૂરિ મ.સા.એ સંશોધન-સંપાદન કાર્ય કર્યું છે.

વ્યવહારસૂત્ર છેદગ્રંથ છે. સાધુ-સાધ્વીજીના પ્રાયશ્ચિત્ત વગેરે વિષયો આમાં આવતા હોવાથી એનું વાંચન-પઠન અધિકારપ્રાપ્ત મુનિઓ જ ગુરુ આજ્ઞા મુજબ કરી શકે.

ગ્રંથ ઘણો વિશાળ હોવાથી એ છ ભાગોમાં બહાર પડે છે. વિહારમાં વાંચન કરતાં પૂ. મુનિ ભગવંતોની જરૂરિયાતને ધ્યાનમાં લઈ પ્રતાકારે પણ થોડી નકલો પ્રકાશિત થઈ રહી છે.



For Private And Personal Use Only

આ અતિ મહત્ત્વના ગ્રંથનું સારી રીતે સંશોધન થાય એ માટે સંપાદક આચાર્યશ્રીએ જુદા જુદા વિદ્વાન આચાર્ય ભગંવતો આદિને વિનંતી કરી હતી. સદ્ભાગ્યે વિવિધ વિદ્વાનોએ આ ગ્રંથને આત્મીયભાવે તપાસી આપ્યો છે. પૂ.આ.ભ.શ્રી રાજશેખરસૂરિ મ.સા. (પૂ. આ.ભ.શ્રી રામચન્દ્રસૂરિ મ.સા. સમુદાય), પૂ. આ.ભ.શ્રી કુલચન્દ્રસૂરિ મ.સા., પૂ.આ.શ્રી પુણ્યરત્નસૂરિ મ.સા., પૂ.આ.શ્રી યશોરત્નસૂરિ મ.સા.(પૂ. આ.શ્રી ભુવનભાનુસૂરિ મ.સા. સમુદાય), પં. મુક્તિચન્દ્ર વિ. ગણી., પં. મુનિચન્દ્ર વિ. ગણી (પૂ.આ.ભ.શ્રી કલાપૂર્ણસૂરિ મ.સા. સમુદાય) આદિએ ગ્રંથ સંશોધનમાં સહકાર આપ્યો છે. આમ અનેક વિદ્વાનોના સહકારથી સંશોધિત થતાં આ આગમગ્રંથને પ્રકાશન કરતાં અમે ગૌરવ અનુભવીએ છીએ.

અનેક સંઘોએ જ્ઞાનદ્રવ્યમાંથી પ્રકાશનનો લાભ લીધો છે. તે બધાના અમો આભારી છીએ.

**લી. ટ્રસ્ટીગણ,**

**આ.ૐકારસૂરિ આરાધના ભવન.**

# સંપાદકીય

વ્યવહારસૂત્ર(સટીક)ના આ બીજા ભાગમાં વ્યવહારસૂત્રનો પ્રથમ ઉદ્દેશ એના ઉપરની નિર્યુક્તિ-ભાષ્ય ગાથા. ૧૮૩ થી ૯૬૩ અને તેના ઉપરની આ. શ્રી મલયગિરિસૂરિ મહારાજે રચેલી ટીકા વગેરે પ્રસિદ્ધ થઈ રહ્યા છે.

સંપાદન માટે ઉપયુક્ત હસ્તલિખિત પ્રતો વગેરેનો પરિચય અને ગ્રંથ-ગ્રંથકાર વિષેનો સંક્ષિપ્ત પરિચય વગેરે પ્રથમભાગના સંપાદકીયમાં આપવામાં આવ્યા છે. જિજ્ઞાસુઓએ ત્યાંથી જોઈ લેવા વિનંતી.

## ઋણસ્વીકાર

પ્રસ્તુત વ્યવહારસૂત્રના સંશોધનમાં પાઠ શુદ્ધીકરણ વગેરેમાં જેઓએ આત્મીયભાવે સહાય કરી છે -

પૂ. આ. ભ. રાજશેખરસૂરિમ.સા., આ.શ્રી કુલચન્દ્રસૂરિ મ.સા., આ. શ્રી પુણ્યરત્નસૂરિમ.સા. આ.શ્રી. યશોરત્નસૂરિ મ.સા., પં. શ્રી મુક્તિચન્દ્રવિ. ગણી, પં. શ્રી મુનિચન્દ્રવિ. ગણી આદિના અમે ખૂબ ખૂબ ઋણી છીએ. આભાર.

લી.

પૂ. આ.ભ.શ્રી **ભદ્રસૂરીશ્વરજી** મ.સા.ના શિષ્યરત્ન
પૂ. મુનિરાજશ્રી **જિનચન્દ્રવિજય** મ.સા.ના વિનેય
આ. વિજય **મુનિચન્દ્રસૂરિ.**

## વિશેષ સૂચના

પોથી આકારે પ્રગટ થતાં આ ગ્રંથમાં પુસ્તક આકારના એક પેજનું મેટર બે પેજમાં લેવામાં આવ્યું છે. એટલે અનુક્રમણિકા વગેરેમાં પેજ નંબર બન્ને સંસ્કરણમાં સમાન રહે તે માટે પોથીમાં પેજ નંબર **A - B** એ પ્રમાણે આપ્યા છે.

એટલે પુસ્તકનું પેજ ૨= પોથીનું પેજ ૨**A** - ૨**B** સમજવું.

પરિશિષ્ટોમાં જ્યાં પંક્તિ નંબર દર્શાવ્યા છે. તે પોથીના **A - B** બાજુમાં સળંગ પંક્તિ નંબર ગણવાથી મળી રહેશે.

જેમ કે અવતરણસૂચિમાં 'तृस्त्रोऽवात्' પૃષ્ઠ ૬ પંક્તિ ૨માં છે તે પોથીમાં ૬**A** બાજુમાં છે 'શબ્દપ્રથા' પૃષ્ઠ ૬ પંક્તિ ૧૮માં બતાવેલ છે તે ૬**B** બાજુમાં છે.

# विषयानुक्रमः भाग-४

## उद्देश : ६


| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र १ | ज्ञातविधिगमनसामाचारी | १०४७-१०४८ |
| २४२७-२८ | ज्ञातविधौ गमनकारणानि | १०४८ |
| २४२९ | ज्ञातविधिभेदाः | १०४९ |
| २४३०-३२ | ज्ञातविधिगमने दोषाः | १०४९ |
| २४३३-४१ | सदृष्यन्तं दोषनिरूपणम् | १०५०-१०५२ |
| २४४२-५३ | दोषविशेषाः | १०५२-१०५५ |
| २४५४ | ज्ञातविधौ प्रायश्चित्तम् | १०५५ |
| २४५५-९ | स्वजनगृहे भिक्षाग्रहणे अग्रहणे दोषाः | १०५५-१०५७ |
| २४६०-६३ | ग्लानादिकारणे ज्ञातविधौ गमनम् यतना च | १०५७ |
| २४६४-६९ | ज्ञातविधौ गमनयोग्यस्य परीक्षा | १०५८ |

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथा | विषय: | पेज |
|---|---|---|
| २४७० | गमनविधि: | १०५९ |
| २४७६-८४ | ज्ञातविधौ भिक्षाचर्याविधि: | १०६१-१०६३ |
| २४८५-८९ | ग्लानचिकित्साविधि: | १०६४-१०६५ |
| २४९०-३ | ज्ञातविधौ आभवनविधि: | १०६५-१०६६ |
| २४९४-८ | ज्ञातविधिगमनकारणानि यतना च | १०६६-७ |
| सूत्र २ | आचार्योपाध्याययो: पञ्च अतिशया: | १०६७ |
| २५०२-२० | वसतेरन्त: पादप्रस्फोटन-प्रमार्जनातिशय: | १०६७-१०७५ |
| २५०२-४ | पादप्रस्फोटनविधि: | १०६८-१०७० |
| २५०५-०९ | पादप्रमार्जनविधि: | १०७०-१०७१ |
| २५१०-११ | आचार्यस्य बहिर्गमनकारणानि | १०७२ |
| २५१२-७ | आचार्यस्य बहि: प्रतीक्षणे दोषा: | १०७२-१०७४ |
| २५१८-२० | भिक्षो: बहि: प्रतीक्षणे दोषाभाव: | १०७५ |
| २५२१ | कारणे भिक्षोरपि अप्रतीक्षणम् | १०७५ |
| २५२२-४६ | वसतेरन्त: उच्चारादिकरणातिशय: | १०७६-१०८४ |




For Private And Personal Use Only

| गाथा | विषय: | पेज |
|---|---|---|
| २५२२-३३ | आचार्यस्य बहि: स्थण्डिलभूमौ गमने दोषा: | १०७६-१०८० |
| २५३४-७ | लोकोत्तरिकविनयस्य श्रेष्ठत्वम् | १०८०-१०८२ |
| २५३८-३९ | बहि: स्थण्डिलभूमौ गमने यतना | १०८२ |
| २५४०-४४ | आचार्यस्य रक्षणे उदाहरणम् | १०८३-१०८४ |
| २५४५ | आचार्यरक्षणे शुश्रूषणे गुणा: | १०८४ |
| २५४६ | वैयावृत्यकरणे स्वातन्त्र्यम् ३ | १०८४ |
| २५४७-८ | आचार्यस्य अतिशायिप्रभुत्वम् | १०८४-१०८५ |
| २५४९-५१ | आचार्यस्य भिक्षार्थमनटनम् | १०८५-१०८६ |
| २५५२-८४ | भिक्षार्थमटने दोषा: | १०८६-१०९६ |
| २५८० | भिक्षार्थमनटने गुणा: | १०९४ |
| २५८४-८६ | भिक्षार्थं गते यतना | १०९६ |
| २५८७-९७ | आचार्यस्य अतिशये उदाहरणादि: | १०९७-१०९९ |
| २५९८-२६०८ | भिक्षाटनप्रयोजनानि आचार्यस्य | ११००-११०३ |
| २६०९-१२ | वैयावृत्त्ये निर्जरा | ११०४-११०५ |
| २६१३-१७ | भावानुसारं निर्जरा | ११०५-११०६ |

| गाथा | विषयः | पेज |
|---|---|---|
| २६१८ | त्रिपृष्ठोदाहरणम् | ११०६-११०७ |
| २६१९-२२ | निर्जरया बलवत्तादिः | ११०७-११०८ |
| २६२३ | सूत्रा-ऽर्थ-तदुभयानां क्रमशः प्राबल्यम् | ११०८ |
| २६२४-२८ | अर्थवाचनाचार्येण अभ्युत्थानं न कार्यम् | ११०८-१११० |
| २६३०-३९ | अभ्युत्थाने व्याक्षेपतादिदोषाः | १११०-१११४ |
| २६४०-४५ | अभ्युत्थानस्य कारणत्रयम् | १११४-१११५ |
| २६४६-४७ | वाचनाचार्यस्य सेवायां दृष्यन्तः | १११५-१११६ |
| २६४८ | सेवानिरपेक्षस्य दण्डः | १११६ |
| २६४९-५३ | सेवाकरणे लाभः | १११६-१११८ |
| २६५४-५५ | आचार्यस्य अन्ये पञ्च अतिशयाः | १११८ |
| २६५६ | उत्कृष्टे भक्तपाने १-२ | १११८ |
| २६५६-८ | उपधिधावनम् - ३ | १११८-१११९ |
| २६५९-६१ | प्रशंसनम् ४ | १११९ |
| २६६२-६३ | हस्त-पादादि प्रक्षालनम् ३ | ११२० |
| २६६४-७२ | अतिशयानां परिभोगाऽपरिभोगे आर्यसमुद्र- | |

| गाथा | विषयः | पेज |
|---|---|---|
| | आर्यमङ्गुदृष्यन्तः | ११२०-११२२ |
| २६७२-६ | पृथग्वसतौ वसने दोषाः | ११२२-११२४ |
| २६७७-८४ | आचार्य-गणावच्छेदकयोः पृथग्वसने प्रयोजनादिः | ११२४-११२६ |
| २६७८ | पर्वस्य व्याख्या | ११२४ |
| २६७८-९ | विद्याग्रहणकालः | ११२४ |
| २६८०-८४ | महाप्राणध्यानकालादिः | ११२५-११२६ |
| सूत्र ३ | गणावच्छेदकस्य द्वौ अतिशयौ | ११२६ |
| २६८५-८७ | कारणे भिक्षोरपि पञ्च अतिशयाः | ११२६-११२७ |
| सूत्र ४ | अकृतश्रुतानां एकत्रवासे प्रायश्चित्तम् | ११२७ |
| २६८८ | आचारकल्पधरनिश्रायां वसनानुज्ञा | ११२७ |
| २६८९ | गीतार्थनिश्रायां लाभः | ११२८ |
| २६९०-२७०४ | अकृतश्रुतानां पृथग्वासे दोषाः | ११२८-११३२ |
| सूत्र ५ | अकृतश्रुतानां कारणे पृथग्वासे यतना | ११३३ |
| २७०७-९ | स्थानाभावे पृथग्वासे तृतीयदिवसे- | |

| गाथा | विषयः | पेज |
|---|---|---|
| | गीतार्थेन सह संवसनम् | ११३४-११३५ |
| २७१०-१३ | हस्तशतान्तरे वसतौ यतना | ११३५-११३६ |
| २७१४-२४ | भिक्षाभावे पृथग्वासे सामाचारी | ११३६-११३९ |
| सूत्र ६ | बहुश्रुतस्यापि एकाकीवासनिषेधः | ११३९-११४० |
| २७२६-८ | एकाकीवासे प्रायश्चित्तं दोषाश्च | ११४०-११४१ |
| २७२८-३७ | अपृथग्वासे गुणाः | ११४१-११४३ |
| २७३८-४४ | पृथग्वसतः शुभाशुभमनःपरिणामादिः सदृष्टान्तः | ११४३-११४५ |
| २७४५-६ | असंख्यलेश्यास्थानानि | ११४५-११४६ |
| २७४७-८ | विशुद्धभावस्य फलम् | ११४६ |
| २७४९-५८ | एकाकिवासे दोषाः | ११४७-११५० |
| सूत्र ७ | कारणे यतनापूर्वकम् एकाकीवासः | ११५० |
| २७६१ | जागरणयतनासामाचारी | ११५१ |
| २७६२ | एकाकिवसनकारणानि | ११५१ |
| २७६३-४ | त्वग्दोषप्रकाराः संक्रामकादिः | ११५१ |
| २७६४-८ | त्रिस्त्रः साराः | ११५१-११५३ |

| गाथा | | विषयः | पेज |
|---|---|---|---|
| २७६९-८२ | | संक्रमकत्वग्दोषे यतना | ११५३-११५७ |
| | सूत्र ८-९ | एकान्तवासे वेदोदयदोषाः | ११५७ |
| २७८४-९२ | | प्रतिसेवाप्रायश्चित्तादिः | ११५८-११६१ |
| | सूत्र १० | एकाकीनिर्ग्रन्थ्या गणप्रवेशे विधिः | ११६१ |
| २७९५-२८०५ | | एकाकिभवनकारणानि | ११६२-११६५ |
| २८०३-११ | | निर्ग्रन्थ्या गणप्रवेशे विधिः | ११६५-११६७ |
| | सूत्र ११ | निर्ग्रन्थगणप्रवेशे विधिः | ११६७ |
| २८१२-१३ | | निर्ग्रन्थगणप्रवेशे अतिदेशः | ११६८ |

॥ षष्ठः उद्देशः संपूर्ण ॥

**उद्देश : ७**

| गाथा | | विषयः | पेज |
|---|---|---|---|
| | सूत्र १ | अन्यगणादागताया निर्ग्रन्थ्याः प्रवेशनिषेधकारणादिः | ११६९ |
| २८१५-१७ | | गणात् निर्गत्य पार्श्वस्थेन तिष्ठत्याः उपदेशादिः | ११७० |
| २८१८ | | चैत्यसाराकारिकायाः निर्ग्रन्थ्या गणनयने विधिः | ११७१ |
| २८१९-२७ | | बहुमूल्यवस्त्रादिधारणे दोषाः प्रायश्चित्तं दण्डश्च | ११७१-७३ |

| गाथा | विषयः | पेज |
|---|---|---|
| २८२८-३७ | प्रव्रज्यार्थमागतानां योग्याऽयोग्यतानिर्णयार्थं गुरुपार्श्वे नयनम् | ११७३-७६ |
| २८२९ | अयोग्यस्य प्रव्रज्यायां हेतुः | ११७४ |
| २८३८-४० | आचार्यकृता परीक्षायतनादिः | ११७६-७७ |
| २८४१-४२ | दूत्यादि कैतवकरणम् | ११७७ |
| २८४३-४५ | सिद्धपुत्रिकाया वस्त्रहरणप्रवृत्तिः वस्त्रप्रकाराश्च | ११७७-७८ |
| सूत्र २ | अन्यगणादागताया निर्ग्रन्थ्याः प्रवेशे सामाचारी | ११७८ |
| २८५९-५७ | अन्यगणात् स्वगणप्रवेशविधिः | ११७९-८२ |
| सूत्र ३ | परोक्षे विसम्भोगकरणे निषेधः | ११८२ |
| २८६०-७४ | परोक्षविसम्भोगे दोषाः | ११८३-८८ |
| २८७१ | प्राघूर्णकादिभिः पृच्छा कार्या | ११८७ |
| २८७५ | प्रत्यक्षं विसम्भोगविधिः | ११८८ |
| २८७६-७९ | विसम्भोगयोग्याः | ११८८-८९ |
| २८८० | अयोग्येन सह व्यवहारे प्रायश्चितम् | ११८९ |

| गाथा | विषयः | पेज |
|---|---|---|
| २८८३-८७ | विदेशस्थेन सह परीक्ष्य व्यवहारकरणम् | ११९०-९२ |
| २८८८-९१ | आर्यसुहस्तितः परीक्ष्य आलोच्य भोजनादिः | ११९२-९३ |
| २८९२-९५ | स्वदेशस्थे भोजनादौ यतना | ११९३-९४ |
| २८९६-२९०० | प्राघूर्णकसामाचारी | ११९५-९६ |
| सूत्र ४ | निर्ग्रन्थीनां प्रत्यक्षं विसम्भोगकरणनिषेधः | ११९६ |
| २९०३-०८ | प्रत्यक्षं विसम्भोगे दोषाः | ११९७-९९ |
| सूत्र ५-६ | आत्मार्थं प्रव्राजनानिषेधः अन्यार्थं प्रव्राजनानुज्ञा | ११९९ |
| २९१०-१४ | आत्मार्थं प्रव्राजने दोषाः | १२००-०१ |
| २९१५ | यतेः स्वजनमहिलाप्रव्राजने हेतवः | १२०१ |
| २९१६-२१ | स्वजनमहिलाप्रव्राजने यतना | १२०२-०४ |
| २९२२-३० | दीक्षार्थ्याः द्रव्यादितुलनाः | १२०४-०७ |
| सूत्र ८ | दिग्बन्धसामाचारी | १२०७ |
| सूत्र ९-१० | विकृष्ट दिग्बन्धसामाचारी | १२०८ |
| २९३६-४७ | क्षेत्रविकृष्टस्य दिग्बन्धे दोषाः | १२०९-१२ |

| गाथा | विषयः | पेज |
| --- | --- | --- |
| २९४८-५२ | भवविकृष्टे दोषाः | १२१२-१३ |
| २९५३ | निर्ग्रन्थस्य विकृष्टे दिग्बन्धे दोषाः | १२१४ |
| २९५४-५८ | विकृष्टे दिग्बन्धे यतना | १२१४-१५ |
| सूत्र ११ | श्रमणानां दूरस्थ कलहस्य उपशमननिषेधः | १२१५ |
| २९६०-६१ | कलहोत्पत्तिकारणानि | १२१६ |
| २९६२-६३ | अनुपशामितकलहेन श्रमणेन सह व्यवहारकरणे प्रायश्चितम् | १२१७ |
| २९६४-६८ | कलहकारिणः प्रवेश निषेधसूचनायां दोषाः प्रायश्चितम् | १२१७-१८ |
| २९६९-७२ | सन्देशकथनविधिः | १२१८-१९ |
| २९७३-८६ | कलहोपशमनविधिः | १२१९-२३ |
| सूत्र १२ | श्रमणीनां दूरस्थकलहोपशमनानुज्ञा | १२२३ |
| २९८७-८९ | कलहनिमित्तानि | १२२३ |
| २९९०-९३ | कलहशमनविधिः | १२२४-२५ |

| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र १३ | व्यतिकृष्टे काले स्वाध्यायकरणउद्देशननिषेधः | १२२५ |
| २९९५ | विकृष्टे स्वाध्यायादौ करणे प्रायश्चित्तम् | १२२५ |
| २९९६ | स्तुति-स्तवव्याख्या | १२२६ |
| २९९७-६ | व्यतिकृष्टे काले उद्दिशतः दोषाः | १२२६-२८ |
| ३००२-६ | जिनवाणीगुणाः | १२२७-८ |
| ३००८-११ | द्रव्य-भावविषोदाहरणम् | १२२९-३० |
| ३०१३ | उद्देशकरणे गुणाः | १२३० |
| ३०१४-१७ | स्वाध्यायकरणकालः | १२३०-३१ |
| ३०१८ | अनुज्ञाविधिः | १२३२ |
| ३०१९-२० | परपक्षेऽपि अनुज्ञाकरणे लाभाः | १२३२ |
| ३०२१ | विकृष्टे काले स्वाध्याये दोषाः | १२३३ |
| ३०२२-२३ | अपवादे विकृष्टे स्वाध्यायानुज्ञा | १२३३ |
| ३०२४ | विकृष्टे स्वाध्याये यतना | १२३४ |
| सूत्र १४ | श्रमणीनां विकृष्टे स्वाध्यायानुज्ञा | १२३४ |

| गाथा | विषयः | पेज |
|---|---|---|
| ३०२७ | प्रवर्तिन्या अभावे निर्ग्रन्थो वाचयेत् | १२३४-३५ |
| ३०२८-३३ | वाचनाया अनिवार्यता | १२३५-३६ |
| ३०३४-३५ | अप्रशस्तभावेन वाचनायां दोषाः | १२३६ |
| ३०३६-३९ | प्रवाचिकाया अभावे श्रमणस्य वाचनायां मर्यादा | १२३६-३७ |
| ३०४०-५३ | संविज्ञत्वाऽसंविज्ञत्वपरीक्षा | १२३७-४१ |
| ३०५४ | असंविज्ञानां संविज्ञमध्ये स्थानम् | १२४१ |
| ३०५५-५६ | असंविज्ञमध्ये स्थापने प्रायश्चितम् | १२४२ |
| ३०५७-६० | महत्तरिकास्वरूपम् | १२४२-४३ |
| ३०६१-६६ | संयतीवाचनायां विधिः | १२४३-४४ |
| ३०६७-७९ | संयतीवाचनायां द्रव्यादियतनाः | १२४४-४७ |
| सूत्र १५ | अस्वाध्यायिके स्वाध्यायनिषेधः | १२४८ |
| सूत्र १६ | स्वाध्यायिके स्वाध्यायकरणोपदेशः | १२४८ |
| ३०८१ | अस्वाध्यायिकस्वरूपम् | १२४८ |
| ३०८२ | परसमुत्थम् पञ्चप्रकारम् | १२४८ |

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथा | विषयः | पेज |
|---|---|---|
| ३०८३-८९ | अस्वाध्यायिके उदाहरणद्वयम् | १२४९-५१ |
| ३०९०-९३ | संयमघाति अस्वाध्यायिकम्-१ | १२५१-५२ |
| ३०९४-९६ | औत्पातिकम् अस्वाध्यायिकम् - २ | १२५३ |
| ३०९६ | चैत्रीकायोर्त्सगप्रयोजनम् | १२५३ |
| ३०९७-३१०४ | सदेवम् अस्वाध्यायिकम् - ३ | १२५४-५७ |
| ३१०५-१० | व्युद्ग्रहजम् अस्वाध्यायिकम् - ४ | १२५७-५९ |
| ३१११-३२ | **शारीरिकम् अस्वाध्यायिकम् - ५** | १२५९-६७ |
| ३११२-२३ | तैरश्चं शारीरिकम् | १२६०-६४ |
| ३१२४-३२ | मानुषं शारीरिकम् | १२६४-६७ |
| ३१३३-३५ | स्वाध्यायज्ञानार्थं कालग्रहणम् | १२६७-६८ |
| ३१३६-९४ | **कालग्रहणविधिः** | १२८६-८५ |
| ३१३६ | २४ भूमिप्रत्युपेक्षणम् | १२६८ |
| ३१६१-६६ | कालवधस्थानानि | १२७६-६७ |
| ३१८१-८७ | कालसंख्याविचारः | १२८१-८३ |




For Private And Personal Use Only

| गाथा | विषयः | पेज |
|---|---|---|
| ३१९५-९९ | स्वाध्यायप्रस्थापनविधिः | १२८५-८६ |
| ३२९७-९९ | स्वाध्यायकालः | १२८६-८७ |
| ३२०० | अस्वाध्याये स्वाध्यायकरणे दोषाः | १२८६ |
| ३२०१ | अपवादे अस्वाध्याये स्वाध्यायः | १२८६-८७ |
| सूत्र १७ | आत्मसमुत्थास्वाध्यायिके विधिः | १२८७ |
| ३२०३ | आत्मसमुत्थास्वाध्यायस्वरूपम् | १२८७ |
| ३२०४-१३ | आत्मसमुत्थे यतनापूर्वक वाचना | १२८८-९० |
| ३२१४-१८ | अस्वाध्याये स्वाध्यायकरणे दोषाः | १२९०-९१ |
| ३२१५ | रागद्वेषमोहकारणे विपर्ययः | १२९० |
| सूत्र १८-१९ | आचार्योपाध्यायपदप्रदानकालः | १२९१ |
| ३२२२ | त्रिपञ्चवर्षपर्यायस्य श्रमणस्य उपाध्यायाचार्यसङ्ग्रहः | |
| | ३०-६० वर्षपर्यायपर्यन्तः श्रमण्याः | १२९२ |
| | उपाध्यायाचार्ययोः सङ्ग्रहः | १२९२ |
| ३३२३ | श्रमण्याः त्रिसंग्रह-द्विसंग्रहार्हत्वादिः | १२९२-९३ |

| गाथा | विषयः | पेज |
|---|---|---|
| ३२२६-३२ | श्रमण्याः संग्रहावश्यकता | १२९३-९५ |
| ३२२९-३२ | पुरुषप्रधानता सदृष्टान्ता | १२९४-९५ |
| सूत्र २० | भिक्षुमरणे विधिः | १२९५ |
| ३२३५-५९ | **अनेकेषु भिक्षुषु परिष्ठापनविधिः** | १२९६-१३०४ |
| ३२४०-४४ | स्थण्डिलाऽप्रेक्षणे प्रायश्चित्तम् दोषाश्च | १२९८-९९ |
| ३२६०-६५ | स्तोकभिक्षुषु परिष्ठापनविधिः | १३०४-०६ |
| ३२६६-६७ | अपरिष्ठापने परलिङ्गकरणे दोषाः | १३०६-०७ |
| ३२६८-७८ | **एकाकिनः परिष्ठापने विधिः** | १३०७-१० |
| ३२७९-८० | पथि परिष्ठापनविधिः | १३१० |
| ३२८१-८४ | अपरिष्ठापने दोषाः | १३११-१२ |
| ३२८५-८६ | परलिङ्गकरणसामाचारी | १३१२-१३ |
| ३२८७-८८ | कालगतस्य उपधिग्रहणविधिः | १३१३ |
| सूत्र २१-२२ | उपाश्रयोऽवक्रयाय दत्ते विक्रीते वा सामाचारी | १३१३-१४ |
| ३२९०-९९ | भाटकेन दत्तायां शालादौ वसने प्रायश्चित्तम्, दोषाः | १३१४-१७ |

| गाथा | विषयः | पेज |
|---|---|---|
| ३३००-५ | कारणेऽवक्रयशालादौ वसने यतना | १३१७-१९ |
| ३३०६-१६ | शालातः निष्काशने सामाचारी | ३३१९-२२ |
| ३३१७-२२ | पडालीगलने विधिः | १३२२-२४ |
| सूत्र २३ | अवग्रहयाचनाविधिः | १३२४ |
| ३३२४-२८ | प्रभु-प्रभुसन्दिष्टस्य अनुज्ञापना | १३२५-२६ |
| सूत्र २४ | मार्गेऽपि अवग्रहयाचना | १३२६ |
| ३३३०-३३ | अध्वनि अवग्रहयाचना | १३२६-२७ |
| सूत्र २५-२६ | राजपरावर्तनादौ अवग्रहसामाचारी | १३२८ |
| ३३३५-३७ | निर्विवादे वंशपरंपरागते परिवर्तने विधिः | १३२९ |
| ३३३८-६१ | विवादग्रस्तपरिवर्तने विधिः | १३२९-३६ |


॥ सप्तमः उद्देशः संपूर्णः ॥

# व्यवहारसूत्रग्रन्थस्य विभागव्यवस्था

| भाग | ग्रन्थः | भाष्यगाथाटीकासहिता | पृष्ठ |
|---|---|---|---|
| १ | पीठिका | गाथा १-१८२ | १-१०८ |
| २ | उद्देश १ | गाथा १८३-९६३ | १०९-५१२ |
| ३ | उद्देश २-३ | गाथा ९६४-१७१० | ५१३-७९२ |
| ४ | उद्देश ४-५-६ | गाथा १७११-२८१३ | ७९३-११६८ |
| ५ | उद्देश ७-८-९ | गाथा २८१४-३८०९ | ११६९-१४८४ |
| ६ | उद्देश १० | गाथा ३८१०-४६७५ | १४८५-१७२५ |

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥
श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## भाग ४

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥

॥ अर्हं नमः ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## ॥ षष्ठ उद्देशकः ॥



For Private And Personal Use Only

व्याख्यातः पञ्चम उद्देशकः । सम्प्रति षष्ठो व्याख्येयः ।

तस्येदमादिसूत्रम्—

**सूत्रम्— भिक्खू य इच्छेज्जा [१]नायविहिं एत्तए, नो से कप्पइ से थेरे अणापुच्छित्ता नायविहिं एत्तए । कप्पइ से थेरे आपुच्छित्ता नायविहिं एत्तए । थेरा य से वियरेज्जा, एवं से कप्पइ नायविहिं एत्तए । थेरा य से नो वियरेज्जा, एवं से नो कप्पइ नायविहिं एत्तए। [२]जे तत्थ थेरेहिं अविइण्णो नायविहिं एइ, से संतरा छेए वा परिहारे वा। नो से कप्पइ अप्पसुयस्स अप्पागमस्स एगाणियस्स नायविहिं एत्तए । कप्पइ से जे तत्थ बहुस्सुए बब्भागमे तेण सद्धिं नायविहिं एत्तए ।**

**तत्थ [ णं ] से पुव्वागमणेणं पुव्वाउत्ते चाउलोदणे पच्छाउत्ते भिलिंगसूवे, कप्पइ से चाउलोदणे पडिगाहेत्तए, नो से कप्पइ भिलिंगसूवे पडिगाहित्तए । तत्थ से पुव्वागमणेणं पुव्वाउत्ते भिलिंगसूवे, पच्छाउत्ते चाउलोदणे, कप्पइ से भिलिंगसूवे पडिगाहित्तए, नो**

१. नायविहं- श्युब्रींग। एवमग्रेऽपि ॥ २. जं -श्युब्रींग ॥

**से कप्पइ चाउलोदणे पडिगाहित्तए। तत्थ से पुव्वागमणेणं दो वि पुव्वाउत्ताइं, कप्पइ से दोवि पडिगाहित्तए । तत्थ से पुव्वागमणेणं दो वि पच्छाउत्ताइं नो से कप्पइ दो वि पडिगाहित्तए। जे से तत्थ पुव्वागमणेणं पुव्वाउत्ते से कप्पइ पडिगाहित्तए । जे से तत्थ पुव्वागमणेणं पच्छाउत्ते नो से कप्पइ पडिगाहित्तए ॥ १ ॥**

"भिक्खू य इच्छेज्जा नायविहिं एत्तए" इत्यादि । अथास्य सूत्रस्य कः सम्बन्धः ? इत्यत आह—

**छेयण-दा[१]हनिमित्तं, मंडलिडक्के व दीहगेलन्ने ।**
**पाउग्गोसहहेउं, नाय[२]विहिं सुत्तसंबंधो ॥२४२७॥**

सर्पेण दष्टः सर्पदंशस्थानस्य **छेदन**निमित्तं वा **दाहनिमित्तं** वा ज्ञातविधिं गन्तुमिच्छति, अथवा **मण्डलि**सर्पेण **दष्ट**स्ततो **दीर्घं ग्लानत्वं** जातं तस्मिन् सति **प्रायोग्यौषधहेतोर्ज्ञातविधौ** गमनं भवति, ततस्तत्प्रतिपादनार्थमेष सूत्रारम्भ इति **सूत्रसम्बन्धः** ॥ २४२७॥

---

**१. दाहसमुत्थं P ॥ २. णायविधी-ला. ॥**

अथवाऽयं सम्बन्धः—

**गेलण्णमहिकयं वा, गिलाणहेउं इमो वि आरंभो ।**
**आगाढं च तदुत्तं, सहणीयतरं इमं होति ॥ २४२८ ॥**

**वा**शब्दः प्रकारान्तरद्योतने । **ग्लानत्व**मनन्तरसूत्रे**ऽधिकृतम्। अयमपि** च सूत्रा**ऽऽरम्भो ग्लानहेतु**रिति सूत्रसम्बन्धः । केवलं यदनन्तरसूत्रे **उक्तं** ग्लानत्वं **तदागाढम्,** कालक्षेपाऽसहनात्; **इदं** त्वधिकृतसूत्रसूचितं **सहनीयतरम्,** ज्ञातविधिं गन्तुं शक्तत्वादिति ॥२४२८॥

एवमनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**भिक्षुः, चशब्दाद्** भिक्षुकी च **इच्छेत् 'ज्ञातविधिं'** स्वजनभेद**मागन्तुम्, तस्य न कल्पते स्थविरान् अनापृच्छ्य ज्ञातविधिमागन्तुम्,** यावत्करणादेवं परिपूर्णः पाठः— ***'कप्पति थेरे आपुच्छित्ता नायविहिं एत्तए । थेरा य से वियरेज्जा एवं से कप्पति नायविहिं एत्तए। जं तत्थ थेरेहिं अवितिण्णे नायविहिं एइ, से अंतरा छेदे वा परिहारे वा'*** इदं प्राग्वत्। **नो से कप्पति** इत्यादि, **न से तस्य कल्पते अल्पश्रुतस्याऽ**गीतार्थस्य **अल्पागमस्य** बहिः-शास्त्रेष्वतिपरिचयस्याऽविद्यमानजिनागमस्य **एकाकिनो ज्ञातविधिमागन्तुं, कल्पते से** तस्य **यस्तत्र** गच्छे **बहुश्रुतः** सूत्रापेक्षया, **बह्वागमो**ऽर्थापेक्षया, **तेन सार्द्धं ज्ञातविधिमागन्तुं, तत्र**

**ण**मिति वाक्यालङ्कारे, [से] तस्य ज्ञातविधिमागतस्य पश्चादा(पूर्वा)गमनेन आगमनात् पश्चात् (पूर्वं) यः **पूर्वायुक्तश्चाउलोदनः**। पूर्वायुक्त इति **के**चित् व्याचक्षते आगमनात् पूर्वं चुल्यामारब्धो रन्धनाय, **अ**परे व्याचक्षते आगमनात् पूर्वं पाकाय समीहितम्, एतत् मतद्वयमप्यसङ्गतम्, आरब्धे समीहिते च पुनः प्रक्षेपसम्भवात्, तस्मात् पूर्वायुक्त इति किमुक्तं भवति—आगमनात् पूर्वं गृहस्थैः स्वभावेन रध्यमानः (राद्धः) स तन्दुलोदनो [कल्पते । पश्चात्प्रवृत्तः] **भिलिङ्गसूपो** नाम सस्नेहः सूपः स [न]**कल्पते प्रतिग्रहीतुम्,** योऽसौ **तत्र पूर्वागमनेन** पूर्वमागताः साधव इति हेतोः **पश्चादायुक्त**-प्रवृत्तस्**तन्दुलोदनो** भिलिङ्गसूपो वा नासौ कल्पते प्रतिग्रहीतुम् । एष सूत्रसङ्क्षेपार्थः। अत्र **भा**ष्यकारो ज्ञातविधिपदं व्याख्यानयति—

**अम्मापितिसंबंधो, पुव्वं पच्छा व संथुया जे उ ।**
**एसो खलु नायविही, णेगा भेया य एक्केक्के ॥ २४२९ ॥**

**मातृद्वारेण पितृद्वारेण** च यः **सम्बन्ध एष ज्ञातविधिः** । अथवा **ये पूर्वसंस्तुता** मातापित्रादयो ये च **पश्चात् संस्तुताः** श्वश्रू-श्वशुरादयः, एष समस्तोऽपि ज्ञातविधिः। **एकैकस्मिंश्च** मातृद्वारे पितृद्वारे च यदि वा पूर्वसंस्तुते पश्चात्संस्तुते चा**नेकभेदाः** । अनेन

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधिशब्दो भेदवाची व्याख्यातः ॥२४२९॥

अधुना **निर्युक्तिविस्तरः**—

**नायविहिगमण लहुगा, आणाइ विराह संजमायाए ।**
**संजमविराहणा खलु, उग्गमदोसो तहिं होज्जा ॥ २४३०॥**

निष्कारणे विधिनापि ज्ञातविधौ गन्तुं न कल्पते, यदि विधिनाऽपि निष्कारणे **ज्ञातविधौ गमनं** करोति, तर्हि प्रायश्चित्तं चत्वारो **लघुकाः**। तथा **आज्ञादयो** दोषास्तथा **संयमे आत्मनि च विराधना**, तत्र **संयमविराधना** यतस्तत्र **खलु** निश्चित**मुद्गमदोषा** आधाकर्मादयो **भवेयुः** ॥२४३०॥

कथमुद्गमदोषा भवेयुरत आह—

**दुल्लभलाभा समणा, नीया नेहेण आहकम्मादी ।**
**चिरआगयस्स कुज्जा, उग्गमदोसं तु एयगरं ॥२४३१॥**



For Private And Personal Use Only

**दुर्लभलाभाः** खलु **श्रमणाः**, तथा महता **स्नेहेना**स्माकं वन्दापनाय **नीता** निर्गतास्तत-श्चिरादागतस्य आत्मस्वजनस्य तस्य प्राघूर्णकत्वकरणायो**द्गमदोष**माधाकर्मादिक**मेकतरं कुर्यात्** ॥२४३१॥

**इति संजमम्मि एसा, विराहणा होइमा उ आयाए ।**
**छगलग१ सेणावति, कलुण२ रयणथाले३ य एमादी ॥२४३२॥**

**इति** एवममुना प्रकारेण **एषा** अन्तरोदिता **संयमे विराधना भवति** । **आत्मनि** विराधना पुनरियं वक्ष्यमाणा **छाग**दृष्टान्तेन **सेनापतौ** मृते समागते **करुण**रोदने **रत्नस्थाले** रत्नभृते स्थाले ढौकिते **एवमादौ** ॥ २४३२॥

तत्र यथा छागदृष्टान्तेनाभिसमीहिते सेनापतौ मृते तस्मिन्नागते आत्मविराधना भवति तथा भावयति—

**जह रन्नो सूयस्सा, मंसं मज्जारएण अक्खित्तं ।**
**सो अद्दण्णो मंसं, मग्गइ इणमो य तत्थातो ॥२४३३॥**



For Private And Personal Use Only

**कडुहंडपोट्टलीए, गलबद्धाए उ छगलओ तत्थ ।**
**सूवेण य सो वहितो, थक्के आतो त्ति नाऊणं ॥२४३४॥**

यथा **राज्ञः सूपस्य** सूपकारस्य **मांसं मार्जारेणाक्षिप्तं** नीतं ततः **स** सूपकारो भीतो **अद्दनो** जातो **मांसं मृगयते**, तस्मिंश्च मृगयमाणे **तत्र** महानसे **अयम**तर्कितः **कटुभाण्ड-पोट्टलिकया गलबद्धया** युक्तश्छाग **आयातः**, **स तत्रायातः** सन् **सूपेन** सूपकारेण **मारितः**, **थक्के** प्रस्तावे **आयातः इति ज्ञात्वा** एष दृष्टान्तः ॥२४३३॥२४३४॥

साम्प्रतमुपनयमाह—

**एवं अद्दण्णाइं ताइं, मग्गंति तं समंतेण ।**
**सो य तहिं संपत्तो, ववरोवितो संजमा तेहिं ॥२४३५॥** दारं १।

**एवं** सूपकार इव तस्य साधो र्ये स्वजनास्तेषां सेनापतिर्मृतस्ततः **तानि** स्वजनरूपाणि मानुषाणि **अद्दण्णाइं** इति अवसन्ना तं श्रमणीभूतं सेनापतिभ्रातरमात्मीयं **समन्ततो मृगयन्ते**, **स च** मृग्यमाण**स्तत्रैव सम्प्राप्त**स्ततस्तं समुपस्थिताः स्वजना 'वयं परिभूता भविष्यामो न

च त्वयि नाथे विद्यमाने परिभवोऽस्माकं युक्तस्तस्मात् कुरु प्रसादम्' इत्येवं **तैरुपचर्यमाणः संयमात् व्यपरोपितः१**। सम्प्रति करुणद्वारमाह—

**सेणावती मतो ऊ, भाय-पिया वा वि तस्स जो आसि ।**
**[1]अण्णो य नत्थि अरिहो, नवरि इमो तत्थ संपत्तो ॥२४३६॥**

**सेनापतिर्मृतस्तस्य यो भ्राता पिता वा आसीत्** सोऽपि मृतः, **अन्यश्च** तस्मिन् गृहे **अर्हो** योग्यः सेनापतित्वस्य **नास्ति, नवरमयमेव** योग्यः । **स च तत्र संप्राप्तः** ॥२४३६॥

**तो कलुणं कंदंता, बिंति अणाहा वयं विणा तुमए ।**
**मा य इमा सेणावति, लच्छी संकामओ अन्नं ॥२४३७॥**

ततस्तत्सम्प्राप्त्यनन्तरं ते स्वजनाः **करुणं क्रन्दन्तो ब्रुवते- 'वयमनाथास्त्वया विना' इयं** च प्रत्यक्षत उपलभ्यमाना **सेनापतिलक्ष्मीरन्यं** पुरुषान्तरं **मा सङ्क्रामतु** ॥ २४३७॥

---

१. नत्थि अरिहो नवरि सो य इमो तत्थ संपन्नो-पु.प्रे.॥

**तं च कुलस्स पमाणं, बलविरिए तुज्झऽहीणमेयं च ।**
**पच्छा वि पुणो काहिसि, धम्मं दे ता पसीयाहिं ॥२४३८॥**

**त्वं च कुलस्यास्य** समस्तस्यापि **प्रमाणम्** । एतच्च **बलं** हस्त्यादि **वीर्य**मान्तरोत्साहः समस्तस्यापि कुलस्य **तवाधीनं, पश्चादपि** त्वं **धर्मं करिष्यसि** । सम्प्रति [1]**दे** प्रार्थये **तावत्** सेनापतिपदप्रतिपत्त्या **प्रसीद** ॥ २३३८॥

**एवं कारुण्णेणं, इड्डीए उ लोभितो उ सो तेहिं ।**
**ववरोविज्जति ताहे, संजमजीवाउ सो तेहिं ॥ २४३९॥** दारं २।

**एवमुपदर्शितेन** प्रकारेण **कारुण्येन ऋद्ध्या च तैः** स्वजनैः **स लोभितो लोभं** ग्राहितस्ततो लोभग्राहणानन्तरं स **तैः संयमजीविताद् व्यपरोप्यत** ॥ तदेवं करुणद्वारं व्याख्यातम् २ ॥ २४३९ ॥

अथ रत्नस्थालद्वारमाह—

**अविभव-अविरेगेण, विणिग्गतो पच्छ इड्डिमं जातो ।**
**थालं वसूण पुण्ण, उवणंती गिण्हिमं तं ति ॥ २४४०॥**

गाथा. २४३२-२४४० निष्कारणे ज्ञातविधि-गमने दोषाः

१. दे [ वं ] प्रा.पु.प्रे. ॥

कदाचित् स व्रती **अविभवेन** विभवाभावेन दारिद्र्येणेत्यर्थः, रिक्थं च पूर्वपुरुषोपार्जितं विरेक्तुं स्वजनैस्तदा नेष्टं ततोऽ**विरेकेण** च रोषेण गृहा**न्निर्गत्य** प्रव्रजितोऽभवत्, **पश्चाच्च** स स्वजनवर्गभ्रात्रादिक **ऋद्धिमान् जात**स्ततो **वसूनां** रत्नानां **पूर्णं** भृतं **स्थालं** तस्यागतस्यो**पनयन्ति** यथा— **गृहाण** रत्नस्थाल**मेतदिति** ॥ २४४० ॥

**तस्स वि दट्ठूण तयं, अह लोभकली ततो उ समुदिण्णो ।**
**वोरवितो संजमाउ, एए दोसा हवंति तहिं ॥२४४१॥**

**तस्यापि** साधोस्तत् रत्नभृतं स्थालं **दृष्ट्वा अथ** अनन्तरं **ततो** रत्नभृतस्थालदर्शनात् **लोभकलिः** समुदीर्णः सम्यक् उदयप्राप्तस्ततस्तेन **संयमात् व्यपरोपितः। एते दोषास्तत्र** ज्ञातविधिगमने दोषा **भवन्ति**॥२४४१॥

सम्प्रति ''एमादी'' (२४३२ गा.) इति व्याख्यानयन् प्रकारान्तरमाह—

**अहवा न होज्ज एते, अण्णे दोसा हवंति तत्थ इमे ।**
**जेहिं तु संजमातो, वोलिज्जइ सुट्ठितो ठियतो ॥२४४२॥**

**अथवा एते** अनन्तरोदिता **दोषा न भवेयुरन्ये इमे** वक्ष्यमाणास्तत्र ज्ञातविधिगमने **दोषा**

**भवन्ति यैः सुस्थितोऽपि स्थितकः** सन् **संयमात् चाल्यते** ॥२२४२॥

के ते दोषाः ? इत्यतस्तत्संसूचकं द्वारगाथाद्वयमाह—

**अक्कंदठाण१ ससुरे उव्वरए२ पेल्लणाए३ उवसग्गे** ४ ।
**पंथे रोयणभयए५ ओहावण अम्ह कम्मकरा६॥ २४४३॥**

**छाघातो७ अणुलोमे८ अभियोगे९ विसे१० सयं व ससुरेणं** ।
**पंतवण बंधरुंभण तं वा ते वातिवायाति११ ॥२४४४॥**

**आक्रन्दस्थानद्वारं** प्रथमं, द्वितीयं **श्वशुरेणापवरके** क्षिप्त इति द्वारम्, तृतीयं **प्रेरणा** द्वारं, चतुर्थ**मुपसर्ग**द्वारम्, पञ्चमं **पथि रोवनं भृतके** भार्या इति द्वारम्, षष्ठ**मपभ्राजना**द्वारं यथा—**अस्माकमेष कर्मकर** आसीत् । सप्तमं **छागघात**द्वारम्,अष्टम**मनुलोम**द्वारं, नवम**मभियोग्य**द्वारं, दशमं **विष**द्वारं। ततः **स्वयं श्वशुरेण प्रान्तापनबन्धरोधनं** क्रियते ततः स कोपात् **तं** श्वशुरं **सोऽतिपातयेत्** विनाशयेत्, ते वा श्वशुरप्रभृतयस्तं साधुमतिपातयेयुरित्येकादशं द्वारमितिद्वारगाथा-द्वयसमासार्थः ॥२३४३॥२३४४॥

साम्प्रतमेतदेव विवरीषुः प्रथमत आक्रन्दस्थानद्वारमाह—

**दीसंता वि हु नीया, पव्वयहिययं पि संपकप्पंति ।**
**कलुणकिवणाणि किं पुण, कुणमाणा एगसेज्जाए ॥ २४४५ ॥**

सेनापतौ मृते स तत्र ज्ञातविधौ गतस्तत्र **दृश्यमाना अपि निजकाः पर्वतहृदयमपि** पर्वतसदृशमानसमपि साधुं संयमात् **सम्प्रकम्पयन्ति** सम्यगन्तर्लीनीभूय प्रकर्षेण च्यावयन्ति, **किं पुनरेकस्यां शय्यायां** वसतौ **करुणकृपणानि** रोदनानि **कुर्वाणाः सुतरां** संयमाद् भ्रंशयन्ति ॥

**अक्कंदट्ठाणठितो, तेसिं सोच्चा उ नायगादीणं ।**
**पुव्वावरत्त रोवण, जाय ! अणाहा वए को वि ॥२४४६ ॥** दारं १।

सोऽधिकृतः साधुर्यत्र ते ज्ञाताः क्रन्दन्ति तस्मि**न्नाक्रन्दस्थाने स्थितः पूर्वरात्रेऽपररात्रे** च **रोदनं तेषां ज्ञातकादीनां** करुणं कृपणं यथा **जात** ! वय**मनाथा** भविष्यामः सर्वेषां परिभवास्पदमिति श्रुत्वा **कश्चित् व्रजेत्** प्रव्रज्यां मुञ्चेदित्यर्थः १॥ २४४६ ॥

गतमाक्रन्दस्थानद्वारमधुना ''ससुर उव्वरए'' [गा. २४४३] इत्यादिद्वारमाह—

**महिलाए समं छोढुं, ससुरेणं ढक्कितो उ उव्वरतो** । दारं २।
**नायविहिमागयं वा, पेल्ले उब्भामगसगाए ॥ २४४७॥** दारं ३।

तस्य साधोः श्वशुरकस्तं तत्र समागतं साधुं दृष्ट्वा निजदुहितरं सर्वालङ्कारभूषितां कारयेत्, कारयित्वा च वन्दापनाय भिक्षार्थं वा तत्र समागतस्तेन **श्वशुरकेण महेलया** भार्यया **सम**मपवरके **क्षिप्त्वा** अपवरको **ढक्कितः** स्थगितद्वारः कृतः। तत्र चोपसर्ग्यमाणः कश्चि**दुत्प्रव्रजेत्** २। प्रेरणाद्वारमाह-**ज्ञातविधिमागतं** सन्तं साधुं दृष्ट्वा स्वजनवर्गस्तस्य **स्वकीयया उद्भ्रामिकया** भार्यया **प्रेरयेत्** संयमात् च्यावयेत् । गतं प्रेरणाद्वारम् ३ ॥२४४७॥

सम्प्रति उपसर्गद्वारं प्रतिपिपादयिषुरिदमाह—

**मोहुम्मायकराइं, उवसग्गाइं करेइ से विरहे ।**
**भज्जा जेहिं तरू विव वाएणं भज्जते सज्जं ॥२४४८॥** दारं ४।

**भार्या से** तस्य स्वजनविधिं गतस्य साधो**र्विरहे मोहोन्मादकरान् उपसर्गान्** आलिङ्गनादीन् तान् **करोति, यैस्तरुरिव वातेन भज्यते सद्यः** ४॥२२४८॥

सम्प्रति "पंथे रोवण भयए" इति द्वारव्याख्यानमाह—

**कइएण सभावेण य, भयओ भोइं पहम्मि पंतावे ।**
**हियय अमुंडियं मे, भयवं पंतावए कुविता ॥२४४९॥** दारं ५।

साधुर्ज्ञातविधिं गतस्तत्र च लज्जया भिक्षां न हिण्डते तत उद्भ्रामकभिक्षाचर्यया गतस्तेषां च ज्ञातानां [1]क्षेत्रं **पथि** वर्तते, तस्य [च]भार्या भृतकेन समं क्षेत्रं गता, [ततश्च तत्र पथि गच्छन्तं तं साधुं दृष्ट्वा **भृतकः भोजिकं** स्वामिनं **कैतवेन स्वभावेन वा प्रान्तापयेत्**-रोदनादिना पीडामुत्पादयेदित्यर्थः। तथा **कुपिता** भार्या **भगवन्तं प्रान्तापयेत्** यथा- **मे हृदयममुण्डितं** नाहमद्यापि निर्विकारेति भावः ॥ २४४९॥

**कम्महतो पव्वइतो, भयतो एसऽम्ह आसि मा वंद ।** दारं ६।
**उब्भामए वोद्दे छाघायं तस्स सा देइ ॥ २४५०॥** दारं ७ ।

कदाचित् स प्रव्रजितः कर्मकर आसीत् ततस्तं बहुजनो दृष्ट्वा ब्रूयात् '**एषोऽस्माकं भृतक आसीत् कर्महतः** कर्मभग्नः सन् **प्रव्रजितस्तस्मान् मा वन्दिषत**'६। छागघातद्वारमाह-

---

१. 'क्षेत्रं पथि तत्र कैतवेन वा स्वभावेन वा तस्य भार्या भृतकेन समं क्षेत्रं गता । तत्र स भृतकः कैतवेन स्वभावेन वा कर्मणि' इति मु. मध्ये आहोरप्रत्योश्च पाठः ॥

**उद्भ्रामके** उद्भ्रामकभिक्षाचर्यागतेऽधिकृते भृतकरूपे साधौ **वोद्रे मूर्खे तस्य** भृतकस्य **सा** भृत्या **छागघातं ददाति,** कुपिता सती छागमिव तं घातयतीत्यर्थः ७॥ २४५०॥

अधुनाऽनुलोमोपसर्गद्वारमाह—

**मा छिज्जउ कुलतंतू, धणगोत्तारं तु जणयमेगसुयं** । दारं ८।
**वत्थऽन्नमादिएहिं, अभिजोग्गेउं च तं नेंति ॥२४५१॥** दारं ९।

तस्य ज्ञातविधिगतस्य साधोर्ज्ञातविधिरेवं ब्रूयात् '**मा छिद्यतां** छेदं यायात् **कुलतन्तुः** कुलसन्तानस्तस्मात् **धनरक्षकमेकं सुतं** प्रसादं कृत्वा **जनय,** पश्चात् पुनर्व्रतं गृह्णीथाः'। एवमुक्तः सन् कश्चित् उत्प्रव्रजेत् ८। अधुना अभियोग्यद्वारमाह—**वस्त्रान्नादिकै**रादिशब्दात् खादिमस्वादिमादिविशेषपरिग्रहः, तै**रभियोज्य** वशीकृत्य स्वजनास्**त**मात्मसमीपं **नयन्ति** ९ ॥२४५१॥

विषद्वारमाह—

**नेच्छंति देवरा मं, जीवंति इमम्मि इति विसं देज्जा ।**
**अन्नेण व दावेज्जा,** दा. १०। **ससुरो वा से करेइ इमं ॥२४५२॥**

तं ज्ञातविधिगतं साधुं दृष्ट्वा तद्भार्या इदं विचिन्तयेत् '**अस्मिन् जीवति मां देवरः** भोग्यतया **नेच्छन्ति,** तस्मान्मारयामि केनाप्युपायेनैनमिति' विचिन्त्य स्वयं वा **विषं दद्यादन्येन वा दापयेत्** १०। "सयं व ससुरेणं" इत्यादि द्वारमाह— **से** तस्य साधोः **श्वशुरो** वा स्वय**मिदं कुर्यात्** ॥२४५२॥

किं तदित्याह—

**पंतवणबंधरोहं, तस्स वि नियल्लगा व खुब्भेज्जा ।**
**अहवा कसातिओ ऊ, सो वऽतिवाएज्ज एक्कतरं ॥२४५३॥** दारं ११।

श्वशुरस्तं दृष्ट्वा कुप्येत यथैतेन मम दुहिता जीवच्छल्यीकृता, ततः कोपात् तस्य साधोः **प्रान्तावणं** प्रहारदानं **बन्धनं** वा निगडादिभिः **रोधं** वा गृहान्नगराद्वा अनिर्गमनं कुर्यात् कारयेत् वा । **तस्यापि** च साधो**र्निजका** आत्मीयास्तमेनामवस्थां प्रापितं दृष्ट्वा ज्ञात्वा **वा क्षुभ्येयुः,** क्षोभाच्च श्वशुरेण समं युद्धं कुर्युस्तत्र परस्परमपद्रावणादि भूयात् । **अथवा स** एव **वा** साधुः **कषायितः** कषायोदयं प्राप्तः सन् **एकतरं** श्वशुराद्यन्यतम**मतिपातयेत्** ११॥ २४५३॥

अत्र प्रायश्चित्तविधिमाह—

**एक्कम्मि दोसु तीसु व, मूलणवट्ठो तहेव पारंची ।**
**अह सो अतिवाइज्जइ, पावइ पारंचियं ठाणं ॥२४५४॥**

**एकस्मिन्**नतिपातिते **मूल**प्रायश्चित्तभाग् भवति **द्वयो**रतिपातितयो**रनवस्थाप्य**स्त्रिष्वतिपातितेषु **पाराञ्ची। अथ स** एवा**तिपात्यते** साधुस्तर्हि स यदि कथमपि जीवति ततः **पाराञ्चितं स्थानं प्राप्नोति** ॥ २४५४॥

अन्यान् दोषानाह—

**अहवा वि धम्मसद्धा, साहू तेसिं घरे न गेण्हंती ।**
**उग्गमदोसादिभया, ताहे नीया भणंति इमं ॥२४५५॥**

**अथवे**ति प्रकारान्तरेण दोषकथनोद्योतने **साधवो धर्मश्रद्धा उद्गमदोषादिभयात् तेषां गृहे न** किमपि **गृह्णन्ति ततस्ते निजाः** स्वजना **इदं भणन्ति** ॥२४५५॥

किं तदित्याह—

**अम्हं अणिच्छमाणो, आगमणे लज्जणं कुणइ एसो ।**
**ओहावण हिंडंतो, अण्णो लोगो व णं भणति ॥२४५६॥**

**अस्माकं** गृहे किमप्य**निच्छन् एष आगमने लज्जन**मस्माकं **करोति,** यतोऽस्मिन् प्रतिगृहमन्यत्र भिक्षां **हिण्डमाने** महती नूनमस्माकमप**भ्राजना लोको वान्य** इदं **भणति** ॥२४५६॥

किं तदित्याह—

**नीयल्लस्स वि भत्तं, न तरह दाउं ति तुब्भे वि किवणत्ति।**
**गेहे भुंजसु वुत्ते, भणाति नो कप्पियं भुंजे ॥२४५७॥**

तं साधुं भिक्षामटन्तं दृष्ट्वा केचिदन्ये स्वजनान् प्रति ब्रूयुः, यथा— **यूयं कृपणा निजकस्याप्ये**कस्य प्राघूर्णकागतस्य **भक्तं** दातुं **न शक्नुथ,** ततस्ते एवमुक्ताः सन्तः साधुसमीपमागत्य ब्रुवते— 'यावन्ति दिनानि यूयमत्र तिष्ठत तावन्माऽन्यत्र भिक्षामटथ किन्तु **गृहे भुङ्ग्ध्वम्।** अन्यत्र भिक्षाटने हि महत्यस्माकमपभ्राजना। स **एवमुक्तः** साधु**र्भणाति**-

'युष्मद्गृहे **न** भुञ्जे, यतोऽहं **कल्पिकं भुञ्जे** युष्मद्गृहे चोद्गमादिदोषाशङ्का' ॥२४५७॥

एवमुक्ते ते स्वजनाः प्राहुः—

**किं तं ति खीरमादी, दामो दिन्ने य भातिभज्जा ते ।**
**बेंति सुते जायंते, पडिया णे करा बहू पुत्ता ॥२४५८॥**

**किं तत्** कल्पिकं यत् त्वं भुङ्क्षे? ततः साधवो यानि युष्माकं यथाप्रवृत्तानि **क्षीरादीनि** क्षीर-घृत-दधि-गुडादीनि, ततस्ते आहुरेतानि यथाप्रवृत्तानि **दास्यामः**। गाथायां "**वर्त्तमानसामीप्ये वर्त्तमानवद्वा**"[ ] इति वचनात् तद् दातुं प्रवृत्तास्ततो **दत्ते** क्षीरादिके **भ्रातृभार्याः सुतान्** क्षीरादीनि याचमानान् प्रति **ब्रुवते**- 'हे **पुत्राः! बहवोऽस्माकं कराः पातिताः** ॥२४५८॥

तानेवाह—

**दहि-घय-गुल-तेल्लकरा, तक्ककरा चेव पाडिया अम्ह।**
**रायकरपेल्लियाणं, समणकरा दुक्करा वोढुं ॥२४५९॥**

**दधिकर-घृतकर-गुलकर-तैलकरास्तथा तक्रकराश्चास्माकं पातिताः** श्रमणैः, **राजकरा** अपि बहवोऽस्माकमपतन् तैः सदैव **प्रेरिता** वयं वर्त्तामहे, परं **राजकरप्रेरितानामस्माकमयं श्रमणकरो दुष्करो वोढु**मतिप्रभूतसर्वापहरणात् ॥ २४५९ ॥

**एए अण्णे य तहिं, नायविहीगमणे होंति दोसा उ ।**
**तम्हा उ न गंतव्वं, कारणजाते भवे गमणं ॥ २४६० ॥**

**एते** अनन्तरोदिता **अन्ये चानुक्तास्तत्र ज्ञातविधिगमने दोषा भवन्ति तस्मात्** ज्ञातविधौ **न गन्तव्यम्**। एष उत्सर्गः, **कारणे** पुनः ग्लानत्वादिलक्षणे **जाते** पुनरपवादतो **गमनं भवेत्** ॥ २४६० ॥

तदेवाह—

**गेलण्णकारणेणं, पाउग्गाऽसति तहिं तु गंतव्वं ।**
**जे उ समत्थुवसग्गे, सहिउं ते जंति जयणाए ॥२४६१ ॥**

**ग्लानत्वकारणेनाऽन्यत्र प्रायोग्यस्यौषधादेरसति** अभावे उपलक्षणमेतत्, वैद्याभावे च

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तत्र गन्तव्यं,** तत्र वैद्यस्य प्रायोग्यस्यौषधस्याशनादेश्च प्राप्यमाणत्वात्, तत्र **ये उपसर्गान् सोढुं समर्था** ये च परिश्रमेण न गृह्यन्ते [**ते**] **यतनया** वक्ष्यमाणया **यान्ति** गच्छन्ति ॥ २४६१ ॥

तामेव यतनामाह—

**बहिय अणापुच्छाए, लहुगा लहुगो य दोच्चणापुच्छा ।**
**आयरियस्स वा लघुका, अपरिच्छियपेसवंतस्स ॥२४६२॥**

अत्रेदं सूत्रं पतति 'नो से कप्पति थेरे अणापुच्छा नायविहिं एत्तए' इत्यादि, तत्र यदि **बहिः** स्थविराणा**मनापृच्छ्य** व्रजति ततस्तस्य प्रायश्चित्तं चत्वारो **लघुकाः**, स्थविरान् आपृच्छ्य तैर्विसर्जितो यदि द्वितीयं [वारं] स्थविरान् अनापृच्छ्य व्रजति ततो **द्वितीयानापृच्छायां** मासलघु। **आचार्यो**ऽपि यद्यपरीक्षितान् प्रेषयति ततस्तस्या**परीक्षितान् प्रेषयत**श्चत्वारो **लघुकाः** प्रायश्चित्तम् ॥ २४६२ ॥

**तम्हा परिच्छियव्वो, सज्झाए तह य भिक्खभावे य ।**
**थिरमथिरजाणणट्ठा, सो उ उवाएहिमेहिं तु ॥२४६३॥**



For Private And Personal Use Only

यत एवमपरीक्षितप्रेषणे प्रायश्चित्तं **तस्मात् स्थिरज्ञानार्थं स्वाध्याये भिक्षाभावे च परीक्षितव्यः। स च एभि**र्वक्ष्यमाणै**रुपायैः** ॥२४६३॥

तानेवाह—

**चरणकरणस्स सारो, भिक्खायरिया तहेव सज्झाओ ।**
**एत्थ परितम्ममाणं, तं जाणसु मंदसंविग्गं ॥२४६४॥**

चरणं व्रतश्रमणधर्मादि । उक्तं च—

*वय-समणधम्म-संजम-वेयावच्चं च बंभगुत्तीतो ।*
*नाणादितियं तवो कोहनिग्गहाइ चरणमेयं ॥*

करणं पिण्डविशुद्ध्यादि । उक्तं च—

*पिंडविसोही समिती, भावण पडिमा य इंदियनिरोहो ।*
*पडिलेहण गुत्तीतो, अभिग्गहा चेव करणं तु ॥*

तस्य **चरणकरणस्य सारो भिक्षाचर्या स्वाध्यायश्च,** ततोऽत्र भिक्षाचर्यायां स्वाध्याये च **परिताम्यति** क्लेशं मन्यते **तं जानीत मंदसंविग्नम्** ॥२४६४॥

**चरणकरणस्स सारो, भिक्खायरिया तहेव सज्झातो ।**
**एत्थ उ उज्जमणाणं, तं जाणसु तिव्वसंविग्गं ॥२४६५॥**

**चरणकरणस्य सारो भिक्षाचर्या तथैव स्वाध्यायस्ततोऽत्र** भिक्षाचर्यादा**वुद्यच्छति तं जानीत तीव्रसंविग्नम्** तदेवं स्थिराऽस्थिरपरिज्ञानार्थं परीक्षोक्ता ॥ २४६५॥

सम्प्रति किमेष उपसर्गसहिष्णुः किं वा नेति परीक्षार्थमाह—

**कइएण सभावेणं, अण्णस्स व साहसे कहिज्जंते ।**
**माय-पिति-भाय-भइणी-भज्जा-पुत्तादिएसुं तु ॥२४६६॥**

यथा स शृणोति तथा **कैतवेन स्वभावेन वा अन्यस्य** साधोर्मातापितृभ्रातृभगिनी-भार्यापुत्रादिषु विषये **साध्वसं कथ्यते** ॥२६६६॥

केन प्रकारेणेत्यत आह—

**सिर कोट्टणकलुणाणि य, कुणमाणाइं तु पायपडियाइं ।**
**अमुएण न गणियाइं, जो जंपति निप्पिवासो त्ति ॥२४६७॥**

मातापित्रादीनि **शिरःकुट्टनकरुणरोदन**भाषणानि **कुर्वाणानि पादपतितानि** चाऽ**मुकेन न गणितानि** एवं साध्वसे कथ्यमाने **यो जल्पति** 'अतीव खलु **निष्पिपासो** घोरहृदयो न वर्त्तते तेन सह वक्तुमपीति' ॥२४६७॥

**भावातो पडिबद्धो, अप्पडिबद्धो वएज्ज जो एवं ।**
**सोइहिति केत्तिए तू, नीया जे आसि संसारे ॥२४६८॥**

**स भावतः** स्वज्ञातेषु **प्रतिबद्धो** ज्ञातव्यो न शक्तः स सोढुमुपसर्गानिति, **यस्तु** तथा साध्वसे कथ्यमाने **एवं ब्रूते 'संसारे** सर्वजीवाः सर्वेषां पुत्रत्वादिकमुपगतास्ते **आसीरन् संसारे**ऽनन्ते **निजास्तान् कियतः** स **शोचयिष्यति** किंवा मातापित्रादिभिः शोचितैर्ये संसारहेतौ असंयमे पातयन्ति' स ज्ञातव्यो भावतः स्वजने**ष्वप्रतिबद्धः** समर्थः सोढुमुपसर्गानिति ॥२४६८॥

**मुहरागगमादीहिं, तेसिं नाऊण रागवेरग्गं ।**
**नाऊण थिरं ताहे, ससहायं पेसवेंति ततो ॥२४६९॥**

त(य)स्य ज्ञातविधिं जिगमिषोः शोभनो मुखरागः, स ज्ञायते स्वजनेषु भावतः प्रतिबद्ध उपसर्गानसहिष्णुश्च, यस्य तु न तथाविधो मुखरागः केवलं विरागः स्पष्टो लक्ष्यते स ज्ञेयो भावतः स्वज्ञातिष्वप्रतिबद्धः सहिष्णुश्चोपसर्गान्। एवं **मुखरागादिभिस्तेषां** ज्ञातविधिं गन्तुमिच्छतां **रागं वैराग्यं** च **ज्ञात्वा** तथा स्थिरम्,उपलक्षणमेतदस्थिरं च **ज्ञात्वा ततः स्थिरं** भावतः स्वजनेष्वप्रतिबद्धं **ससहायं** सूरयः **प्रेषयन्ति** ॥२४६९॥ साम्प्रतमल्पश्रुताऽल्पागमपद-व्याख्यानार्थमाह—

**अबहुस्सुतो अगीतो, बाहिरसत्थेहि विरहितो इयरो ।**
**तव्विवरीए गच्छे, तारिसगसहायसहितो वा ॥२४७०॥**

अल्पश्रुतो नाम **अबहुश्रुतः** स चा**ऽगीतार्थ** उच्यत॥ **इतरः** अल्पागमो यो **बाह्यशास्त्रै-र्विरहित** एतादृशो न गच्छेत् स्वजनविधौ किन्तु **तद्विपरीतो** बहुश्रुतो बह्वागमश्च। यदि वा स्वयमल्पश्रुतोऽल्पागमो वा **तादृशसहायसहितो** बहुश्रुतबह्वागमसहायसहितो **गच्छेत्** ॥ २४७०॥

एतदेव सविशेषमाह—

**धम्मकहीवादीहि य, तवस्सिगीएहि संपरिवुडो उ ।**
**नेमित्तिएहि य तहा, गच्छे[1] सो अप्पछट्ठो उ ॥२४७१॥**

**धर्मकथिभिर्द्वित्रिप्रभृतिभिर्वादिभिः** वादकुशलैः **तपस्विभिः** षष्ठाष्टमादितपःकारिभिः **गीतार्थैः** सूत्रार्थतदुभयनिष्णातैः **नैमित्तिकैश्च संपरिवृतो** गच्छेत् अथ धर्मकथा[थ्या]दयो बहवो न सन्ति ततो जघन्यतोऽप्येकैकधर्मकथ्यादिसहाय **आत्मषष्ठो** व्रजेत् ॥२४७१॥

तत्र प्रवेशविधिमाह—

**पत्ताण वेल पविसण, अहपुण पत्ता पगे हवेज्जाहि ।**
**तं बाहिं ठावेउं, वसहिं गिण्हंति अन्नत्थ ॥२४७२॥**

यदि **वेलायां** भिक्षावेलायां स्थानं **प्राप्तास्तर्हि** समकालमेव सर्वेषां **प्रवेशनम्, अथ पुनः प्रगे** प्रभात एव **प्राप्ता भवेयुस्तदा तं** स्वजनवन्तं **बहिः स्थापयित्वा वसतिमन्यत्र गृह्णन्ति** ॥२४७२॥

---

१. गच्छति सो. ला. ॥

**पडिवत्तीकुसलेहिं, सहितो ताहे उ वच्चए तहियं ।**
**वासपडिग्गहगमणं, नातिसिणेहाऽऽसणग्गहणं ॥२४७३॥**

अन्यवसतौ गृहीतायां **प्रतिपत्तिकुशलैः सहितस्ततो** बहिःस्थानात् **तत्र** वसतौ **व्रजति**,[2] तत्र तावदा**वासो** यावद् भिक्षावेला, ततः **पतद्ग्रहं** गृहीत्वा **गमनं** विधेयं, तत्र यदि प्राप्तायां भिक्षावेलायां पतद्ग्रहं गृहीत्वा व्रजन्ति तदा तत्कालमेव गृह्णन्ति भक्तादि, कथमपि भिक्षा-वेलायामप्राप्तायां तत्र पतद्ग्रहं गृहीत्वा व्रजन्ति निमन्त्रयन्ति च ते तदा तत् क्षणमेव यल्लभन्ते तद् गृह्णन्ति । अथ मुहूर्त्तानुगुण्यतः कृतभिक्षाकास्तत्र गतास्तर्हि तत्र पतद्ग्रहं न नयन्ति। तत्र च गत्वा **नातिस्नेहः** स्वज्ञातानां **दर्शनीयः**, यदि पुनरतिस्नेहं दर्शयति ततोऽनुरक्तोऽ-स्माकमिति ज्ञात्वा ते उपसर्गयेयुः। तथा तत्र गतेनाऽऽसनपरिग्रहः कर्त्तव्यः न पुनरेवं चिन्तनीयम्—

*आसंदी पलियंकेसु, मंचमासालएसु वा ।*
*अणायरियमज्जाणं, आसइत्तु सइत्तु वा ॥ [दशवै. ६-५४]*

१. वसति-पु. प्रे. पाठान्तरम्॥

आसनपरिग्रहाभावे ह्यपभ्राजना भवति तस्मादासने उपवेष्टव्यम् ॥२४७३॥

**सयमेव उ धम्मकहा, सासण पंते य निम्मुहे कुणति ।**
**अपडुप्पण्णे य तहिं, कहेति तल्लद्धितो अण्णो ॥२४७४॥**

यदि स स्वज्ञातिकः साधुः **धर्मकथायां** कुशलः **प्रान्तांश्च निरुत्तरान् करोति** कर्तुं समर्थस्ततः **स्वयमेव** तस्य **धर्मकथा** कथनीया भवति, अथ सोऽप्रत्युत्पन्नोऽनागमिकः प्रतिपत्त्यकुशलो वा तदा तस्मिन् **अप्रत्युत्पन्नेऽन्यः तल्लब्धिको** धर्मकथालब्धिसम्पन्नः प्रत्युत्तरदानलब्धिसम्पन्नश्च **कथयति** ॥२४७४॥

**मलिया य पीढमद्दा, पव्वज्जाए य थिरनिमित्तं तु ।**
**थावच्चापुत्तेणं, आहरणं तत्थ कायव्वं ॥२४७५॥**

**→"[१]ताहे पीढसमुद्दा मुहपियजंपगाते पव्वज्जातो भावणा वयणाणि भणिज्जा तेण पडिवत्तिकुसलेणं कहएणं मलिया भद्दिया भवन्तीति" चूर्णिः ←**

१. → ← चिह्नद्वयवर्तिपाठः मुद्रिते वर्तते पु. प्रे. नास्ति॥

**पीढमर्दा** नाम मुखप्रियजल्पाः **स्थिरीकरणनिमित्तं तत्र** धर्मकथायां **स्थापत्यापुत्रेण** ज्ञाताधर्मकथाप्रसिद्धेनाऽऽ**हरणं कर्त्तव्यम्** ॥२४७५॥

**कहिए व अकहिए वा, जाणणहेउं अइंति भत्तघरं ।**
**पुव्वाउत्तं तहियं, पच्छाउत्तं च जं तत्थ ॥२४७६॥**

धर्मे **कथिते अकथिते वा** भिक्षाग्रहणवेलायामुद्गमादिषु **ज्ञानार्थं भक्तगृहं** महानसं प्रविशन्ति प्रविश्य च **यत् तत्र पूर्वायुक्तं** पूर्वप्रवृत्तमुपस्क्रियमाणं **पश्चादायुक्तं** यत्तेषु साधुष्वागतेषु तन्निमित्तमुपस्क्रियमाणं तत् परिभावयन्ति ॥ २४७६॥

पूर्वायुक्तमित्यत्र व्याख्यानद्वयं परमतेन दर्शयति—

**पुव्वाउत्ताऽऽरुहिए, केसिंचि समीहियं तु जं तत्थ ।**
**एए न होंति दोण्णि वि, पुव्वपवत्तं तु जं तत्थ ॥२४७७॥**

केचित् व्याचक्षते **पूर्वायुक्तं** नाम चुल्ल्यां पाकार्थ**मारोपितं,** केषाञ्चित् पुनरिदं व्याख्यानं

**यत् तत्र समीहितं** पाकाय ढौकितम्, **एतौ** द्वावप्यादेशौ **प्रमाणं न भवत**स्तस्मादिदं व्याख्यानं **यत् तत्र** गृहस्थानां **पूर्वप्रवृत्त**मुपस्क्रियमाणं तत् पूर्वायुक्तमिति॥ २४७७॥

अथ कस्मादितरदादेशद्वयं न प्रमाणमत आह—

**पुव्वारुहिए य समीहिए य किं छुब्भई न खलु अण्णं? ।**
**तम्हा खलु जं उचियं, तं तु पमाणं न इतरं तु ॥२४७८॥**

**पूर्वं** चुल्ल्यामारोपिते **समीहिते वा किं न क्षिप्यते खल्वन्यत्?** क्षिप्यते इति भावः। **तस्मात् खलु यदुचितं** व्याख्यानं **तत् प्रमाणं नेतरत्** परकीयमादेशद्वयम् ॥२४७८॥

**बालगपुच्छादीहि य, नाउं आयरमणायरेहिं च ।**
**जं जोग्गं तं गेण्हइ, दव्वपमाणं च जं तत्थ ॥२४७९॥**

बालकपृच्छादिभिः, आदिशब्दात् बालकोल्लापादिभिश्च[१] **पिण्डनिर्युक्तिप्रसिद्धैस्तथा आदरानादराभ्यां च** योग्यमयोग्यं **ज्ञात्वा यत् तत्र योग्यं** श्रमणप्रायोग्यं प्रतिभाति तत्

१.बालकाला॰ सं ॥

**गृह्णाति** वरवृषभः, **द्रव्यप्रमाणं च** जानीयात् कियत् कुटुम्बमन्यद्वा भोजकं कियद्वा राद्धमित्येवं यत् यावत् प्रायोग्यं प्रतिभासते [तत्] तावत् गृह्णीयात् ॥२४७९॥

सम्प्रत्येतदेव विशेषतरमाह—

**दव्वपमाणं[१] गणणा, खारियफोडिय तहेव अद्धा य ।**
**संविग्ग एगठाणा, अणेगसाहूसु पन्नरस ॥२४८०॥**

**द्रव्यप्रमाणं** नाम द्रव्याणां **गणना,** यथा— एतावन्तोऽत्रौदनभेदाः, एतावन्ति च शाकविधानानि, इयन्तश्च खाद्यविशेषाः एतावन्ति च द्राक्षापानकादीनि पानकानि, तथा **क्षारितानि** नाम यानि लवणखरण्टितानि शालनकानि, आस्तानानीत्यर्थः[२] । **फोडितं** जीरकहिङ्गुधूपवासितम्, एतत् सर्वं ज्ञातव्यम्। **तथा अद्धा** कालो भिक्षायां ज्ञातव्योऽन्यथा अवष्वष्कणादयो दोषाः स्युः। तथा **संविग्ना एकस्थाना** एकसङ्घाटात्मकाः प्रविशन्ति ततः कल्पते, **अनेकसाधुषु** अनेकेषु साधुसङ्घाटकेषु प्रविशत्सु न कल्पते यतस्तत्र नियमादाधाकर्मरहिता उद्देशिकादयः **पञ्चदश** दोषाः॥ २४८०॥

---

१. °पमाण° सं.२ ला.॥ २. 'अथाणा' इति भाषायाम् ॥

एतदेव विवरीषुः प्रथमतो द्रव्यप्रमाणमाह—

**सत्तविहमोयणो खलु, साली-वीही य कोद्दव-जवे य ।**
**गोहुम-रालग-आरण्ण-कूर-खज्जा यऽणेगविहा ॥२४८१॥**

**सप्तविधः**, मकारोऽलाक्षणिकः, **ओदनः** कूरः, तद्यथा- **शालिः** कलमशाल्यादिकूरः, **व्रीहिः** सामान्यतन्दुलौदनः, **कोद्रवकूरो यवकूरो गोधूमकूरो रालककूरः** अकृष्टपच्योऽरण्यव्रीहिः **कूरश्च खाद्यानि चानेकविधानि** ॥ २४८१॥

**सागविहाणा य तहा, खारियमादीणि वंजणाइं च ।**
**खंडादिपाणगाणि य, नाउं तेसिं तु परिमाणं ॥२४८२॥**

**शाकविधानानि** प्राजनकानि **क्षारितादीनि,** आदिशब्दात् स्फोटितपरिग्रहः **व्यञ्जनानि तथा खण्डादिपानकानि** आदिशब्दात् द्राक्षादिपरिग्रहः । **तेषामोदनादीनां परिमाणं ज्ञात्वा** ॥२४८२॥

किमित्याह—

**तहियं गिलाणगस्स, अहागडाइं हवंति सव्वाइं ।**
**अब्भंग सिरावेहो, अवाणच्छेयावणोज्जाइं ॥२४८५॥**

यदि स्वजनानां सम्बन्धी कोऽपि ग्लानो वर्त्तते तस्य चिकित्सां वैद्यः करोति, यदि वा वैद्यः साधुस्वजनानां स्वजनोऽन्यस्य कस्यापि ग्लानस्य क्रियां करोति ततस्तत्र ग्लानो ज्ञातविधिं नीयते, यतस्तत्र **ग्लानस्य अभ्यङ्गशिरावेधो अपान**मपानकर्म छेदेनापनीयानि **छेदापनीयानि** एतानि सर्वाणि **यथाकृतानि** पुरःकर्म-पश्चात्कर्मरहितानि **भवन्ति** ॥२४८५॥

एतदेव स्पष्टं भावयति—

**जइ नीयाण गिलाणो, नीयो वेज्जो कुणइ अन्नस्स ।**
**तत्थ हु न पच्छकम्मं, जायइ अब्भंगमादीसु ॥२४८६॥**

**यदि निजकानां** सम्बन्धी **ग्लानः वैद्यो वा निजकः अन्यस्य** कस्यापि ग्लानस्य **कुरुते** चिकित्सां, **तत्र हुः** निश्चितं **न पश्चात्कर्माभ्यङ्गादिषु** जायते ॥२४८६॥

कथं न जायते इत्याह—

**पुव्वं च मंगलट्ठा, तुप्पेउं जइ करेइ गिहियाणं ।**
**सिरवेधबत्थिकम्माइसु न उ पच्छकम्मेयं ॥ २४८७॥**

**पूर्वं** यदि **मङ्गलार्थं** साधुं **तुप्पेउं** देशीपदमेतत् अभ्यङ्ग्य पश्चात् **गृहिकाणां** गृहस्थानां **करोत्यभ्यङ्ग**मेतत् पश्चात्कर्म न भवति, एवं **शिरावेधबस्तिकर्मादिष्वपि** पूर्वं साधौ कृत्वा पश्चात् गृहस्थेषु क्रियमाणेषु **न पश्चात्कर्म** ॥२४८७॥

**अत्तट्ठा उवणीया, ओसहमादी हवंति ते चेव ।**
**पत्थाहारो य तहिं, अहाकडो होइ साहुस्स ॥२४८८॥**

**आत्मार्थं** यान्युपनीतानि **औषधादीनि** गृहस्थैस्ता**न्येव** साधोरपि **भवन्ति, पथ्याहारोऽपि** च **तत्र साधोर्यथाकृतो भवति** ततो न पश्चात्कर्म ॥२४८८॥

**अगिलाणे उ गिहिम्मी, पुव्वुत्ताए करेंति जयणाए ।**
**अण्णत्थ पुण अलंभे, नायविहिं नेंति अतरंतं ॥२४८९॥**

यदि निजकानां सम्बन्धी न कश्चित् ग्लानो नापि निजको वैद्योऽन्यस्य चिकित्सां करोति तदा **गृहिणि** गृहस्थे **अग्लानेऽ**न्यत्र **पूर्वोक्तया यतनया** या पूर्वं **कल्पाध्ययने** ग्लाने सूत्रे चिकित्सायतना उक्ता तया चिकित्सां **कुर्वन्ति**। तथाऽन्यत्रौषधानां लाभो नास्ति । तत आह **अन्यत्र** पुनरौषधाना**मलाभे ज्ञातविधि**मतरन्तं ग्लानं नयति। तदेवं ग्लानविधिरप्युक्तः ॥२४८९ ॥

सम्प्रति लाभचिन्तायामाभवनविधिमाह—

**अहुणा[१] तु लाभचिंता, तत्थ गयाणं इमा भवति तेसिं ।**
**जइ सव्वेगायरियस्स होंति तो मग्गणा नत्थि ॥२४९०॥**

**अधुना तेषां तत्र गतानां** ज्ञातविधौ गताना**मियं लाभचिन्ता[२] भवति यदि** ते धर्मकथ्यादयः **सर्वेऽप्येकस्याचार्यस्य भवन्ति** तर्हि **नास्ति मार्गणा** सर्वमाचार्यस्याभवतीति भावः ॥२४९० ॥

**संतासंतसतीए, अह अण्णगणा बिइज्जगा नीया ।**
**तत्थ इमा[३] मग्गणा उ, आभव्वे होइ नायव्वा ॥२४९१॥**

१. अहुणा लाभे- पु. प्रे. ॥ २. लाभे- सं. ॥ ३. इम मग्गणा ऊ -पु. प्रे. ॥

सदभावो नाम सन्ति साधवः परं न धर्मकथादिषु कुशलाः, असदभावो मूलत एव न सन्ति साधवः। एवं **सदभावेनाऽसदभावेन** वा **येऽन्यगणसत्का द्वितीयका नीतास्तेषामियमाभाव्ये मार्गणा भवति** ॥२४९१॥

तामेवाह—

**जं सो उवसामेई, तन्निस्साए[1] य आगया जे उ ।**
**ते सव्वे आयरितो, लभते पव्वायगो तस्स ॥२४९२॥**

**स** ज्ञातविधिमागतः सन् **यमुपशमयति** प्रव्रज्यापरिणामं ग्राहयति **ये च तन्निश्रया** तस्य ज्ञातविधिमागतस्य निश्रया, स्वजनोऽयमस्माकमिति बुद्ध्या तत्समीप**मागताः, तान् सर्वान्** य**स्तस्य** ज्ञातविधिं द्रष्टुमागतस्य साधोर्यः **प्रव्राजकः आचार्यः** स लभते ॥ २४९२॥

**जे पुण अहभावेणं, धम्मकही सुंदरोत्ति वा सोउं ।**
**उवसामिया य तेहिं, तेसिं चिय ते हवंती उ ॥२४९३॥**

१. पव्वावेगो-सं. ॥

**ये पुनर्यथाभावेन** यदि वा ये **सुन्दरो धर्मकथीति श्रोतु**मागताः सन्तस्तैः धर्मकथ्यादिभि**रुपशामिताः** प्रव्रज्यापरिणामं ग्राहितास्ते **तेषामेवाभवन्ति** ॥२४९३॥

**अण्णेहि कारणेहिं व, गच्छंताणं तु जयण एसेव ।**
**ववहारो सेहस्स य, ताइं च इमाइं कज्जाइं ॥२४९४॥**

आस्तां स्वजनवन्दापनाय ग्लानप्रयोजनेन वा ज्ञातविधिं गतानां यतना प्रागुक्ता भवति, **अन्यैर्वा कारणै**र्वक्ष्यमाणैर्ज्ञातविधिं **गच्छतामेषैव** अनन्तरोदिता **यतना** । एष एव **च शैक्षस्य** विषयेऽनन्तरोदित आभवन**व्यवहारः तानि** चान्यानि **कार्याणि** कारणानि **इमानि** ॥२४९४॥

तान्येवाह—

**तवसोसियअप्पायण, ओमे व असंथरंत गच्छेज्जा ।**
**रमणिज्जं वा खेत्तं, तिकालजोग्गं तु गच्छस्स ॥२४९५॥**

तपसा विकृष्टेन शोषितस्**तपःशोषितः** स्वजनाश्च प्रचुरदानास्तत **आप्यायन**निमित्तं सपरिवारो ज्ञातविधिं व्रजेत्, अथवा **अवमं** दुर्भिक्षं जातं, तत्रा**ऽसंस्तरन्तो** ज्ञातविधिं **गच्छेयुः**,

**रमणीयं वा तत्क्षेत्रं गच्छस्य त्रिकालयोग्यं** ततो गच्छन्ति ॥२४९५॥

त्रिकालयोग्यतामेव भावयति—

**वासे निच्चिक्खिल्लं, सीयलदव पउरमेव गिम्हासु ।**
**सिसिरे य घणनिवाया, वसही तह घट्ठमट्ठा य ॥२४९६॥**

**वर्षे** वर्षाकाले **निश्चिक्खलः** कर्दमाभावः, **ग्रीष्मेषु** ग्रीष्मकाले **प्रचुरं शीतलं द्रवं** लभ्यते, **शिशिरे** शीतकाले घनमतिशयेन **निवाता वसतिर्लभ्यते घृष्टा मृष्टा** च ॥२४९६॥

**छिन्नमडंबं च तयं, सपक्खपरपक्खविरहितोमाणं ।**
**पत्तेय उग्गह त्ति य, काऊणं तत्थ गच्छेज्जा ॥२४९७॥**

यदन्यत् क्षेत्रं गन्तव्यं **तत् छिन्नमडम्बं,** यत्र तु स्वजनाः सन्ति तत् **स्वपक्षपरपक्ष-कृतापमानविरहितं** गाथायामपमानशब्दस्यान्यथोपनिपातः प्राकृतत्वात्, **प्रत्येकं** ग्लानबालादीनाम**वग्रह** उपष्टम्भश्च जायते **इतिकृत्वा** इतिहेतोस्**तत्र** ज्ञातविधौ **गच्छेत्** ॥२४९७॥

**उवदेसं काहामि य, धम्मं गाहिस्स पव्वयाविस्सं ।**
**सड्ढाणि व वुग्गाहे, भिच्छुगमादी ततो गच्छे ॥२४९८॥**

**धर्मोपदेशं** वा स्वजनानां **करिष्यामि,** यदि वा **धर्मं** श्रावकधर्मं **ग्राहयिष्यामि** । अथवा ते निष्क्रमितुकामा वर्त्तन्ते ततः **प्रव्राजयिष्यामि** दान**श्राद्धानि** वा तानि कुलानि **भिक्षुकादिर्व्युद्ग्राहयेत् तत** एतैः कारणैर्ज्ञातविधिं **गच्छेत्** ॥ २४९८ ॥

**सूत्रम्— आयरिय-उवज्झायस्स गणंसि पंच अइसेसा पण्णत्ता, तं जहा- आयरिय-उवज्झाए[1] अंतो उवस्सयस्स पाए निगिज्झिय निगिज्झिय पप्फोडेमाणे वा पमज्जेमाणे वा नाइक्कमइ १।**

**आयरिय-उवज्झाए अंतो उवस्सयस्स उच्चार-पासवणं विगिंचमाणे विसोहमाणे वा नाइक्कमइ २। आयरिय-उवज्झाए पहू, वेयावडियं इच्छा करेज्जा, इच्छा नो करेज्जा ३। आयरिय-उवज्झाए अंतो उवस्सयस्स एगरायं वा दुरायं वा एगओ वसमाणे**

१. नो अइ° श्युब्रींग, एवमग्रेऽपि ॥

**नाइक्कमइ ४। आयरिय-उवज्झाए बाहिं उवस्सयस्स एगरायं वा दुरायं वा एगओ वसमाणे नाइक्कमइ ५ ॥ २ ॥**

''आयरियउवज्झायस्स गणंसि पंच अतिसेसा पण्णत्ता'' इत्यादि । अस्य सूत्रस्य सम्बन्धप्रतिपादनार्थमाह—

**अतिसेसियदव्वट्ठा, नायविधिं वयति बहुसुतो संतो ।**
**णेगा य अतिसया बहुसुयस्स एसो उ पस्सेसो ॥२४९९॥**

**अतिशेषिता**नाम् अतिशयितानां ग्लानप्रायोग्याणां शतपाकादीनां **द्रव्याणामर्थाय बहुश्रुतः सन् ज्ञातविधिं व्रजति** इति पूर्वसूत्रे प्रतिपादितमस्मिंश्च सूत्रे **बहुश्रुतस्य** सतोऽनेके **अतिशया** इति प्रतिपाद्यमि**त्येष** सूत्रस्य **प्रश्लेषः** सम्बन्धः ॥२४९९॥

प्रकारान्तरेण सम्बन्धमाह—

**अण्णो वि अत्थि जोगो, असाहुदिट्ठीहि हीरमाणाणं ।**
**वायादतिसयजुत्ता, तहियं गंतुं नियत्तंति ॥ २५००॥**

**अन्योऽपि** पूर्वसूत्रेण सहास्य सूत्रस्य **योगः** सम्बन्धोऽस्ति । तमेवाह-**असाधुदृष्टिभिः** परतीर्थिकदृष्टिभिः **ह्रियमाणानां** स्वजनानां **वादाद्यतिशययुक्तास्तत्र** ज्ञातविधिस्थाने गत्वा तान् कुदृष्टिन् तेषां **निवर्त्तयन्ति** इति प्रागुक्तं "वुग्गाहे भिच्छुगमादी"[गा. २४९८] इति वचनात्, ते चातिशया अत्रापि प्रतिपाद्यन्ते इति भवति सम्बन्धः ॥ २५०० ॥

पुनः प्रकारान्तरेणाह—

**पुणरवि भण्णति जोगो, नायविधिं गंतु परिनियत्तस्स ।**
**वसहिं विसतो सुत्तं, संसाहिउमागते वा वि ॥२५०१॥**

**पुनरपि** प्रकारान्तरेण **भण्यते योगो ज्ञातविधिं** वन्दापनाय **गत्वा प्रतिनिवृत्तस्य** परतीर्थिकं वा वादोपस्थितं **संसाध्य** निर्जित्याऽऽ**गतस्य वसतिं विशतो**ऽधिकृतं सूत्रमुपतिष्ठतेऽधिकृतसूत्रार्थ उपढौकते ततः एतदर्थं ज्ञातविधिसूत्रानन्तरमस्य सूत्रस्योपनिपातः कृतः ॥ २५०१ ॥

एभिः सम्बन्धैरायातस्य अस्य व्याख्या—

आचार्यश्च स उपाध्यायश्च **आचार्योपाध्यायः** स हि केषाञ्चिदाचार्यः केषाञ्चिदुपाध्यायस्तत

एवमुक्तं, यावता पुनः स नियमादाचार्यः एव, तस्य **गणे** गणमध्ये **पञ्च अतिशेषा** अतिशयाः **प्रज्ञप्तास्तद्यथा-आचार्योपाध्यायान् उपाश्रयस्यान्तर्मध्ये पादान् निगृह्य निगृह्य** तथा पादा यतनया प्रस्फोटयितव्या यथा धूलिः कस्यापि क्षपकादेर्न लगति एवं शिक्षयित्वा **प्रस्फोटयतः** (यन् प्रमार्जयन्) प्रस्फोटको **नातिक्रामति** एष एकोऽतिशयः। तथा **आचार्योपाध्यायान् उपाश्रयस्यान्तरुच्चारं प्रश्रवणं वा विगिंचयतो** (न्) व्युत्सृजतो **विशोधक**(यन्) उच्चारादिपरिष्ठापको **नातिक्रामति** एष द्वितीयः। तथा **आचार्योपाध्यायः प्रभुः** अतो **वैयावृत्त्यमिच्छया कारयेत्** न बलाभियोगतः। "**आणा बलाभिओगो निग्गंथाणं न कप्पए काउं**" [ ] इतिवचनात्, एष तृतीयः। तथा **आचार्योपाध्याय उपाश्रयस्यान्तर्मध्ये एकरात्रं वा द्विरात्रं वा वसन् नातिक्रामति** नातिचारभाग् भवति एष चतुर्थः। **आचार्योपाध्याय उपाश्रयाद्बहिरेकरात्रं वा द्विरात्रं वा वसन् नातिक्रामति**। एष सूत्रसंक्षेपार्थः ॥ अधुना भाष्यविस्तरः—

गाथा २५०१-२५०४ पादप्र-स्फोटन-प्रमार्जनविधिः

**बहिअंतविवच्चासो, पणगं सागारि चिट्ठइ मुहुत्तं ।**
**बिइयपयं वित्थिण्णे, निरुद्धवसहीए जयणाए** ॥२५०२॥ दारगाहा।



For Private And Personal Use Only

**बहिरन्तश्च** यदि **विपर्यासो** बहिरस्फोट्य अन्तः प्रस्फोटनरूपस्तदा **पञ्चकं** पञ्चरात्रिन्दिवं प्रायश्चित्तमथ बहिः **सागारिको** वर्त्तते ततस्**तिष्ठति मुहूर्तं** व्याख्यानतो विशेषप्रतिपत्तिरन्त-र्मुहूर्त्तमित्यर्थः। अथ एतावता कालेन सागारिको नापयाति तर्हि **द्वितीयपदम्** अपवादपदमाश्रयते, बहिः पादाऽस्फोटनेऽप्यन्तर्वसतेः प्रविश्यते तत्र **विस्तीर्णे** उपाश्रये अपरिभोगे प्रदेशे आचार्यपादाः प्रस्फोटयितव्याः, **निरुद्धायां** सङ्कटायां **वसतौ** यत्राचार्यसत्कवेण्टिकाद्यवकाश-स्तत्र **यतनया** यथा न कस्यापि धूलिर्लगति इत्येवंरूपया प्रस्फोटयितव्याः। एष द्वारगाथा-सङ्क्षेपार्थः॥ २५०२॥

साम्प्रतमेनामेव विवरीषुरिदमाह—

**बाहिं अपमज्जंते, पणगं गणिणो उ सेसए मासो ।**
**अप्पडिलेहदुपेहा पुव्वुत्ता सत्तभंगा उ ॥२५०३॥**

आचार्यः कुलादिकार्येण निर्गतः प्रत्यागतः उत्सर्गेण तावद्वसतेर्बहिरेव पादान् प्रस्फोटयति प्रत्युपेक्षते प्रमार्जयति चेत्यर्थः। यदि पुनः निष्कारणं बहिः पादान् न प्रस्फोटयति तदा **बहिरप्रमार्जने गणिन** आचार्यस्य प्रायश्चित्तं **पञ्चकं, शेषके** साधौ बहिःपादानप्रमार्जयति

**मासो** लघुको मासः प्रायश्चित्तम्, तस्माद्बहिः पादान् प्रस्फोट्यान्तः प्रवेष्टव्यं, तच्च प्रस्फोटनं विधिना कर्त्तव्यम्। स चायं विधिः- [पूर्वं] प्रत्युपेक्षते ततः प्रमार्जयति अविधिः पुनरयं- न प्रत्युप्रेक्षते न प्रमार्जयति १, न प्रत्युपेक्षते प्रमार्जयति २, प्रत्युपेक्षते न प्रमार्जयति ३। प्रत्युपेक्षते प्रमार्जयति च ४। अत्राऽऽद्येषु त्रिषु भङ्गेषु प्रत्येकं प्रायश्चित्तं मासिकं, चतुर्थे भङ्गे भङ्गाश्चत्वारस्तद्यथा दुष्प्रत्युपेक्षते दुष्प्रमार्जयति १ दुष्प्रत्युपेक्षते सुप्रमार्जयति २ सुप्रत्युपेक्षते दुष्प्रमार्जयति ३ सुप्रत्युपेक्षते सुप्रमार्जयति ४। अत्र चतुर्थो भङ्गः शुद्धः शेषेषु त्रिषु भङ्गेषु प्रत्येकं प्रायश्चित्तं पञ्च रात्रिन्दिवम्। एतदेवाह-**अप्रत्युपेक्षे** उपलक्षणमेतत् अप्रमार्जने च, तथा **दुष्प्रेक्षाया**मत्राप्युपलक्षणव्याख्यानमिति दुष्प्रमार्जनायां च **पूर्वोक्ताः क**ल्पाध्ययनोक्ताः **सप्तभङ्गाः** तत्र चोक्तप्रायश्चित्तविधिः ॥२५०३॥

**बहि-अंतविवच्चासो, पणगं सागारिए असंतम्मि ।**
**सागारियम्मि उ चले, अच्छंति मुहुत्तगं थेरा ॥२५०४॥**

यदि **सागारिके असति** अविद्यमाने **बहिरन्तर्विपर्यासो** भवति बहिरप्रस्फोट्यान्तः प्रस्फोटयतीत्यर्थः, तदा गणिनः प्रायश्चित्तं **पञ्चकम्**। अथ **सागारिको** बहिस्तिष्ठति सोऽपि

च **चलः** चलो नाम मुहूर्त्तमात्रेण गन्ता तस्मिन् सागारिके चले तिष्ठति **मुहूर्त्तकम्** अल्पार्थे कप्रत्ययोऽल्पं मुहूर्त्तं, किमुक्तं भवति सप्त तालमात्रम् सप्तपदातिक्रमणमात्रं वा कालं **स्थविरा तिष्ठन्ति** ॥२५०४॥

**थिरवक्खित्ते सागारिए अणुवउत्ते पमज्जिउं पविसे ।**
**निव्विक्खित्तुवउत्ते, अंतो उ पमज्जणा ताहे ॥२५०५॥**

**स्थिरो** नाम यस्तत्रावस्थायी ध्रुवकर्मिकः, **व्याक्षिप्तः** कर्मणि कर्त्तव्ये व्याकुलस्तद्विपरीतोऽव्याक्षिप्तः । उपयुक्त आचार्यान् दृष्ट्या निरीक्षमाणस्तद्विपरीतो**ऽनुपयुक्तः**। तत्र **स्थिरे व्याक्षिप्तेऽनुपयुक्ते** सागारिके विद्यमाने बहिः पादान् **प्रमार्ज्य प्रविशेत्**, स्थिरे **निर्व्याक्षिप्ते उपयुक्ते** बहिः सागारिके सति वसतेरन्तः **प्रमार्जना** पादानाम् ॥ २५०५॥



अथाचार्यस्य पादाः किं स्वयमेवाचार्येण प्रस्फोटयितव्याः उताऽन्येन साधुना? तत आह—

**आभिग्गहियस्स असती, तस्सेव रयोहरेण अण्णयरो ।**
**पाउंछणुण्णिएण व, फुस्संति य [१]अणण्णभुत्तेण ॥२५०६॥**

---

१. ला.। अणुवभोत्तेणं- पु. प्रे.। अण्णभोत्तूणं-पु. प्रे. पाठा. ॥

केनापि साधुना अभिग्रहो गृहीतो वर्त्तते, यथा— 'मया आचार्यस्य बहिर्निर्गतस्य प्रत्यागतस्य च पादाः प्रस्फोटयितव्या' इति, स यद्यस्ति तर्हि तेन प्रमार्जनायोपस्थातव्यं, तत्र चाऽऽचार्येणात्मीयं रजोहरणं तस्य समर्पयितव्यं पादप्रमार्जनाय, ततः स आभिग्रहिकस्तेनाऽऽचार्यसत्केन रजोहरणेन आचार्यस्य पादान् प्रमार्जयति अथवा यदन्यदौर्णिकं पादप्रोञ्छनकमन्येन साधुना पादप्रमार्जनेनापरिभुक्तं तेनाचार्यस्य पादान् प्रस्फोटयति। अथाभिग्रहिको न विद्यते ततः **आभिग्रहिकस्यासति** अभावे **अन्यतरस्तस्यैवा**चार्यस्य **रजोहरणेन और्णिकेन वा पादप्रोञ्छनकेन[1][ ना ]न्येभुक्तेन** पादान् पुंसयति, यदि पुनरव्यापृतोऽपि निष्कारणमाचार्यस्य पादान् न प्रमार्जयति तदा मासलघु। अथाऽऽत्मीयेन रजोहरणेन पादप्रोञ्छनेन वाऽन्यपादप्रमार्जनातः परिभुक्तेन प्रमार्जयति तदाऽपि मासलघु। यदि बहिर्वसतेः सागारिकस्तिष्ठतीत्याचार्यस्य पादा न प्रस्फोटितास्तर्हि वसतेरन्तः प्रविष्टस्य प्रस्फोटनीयाः ॥२५०६॥

तत्रायं विधिः—

गाथा २५०६-२५०९ वसतिप्रवेशे पादस्फोटन-प्रमार्जनविधिः

---

१. °नान्यभु° पु. प्रे. ॥



For Private And Personal Use Only

**विपुलाए अपरिभोगे, अप्पणउवासए व चिट्ठस्स ।**
**एमेव भिक्खुयस्स वि, नवरिं बाहिं चिरयरे तु ॥२५०७॥**

यदि विपुला वसतिस्तत्र तस्यां **विपुलायां** वसता**वपरिभोगे** अवकाशे आचार्येण स्थित्वा पादाः प्रस्फोटयितव्याः । अथ सङ्कटा वसतिस्तर्हि आचार्यस्य **आत्मीयो** यो वेण्टिकाद्य**वकाशस्**तत्र ऐर्यापथिकीं प्रतिक्रम्यो**पविष्टस्य** पादाः प्रमार्जनीयाः। ते च कुशलेन साधुना तथा प्रमार्जनीया यथा अन्ये साधवो धूल्या न भ्रियन्ते यथा आचार्यस्योक्त**मेवं भिक्षोरपि** द्रष्टव्यं, **नवरं** यदि **बहि**र्वसतेः सागारिकस्तिष्ठति तत**श्चिरतर**मपि कालं प्रतीक्षेत यावच्चलः सागारिको व्यतिक्रामति, यदि पुनर्भिक्षुः वसतेर्बहिः सागारिकाऽभावेऽपि पादावप्रस्फोट्य वसतेरन्तः प्रविशति तदाऽस्य प्रायश्चित्तं मासलघु ॥२५०७॥

**निग्गिज्झ पमज्जाही, अभणंतस्सेव मासियं गुरुणो ।**
**पायरए खमगादी, चोयग कज्जाऽगते दोसा ॥ २५०८॥**

यदि बहिः सागारिक इति कृत्वा वसतेरन्तः पादाः प्रस्फोटयितव्याः। ततः सङ्कटायां वसतौ पादान् प्रमार्जयितुमुपस्थितं साधुमाचार्यो ब्रूते-आर्य **निगृह्य** पादान् **प्रमार्जय** यथा

पादधूल्या न कोऽपि साधुर्भ्रियते॥ अथैवं न ब्रूते तत **एवमभणतो गुरोः** प्रायश्चित्तं **मासलघु** तथा **पादरजसा क्षपकादयः** खरण्ट्येरन् तथा च सति वक्ष्यमाणा दोषाः। अत्र **चोदक** आह-आचार्यः कस्माद्बहिर्गच्छति ?। सूरिराह-**कार्याऽगते** कार्येषु समापतितेषु अगते **दोषास्तस्माद्** गच्छति ॥२५०८॥

अधुना "पायरए खमगादी" [गा. २५०८]इत्येतद् व्याख्यानयति—

**तवसोसितो व खमगो, इड्ढिमावुड्ढो वऽकोवितो वावि ।**
**मा भंडणखमगादी, इति सुत्तनिगिज्झ जयणाए ॥२५०९॥**



तपसा शोषितस्**तपःशोषितः क्षपक**स्तस्य त्वल्पेऽप्यपराधे द्वेषो जायते ततः स आचार्यपादप्रमार्जनधूल्या विकीर्णः कुपितो भवेत्, कुपितश्च सन् भण्डनं कृत्वा अन्यत्र गच्छे प्रविशेत् प्रतिभज्येत वा। अथवा कोऽपि **ऋद्धिमान् वृद्धो** राजादिः प्रव्रजितः स पादधूल्याऽवकीर्णो रुष्टः सन् भण्डनादि कुर्यात् । **अकोविदो** नाम शैक्षकः, सोऽपि रुष्टः प्रतिभज्येत तस्मात् **क्षपकादिर्मा भण्डनं** कार्षीदिति **सूत्रे निगिज्झे**त्युक्तमस्याप्ययमर्थो **यतनयेति**॥ २५०९॥

सम्प्रति 'चोयगकज्जाऽगते दोसा' व्याख्यानयति—

**थाणे कुप्पति खमगो, किंचेव गुरुस्स निग्गमो भणितो ।**
**भणइ कुलगणकज्जे, चेइअनमणं च पव्वेसु ॥२५१०॥**

**स्थाने कुप्यति क्षपकः**। तथाहि- स पादधूल्या अवकीर्यते ततो मा कोपं कार्षीत् **किंच गुरोः** आचार्यस्य **निर्गमः** केन कारणेन भणितः? तत्कारणमेव नास्ति येन कारणेन बहिराचार्यस्य निर्गमनम्। आचार्य आह-**भण्यते** अत्रोत्तरं दीयते **कुलकार्ये गणकार्ये** उपलक्षणमेतत् सङ्घकार्ये च बहुविधे समापतिते तथा **पर्वसु** पाक्षिकादिषु **चैत्यानां** सर्वेषामपि **नमन**मवश्यं कर्त्तव्यमिति हेतोश्चाचार्यस्य वसतेर्बहिर्निर्गमनम् ॥ २५१०॥



पुनश्चोदक आह—

**जति एवं निग्गमणे, भणाति तो बाहि चिट्ठए पुंछे ।**
**वुच्चति बहि अच्छंते, चोयग गुरुणो इमे दोसा ॥२५११॥**

चोदको भणति **यदि एवं** कुलादिकार्यनिमित्तमाचार्यस्य **निर्गमनं ततो** निर्गमने सति

प्रत्यागतो यदि वसतेर्बहिः सागारिकस्ततस्तावद्बहिस्तिष्ठतु यावच्चलः सागारिको व्युत्क्रान्तो भवति। ततो बहिरेव पादान् प्रस्फोट्य वसतेरन्तः प्रविशतु, एवं च सति क्षपकादिदोषाः परित्यक्ता भवन्ति। आचार्य आह-**उच्यते** उत्तरं भण्यते 'हे **चोदक! गुरोः** आचार्यस्य वसते-**र्बहिस्तिष्ठत इमे** वक्ष्यमाणा बहवो **दोषाः** ॥ २५११॥

तानेवाह—

**तण्हुण्हादिअभाविय१, वुड्ढा वा अच्छमाण मुच्छादी२ ।**
**विणए गिलाणमादी३, साहू सन्नी पडिच्छंती४ ॥२५१२॥** दारगाहा।



कुलादिकार्येण निर्गते आचार्ये **उष्णोनाभाविते तृष्णा** जायते ततस्तृष्णाभिभूतो वसतिमागतो यदि बहिः वसतेः प्रतीक्षते यावत् सागारिकोऽपगच्छति तावत् तृष्णया उष्णेन, आदिशब्दादनागाढागाढपरितापनापरिग्रहः, पीडिते मूर्च्छा जायते, आदिशब्दात् वसतिं प्रविष्टः सन् प्रचुरं पानीयमापिबेत् ततो भक्ताऽजीर्णतया ग्लानत्वं भवेदित्यादिपरिग्रहः। तथा **वृद्धा** उपलक्षणमेतत् बालशैक्षाऽसहादयश्चाचार्ये तिष्ठति प्रतीक्षते, ते च प्रतीक्षमाणाः प्रथम-

द्वितीयपरीषहाभ्यां पीडिता **मूर्च्छाद्याप्नुवन्ति**, तथा **ग्लानाः आदि**शब्दात् क्षपकादिपरिग्रह ते **विनयेन** प्रतीक्षमाणा भोजनमकुर्वन्त औषधादिकं च गुरुणा विना अलभमाना गाढतरं ग्लानत्वाद्याप्नुवन्ति। तथा **साधवः** केचित् प्राघूर्णका गन्तुमनसस्तथा **संज्ञिनः** श्रावका अष्टम्यादिषु कृताऽभक्ताः पारणके भिक्षायामदत्तायामपारयन्त आचार्यं **प्रतीक्षमाणा**स्तिष्ठन्ति। तत्र साधूनां दिवसो गरीयान् चटति तत्र चोष्णादिपरितापनादोषाः, संज्ञिनां चान्तरायमित्येष गाथासङ्क्षेपार्थः ॥२५१२॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः "तण्हुण्हादिअभाविए" इत्येतद् व्याख्यानयति—

**तण्हुण्हऽभावियस्स, पडिक्खमाणस्स मुच्छमादीया ।**
**खद्धादियण गिलाणे, सुत्तत्थ विराहणा चेव ॥ २५१३॥** दार १।

गाथा २५१०-२५१४ आचार्यस्य बहिः प्रतीक्षणे दोषाः

आचार्यः स्वरूपत **उष्णोनाभावितः** क्वचित् कदाचित् प्रयोजनवशतो बहिर्निर्गमनात्। ततः कुलादिकार्येषु निर्गतस्तृष्णाभिभूतो वसतिमागतोऽपि यदि सागारिकमपगच्छन्तं यावत् प्रतीक्षते ततः **प्रतीक्षमाणस्य** तृष्णया उष्णेन च तापितस्य **मूर्च्छादयो** भवन्ति,

आदिशब्दादागाढपरितापनादिपरिग्रहस्तथा वसतिं प्रविष्टो अतीवतृष्णोष्णाभिभूतः **खद्धस्य** प्रचुरस्य पानीयस्याऽऽ**दानं** ग्रहणं कुर्यात् प्रचुरं पानीयं पिबेदित्यर्थः। ततो भक्ताजीर्णतया ग्लानो भवेत्, तस्मिंश्च ग्लाने सूत्रार्थपरिहानिर्विराधना च तस्याचार्यस्य स्यात्, ग्लानत्वेनाचार्यो म्रियेतेति भावः, अथवा सूत्रार्थपरिहाण्या अजानतां साधूनां ज्ञानादिविराधना स्यात्, सूत्रार्थाभावतोऽजानन्तः साधवो ज्ञानादिविराधनां कुर्युरिति भावः १॥ २५१३॥

अधुना 'वुड्ढा वा' इति व्याख्यानार्थमाह—

**वुड्ढाऽसहु सेहादी** दारं २, **खमगो वा पारणम्मि भुक्खत्तो ।**
**अच्छति पडिच्छमाणो, न भुंजऽणालोइयमदिट्ठं ॥ २५१४॥**

**वृद्धा** वयोवृद्धा **असहाः** प्रथमद्वितीयपरीषहान् सोढुमसमर्थाः, तथा **शैक्षकाः आदिशब्दात्** ग्लानाश्चाचार्यं प्रतीक्षमाणास्तिष्ठन्ति ते च तथा तिष्ठन्तस्तृडादिभिः पीडिता मूर्च्छाद्याप्नुवन्ति ग्लानस्य च गाढतरं ग्लानत्वमुपजायते, यदि पुनरागतमात्र[1] एव वसतौ प्रविशति ततो यथायोगं वृद्धादीनामकालहीनं सम्पाद्यते इति न कश्चिद्दोषः २। अधुना ''विणए

१. °रागता एव -सं. ॥

**ग्लानस्यौषधादिकं** साधवो **गुरुणा विना न ददति,** आदिशब्दात् भोजनादिपरिग्रहः। यदि वा **ऊनमधिकं वा दद्युस्तस्य** च ग्लानस्याचार्यं प्रतीक्षमाणस्य **वेलातिगच्छति**३ ॥ २५१६ ॥

सम्प्रति ''साधू सण्णी''[गा.२५१२] इति व्याख्यानयति—

**पाहुणगा गंतुमणा, वंदिय जो तेसि ऊण्हसंतावो ।**
**पारणए**[१] **पडिच्छंते, सड्ढे वा अंतरायं तु ॥२५१७॥** दारं ४ ।

**प्राघुर्णकाः** केचित् साधव आगताः, ते **गन्तुमनसः** ते यद्याचार्यमवन्दित्वा अनापृच्छ्य वा गच्छन्ति ततोऽविनयादयो दोषाः, ततः प्रतीक्षमाणास्तिष्ठन्ति, आचार्यश्च चिरेण वसतिं प्रविष्टस्तावद् दिवस आसमन्तात् तप्तोऽभवत् ततो गुरुं **वन्दित्वा** व्रजतां **य उष्णसन्तापस्**तेषां स आचार्यनिमित्तकः, तथा **श्राद्धे** अष्टम्यादिषु पर्वसु कृताऽभक्ते **पारणके** आचार्यं **प्रतीक्षमाणे अन्तरायं** कृतं भवति ४॥ २५१७॥

उपसंहारमाह—

---

**१. पारणग- ला. पाठा.। पाणगे-ला.। पारग प° मु. पु. प्रे. ॥**

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जम्हा एते दोसा, तम्हा गुरुणा न चिट्ठियव्वं तु ।**
**भिक्खूण चिट्ठियव्वं, तस्स न किं दोस होंतेए? ॥ २५१८॥**

**यस्मादेते दोषास्तस्मात् गुरुणा न** वसतेर्बहिश्चिरं **स्थातव्यम्। भिक्षुणा** पुनश्चिरमपि **स्थातव्यं** यावच्चलः सागरिकोऽपयाति, ततो बहिः पादान् प्रमृज्यान्तर्वसतेः प्रवेष्टव्यम्। अत्र चोदक आह-**तस्य** भिक्षोः **किमेते**ऽनन्तरोदितास्ते दोषा **न भवन्ति?** ॥ २५१८॥

आचार्य आह—

**अणेगबहुनिग्गमणे, अब्भुट्ठाणभाविया य हिंडंता ।**
**दसविह वेयावच्चे, सग्गामे बर्हिं च वायामो ॥२५१९॥**
**सीउण्हसहा भिक्खू, न य हाणी वायणादिया तेसिं ।**
**गुरुणो पुण ते नत्थी, तेण [१]पमज्जंति खेयण्णो ॥२५२०॥**

अनेकैः कारणैः बहून् वारान् निर्गमनम् **अनेकबहुनिर्गमनं**, तस्मिन्, तथा गुर्वादीनाम**भ्युत्थाने** आसनप्रदानादौ च तथा भिक्षार्थं **हिण्डमाना भाविता** व्यायामितशरीराः,



**१. ला.। पमज्जंतो -पु. प्रे. मु. ला. पाठा. ॥**

For Private And Personal Use Only

यदुक्तमनेकैः कारणैः बहुवारं निर्गमनं, तत्र कारणान्याह—**दशविधवैयावृत्त्य**निमित्तं **स्वग्रामे बहिः** परग्रामेऽनेक-वारमनेकधा **व्यायामो**ऽभवत्, तथा **शीतोष्णसहा भिक्षवो न च** तेषां भिक्षूणां **वाचनादिका** वाचनादिविषया **हानिः गुरोः पुनस्ते**ऽनेकबहुनिर्गमनादयो **न सन्ति।** **ततस्तृ**ष्णाद्यध्यासितुमसहिष्णव आचार्या वसतेर्बहिः सागारिके तिष्ठति लघुवसतेरन्तः प्रविशन्ति। **ततः खेदज्ञेन** कुशलेन पादान् **प्रमार्जापयन्ति** ॥२५१९॥२५२०॥

इदानीं भिक्षोरपि द्वितीयपदमाह—

**धुवकम्मियं च नाउं, कज्जेणऽण्णेण वा अणतिपातिं ।**
**अव्वक्खित्ताउत्तं, न उदिक्खति बाहि भिक्खू वि ॥२५२१॥**

वसतेर्बहिः सागारिकं **धुवकर्मिकं** वा लोहकारादिक**मन्येन वा कार्येणा**न्यमपि सागारिकम**नतिपाति**नमगच्छन्तं तथा **अव्याक्षिप्तमायुक्तं च ज्ञात्वा भिक्षुरपि बहिर्नोदीक्षते** न प्रतीक्षते किन्तु वसतिं प्रविश्यात्मीये अवकाशे यतनयाऽऽत्मनः पादौ प्रमार्जयेत् ॥ २५२१॥

प्रथमोऽतिशयो गतः, सम्प्रति द्वितीयं विभावयिषुरिदमाह—

**बहिगमणे चउगुरुगा, आणादी वाणिए य मिच्छत्तं१ ।**
**पडियरणमणाभोगे२, खरिमुह मरुए तिरिक्खादी ॥ २५२२॥**

आचार्यो यदि विचारभूमिं **बहिर्गच्छति** ततः प्रायश्चित्तं **चत्वारो गुरुका आज्ञादय**श्च दोषाः। तथा **वाणिए य मिच्छत्त**मिति **वणिजि** अभ्युत्थानं पूर्वं कृतवति पश्चादकुर्वति केषाञ्चित् **मिथ्यात्व**मुपजायत॥ इयमत्र भावना-आचार्यं संज्ञाभूमिं व्रजन्तं ततः प्रत्यागच्छन्तं च दृष्ट्वा वणिजो निजनिजापणे स्थिता अभ्युत्थानं कृतवन्तः, तं च तथा वणिजां बहुमानेनाभ्युत्थानं दृष्ट्वा केचिदन्ये मन्यन्ते गुणवानेष आचार्यो येन वणिज एवमेतमभ्युत्तिष्ठन्ति तस्मादस्माकमपि पूज्य इति तेऽपि पूजयन्ति, यदा त्वाचार्यः कदाचित् द्वौ वारौ संज्ञाभूमिं व्रजति तदा चतुरो वारान् गमने प्रत्यागमने चोत्थातव्यं, ते चालस्यं मन्यमाना अभ्युत्थातव्यं भविष्यतीति कृत्वा आचार्यं दृष्ट्वाऽन्यतो मुखं कुर्वन्ति, तांश्च तथा कुर्वतो दृष्ट्वा अन्ये चिन्तयन्ति नूनमेष प्रमादी जातो ज्ञाताऽपि गुणवानपि यदीदृशः पतति तर्हि न किञ्चिदिति ते मिथ्यात्वं गच्छन्ति । तथा आचार्यं लोकेन पूज्यमानं दृष्ट्वा **मरुके** ब्राह्मणस्य मारणबुद्ध्या **प्रतिचरणं** भवति, ततः संज्ञाभूमिं गतं विजने प्रदेशे मारयेत् । तथा **खरमुखीं** नपुंसकीं दासीं वा प्रापयित्वा उड्डाहं कुर्यात्। **अनाभोगेन** वा वनगहने प्रविष्टे **तिर्यगादौ** च गर्दभादौ

कुलटादौ च प्रविष्टायामात्मपरोभयसमुत्था दोषाः। एष गाथासङ्क्षेपार्थः॥ २५२२॥

सम्प्रति ''वाणियए मिच्छत्तं'' इत्येतद्विभावयिषुराह—

**सुयवं तम्मि परिवारवं च वणियंतरावणुट्ठाणेण ।**

**दुट्ठाणनिग्गमम्मि य, हाणी य परम्मुहाऽवन्नो ॥२५२३॥**

संज्ञाभूमिं व्रजति ततः प्रत्यागच्छति वा **तस्मिन्** आचार्ये **श्रुतवानेष परिवारवां**श्चेति मन्यमाना **अन्तरा** निजनिजाऽऽ**पणेषु** स्थिता **वणिजो**ऽभ्युत्थानं कृतवन्तः, तेषां **चोत्थाने** लोकस्य च भूयान् बहुमान आसीत्, कदाचिदाचार्यो द्वौ वारौ संज्ञाभूमिं व्रजेत् ततो **द्विस्थान-निर्गमने** चतुरो वारान् गच्छति प्रत्यागच्छति चोत्थातव्यं, ततस्ते आलस्यं मन्यमाना अभ्युत्थानस्य **हानिं** कुर्वन्ति ते च हानिमभ्युत्थानस्य चिकीर्षवोऽभ्युत्थातव्यं भविष्यतीति कृत्वा तमाचार्यं दृष्ट्वा **परम्मुखा** भवन्ति, अन्यतो मुखं कुर्वन्तीति भावः । अथवा **अवर्णः** स्यात्, तथाहि—द्वौ वारौ संज्ञाभूमिं व्रजन्तमाचार्यं दृष्ट्वा ते वदन्ति 'नूनमेष आचार्यो द्वौ त्रीन् वारान् समुद्दिशति तेन द्वौ वारौ संज्ञाभूमिं याति' ॥२५३३॥

**गुणवं तु जतो वणिया, पूयंतऽण्णे वि सन्नया तम्मि ।**

१. परमुहा-सं. ॥

**पडियत्ति अणुट्ठाणे, दुविहनियत्ती अभिमुहाणं ॥२५२४॥**

वणिजां बहुमानेनाभ्युत्थानं दृष्ट्वा केचिदन्ये चिन्तयन्ति- **गुणवाना**चार्यो **यतो वणिजः पूजयन्ति**' एवं चिन्तयित्वा तेऽ**प्यन्येपि तस्मिन्ना**चार्ये **सन्नता** भवन्ति। वारद्वयसंज्ञाभूमिं गमने वणिजा**मनुत्थाने** ते चिन्तयन्ति 'नूनमेष आचार्यः **पतितः** कथमन्यथा वणिजः पूर्वमभ्युत्थानं कृतवन्तो नेदानीं कुर्वन्ति,' तथा च सति तेषा**मभिमुखानां द्विविधा निवृत्तिः**, तथा ये श्रावकत्वं ग्रहीतुकामा ये च तस्य समीपे प्रव्रजितुकामास्ते चिन्तयन्ति यद्येषोऽपि प्रधानो ज्ञाता कुशीलत्वं प्रतिपद्यते तर्हि नूनं सर्वं जिनवचनमसारमिति मन्यमानाः श्रावकत्वात् व्रतग्रहणाद्वा प्रतिनिवर्त्तन्ते मिथ्यात्वं गच्छन्ति॥ २५२४॥

सम्प्रति ''पडियरणमणाभोगे'' इत्यादि व्याख्यानमाह—

**आउट्टो त्ति व लोगे पडियरिउं छन्ने मारए मरुगो ।**
**खरियमुहसंढगं वा लोभेउ तिरिक्ख संगहणं ॥२५२५॥**

गुणवानाचार्य इति कृत्वा सर्वो लोक आचार्यस्य **आवृत्तो**ऽभवत् प्रणतोऽभूत्, धिग्जातीयानां

च केषाञ्चित् पापीयसां तथापूजामाचार्यस्य दृष्ट्वा महामत्सरः, ततो मात्सर्येण संज्ञाभूमिगतमाचार्यं **प्रतिचर्य छन्ने** प्रदेशे **मरुको** ब्राह्मणः कोऽपि[ **मारयेत्** ]जीवितताद् व्यपरोप्य गर्त्तादिषु प्रच्छन्ने प्रदेशे स्थगयेत् तथा **खरिकामुखीं** दासीं **नपुंसकं वा प्रलोभ्य** तत्र प्रेष्य **सङ्ग्रहं** कुर्यात् तथा 'मैथुनमेष सेवमानो गृहीतः', तत उड्डाहः स्यात्। तथा अनाभोगेनाचार्यो वनादिगुपिलमवकाशं संज्ञाव्युत्सर्जनाय प्रविष्टः स्यात् तत्र च **तिरिक्ख** त्ति तिर्यग्योनिका गर्दभ्यादिका पूर्वागता पश्चाद्वा प्रविष्टा भवेत्, तां च केचित् प्रत्यनीका दृष्ट्वा उड्डाहं कुर्युः॥ २५२५॥

मूलगाथायां यदुक्तं ''तिरिक्खादी''ति तत्रादिशब्दव्याख्यानार्थमाह—

**आदिग्गहणा उब्भामिगा व तह अन्नतित्थिगा वा वि ।**
**अहवा वि अन्नदोसा, हवंति मे वादिमादीया ॥२५२६॥**

**आदिग्रहणात् उद्भ्रामिका** कुलटा तथा **अन्यतीर्थिकी वा** परिगृह्यते, सा तस्मिन् गहने पूर्वगता पश्चाद्वा प्रविष्टा भवेत् तत्र चाऽऽत्मपरोभयसमुत्था दोषाः सङ्ग्रहणादयश्च प्रागुक्ताः। **अथवा इमे** वक्ष्यमाणा **अन्ये वाद्यादयो दोषा भवन्ति** ॥ २५२६॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तानेव सञ्ज्ञिघृक्षुर्द्वारगाथामाह—

**वादी१ दंडियमादी,२ सुत्तत्थाणं च गच्छपरिहाणी३।**
**आवस्सगदिट्ठंतो, कुमर करेंतेऽकरेंते य ४॥ २५२७॥**

**वादिदण्डिकादयो** वादि-दण्डिकादिविषया बहवो दोषाः,तथा **सूत्रार्थानां गच्छस्य च परिहाणिः** अथवा सूत्रार्थानां परिहाणिर्गच्छे च ज्ञानादीनां परिहानिः, तथा **आवश्यकं** उच्चारावश्यकं **कुर्वन् अकुर्वन् च कुमारो दृष्टान्तः**। एष द्वारगाथासङ्क्षेपार्थः । साम्प्रतमेनामेव विवरीषुः प्रथमतो वादिद्वारमाह—

**सन्नागतोत्ति सिट्ठे, भयातिसारो त्ति बेति परवादी ।**
**मा होहिति सिं वज्झा, वच्चामि अलं विवाएणं ॥ २५२८ ॥** दारं १।

कोऽपि परप्रवादी बहुश्रुतमाचार्यं लोकपूजितं श्रुत्वा तेन समं वादं करिष्यामीत्यागतो भवेत्। आचार्यश्च संज्ञाभूमिं तदा गतः, तेन चाऽऽगतेन वसतौ पृष्टं 'क्व आचार्याः ?' साधुभिः कथितम् 'आचार्याः **संज्ञाभूमिं** गताः' एवं श्रुत्वा स **परप्रवादी ब्रूयात्**-'मम भयेन पलायितो



For Private And Personal Use Only

यदि वा मम **भयेनाऽतीसारो** जातः । अथवा **मा भविष्यत्येषां हत्येति व्रजामि अलं** पर्याप्तं **विवादेन**'॥ २५२८॥

अधुना ''दंडियमादि'' त्ति व्याख्यानयति —

**चंदगवेज्झासरिसं, आगमणं रायइड्ढिमंताणं ।**
**पव्वज्ज सागभद्दग, इच्चादि गुणाण परिहाणी ॥ २५२९॥** दारं २।

यथा **इन्द्रपुरे इन्द्रदत्तस्य** राज्ञः सुतेन कथमपि पुत्तलिकाक्षि**चन्द्रकस्य वेधः** कृतस्तत्**सदृशं राज्ञ ऋद्धिमतां** चान्येषामाचार्यसमीपे आगमनम्, आचार्ये च संज्ञाभूमिं गते दण्डिकादिरागतो भवेत्। ततः संज्ञाभूमिं गत आचार्य इति श्रुत्वा प्रतिनिवर्तेत, यदि पुनः संज्ञाभूमिं न गता आचार्या भवेयुस्ततो धर्मं श्रुत्वा कदाचित् ते **प्रव्रज्यां** गृह्णीयुः। प्रव्रजितेषु च राजादिषु महती प्रवचनप्रभावना । तथा **श्रावकत्वं** केचित् कदाचित् प्रतिपद्येरन् यथा**भद्रका** वा भवेयुस्तथा वा चैत्यसाधूनां महान् उपग्रहः, संज्ञाभूमिगमने चैतेषां **गुणानां हानिः** ॥ २५२९ ॥

सम्प्रति ''सुत्तत्थाणं च गच्छे परिहाणी'' इत्येतद्व्याख्यानार्थमाह—

**सुत्तत्थे परिहाणी, वीयारं गंतु जा पुणो एइ ।**
**तत्थेव य वोसरणे, सुत्तत्थेसुं न सीयंति ॥ २५३० ॥** दारं ३।

**विचारं** विचारभूमिं **गत्वा यावत्** [**पुनरेति** तावत्] **सूत्रार्थपरिहाणिः**। इयमत्र भावना- संज्ञाभूमिर्दूरे भवेत् सूत्रपौरुष्यामर्थपौरुष्यां चार्द्धकृतायामाचार्यः संज्ञावान् जातस्ततो गतः संज्ञाभूमिं तत उद्घाटायां पौरुष्यामर्थपौरुष्यां कालवेलाया वा समागतः, ततः सूत्रार्थपरिहानिः, तद्भावाच्च शिष्याः प्रतीच्छिकाश्चान्यं गणं व्रजन्ति, ततो गच्छस्यापि परिहाणिः, **तत्रैव** पुनरुपाश्रये संज्ञाया **व्युत्सर्जने सूत्रार्थेषु** साधवो **न सीदन्ति** । अत्र चावश्यकं कुर्वन् अकुर्वन् कुमारो दृष्टान्तः ॥ २५३० ॥

तमेव भावयति—

**तीरगए ववहारे, खीरगते होंति तदिह उट्ठाणे ।**
**कोसस्स हाणि परचमुपेल्लण रज्जस्स अपसत्थे ॥ २५३१ ॥** दारं ४।

कुमारस्याऽऽस्थाने समुपविष्टस्याऽर्थिनः प्रत्यर्थिनश्च व्यवहारेणोपस्थिताः। तेषां चोत्तरोत्तरेण

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यवहरतां व्यवहारस्**तीरं गतः**, परं नाद्यापि समाप्तिमुपयाति तस्मिंश्चासमाप्ते **व्यवहारे** सति राजकुमारः संज्ञावान् जातस्तत **उत्थाय** संज्ञाभूमिं गतः स च यावन्नायाति तावदर्थिनः प्रत्यर्थिनश्च **क्षीरोदक**संयोगादिवदेकीभूताः, ततो राजकुमारस्य प्रत्यागतस्य ते ब्रुवते 'वयं परस्परं सुस्थीभूताः।' एवं सदा कुर्वन् समस्तादपि लक्षादिप्रमाणात् दण्डाऽऽयपदात् परिभ्रष्टः। ततः **कोशस्य हानि**र्जाताः, तां च ज्ञात्वा **परचमूः** परबलमागतं, तया च **राज्यस्य प्रेरणमे**षोऽ**प्रशस्ते दृष्टान्तः**।



प्रशस्ते पुनर्दृष्टान्तः स्वयं भावनीयः। स चायं- प्रथमत एवाऽऽवश्यकमुच्चारादेः कृत्वा आस्थाने समुपविशति, उपविष्टो यदि संज्ञावान् भवति ततः प्रच्छन्ने प्रदेशे व्यत्सृजति। एवं तस्य कुर्वतः प्रभूतं प्रभूततरं दण्डाऽऽयपदं जातम्। तथा च सति कोशस्य महती वृद्धिस्ततः परबलस्य प्रेरणं राज्यान्तरसङ्ग्रहः। एष दृष्टान्तोऽयमर्थोपनयः- य आचार्यो बहिः संज्ञाभूमिं व्रजति तस्य प्रागुक्तप्रकारेण सूत्रार्थपरिहाणिः, तत्परिहाण्या गच्छस्यापि परिहाणिः शिष्याणां प्रातीच्छिकानां चान्यत्र गणान्तरे गमनात्। यस्तु तत्रैवोपाश्रये व्युत्सृजति तस्य न किञ्चिदपि परिहीयते इति सर्वं सुस्थम् ॥ २५३१॥

For Private And Personal Use Only

एतदेवाह—

**वेलं सुत्तत्थाणं, न भंजए दंडियादिकहणं वा ।**
**पच्छण्णोऽमयकोसे, पुच्छा पुण साहणा विणए ॥ २५३२ ॥**

यथा बहिर्न गन्तव्यमेवं ग्रामादीनामन्तरेऽपि सूत्रार्थानामपरिहानिनिमित्तं, दण्डिकादीनामागतानां धर्मकथाया अविघ्ननिमित्तं च संज्ञाव्युत्सृजनाय न गन्तव्यं, किन्तूपाश्रयस्याऽन्तर्व्युत्सृजनीयम्, येन **सूत्रार्थवेलां न भनक्ति**। नापि **दण्डिका[ दी ]**नामागतानां **धर्मकथनं** विघ्नयति। पूर्वमेव चोपयोगः कर्त्तव्यः किं मम संज्ञा भवेन्न वा ?। तत्र यदि शङ्का तदा कृताऽऽवश्यकेन सूत्रपौरुष्या[ मर्थ ] पौरुष्यां च सूत्रार्थप्रदानायोपवेष्टव्यम्। तत्रापि न तावदासितव्यं यावदवश्यमुत्थेयं भवति, किन्त्वग्रे, अत्रार्थे निदर्शनम्-एक आचार्य आवश्यकं शोधयित्वा तिष्ठति, दण्डिकश्च धर्मश्रवणार्थमागतः, आचार्येण धर्मकथा प्रारब्धा। स च धर्मकथाक्षिप्तो राजकुमारो धर्मं शृण्वन्नभीक्ष्णमभीक्ष्णं कायिकीव्युत्सृजनायोत्तिष्ठति, अथ आचार्यस्य च **प्रच्छन्नोऽमृतकोशः** समर्प्यते प्रच्छन्नं कायिकीमात्रकं साधवः समर्पयन्ति, तत्र कायिकीं व्युत्सृजति। ततो **विनये** लोकोत्तरिके बलवति राज्ञः **पृच्छा** आचार्यस्य **कथनम्**॥ २५३२॥

एतदेव विभावयिषुरिदमाह—

**निद्दाहारो वि अहं, असइं उट्ठेमि नेस कहयंतो ।**
**पासगतो मण्णे तं, वत्थंतरियं पणामेइ ॥ २५३३॥**

राजा चिन्तयति 'मम **स्निग्ध आहारस्तथाऽपि** कायिकीव्युत्सर्गाय पुनः पुन**रुत्तिष्ठामि, आचार्यस्तु कथयन्** रूक्षाहारोऽपि कायिकीव्युत्सर्गाय **नोत्तिष्ठति**, नूनं **मन्ये** य एष आचार्यस्य **पार्श्वे स्थितः** क्षुल्लकः स तत् कायिकीमात्रं प्रच्छन्नं च **वस्त्रान्तरितं प्रणामयति** समर्पयति। तत्र कायिकीमाचार्यो व्युत्सृजति ॥ २५३३॥

'एतच्च यदि पृच्छ्यते तर्हि अविनयः कृतो भवति तस्मादुपायेन पृच्छामि' इति विचिन्त्येदं पृच्छति—

**विणओ उत्तरिओ त्ति य, बलिओ गंगा कुतोमुही वहति? ।**
**पुव्वमुही अचलंतो, भणति निवं आगितिजुतो वि ॥ २५३४॥**

राजा सूरिमापृच्छति-'भगवन् ! किं लौकिको विनयो बलीयान् अथ लोकोत्तरिकः ?'। आचार्येणोक्तमयमर्थः परीक्ष्यतां, परमेवं ज्ञायते **लोकोत्तरिको विनयो बलीयान्** । तत्र परीक्षा कर्तुमारब्धा। आचार्येणोक्तं-यस्तव दृष्टप्रत्ययो यं वा आकृत्या त्वं जानासि न एष विनयभ्रंशी तं प्रेषय, 'यथा कुतोमुखी गङ्गा वहति? इति ज्ञात्वा निवेदय'। ततो राजा य आकृतिमान् यश्च दृष्टप्रत्ययस्तं प्रेषयति, 'व्रज, **कुतोमुखी गङ्गा वहति**' सो**ऽचलन्** तत्रैव स्थितो नृपं **भणति** 'यथा **पूर्वाभिमुखी** गङ्गा वहति लोकोऽप्यन्य एतत् जानाति'। तत्र आचार्यो ब्रूते-'मम शिष्याणां मध्ये यं त्वं विषमकरचरणनाशादिभिर्विषमं जानासि, उक्तं च—

*विषमसमैर्विषमसमाः विषमैर्विषमाः समैः समाचाराः ।*
*करचरणवदननासाकर्णौष्ठनिरीक्षणैः पुरुषाः ॥*

विषमत्वाच्चाविषमे एव विनयभ्रंशं करिष्यतीति तं प्रेषय ॥ २५३४॥

**रण्णा पयंसितो एस वयउ अविणीयदंसणो समणो ।**
**पच्चागय उस्सग्गं काउं आलोयए गुरुणो ॥ २५३५॥**

एवमाचार्येणोक्ते **राज्ञा** यो विषमकरचरणादिना **अविनीतदर्शनः श्रमणः** स **प्रदर्शित** '**एष व्रजतु**' 'कया दिशा गङ्गा वहतीति' आचार्येण स प्रेषितः। स आचार्यानापृच्छ्य तत्र गत्वा ततः **प्रत्यागत्य** ऐर्यापथिक्याः **कायोत्सर्गं कृत्वा गुरोः** पुरत **आलोचयति** ॥ २५३५॥

कथमित्याह—

**आदिच्चदिसालोयण, तरंगतणमाइया य पुव्वमुही ।**
**मा होज्ज दिसामोहो, पुट्ठो वि जणो तहेवाह ॥ २५३६॥**

भगवन्! युष्मत्पादानापृच्छ्याहं गङ्गातटं गतः, तत्र च गत्वा सूर्यं निर्ध्यातवान्, यत आदित्याद् दिग्विभागः सम्यक् ज्ञायते, एव**मादित्यदिगालोचनं** कृतम्। तथा **तरङ्गैस्तृणादीनि** पूर्वाभिमुखाण्युह्यमानानि दृष्टानि, तत्र कदाचित् दिग्मोहोऽपि स्यात् ततो **मा भूद् दिग्मोह** इत्यन्योऽपि **जन**स्त्रिसङ्ख्याकः पृष्टः, सो**ऽपि तथैवाह**-यथा **पूर्वाभिमुखी** गङ्गा वहतीति। एतच्च राज्ञा प्रत्ययिकप्रच्छन्नपुरुषैः परिभावायितं, तैरपि तथैव कथितम् ॥ २५३७॥

ततो राजा प्राह—

**वहबंधछेयमारण, निव्विसय धणावहार लोगम्मि ।**
**भवदंडो उत्तरितो, उच्छहमाणस्स ता बलितो ॥ २५३७ ॥**

[लोके]योऽस्माकमाज्ञां भनक्ति तस्य **वधं** लकुटादिप्रहारैस्ताडनं, **बन्धं** निगडादिभिः, **छेदं** कर्णच्छेदादिकं केषाञ्चित्, **मारणं** विनाशनमपरेषां, **निर्विषयकरणम्** अन्येषां, **धनापहारं** कुर्मस्तथा[ऽपि] केचित् अस्माकमाज्ञां भञ्जन्ति। लोकोत्तरेषु पुनराज्ञां भञ्जतामेतानि भयानि न सन्ति तथापि परेण प्रयत्नेन लोकोत्तरिकाम् आज्ञां कुर्वन्ति तत्र किं कारणम्? आचार्य आह-**भवदंडो** इत्यादिपश्चार्द्धं, यस्तीर्थकरगणधरादीनामाज्ञां भनक्ति तस्य परभवे हस्तछेदनादीनि भवन्ति, एष **लोकोत्तरे भवदण्डः**, अस्माद्भीतस्य साधो**रुच्छहमानस्य स्वशक्त्य**निगूहनेनोद्यमं कुर्वतो विनयो बलीयान् एवं लोकोत्तरिको विनयो **बलिकः**॥ २५३७॥

अत्रैवापवादमाह—

**बितियपयं असतीए, अण्णाए उवस्सए व सागारो ।**
**न पवत्तति संतेऽवी, जे य समत्था समं तेहि ॥ २५३८॥**

**कुपहादी निग्गमणं नातिगभीरे अपच्चवायम्मि ।**
**वोसिरियम्मि य गुरुणा निसिरंति महंतदंडधरा ॥ २५३९॥**

**द्वितीयपदम्** अपवादपदमधिकृत्य संज्ञाभूमिमाचार्यो व्रजेत्। तदेव द्वितीयपदमाह- उपाश्रयस्य पश्चात्कृते संज्ञाभूमिर्नास्ति, ततस्तस्या **असति** बहिर्व्रजेत्, **अण्णाए**त्ति यत्र न ज्ञायते एष आचार्यस्तत्राऽपि बहिर्व्रजेत्। अथवा **उपाश्रये सागारिको** विद्यते ततो बहिर्याति। कस्यापि पुनरुपाश्रयस्य पश्चात्कृते **विद्यमानेऽपि** संज्ञा **न प्रवर्त्तते** सोऽपि बहिर्याति। एतैः कारणैः बहिर्गमने जाते **ये समर्था**स्तरुणा साधव**स्तैः समं** याति। तत्र यानि **कुपथादीनि** कुरथ्यादीनि **तैर्गन्तव्यं** तैर्गच्छतोऽपि प्रायः पूर्वोक्ता दोषा न भवन्ति। तत्रापि **यन्नाऽतिगम्भीरं** नाऽतिविषमम्, **अप्रत्यवायं** प्रत्यवायविरहितं तत्राचार्यः संज्ञां **व्युत्सृजति,** येषां च सहायानां हस्ते महान्तो दण्डकास्ते **महादण्डधरा**श्चतसृष्वपि दिक्षु संरक्षणपरायणास्तिष्ठन्ति। व्युत्सृष्टे च गुरुणा पुरीषे ते महादण्डधरा **निस्तरन्ति**। कस्मादेवं रक्षा क्रियते? इति चेत्, कुलस्य तदायत्तत्वात् । उक्तं च—

*"जम्मि कुलं आयत्तं तं पुरिसं आयरेण रक्खाहि ।" [ ]*

इत्यादि ॥२५३८॥२५३९॥ कथं पुनः स रक्षितव्यः? इत्यत आह—

**जह राया तोसलिए, मणिपडिमा रक्खए पयत्तेणं ।**
**तह होइ रक्खियव्वो, सिरिघरसरिसो उ आयरितो ॥२५४०॥**

**यथा राजा तौसलिको मणिप्रतिमे प्रयत्नेन [ रक्षति तथा भवत्याचार्यः ] रक्षितव्यः,** यतः- **श्रीगृहसदृश** एष आचार्यः ॥ २५४०॥

अथ के ते प्रतिमे इत्यत आह—

**पडिमुप्पत्ती वणिए, उदही उप्पातोवायणं भीओ ।**
**रयणदुगे जिणपडिमा, करेमि जइ उत्तरेऽविग्घं ॥२५४१॥**

**उप्पाउवसम उत्तरणमविग्घं एक्कपडिमकरणं वा ।**
**देवयछंदेण ततो, जाया बितिए वि पडिमातो ॥२५४२॥**

**प्रतिमाया उत्पत्ति**र्वक्तव्या, सा चैवम्-एकस्य **वणिजः** समुद्रं प्रवहणेनावगाढस्य **उत्पात** उपस्थितः। ततः स वणिक् **भीतः** सन् **औपयाचितकं** करोति यथा- **यद्येत**दौत्पातिकमुपशाम्यति **अविघ्नेनोत्तरामि** च ततोऽनयोर्द्वयोः मणिर**त्नयोर्द्वे** मणिमय्यौ **जिनप्रतिमे कारयिष्यामि।** एवमौपयाचितके कृते देवतानुभावे**नौत्पातिकमुपशान्तम्, अविघ्नं** समुद्रो**त्तरणम**भूत्। स चोत्तीर्णः सन् लोभेन एकस्मिन् मणिरत्ने **एकां** जिन**प्रतिमां कारयति** । ततो देवतया द्वितीयेऽपि मणिरत्ने द्वितीया जिनप्रतिमा कारिता, तथा चाह-**देवताछन्देन, ततो जाता द्वितीयेऽपि** मणिरत्न**प्रतिमा** ॥२५४१ ॥२५४२ ॥

**तो भत्तीए वणितो, सुस्सूति ता परेण जत्तेणं ।**
**ता दीवएण पडिमा, दीसंतिहरा उ रयणाइ ॥२५४३॥**



**ततः** प्रतिमाद्वयकारापणानन्तरं ते प्रतिमे च **वणिक् भक्त्या परेण यत्नेन शुश्रूषत॥** तयोश्च प्रतिमयोरिदं प्रातिहार्यम् **ते** प्रतिमे यावद्दीपकपार्श्वे ध्रियते **तावद्दीपकेन** हेतुना **प्रतिमे दृश्येत॥ इतरथा** दीपकाभावे सप्रकाशेऽपि प्रकाशे मणिर**त्ने** दृश्येते ॥२५४३ ॥

**सोऊण पाडिहेरं, राया घेत्तूण सिरिहरे छुहति ।**
**मंगलभत्तीए ततो, पूएति परेण जत्तेण ॥२५४४॥**

इदमनन्तरोदितं **प्रातिहार्यं राजा** तौसलिकः **श्रुत्वा** ते प्रतिमे [ **गृहीत्वा** ] स्वयमेवात्मीये **श्रीगृहके** भाण्डागारे **क्षिपति** मुञ्चति ततो **मङ्गलबुद्ध्या भक्त्या** च **परेण यत्नेन पूजयति** यस्मिंश्च दिवसे ते प्रतिमे श्रीगृहकमानीते ततः प्रभृति राज्ञः कोशादिषु वृद्धिरुपजायत॥ आह-श्रीगृहसदृश आचार्य इत्युक्तं तत एवं दृष्टान्तभावना कर्त्तव्या यथा-राजा श्रीगृहं प्रयत्नेन रक्षयति एवमाचार्योऽपि रक्षणीयस्ततः कथमत्र मणिमयप्रतिमाभ्यां दृष्टान्तभावना कृता ?॥ २५४४॥ उच्यते—

**मंगलभत्ती अहिया, उप्पज्जइ तारिसम्मि दव्वम्मि ।**
**रयणग्गहणं तेणं, रयणब्भूतो तहायरितो ॥२५४५॥**

श्रीगृहे द्रविणं रक्षणीयं, मणिमयप्रतिमयोः पुनः द्रविणमप्यतिप्रभूतमस्ति मङ्गलबुद्धिश्च तत्रापि परमा तीर्थकरभक्तिश्चेति प्रयत्नरक्षणे त्रीणि कारणानि। तथा चाह-**मङ्गलं** मङ्गलबुद्ध्या **भक्तिश्चाधिका तादृशे द्रव्ये** समुत्पद्यते **ततो रत्नग्रहणम्**। यथा ते रत्नप्रतिमे

कारणत्रयवशाद्विशिष्टेन प्रयत्नेन रक्ष्येते शुश्रूष्येते च, **तथा** शिष्यैः **आचार्यः** प्रयत्नेन रक्षणीयः शुश्रूषणीयश्च ॥ २५४५॥

अथैवमाचार्ये रक्षिते शुश्रूषिते च को गुण इत्यत आह—

**पूयंति य रक्खंति य, सीसा सव्वे गणिं सया पयया।**
**इहपरलोए य गुणा, हवंति तप्पूयणे जम्हा ॥ २५४६॥**

**गणिन**माचार्यं **शिष्याः सर्वे सदा प्रयताः** प्रयत्नपराः **पूजयन्ति** शुश्रूषन्ते [**रक्षन्ति**] च, **यस्मात् तत्पूजने** आचार्यपूजने इहलोके परलोके च **गुणा भवन्ति । इहलोके** सूत्रार्थतदुभयानि, परलोके सूत्रार्थाभ्यामधीताभ्यां ज्ञानादिमोक्षमार्गप्रसाधनम् । अथवा पारलौकिका गुणा "**आयरियवेयावच्चं करेमाणे महानिज्जरे महापज्जवसाणे भवति**" इत्येवमादयः। गतो द्वितीयोऽतिशयः॥ २५४६॥ सम्प्रति तृतीयं "इच्छा पहू वेयावडियं करेज्जा" इत्येवंरूपमतिशयमभिधित्सुराह—

**जेणाहारो उ गणी, सबालवुड्ढस्स होइ गच्छस्स ।**
**तो अतिसेसपभुत्तं, इमेहि दारेहि तस्स भवे ॥ २५४७॥**

**येन** कारणेन **गणी** आचार्यः **सबालवृद्धस्य गच्छस्याऽऽधारस्ततस्तस्य भवत्यतिशेषप्रभुत्वं** अतिशायिप्रभुत्वम्, तच्चैभिर्वक्ष्यमाणैर्द्वारैरवगन्तव्यम् ॥ २५४७॥

तान्येवाह—

**तित्थयर१पवयणे २निज्जरा य सावेक्ख भत्त अविछेदो ।**
**एएहिं कारणेहिं, अतिसेसा होंति आयरिए ॥ २५४८॥** दारगाहा।

आचार्यस्**तीर्थकर**स्तीर्थकरानुकारी तथा सूत्रतोऽर्थतश्चाधीती **प्रवचने** तथा तस्य वैयावृत्त्यकरणे महती **निर्जरा** भवति तथा शिष्याः प्रातीच्छिकाश्चात्मानुग्रहबुद्ध्या सूरेः वैयावृत्त्यं कुर्वन्तः **सापेक्षा** भवन्ति, सापेक्षाणां च भूयान् ज्ञानादिलाभो महती च निर्जरा, इतरे अकुर्वन्तो ये निरपेक्षास्तेषां महान् संसारः। तथा **भक्ता**वाचार्यस्य क्रियमाणायां सकलस्यापि गच्छस्यानुग्रहकरणात् तीर्थस्या**ऽव्यवच्छेदः** कृतो भवति । **एतैः कारणैः आचार्यस्य** सूत्रोक्ता **अतिशेषा भवन्त्यन्ये** वा वक्ष्यमाणा इति द्वारगाथासङ्क्षेपार्थः॥ २५४८॥

साम्प्रतमेषां व्याख्या, तत्र प्रथमं तीर्थकरकल्पद्वारं व्याख्यानयति

**देविंदचक्कवट्टी, मंडलिया ईसरा तलवरा य ।**
**अभिगच्छंति जिणिंदे, ते गोयरियं न हिंडंति ॥ २५४९॥**

**जिनेन्द्रान्** भगवत उत्पन्ने ज्ञाने **देवेन्द्राः** शक्रप्रभृतय**श्चक्रवर्त्तिनः**, उपलक्षणमेतत्, यथायोगं वासुदेवा बलदेवाश्च तथा **माण्डलिकाः** कतिपयमण्डलप्रभव **ईश्वरास्तलवराश्चाभिगच्छन्ति** ततस्ते **गोचरचर्यां न हिण्डन्ते** ॥ २५४९ ॥

**संखादीया कोडी, सुराण निच्चं जिणे उवासंति ।**
**संसयवागरणाणि य, मणसा वयसा व पुच्छंते ॥ २५५०॥**

**सङ्ख्यातीताः सुराणां कोटयो नित्यं** सर्वकालं जिनान् तीर्थकृत **उपासते** तथा सततं **मनसा वचसा पृच्छति** सुरादिके मनसा वचसा च **संशयव्याकरणानि** करोति (कुर्वन्ति) ततो न भिक्षां हिण्डन्ते ॥२५५०॥

**उप्पण्णणाणा जह नो अडंती, चोत्तीसबुद्धातिसया जिणिंदा ।**
**एवं गणी अट्ठगुणोववेतो, सत्था व नो हिंडइ इड्ढिमं तु ॥ २५५१॥**

यथा उत्पन्ने ज्ञाने **जिनेन्द्राश्चतुस्त्रिंशद्बु[1]द्धातिशयाः** सर्वज्ञातिशया देहसौगन्ध्यादयो येषां [2]ते तथा [ते]हि [यथा]भिक्षां **न हिण्डन्ते** । **एवं** तीर्थकरदृष्टान्तेन **गणी** आचार्यो**ऽष्टगुणोपेतो**-ऽष्टविधगणिसम्पदुपेतः **शास्ता इव** तीर्थकर इव **ऋद्धिमान् न हिण्डत**॥ २५५१॥

**गुरुहिंडणम्मि गुरुगा, वसभे लहुयाऽनिवारयंतस्स ।**
**गीयागीते गुरु-लहु, आणादीया बहू दोसा ॥ २५५२॥**

आचार्यं भिक्षामटामीति व्यवसितं यदि वृषभो न निवारयति तदा तस्या**ऽनिवारयतः** प्रायश्चित्तं चत्वारो लघुकाः। अथ वृषभेण निवारितोऽपि न तिष्ठति तर्हि वृषभः शुद्धः,आचार्यस्य प्रायश्चित्तं चत्वारो **गुरुकाः**। तथा **गीतार्थो** भिक्षुश्चेन्न निवारयति तदा तस्य मास**गुरु**। **अगीतार्थस्य** भिक्षोरनिवारयतो मास**लघु** । आचार्यस्य गीतार्थाऽगीतार्थाभ्यां वारितस्यापि गमने प्रत्येकं चतुर्गुरु **आज्ञादयश्च** दोषाः, इमे च वक्ष्यमाणा **बहवो दोषाः** ॥ २५५२॥

तानेवाह—

---

१ 'बुद्ध्यति' पु.प्रे.। २. ते तथा भिक्षां न-आहोर ६४। ते यथा भिक्षां न -मु. ॥

**वाते १ पित्ते २ गणालोए,३ कायकिलेसे ४ अचिंतया ५।**
**मेढी ६ अकारगे ७ वाले, ८गणचिंता ९ वादि १० इड्डिणो ११॥ २५५३॥**

भिक्षामटतो **वातः** वातप्रकोपो भवति । तथा अत्युष्णपरितापनात् **पित्ते** पित्तमुद्रिक्तीभवति। तथा **गणस्य** गच्छस्य भिक्षाटनपरिश्रमत **आलोकः** कर्त्तव्यो न भवति। तथा भिक्षाटने **कायक्लेशो** भवति तस्माच्च सूत्रार्थपरिहाणिस्तथा सूत्रार्थयो**रचिन्ता** भवति। तथा **मेढी**भूत आचार्यः, तस्मिन् भिक्षामटति शिष्याणामात्मद्वारभावतः प्राघूर्णकादीनां वात्सल्यकरणाभावः। तथा **अकारकं** चेद् द्रव्यं लभते तस्य भोजने ग्लानत्वम्,अभोजने पारिष्ठापनिका दोषः। तथा भिक्षामटतो **व्यालः** श्वादिरुपतिष्ठति, तत्र चात्मविराधनादोषः। तथा [गणचिन्ता इति बाल-वृद्धादीनां कारकाऽकारकादिचिन्ता न भवति। वादिना प्रेरणं भवति, इत्यादयो] भिक्षाटने दोषाः एष द्वारगाथासङ्क्षेपार्थः। साम्प्रतमेनामेव विवरीषुः प्रथमतो वातद्वारमाह—

**भारेण वेयणाए, हिंडंते उच्चनीय सासो वा ।**
**बाहुकडिवायगहणं, विसमाकारेण सूलं वा ॥ २५५४॥**

**भारेण** भक्तभृतभाजनभारेण **वेदना** भवति। तथा कोऽपि ग्रामो गिरौ निविष्टो भवेत्, तत्र

च कानिचिद् गृहाण्युच्चस्थाने कानिचित् **नीच**स्थाने, तानि **भारेण वेदनायां** सत्यां हिण्डमानस्य **श्वासो** भवति। तथा बाहोः **कटेश्च वातेन ग्रहणं** भवति । तथा ग्रामे **विषमाकारेण** व्यवस्थिते यत्र तत्रापि वा तिर्यक् शरीरं कृत्वा गच्छतः **शूलं वा** भवेत् ॥२५५४॥

**अत्युण्हतावितो तु, खद्धं दवाऽऽवियणे छड्डुणाईया ।**
**अप्पियणे असमाही, गेलन्ने सुत्तभंगादी ॥ २५५५॥** दारं १॥

तथा **अत्युष्णेन परितापितः** सन् **खद्धं** प्रचुरं द्रवं पानीयमतितृषित **आददीत**। तथा समुद्दिष्टोऽपि तथापरितापभावतः पुनः पानीयमापिबेत् तथा चाहारः पानीयेन प्लावितः सन् न जीर्येत, अजरणाच्च **छर्दनं** वमनं भवेत् **आदि**शब्दात् आहाररुचिर्नोपजायत। अथ पानीयं प्रभूतं **न पिबति** ततो**ऽसमाधिः।** आहारारुचौ च पुनर्भोजने ग्लानत्वम् **ग्लानत्वे** च **सूत्रभङ्गः** सूत्रपौरुषीभङ्गः । **आदि**शब्दादर्थपौरुषीभङ्गश्च ॥ २५५५॥

गतं वातद्वारम् । अधुना पित्तद्वारमाह—

**बहिया य पित्तमुच्छा, पडणं उण्हेण वा वि वसहीए ।**
**आदियणे छड्डुणादी, सो चेव य पोरिसीभंगो ॥ २५५६ ॥** दारं २॥

भक्तभृतभाजनसहितस्य उष्णेन परितापितस्य पित्तप्रकृतेर्बहिः **पित्तमूर्च्छा**वशतः **पतनं** भवेत्, तथा च सति महानुड्डाहः। **वसतौ वा** पित्तमूर्च्छावशतः पतनम्, तत्र च प्रभूतजलापानं समुद्देशानन्तरमपि प्रचुरजला**दानम्**। तथा च सति त एव **छर्दनादयः** प्रागुक्ता दोषाः, **स एव** च सूत्र**पौरुष्या** अर्थपौरुष्याश्च **भङ्गः** ॥ २५५६॥

गतं पित्तद्वारमधुना गणाऽऽलोकद्वारमाह—

**आलोगो तिन्नि वारे, गोणीण जहा तहेव गच्छे वि ।**
**नट्ठं न नाहिति नियट्ट दीहसोही निसिज्जं च ॥ २५५७॥**



**यथा** गोवालस्तिसृषु वेलासु **गवा**मालोकं करोति । तद्यथा-प्रगे प्रसरन्तीनाम्, मध्याह्ने छायास्वास्थितानाम्, विकालवेलायां गृहं प्रत्यागच्छन्तीनाम्। यदि न करोति तदा न जानाति का विनष्टा ? का वाऽऽगता? इति। एवमाचार्येणापि **तिसृषु वेलासु गच्छेऽप्यालोकः** कर्त्तव्यः। तद्यथा-प्रातः मध्याह्ने विकालवेलायां च। तत्र यदि प्रातरावश्यके कृते गणालोकं

न करोति तदा मासलघु। भिक्षावेलायां द्वितीयं वारं गणालोकमकुर्वतो मासलघु । तृतीयं वारं विकालवेलायामप्यकुर्वतो मासलघु । तत्राचार्यो यदि भिक्षां नाऽटति तदा तिसृषु वेलासु गणालोकं कर्तुं शक्नोति । भिक्षामटन् कथं कुर्यात्?। गणाऽऽलोके चाऽक्रियमाणे इमे दोषाः-कोऽपि साधुर्नष्टो भवेत्, स च नष्ट इति ज्ञात्वा प्रत्यानीयते, गणालोके पुनरकृते **नष्ट** इत्येव **न ज्ञायते**॥ तथा भिक्षाचर्यागमने कः **सन्निवृत्तः** को वा न? इति न ज्ञायते, तथा गणाऽऽलोके अक्रियमाणे को **दीर्घ**कालं भिक्षाचर्यां करोति ? को वा न? इति, केन ज्ञायते तथा भिक्षामटत्याचार्ये भिक्षाचर्यात आगतानामालोचनायां कः **शोधिं** करोति ? तथा भिक्षां हिण्डमाने सूरौ कोऽपि गृह**निषद्यां** वाहयति इत्येतन्न ज्ञायते ॥ २५५७॥



**मा आवस्सयहाणी, करेज्ज भिक्खालसा व अच्छेज्जा ।**
**तेण तिसंझाऽऽलोगं, सिस्साण करेति अच्छंते ॥ २५५८॥** दारं ३॥

भिक्षामटत्याचार्ये ये **अवश्यं** कर्त्तव्या योगास्तेषां यः प्रमादतो **हानिं** करोति स न ज्ञायते । तथा आचार्य एवास्माकं भिक्षामानेष्यतीति केचित् **भिक्षालसा** वसतावेव **तिष्ठेयुर्न**

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिक्षामटेयुः। यत एवं गणालोकेऽक्रियमाणेऽमी दोषाः, **तस्मात् तिसृष्वपि सन्ध्यासु शिष्याणामालोकस्तिष्ठन्** भिक्षामहिण्डमानः **करोति**॥ २५५८॥

गत गणालोकद्वारम्, अधुना कायक्लेशद्वारमाह—

**हिंडंतो उव्वातो, सुत्तत्थाणं च गच्छपरिहाणी ।**
**नासेहिति हिंडंतो, सुत्तं अत्थं अरेगेणं ॥ २५५९॥** दारं ४।

**हिण्डमानः** पुनर्भिक्षां महान् कायक्लेश इति **उव्वातोत्ति** परिश्रान्तो भवति, परिश्रान्तत्वात् सूत्रमर्थं च दातुमसमर्थ इति शिष्येषु प्रातीच्छिकेषु च **सूत्रार्थानां परिहानिः** । ततो **गच्छ**स्यापि **परिहानिः**। शिष्याणां प्रातीच्छिकाणां वाऽन्यत्रान्यत्र गणान्तरे सङ्क्रमात् । तथा हिण्डमानः सूत्रमर्थं **चारेकेण** अक्षेपेणाऽऽत्मनोऽपि नाशयिष्यति॥ २५५९॥ गतं कायक्लेशद्वारम् । इदानीमचिन्ताद्वारमाह—

**जा आससिउं भुंजइ, भुत्तो खेयं च जाव परिणेई ।**
**ताव गतो सो दिवसो, नट्ठसती दाहिती किं वा ?॥ २५६०॥**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**यावद्भिक्षामटित्वा** क्षणमात्र**माश्वस्य भुङ्क्ते । भुक्तो**ऽपि च **खेदं** भिक्षाटनपरिश्रमं **यावत् प्रतिनयति** स्फेटयति **तावद्दिवसः** सकलोऽपि **गतस्ततो** नास्ति सा वेला यत्र सूत्रस्यार्थस्य वा चिन्तां करोति। अचिन्तितं च विस्मृतिमुपयाति, ततो **नष्टस्मृतिः किं दास्यति**? न किमपीति भावः। वाशब्दो दूषणसमुच्चये ॥ २५६० ॥

एतदेव सुव्यक्तं भावयति—

**रेगो नत्थि दिवसतो, रत्तिं पि न जग्गते समुव्वातो ।**
**न य अग्गुणिउं दिज्जइ, जइ दिज्जइ संकितो दुहातो ॥ २५६१ ॥** दारं ५।



**नास्ति रेको** विविक्तोऽवसरो **दिवस**मध्ये यत्र सूत्रमर्थं वा चिन्तयति **रात्रावपि समुद्वातः** सम्यक् परिश्रान्तो **न जागर्ति,** न च सूत्रमर्थं वा अगुणयित्वा दीयते, यदि पुनर्दीयते तर्हि द्विधातः सूत्रतोऽर्थतश्च शङ्कितो भवति ॥ २५६१ ॥

गतमचिन्ताद्वारम् , अधुना मेढिद्वारमाह—

For Private And Personal Use Only

**मेढीभूते बाहिं, भुंजण आदेसमाइ आगमणं ।**
**विणओ गिलाणमादी, अच्छते मेढिसंदेसा ॥ २५६२॥** दारं ६।

आचार्यः सर्वस्यापि गच्छस्य **मेढि[ ढी ]भूतः**, मेढिरिति वा आधार इति वा चक्षुरिति वा एकार्थम् , स चेद् भिक्षां गच्छति ततः साधूनां वसते**र्बहिः** यदृच्छया **भोजनं** स्यादेतदनन्तरमेव भावयिष्यते तत एवं ज्ञायते केचि**दादेशाः** प्राघूर्णका **आगच्छेयुः**,**आदि**शब्दात् केचिदलब्धिका लब्धिपरिहीनास्ततस्तेषा**मादेशादीनामागमनं** ज्ञात्वा कः प्राघूर्णकानां विश्रामणं संदेशं वा कुर्यात्? को वा लब्धिपरिहीनानां यन्नास्ति तस्य दानम्। प्राघूर्णकानामितरेषां च वात्सल्याकरणे **विनयो** न कृतः स्यात् । तथा **ग्लानस्य आदि**शब्दात् बाल-वृद्धा-ऽसहानां च कः सन्देशप्रदानेन चिन्ता कुर्यात् ?। **तिष्ठति** भिक्षामनटत्याचार्ये तस्य **मेढेः सन्देशा**दादेशात् सर्वमादेशादेः सुस्थं भवति॥ २५६२॥



सम्प्रति यदुक्तं ''बाहिभुंजणत्ति'' तद् भावयति—

**आलोयदायणं वा, कस्स करेहामु कं च छंदेमो ? ।**
**आयरिए य अडंते, को अच्छिउमुच्छहे अन्नो ? ॥ २५६३॥**

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिष्याः प्रातीच्छिकाश्च भिक्षां प्रविष्टाश्चिन्तयन्ति-यदि सूरिरपि भिक्षार्थं विनिर्गतो भविष्यति ततो वयं प्रतिश्रयं गत्वा कस्य पुरत **आलोचयिष्यामः** ? कस्य वा भक्तं पानं वा **दर्शयिष्यामः** ? **कं** वाऽन्यं साधुं तत्र गताः **छन्दयामो** निमन्त्रयामः ? यतो भिक्षा**मटत्याचार्ये कोऽन्यः** साधुः **स्थातुमुत्सहते** ? सर्वेऽपि भिक्षां यान्तीति भावः। तथाहि-सर्वे साधवो भिक्षामटत्याचार्ये चिन्तयन्ति- यदि स्वयमाचार्यो भिक्षां हिण्डते काऽस्माकं शक्तिः पश्चात् स्थातुम्? वयमपि यास्यामः। एवं सर्वस्यापि गमने निमन्त्रणाऽपि कस्य स्यादिति विचिन्त्य बहिरेव समुद्दिश्य वसतावागच्छेयुरिति ॥ २५६३॥ गतं मेढिद्वारम् । इदानीमकारकद्वारमाह—

**णीणिए अकारगम्मी, दव्वे पडिसेहणा हवति दुक्खं ।**
**रायनिमंतणगहणे, खिंसण वावारणा दुक्खं ॥ २५६४ ॥** दारं ७।



भिक्षामटत आचार्यस्य यदकारकं तस्य तत् भिक्षार्थं निष्काशितं तस्मिन् **अकारके द्रव्ये** भिक्षार्थं **निष्काशिते प्रतिषेधनं** ''ममैतदकारकमन्यद्देहि' इति वक्तुं लज्जातो **भवति दुक्खं**, यदि पुनः लज्जां मुक्त्वा भणति तदा अनन्तरवक्ष्यमाणगाथोद्वयोक्ता दोषाः। तथा भिक्षामटन्नाचार्यो राज्ञा मत्तवारणकस्थितेन दृष्टस्तत आकारयित्वा भणितो 'मम गृहे भिक्षां

For Private And Personal Use Only

गृहाण'। स प्राह 'न कल्पते राजपिण्ड' इति । एवं **निमन्त्रणानन्तरमग्रहणे** राज्ञा भण्यते 'साधो! किं तव पतद्ग्रहे समस्ति ततो दर्शितेऽन्तप्रान्तादिके वासिकादौ च राजा तत् दृष्ट्वा **खिंसनं** कुर्यात् । तथा आचार्योऽलब्धिको भवेत् स चेत् ग्लानादिनिमित्तं शिष्यान् प्रातीच्छिकांश्च व्यापारयेद् यथा-'ग्लानादीनां योग्यमानयत' ते चाऽलब्धिकं ज्ञात्वा परिभवमुत्पादयन्तीति तेषां **व्यापारणात् दुःखम्** एष द्वारगाथासमासार्थः ॥२५६४॥

साम्प्रतमेनामेव विवरीषुः लज्जां मुक्त्वा अकारकद्रव्यप्रतिषेधने ये दोषास्तानाह—

**जेणेव कारणेणं, सीसमिणं मुंडियं भदंतेण ।**
**वयणघरवासिणी वि हु, न मुंडिया ते कहं जीहा ॥ २५६५॥**

**येनैव कारणेन** हेतुना **भदन्तेन** गुरुणा तव **शीर्षमिदं मुण्डितं** तेनैव कारणेन तव **जिह्वाऽपि वदनगृहवासिनी** 'ममैतदकारकमन्यद्देही'ति ब्रुवाणा **कथं न मुण्डिता?** येनैवं न भाषते॥ २५६५॥

यथा—

**गयमागयम्मि लोए, सीसा वि तहेव तस्स गच्छंति ।**
**सयमेव दुट्ठजिब्भो, सीसे विणइस्सती केण ?॥ २५६६ ॥**

गतागमोऽयं स्वभावतो लोकः, पितृस्वभावं पुत्रोऽनुकरोतीति भावः । ततो **गतागमे**ऽस्मिन् **लोके** यथाचार्यो गच्छति चेष्टते **शिष्या अपि तस्य तथैव गच्छन्ति** वर्त्तन्त॥ त्वं च **स्वयमेव** इत्थं दुष्टजिह्वस्ततः **केन** प्रकारेण **शिष्यान् विनेष्यति** शिष्ययिष्यति? नैव कथञ्चनेति भावः। ततस्तेऽपि त्वत्सदृशा भविष्यन्तीति ॥२५६६॥

**पडिसेहंतमजोग्गं, अण्णस्स वि दुल्लहं हवइ भिक्खं ।**
**सद्धाभंगऽचियत्तं, जिब्भादोसो अवण्णो य ॥ २५६७ ॥**



**अयोग्यम्** अकारकं **प्रतिषिध्यमानं** महान्तमपगुणं करोति, कोऽसावपगुण? इत्याह - **अन्यस्यापि** साधोर्**दुर्लभं भवति भैक्षं**, नैते यद्वा तद्वा गृह्णन्तीत्यदानात्। तथा अकारकस्य प्रतिषेधने कस्या अपि महत्याः **श्रद्धाया भङ्गः**। अपरस्याऽपि **अचियत्त**मप्रीतिः। ततस्तद्वशाद**वर्णो जिह्वादोष** उत्पद्यते ॥ २५६७॥

सम्प्रति यदुक्तं ''राजनिमन्त्रणाऽग्रहणे खिंसनम्' इति तत्र तदेव खिंसनमाह—

**पुव्विं अदत्तदाणा, अकोविया इह उ संकिलिस्संति ।**
**काऊण अंतरायं, नेच्छंतिट्ठं पि दिज्जंतो ॥ २५६८॥**

अन्तप्रान्तादौ वासितादौ च दर्शिते राजा प्राह-**पूर्वमदत्तदाना** यूयं तत **इहाऽकोविदा** अतत्त्वज्ञाः सन्तः **क्लिश्यन्ति** क्लिश्यध्वे तथा च राजपिण्ड इत्य**न्तरायं कृत्वा इष्टमपि दीयमानं** भवन्तो **नेच्छन्ति** ॥२५६८॥

**गहण पडिसेहभुंजणे, अभुंजणे चेव मासियं लहुयं ।**
**अमणुण्ण अलंभे वा, खिंसिज्ज व सेहमादीया ॥ २५६९॥**

अकारकस्य **ग्रहणे** सति यद्यन्यैः साधुभिः **प्रतिषिध्यमानो**ऽपि **भुङ्क्ते** तदा ग्लानत्वम्, अथ न भुङ्क्ते तदा**ऽभोजने** पारिष्ठापनिकादोषस्तत्र च प्रायश्चित्तं **मासिकं लघु**। तथा यद्याचार्योऽलब्धिकस्तदा **अमनोज्ञलाभे अलाभे वा शैक्षकादयः खिंसेयुः**'न किमपि क्वापि गतो लभते[१], रिक्तमेतस्याचार्यत्वम्' ॥२५६९॥



---

१ °तेऽतिरिक्त° मु.॥

**वावारिया गिलाणादियाणं गेण्ह जोग्गं ति ते ततो बेंति ।**
**तुब्भे कीस न गेण्हह हिंडंता ऊ सयं चेव ॥ २५७० ॥**

आचार्यो लब्धिहीनः सन् शिष्यान् प्रातीच्छिकांश्च व्यापारयेत्, यथा-**ग्लानादीनां** ग्लान-प्राघूर्णकप्रभृतीनां **योग्यं गृह्णीत**। तत एवं **ते व्यापारिताः** सन्तो **ब्रुवते 'यूयं स्वयमेव हिण्डमानाः** ग्लानादिप्रायोग्यं **कस्मान्न गृह्णीत?'** ॥ २५७० ॥

**एवाणाए परिभवो, बेंति य दीसए य पाडिरूवं भे ।**
**आणेह जाणमाणा, खिंसती एवमादीहिं ॥ २५७१ ॥**

**एवमुपदर्शितेन** प्रकारेण **आज्ञायाः परिभव** उत्पाद्यते यथा-यदि यूयं प्रायोग्यं न लभध्वे कथं वयं लप्स्यामहे? एवमुक्ते यद्याचार्यो ब्रूते-आर्या! उद्यमेन किं न लभ्यते? तत एवमुक्ते रुष्टा **ब्रुवते-दृश्यते** खलु **भे** भवतां **प्रातिहार्यं** सातिशयमाचार्यत्वं स्वयमेव **जानन्तः** कस्मान्ना**नयत एवमादिभि**रुच्चा-ऽवचैर्वचनैः **खिंसन्ति** हीलयन्ति॥ २५७१ ॥

गतमकारकद्वारम्, व्यालद्वारमाह—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वाले य साणमादी, दिट्ठंतो तत्थ होति छत्तेण ।**
**[1]लोभेय अभियोगे, विसे य इत्थीकए वावि ॥ २५७२॥** दारं ८।

भिक्षामटतो **व्याल**प्रभृतिकः कदाचिल्लगति तदा महत्यपभ्राजना। **तत्र च दृष्टान्तः छत्रेण।** यथा छत्रमुपरि ध्रियमाणं शोभते अधःपतितं तु न किमपि। एवमाचार्योऽपि बहुभिः परिवारितो गच्छन् शोभते, भिक्षाटनप्रवृत्तस्तु **श्वादि**परिगृहीतो न किमपि। तथा प्रतिरूपवानाचार्यो भवतीति **लोभेन** गाथायां सप्तमी तृतीयार्थे**ऽभियोगो** वशीकरणं **स्त्रीकृतं** स्यात् **विषं वा** केनचित् प्रद्विष्टेन दीयेत ॥ २५७२॥

एतदेवोत्तरार्द्धं व्याचिख्यासुराह—

**मोएउं असमत्था, बद्धं रुद्धं व नच्चणं कुसिया ।**
**जुवतिकमणिज्जरूवो, सो पुण सव्वे वि ते सत्तो ॥ २५७३॥**



---

१ ला. मु. । लाभण - पु. प्रे. ॥

For Private And Personal Use Only

युवतिकमनीयरूपतयाऽलीकदोषसम्भवेन अन्यथा वा **बद्धं रुद्धं वा नर्त्तनं** नटानां नायकं **कुशिता मोचयितुमसमर्था**स्तेषां तादृक्शक्त्यभावात्, **स पुनर्युवतिकमनीयरूपस्तान्** कुसितान् **सर्वानपि** केनापि दोषेण बद्धान् रुद्धान् वा मोचयितुं **शक्त**स्ततो यथा स प्रयत्नेन रक्ष्यते, एवमाचार्योऽपि रक्षणीयोऽन्यथा दोषः॥ २५७३॥

तथा चाह—

**एमेवायरियस्स वि, दोसा पडिरूववं च सो होइ ।**
**दिज्ज विसं भिक्खुवासो, अभिजोग्गवसीकरणमादी ॥ २५७४॥**

**एवमेव** नर्त्तनस्येवाऽऽ**चार्यस्या**प्यरक्षितस्य **दोषा** भवन्ति। तथा हि **सोऽ**पि **प्रतिरूपवान् भवति** ततः कोऽपि **भिक्षूपासको** जिनप्रवचनप्रभावनामसहिष्णु**र्विषं दद्यात्**। स्त्री वा काचिद् रूपलुब्धा **अभियोग्यं** कुर्यात्, **वशीकरणादि** वा प्रयुञ्जीत । यस्मादेते दोषास्तस्मात् प्रयत्नतो रक्षणीयोऽन्यथा तदभावे गणस्याप्यभावापत्तेः॥ २५७५॥

तथा चाह—

**नच्चणहीणा व नडा, नायगहीणा व रूविणी वा वि ।**
**चक्कं च तुंबहीणं, न हवति एवं गणो गणिणा ॥ २५७५ ॥**

यथा **नर्त्तनहीना नटी**, यथा **नायकहीना रूपवती** स्त्री, यथा वा **चक्रं तुम्बहीनं न भवति एवं गणिना**चार्येण विना **गणो**ऽपि न भवति ॥ २५७५ ॥

तदेवं व्यालद्वारं गतम्, इदानीं गणचिन्ताद्वारमाह—

**लाभालाभद्धाणे, अकारगे बालवुड्ढमादेसे ।**
**सेह-खमए न नाहिति, अच्छंतो नाहिति सव्वे ॥ २५७६ ॥** दारं ९।

केन पर्याप्तं **लब्धं** केन वा **न लब्धम्** इति न ज्ञास्यति, स्वयं भिक्षाटने परिश्रान्तत्वात्। तथा **अध्वनि** मार्गे ये परिश्रान्ताः समागमन् प्राघूर्णकास्तेषामिद**मकारक**मिदं वा कारकं तथा **बालान् वृद्धान्** पूर्वागतांश्चाऽऽ**देशान्** प्राघूर्णकान्, तथा **शैक्षान् क्षपकांश्च** करणीयसाराकरणतया **न ज्ञास्यति** स्वयं भिक्षापरिभ्रमणेन परिश्रान्तत्वात्। **तिष्ठन्** पुनः **सर्वान्** यथौचित्येन **ज्ञास्यति,** परिश्रमाभावात् ॥ २५७६ ॥

गतं गणचिन्ताद्वारम्। अधुना वादिद्वारमाह—

**सोऊण गतं खिंसति, पडिच्छ उव्वात वादि पेल्लेइ ।**
**अच्छंति सत्थचित्ते न होंति दोसा तवादीया ॥ २५७७॥** दारं १०।

भिक्षामटितुं प्रवृत्ते आचार्ये वादी कोऽपि समागतस्तेन साधवः पृष्टाः 'क्व आचार्यः' ? साधुभिरुक्तं- 'भिक्षाटनाय गतः'। ततः स भिक्षार्थं **गतं श्रुत्वा खिंसति** हीलयति- एतावत्तस्य पाण्डित्यं यः स्वयं भिक्षामटति। ततः क्षणमात्रं **प्रतीक्षितः**, स चाऽऽचार्य **उद्वान्तः** परिश्रान्तः समागतः, तं समागतं दृष्ट्वा **वादी प्रेरयति** स च परिश्रान्तत्वादुत्तरं दातुमसमर्थः। **तिष्ठति** पुनः स्वस्थचित्ते **दोषास्तापादयः**, आदिशब्दात् तृषितत्वादिपरिग्रहो **न भवन्ति** तथा च सति न वादिना तस्य प्रेरणं किन्तु जय इति ॥ २५७७॥

वादी समागतो भिक्षार्थं गत इति श्रुत्वा यदवादीत् तदुपदर्शयति—

**पागडियं माहाप्पं, विण्णाणं चेव सुट्ठु भे गुरुणो ।**
**जइ सो विजाणमाणो, न वि तुब्भमणाढितो होंता ॥ २५७८॥**

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिक्षार्थं गत इति ब्रुवाणैर्भवद्भिः **सुष्ठु** अतिशयेन **माहात्म्यं** गरिमलक्षणं **विज्ञानं च प्रकटितम्। यदि सोऽपि ज्ञाता** भवति **न वै युष्माकमनादृतो भवेत्** ॥ २५७८॥

अधुना "पडिच्छि उव्वाय वादि पेल्लेइ" इति व्याख्यानयति—

**न वि उत्तराणि पासइ, पासणियाणं च होति परिभूता ।**
**सेहादिभत्तगा वि य, दट्टुं अमुहं परिणमंति ॥ २५७९॥**

स भिक्षाटनपरिश्रान्तः सन् **न वि** नैव **उत्तराणि पश्यति,** परिश्रमेण बुद्धिसंव्यापादनात्। तथा च सति स **प्राश्निकानामपि** सभ्यानामपि **परिभूतो भवति** ततो ये **शैक्षकादयो** ये च **भद्रकादयस्ते तममुखं** निरुत्तरं दृष्ट्वा वि**परिणमन्ति** विपरिणामं भजन्ते॥ २५७९॥

भिक्षार्थमनटने पुनरनेके गुणाः—

**सुत्तत्थाणं गुणणं, विज्जा-मंता-निमित्त-जोगाणं ।**
**वीसत्थो पतिरिक्के, परिजिणइ रहस्ससुत्ते य ॥ २५८०॥**



For Private And Personal Use Only

**सूत्रार्थानां** तथा **विद्यानां मन्त्राणां निमित्त**शास्त्राणां **योग**शास्त्राणां च **गुणनं** परावर्त्तनं भवति। तथा **विश्वस्तः** सन् **प्रतिरिक्ते** विविक्ते प्रदेशे **रहस्यसूत्राणि परिजयति** अत्यन्तस्वभ्यस्तानि करोति। तस्मान्न भिक्षार्थमटितव्यमाचार्येण ॥ २५८० ॥

गतं वादिद्वारम् । इदानीं ऋद्धिमदद्वारमाह—

**रण्णा वि दुवक्खरतो, ठवितो सव्वस्स उत्तमो होइ ।**
**गच्छम्मि वि आयरितो, सव्वस्सवि उत्तमो होति ॥ २५८१ ॥** दारं ११।

**राज्ञा द्व्यक्षरको** दासो यद्यपि जात्या हीनस्तथापि स **स्थापितः** सन् **सर्वस्याप्युत्तमो भवति,** उत्तमत्वाच्च न यथाकथञ्चन प्रेषणेन हिण्डाप्यते । सोऽप्येवं यदा, तदा **गच्छे** योऽप्याचार्यः **सर्वस्याप्युत्तमो भवती**ति स सुतरां भिक्षां न हिण्डापयितव्यः ॥२५८१ ॥

**रायाऽमच्च-पुरोहिय सेट्ठी-सेणावती तलवरा या ।**
**अभिगच्छंतायरिए, तहियं च इमं उदाहरणं ॥ २५८२ ॥**

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा तीर्थकरः छद्मस्थकाले हिण्डमानोऽप्युत्पन्ने ज्ञाने देवेन्द्राद्यभिगमनान्न हिण्डत॥ एवमाचार्यानपि आचार्यपदस्थापितान् **राजा अमात्यः पुरोहितः श्रेष्ठी सेनापतिस्तलवरा-श्चाभिगच्छन्ति,** ततस्तेऽपि भिक्षां न हिण्डन्ते, अन्यथा दोषः। **तत्र चेदमुदाहरणम्** ॥ २५८२ ॥

तदेवाह—

**सोऊण य उवसंतो, अमच्चो रण्णो तगं निवेदेति ।**
**राया वि बितियदिवसे, तइए अमच्ची य देवी य ॥ २५८३ ॥**

**राज्ञोऽमात्य** आचार्यसमीपे धर्मं **श्रुत्वा उपशान्तः**। स च **राज्ञस्तक**माचार्यं **निवेदयति**। यथा गुणवानतीवाऽऽचार्योऽमुकप्रदेशे तिष्ठति। ततो **द्वितीयदिवसे राजा** अमात्येन सह गतः। स धर्मं श्रुत्वा परितुष्टः, आगतो निजाऽग्रमहिष्याः परिकथयति। अमात्येनाप्यात्मीयभार्यायाः कथितम्। ततो**ऽमात्यी देवी च तृतीय**दिवसे धर्मश्रवणाय समागता [तदा च] आचार्यो भिक्षार्थं गतः॥ २५८३ ॥

ततः-

गाथा २५७७-२५८३ आचार्यस्य भिक्षार्थमगमने गुणाः



For Private And Personal Use Only

**सोउं पडिच्छिऊणं, व गया अहवा पडिच्छणे खिंसा ।**
**हिंडंति होइ दोसा, कारण पडिवत्तिकुसलेहिं ॥ २५८४॥**

भिक्षार्थं गत इति **श्रुत्वा** ते हीलयित्वा गते अथवा क्षणमात्रं **प्रतीक्ष्य** हीलयन्त्यौ **गत॥** यदि वा यावदाचार्य आगच्छति तावत् **प्रतीक्षमाणे** हीलयतः। **अथवा** प्रस्विन्नशरीरं परिगलत्प्रस्वेदमागतं दृष्ट्वा खिंसतः, यदि वा क्लमेन सुष्ठु कृतं वदनं परिश्रमेण वा न सुष्ठु वचनविनिर्गमस्तत उत्थिते हीलयतो यथा 'पिण्डोलक इवैष भिक्षामटति किमाचार्यत्वमस्य?' एते भिक्षां **हिण्डमाने दोषाः** । यदि पुनः **कारणे** वक्ष्यमाणे भिक्षार्थं गतो भवेत्, राजादयश्च तत्रागताः,ते च पृच्छेयुः- 'क्व गत आचार्यः?' तत्र ये **प्रतिपत्तिकुशला**-स्तैर्नेदं प्रतिवक्तव्यं 'भिक्षार्थं गत' इति। [किन्तु] 'चैत्यवन्दननिमित्तं गत' इति।



ते यदि राजादय आचार्यमागच्छन्तं प्रतीक्षेरन् तदा येऽतीवदक्षा गीतार्थास्ते सुन्दरं पानकं प्रथमालिकां च सुन्दरं कल्पं चोलपट्टं च गृहीत्वाऽऽचार्यसमीपे गत्वाऽऽचार्यस्य कथयन्ति। तत आचार्यो मुखहस्तपादादि प्रक्षाल्य प्रथमालिकां पानकं च कृत्वा कल्पं प्रावृत्य पात्राण्यन्यस्य समर्प्य तादृशवेषो वसतावानीयते यथा अनाख्यातोऽपि राजादिभिर्ज्ञायते एष

आचार्य इति। ततो वसतिं प्राप्तस्य पादप्रोञ्छनं पादप्रमार्जनार्थमादाय साधव उपतिष्ठन्ति, पादप्रमार्जनानन्तरं वसतेरन्तः प्रविश्य पूर्वरचितायां निषद्यायामुपविशति उपविष्टस्य चरणकल्पकरणाय कोऽपि साधुरुपढौकते, चरणप्रक्षालनानन्तरं च सर्वे साधवः पुरतः पार्श्वतः पृष्ठतो वा किङ्करभूतास्तिष्ठन्ति यथा राजा चकितस्तिष्ठति॥ २५८४॥

एतदेवाऽऽह—

**कारणे भिक्खस्स गते, वि कज्जं अन्नं निवस्स साहित्ता।**
**निज्जोग नयण पढमा, कमादिधुवणं मणुण्णादी ॥ २५८५॥**

**कारणे** वक्ष्यमाणलक्षणे समापतिते **भैक्षस्य गते**ऽप्याचार्ये **नृपस्याऽन्यत् कार्यं कथयित्वा प्रथमालिकादेर्नियोगस्य नयनं** ततः **क्रमादिप्रक्षालनं** ततो **मनोज्ञ**प्रथमालिकादिकरणम् ॥ २५८५॥

**कयकुरुकुय आसत्थो, पविसइ पुव्वरइयनिसेज्जाए ।**
**पयया य होंति सीसा, जह चकितो होइ राया वि ॥ २५८६॥**

**कृतकुरुकुचः** कृतकुलकुल **आस्वस्थः प्रविशति।** प्रविश्य **पूर्वरचितायां निषद्याया-**मुपविशति। ततः पादप्रक्षालनसमीपोपवेशन**प्रयतास्तथा भवन्ति यथा राजाऽपि चकितो जायते** ॥ २५८६ ॥

अत्र परप्रश्नमाह—

**सीसा य परिच्चत्ता, १चोयगवयणं कुडुंबिझामणया२ ।**
**दिट्ठंतो दंडिएणं३, सावेक्खे चेव निरवेक्खे ॥ २५८७ ॥** दारगाहा।

**चोदकवचनम्** आचार्यं रक्षयित्वा **शिष्या** भिक्षायां प्रेषितास्तर्हि ते **त्यक्ताः** आचार्य आह— अत्र **कुटुम्बि**गृहप्रदीपनदृष्टान्तस्तथा **दण्डिकेन दृष्टान्तः सापेक्षनिरपेक्षे चा**ऽऽचार्ये। एष द्वारगाथाक्षरार्थः ॥ २५८७॥

सम्प्रत्येनामेव विवरीषुः प्रथमतः 'सीसा य परिच्चत्ता' इति भावयति —

**वायादीया दोसा, गुरुस्स इतरेसि किं न ते होंति ।**
**रक्खप्प सिस्स चाए, हिंडणतुल्ले असमता या ॥ २५८८॥** दार १॥

**वातादयो दोषा गुरोर्भवन्ति इतरेषां** साधूनां **किं ते न भवन्ति?** भवन्त्येवेति भावः। ततो **हिण्डन**दोषे **तुल्य आत्मनो रक्षा** क्रियते, **शिष्याणां** च **त्यागः** इत्य**समता** नेदं समञ्जसमित्यर्थः ॥ २५८८॥

अन्यच्च—

**दसविहवेयावच्चे, निच्चं अब्भुट्ठिया असढभावा ।**
**ते दाणि परिच्चत्ता, अणुज्जमंताण दंडो य ॥ २५८९॥**

**दशविधे** आचार्यादिभेदतो दशप्रकारे **वैयावृत्त्ये नित्यं** सर्वकाल**मशठभावाः** सन्तोऽ**भ्युत्थितास्ते सम्प्रति** वातादिदोषान् पश्यद्भिरपि भिक्षाटने प्रेष्यमाणाः **परित्यक्ताः**। तथा दशविधे वैयावृत्त्ये नोद्यच्छन्ति ततस्तेषा**मनुद्यच्छता**माचार्यादिवैयावृत्त्याऽकरणे यथार्हं प्रायश्चित्त**दण्डो** दीयते॥ २५८९॥

तदेवं "सीसा य परिच्चत्ता" इति भावितमिदानीं "कुडुंबिझामणया" इति दृष्टान्तं भावयति—

**वड्ढी धन्नसुभरियं, कोट्ठारं डज्झते कुटुंबिस्स ।**
**किं अम्ह मुहा देइ, केई तहियं न अल्लीणा ॥ २५९० ॥** दारं २।

एकः कौटुम्बिकः स कर्षकाणां कारणे समुत्पन्ने **वृद्ध्या** कलान्तररूपया **धान्यं** ददाति, तया च वृद्ध्या **कौटुम्बिकस्य** कोष्ठागाराणि **धान्यस्य सुभृतानि** जातानि । अन्यदा च तस्यैकं कोष्ठागारं वृद्धिधान्यसुभृतं वह्निना प्रदीप्तेन **दह्यते,** तत्र केचित् कर्षका विध्यापननिमित्तं तत्र दह्यमाने कोष्ठागारे न समागताः, 'किमेष कौटुम्बिकोऽस्माकं मुधा ददाति येन वयं विध्यापनार्थमभ्युद्यता भवामः ?' ॥२५९० ॥

**एतस्स पभावेणं, जीवा अम्हे ति एव नाऊणं ।**
**अण्णे उ समल्लीणणा, विज्झविए तेसि सो तुट्ठो ॥ २५९१ ॥**

**अन्ये** कर्षका **एतस्य** कौटुम्बिकस्य **प्रभावेण वयं** जीवन्ति स्म, **जीवा** अच् प्रत्ययः, जीविता इत्यर्थः, **एवं ज्ञात्वा समालीनास्**तत्र समागता विध्यापनाय च प्रवृत्तास्ततो **विध्यापिते** कोष्ठागारे **स** कौटुम्बिक**स्तेषां तुष्टः** ॥ २५९१ ॥

ततः किमकार्षीद्? इत्यत आह—

**जे उ सहायगत्तं, करेसु तेसिं अवड्ढियं दिन्न ।**
**दड्ढं ति न दिण्णियरे, अकासगा दुक्खजीवी य ॥ २५९२॥**

**ये तु** विध्यापने **सहायत्वमकार्षुस्तेषामवृद्धिकं** कलान्तररहितं धान्यं दत्तम्, **इतरेषां** तु सहायत्वमकृतवतां **दग्धमित्युत्तरं** विधाय न दत्तं ततस्ते **अकर्षकाः** सन्तो **दुःखजीविनो** जाताः। एष दृष्टान्तः॥ २५९२॥

साम्प्रतमुपनयमभिधित्सुराह—

**आयरिय कुटुंबीवा, सामाणियथाणिया भवे साहू ।**
**वावाह अगणितुल्ला, सुत्तत्था जाण धन्नं तु ॥ २५९३॥**

**आचार्यः कुटुम्बी इव** कुटुम्बितुल्य इत्यर्थः। **सामान्यकर्षकस्थानीयाः साधवः।** आचार्यस्य भिक्षाटने वातादि**व्याबाधा अग्नितुल्या। सूत्रार्थान् जानीहि धान्यं** धान्यतुल्यान् ॥२५९३॥

**एमेव विणीयाणं, करेंति सुत्तत्थसंगहं थेरा ।**
**हावेंति उदासीणे, किलेसभागी य संसारे ॥ २५९४॥**

**एवमेव** कौटुम्बिकदृष्टान्तप्रकारेण ये **विनीतास्तेषां** स्थविरा आचार्याः **सूत्रार्थसङ्ग्रहं कुर्वन्ति** सूत्रार्थान् प्रयच्छन्ति, यस्तूदासीनस्तत्र **हापयन्ति,** न प्रयच्छन्तीति भावः । स चोदासीनो वर्त्तमानो न केवलं सूत्रार्थाऽयोग्योऽभवत् **क्लेशभागी च संसारे** जायते ॥ २५९४॥

गतं ध्यामनद्वारम्। सम्प्रति दण्डिकदृष्टान्तं विभावयिषुरिदमाह—

**उप्पण्ण कारणे पुण, जइ सयमेव सहसा गुरु हिंडे ।**
**अप्पाण गच्छमुभयं, परिचयती तत्थिमं नायं ॥ २५९५॥** दारं ३।

**उत्पन्नेऽपि कारणे** वक्ष्यमाणलक्षणे **यदि सहसा स्वयमेव गुरुर्भिक्षां हिण्डते** तर्हि स **गुरुरात्मानं गच्छमुभयं** च **परित्यजति, तत्र चेदं** वक्ष्यमाणं **ज्ञातमुदाहरणम्** ॥ २५९५॥

तदेवाह—

**सोउं परबलमायं, सहसा एक्काणिओ उ जो राजा ।**
**निग्गच्छति सो चयती, अप्पाणं रज्जमुभयं च ॥ २५९६ ॥**

यो निरपेक्षो **राजा परबलमागतं श्रुत्वा** बलवाहनानि अमेलयित्वा **सहसा एकाकी** परबलस्य सम्मुखो निर्गच्छति **स आत्मानं राज्यमुभयं च त्यजति,** बलवाहनव्यतिरेकेण युद्धारम्भे मरणभावात्। एवमाचार्योऽपि निरपेक्षः समुत्पन्नेऽपि कारणे सहसा भिक्षामटन्नात्मानं गच्छमुभयं च परित्यजति ॥ २५९६॥

सापेक्षदण्डिकदृष्टान्तभावनामाह—

**सावेक्खो पुण राया, कुमारमादीहिं परबलं खविया ।**
**अजिए सयं पि जुज्झइ, उवमा एसेव गच्छे वि ॥ २५९७॥**

**सापेक्षः पुना राजा** प्रथमं कुमारादीन् युद्धाय प्रेषयति, ततः **कुमारादिभिः परबलं क्षपयित्वा** यदा कुमारैर्न पराजीयते परबलं तदा तस्मि**न्नजिते स्वयमपि** राजा युध्यति **एषैवोपमा गच्छेऽपि** द्रष्टव्या। आचार्योऽपि पूर्वं यतनां करोति तथापि असंस्तरणे स्वयमपि हिण्डते, एवं चात्मानं गच्छमुभयं च निस्तारयतीति भावः ॥ २५९७॥

सम्प्रति यैः कारणैराचार्येण भिक्षार्थमटितव्यं तानि कारणान्याह—

**अद्धाण१ कक्खडा२ऽसति३, गेलन्ना४ ऽऽदेसमाइएसुं५ च ।**
**संथरमाणं भइतो६, हिंडेइ असंथरंतम्मि७॥ २५९८॥**

**अध्वानं** प्रपन्नः सार्थेन सममाचार्यो गच्छश्च, तत्र चासंस्तरणे यदि सार्थिका आचार्यस्य गौरवेण प्रयच्छन्ति ततः स्वयमाचार्यो हिण्डते, एवं **कर्कशे**ऽपि क्षेत्रे भावनीयम्। तथा - **असति** सहायानामभावे को भिक्षामानीय ददातीति स्वयं हिण्डते तथा **ग्लाना** बहवस्ततस्तेषां सर्वेषामपि गच्छसाधवः प्रायोग्यमुत्पादयितुमशक्ताः अथवा ग्लानप्रायोग्यमन्यः कोऽपि न लभते तत आचार्यो हिण्डते । एव**मादेशाः** प्राघूर्णकाः, **आदि**शब्दात् बाल-वृद्धाऽसहपरिग्रहः, तेष्वपि भावनीयम् । एतेषु विषये **असंस्तरति** गच्छे नियमादाचार्यो **हिण्डते,** अन्यथा प्रायश्चित्तसम्भवात्, **संस्तरति** पुनर्**भक्तो** विकल्पितः, कदाचित् हिण्डते कदाचिन्न । अभ्युद्यतविहारपरिकर्म कुर्वन् हिण्डते, शेषकालं नेत्यर्थः। एष द्वारगाथासङ्क्षेपार्थः ॥ २५९८॥

अत्र यदुक्तं 'संस्तरणे न हिण्डते इति' तत्र संस्तरणं त्रिविधं जघन्यं, मध्यममुत्कृष्टं च, तत्र जघन्यमधिकृत्याह—

**पंच वि आयरियादी, अच्छंति जहन्नए वि संथरणे ।**
**एवं[१] पऽसंथरंते, सयमेव गणी अडति गामे ॥ २५९९॥**

**जघन्येऽपि** वक्ष्यमाणस्वरूपे **संस्तरणे पञ्चाप्याचार्यो**पाध्याया-प्रवर्त्ति-स्थविर-गणावच्छेदिनस्**तिष्ठन्ति,** जघन्येऽपीति अपिशब्दः सम्भावने, स चैतत् सम्भावयति यदि तावत् जघन्येऽपि संस्तरणे पञ्चाप्याचार्यादयस्तिष्ठन्ति । ततो मध्यमे उत्कृष्टे च संस्तरणे नियमात् पञ्चभिरपि स्थातव्यम्। **एवमपि** जघन्येनापि संस्तरणेन **असंस्तरति** गच्छे **स्वयमेव गणी** आचार्यो **ग्रामे** भिक्षाम**टति** । स च प्रतिलोमपरिपाट्या पर्यन्ते । तथाहि-जघन्येनाऽपि संस्तरणेनाऽसंस्तरति प्रथमं गणावच्छेदो हिण्डते, तथाप्यसंस्तरणे स्थविरोऽपि हिण्डते, एवमप्यसंस्तरणे प्रवर्त्त्यपि, तथाऽप्यसंस्तरणे उपाध्यायोऽपि, तथाऽपि चेन्न संस्तरति गच्छस्तत आचार्योऽपि ॥ २५९९॥

तत्र प्रथममुत्कृष्टं संस्तरणमाह—

---

१. एवं पि असं ° इति ज्ञेयम् ॥

**मंडलगयम्मि सूरे, उत्तिण्णा जाव पट्ठवणवेला ।**
**ता एंति भुत्ता सण्णा ऽऽगया य उक्कोससंथरणे ॥ २६००॥**

नभो**मण्डलस्य** मध्य**गते सूर्ये** मध्याह्ने इत्यर्थः । भिक्षार्थ**मवतीर्णा**स्ततः पर्याप्तं हिण्डित्वा **यावत्** तृतीयपौरुष्या आदौ[**मध्ये यावत्**]स्वाध्याय**प्रस्थापनवेला** तावत् सन्निवर्त्तन्ते एतदुत्कृष्टं संस्तरणम् । [1]अथवा [**तावद् भुक्ताः** सन्तः संज्ञाभूमिं स्थण्डिलभूमिं गच्छन्ति, ततः प्रत्यागताः **संज्ञाऽऽगताः**,]सन्निवर्तन्ते एतद**ुत्कृष्टं संस्तरणम्** ॥ २६००॥

मध्यमं जघन्यं चाह—

**सण्णातो आगयाणं, च पोरिसी मज्झिमं हवति एयं ।**
**विसुयावियमत्थदिणे, समतित्थंते जहण्णं तु ॥ २६०१॥**

१ इदं तु ध्येयम् - अत्र मुद्रिते पु. प्रे. मध्ये च पुनः स एव पाठः इत्थं पुनरुक्तो दृश्यते - 'अथवा तृतीयपौरुष्या आदौ स्वाध्याय प्रस्थापनवेला तावत् सन्निवर्तते एतदुत्कृष्टं संस्तरणम्' अस्य स्थाने अस्माभिः परिकल्पितः पाठः [ ] मध्ये स्थापितोऽस्ति ॥

मध्याह्नादारभ्य भिक्षार्थमवतीर्णानां पर्याप्तं हिण्डित्वा वसतावागतानां भुक्तानां **संज्ञातः** संज्ञाभूमीत **आगतानां** यदि चतुर्थी **पौरुषी** अवगाहते **एतत् मध्यमं** संस्तरणं भवति। मध्याह्नादारभ्य भिक्षामटित्वा भुक्त्वा संज्ञाभूमीतः प्रत्यागतमात्रेषु[१] **विसुयाविएसु** विशोधितेसु सूरास्त**मयेन दिनं समतिक्रामति जघन्यं** संस्तरणमवसातव्यम् ॥ २६०१ ॥

तदेवमुक्तं जघन्यादिभेदभिन्नं संस्तरणम्,इदानीमध्वादिद्वारव्याख्यानार्थमाह—

**अद्धाणेऽसंथरणे, अकोवियाणं विकरणपलंबो** । दारं १।
**एमेव कक्खडम्मि वि** । दारं २।, **असतित्ति सहायगा नत्थि** ॥ **२६०२** ॥
दारं ३।

**अध्वनि** सार्थेन समं व्रजता**ऽसंस्तरणे** भिक्षार्थमाचार्यो हिण्डते, अथवा ते सहाया **अकोविदाः** सार्थे च प्रलम्बान्यविकरणकृतान्यखण्डीकृतानि लभ्यन्ते, तत आचार्यः स्वयमेव हिण्डमानस्तानि विकरणानि कृत्वा सन्निवर्त्तते, अथवा ददतामुपदेशं ददाति विकरणानि कृत्वा

१. प्रत्यागत्यमा० मु. ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ददध्वमिति। एव**मकोविदानां** सहायानां भावे **प्रलम्बविकरण**निमित्तमाचार्यो गच्छति। **एवमेव कर्कशेऽपि** क्षेत्रे भिक्षार्थं गमनमाचार्यस्य भवति, तत्राप्यसंस्तरणे अकोविदसहायभावे प्रलम्बविकरणाय वा गच्छतीति । तथा **असतित्ति** नाम **सहायका न सन्ति** ततः स्वयमेव भिक्षामटति ॥२६०२॥

**बहुया तत्थ अतरंता, अहव गिलाणस्स सो परं लहति** । दारं ४।
**एमेव य आदेशे, सेसेसु विभासबुद्धीए ॥२६०३॥** दारं ५।

**बहवस्तत्र** गच्छे **अतरन्तो** ग्लानास्ततः सर्वेषां गच्छसाधवः प्रायोग्यमुत्पादयितुमशक्ताः, **अथवा ग्लानस्य परं** प्रायोग्यमन्यो न **लभते** किन्तु **स** एवाचार्यः,ततः स हिण्डते, **एवमेवादेशेषु** प्राघूर्णकेषु **शेषेषु** च बालवृद्धाऽसहेषु **विभाषा** विविधं भाषणं **स्वबुद्ध्या** कर्त्तव्यं, तच्चैवं यद्यादेशादयो बहवः[ततश्च]सर्वेषां साधवः कर्त्तुं न शक्नुवन्ति यदि वा स एवादेशादिप्रायोग्यं लभते नान्यः कोऽपि, ततः स हिण्डते॥ २६०३॥

सम्प्रति 'संथरणमाणे भइतो' इति व्याख्यानयति—



For Private And Personal Use Only

**अब्भुज्जयपरिकम्मं, कुणमाणो जा गणं न वोसिरति ।**
**ताव सयं सो हिंडति, इति भयणा संथरंतम्मि ॥ २६०४॥** दारं ६।

**अभ्युद्यतविहारपरिकर्म कुर्वन् यावत् गणं न व्युत्सृजति तावत् स्वयं स** आचार्यो **हिण्डते इति** एषा **भजना संस्तरति** गच्छे ॥ २६०४॥

**अद्धाणादिसुवेहं, सुहसीलत्तेण जो करेज्जाहि ।**
**गुरुगा व जं च जत्थ व, सव्वपयत्तेण कायव्वं ॥ २६०५॥**

**अध्वादिषु** कर्कशादिष्वसंस्तरति गच्छे **सुखशीलत्वेन** सुखमाकाङ्क्षमाण 'आचार्योऽहमि' त्यालम्बनमाधाय **य उपेक्षामाचार्यः करोति,** भिक्षां न हिण्डते इत्यर्थः तस्य प्रायश्चित्तं चत्वारो **गुरुकाः। यच्च यत्र वा** अनागाढपरितापनादि साधवः प्राप्नुवन्ति तन्निष्पन्नमपि तस्य प्रायश्चित्तं, तस्मात् **सर्वप्रयत्नेन** अध्वादिष्वसंस्तरणे भिक्षाटनं **कर्त्तव्यम्** ॥ २६०५॥

साम्प्रतमसंस्तरणे यतनामाह—

**असती पडिलोमं तू, सग्गामे गमण दाणसड्ढेसु ।**
**पेसेइ बितियदिवसे, आवज्जइ मासियं गरुयं ॥ २६०६॥** दार ७।

**असति** अवमौदर्यादिना गच्छसंस्तरणाभावे **प्रतिलोमं** गणावच्छेदकादारभ्य प्रतिकूलगमन-मवसातव्यम् । तद्यथा-प्रतिवृषभादिभिरसंस्तरणे गणावच्छेदोऽपि प्रतिवृषभादिभिः सह हिण्डते, तथाप्यसंस्तरणे स्थविरोऽपि, तथाप्यसंस्तरणे प्रवर्त्तकोऽपि, तथाप्यसंस्तरणे उपाध्यायोऽपि, तथा चेन्न संस्तरति तदा **स्वग्रामे दानश्राद्धेषु** कुलेष्वाचार्यस्य **गमनं** भवति। तथापि चेदसंस्तरणं तत आचार्यो अन्यान्यपि गृहाणि। तथा केनापि साधुना कस्मिंश्चित् कुले ग्लानप्रायोग्यं किमपि द्रव्यं याचितं परं न लब्धमथ च तद् द्रव्यं तस्मिन् गृहे प्रभूतमस्ति अन्यत्र च न विद्यते, तत्र यदि **द्वितीये दिवसे** तस्मिन् कुले येन[न]लब्धं तमेवाचार्यः **प्रेषयति** ततो **गुरुकं मासिकं** प्रायश्चित्त**मापद्यते,** तस्मात् तस्मिन् कुले प्रतिलोमं प्रेषयितव्यः। तद्यथा-प्रथमं गणावच्छेदकः प्रेष्यः, तेनाप्यलब्धे स्थविरः, तेनाऽप्यलब्धे प्रवर्तकस्तेनाप्यलब्धे उपाध्यायः, तेनाप्यलब्धे स्वयमाचार्यो व्रजति। यदि वा स गृहप्रभुर्यस्य गौरवं करोति स प्रेषयितव्यः ॥ २६०६ ॥

साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतो गाथापूर्वार्द्धं भावयति—

**गणावच्छेदतो पुव्वं, ठवणकुलेसुं व हिंडइ सगामे ॥**
**एवं थेरपवित्ती, अभिसेयगुरू य पडिलोमं ॥ २६०७॥**

**पूर्वं गणावच्छेदकः स्वग्रामे स्थापनाकुलेषु हिण्डते ।** **एवं** गणावच्छेदादारभ्य **प्रतिलोमं** वक्तव्यम्। तद्यथा-असंस्तरणे **स्थविरोऽ**पि हिण्डते तथाप्यसंस्तृतौ **प्रवर्त्त्य**पि, तथाप्यसंस्तरणे **अभिषेक** उपाध्यायः, तथाऽपि संस्तरणाभावे **गुरु**रपि॥ २६०७॥

अधुना 'पासेइ बितियदिवसे' इत्यादि भावयति—

**ओभासिय पडिसिद्धं, तं चेव न तत्थ पट्ठवेज्जा उ ।**
**पडिलोमं गणिमादी, गोरव्वं जत्थ वा कुणति ॥ २६०८॥**

केनापि साधुना ग्लानप्रायोग्यं किमपि द्रव्यं कस्मिंश्चित् कुले **अवभाषितं** याचितमित्यर्थः। तच्च गृहप्रभुणा **प्रतिषिद्ध**मन्यत्र तद् द्रव्यं नास्ति किन्तु तस्मिन्नेव गृहे, ततो द्वितीयदिवसे **तत्र** कुले **न तमेव प्रेषयेत्** किन्तु **प्रतिलोमं गण्यादिं** गणावच्छेदकप्रभृतिकं यथोक्तं प्राक्। **यत्र वा** गृहप्रभु**गौर्रवं करोति** तं वा प्रेषयेत् ॥२६०८॥

**तित्थगर त्ति समत्तं, अहुणा पावयणनिज्जरा चेव ।**
**वच्चंति दो वि समगं, दुवालसंगं पवयणं तु ॥ २६०९॥**

**तीर्थकर** इति द्वारं **समाप्तम्, अधुना प्रवचनं निर्जरा चेति द्वे अपि** द्वारे **समक**मेकं कालं **व्रजतः**। तत्र **प्रवचनं** नाम **द्वादशाङ्गं** गणिपिटकम् ॥ २६०९॥

**तं तु अहिज्जंताणं, वेयावच्चे उ निज्जरा तेसिं ।**
**कस्स भवे केरिसया, सुत्तत्थजहोत्तरं बलिया ॥ २६१०॥**

**तत् तु** द्वादशाङ्गं गणिपिट्टक**मधीयानानां वैयावृत्त्ये** क्रियमाणे **तेषां** वैयावृत्त्यकराणां महती **निर्जरा**। उक्तं च- "**आयरियवेयावच्चं करेमाणे महानिज्जरे महापज्जवसाणे भवति**" इत्यादि। अत्र महानिर्जरस्तदावरणीयस्य कर्मणः क्षयकरणात्, महापर्यवसानः पुनरन्यनवकर्म-बन्धाभावात् । अत्र शिष्यः प्राह-**कस्य कीदृशी** निर्जरा **भवति** ?। आचार्यः प्राह-सूत्रे अर्थे च **यथोत्तरं बलिका** ॥ २६१०॥

एतदेव विभावयिषुराह—

**सुत्तावासगमादी, चोद्दसपुव्वीण तह जिणाणं च ।**
**भावे सुद्धमसुद्धे, सुत्तत्थे मंडली चेव ॥ २६११॥**



**सूत्रमावश्यकादि** यावच्चतुर्दश **पूर्वाणि** एतद्धराणां यथोत्तरं महती महत्तरा निर्जरा, एवमर्थेऽपि भावनीयम् । **तथा जिनाना**मप्यवधिजिनप्रभृतीनां यथोक्तबलिका निर्जरा। इयमत्र भावना-एक **आ**वश्यकसूत्रधरस्य वैयावृत्त्यं करोति अथ अपरो **द**शवैकालिकश्रुतधरस्य तत्र यो दशवैकालिकश्रुतधरवैयावृत्त्यकरस्तस्य आवश्यकसूत्रधरवैयावृत्त्यकराद् महती निर्जरा, एवमधस्तनाधस्तनश्रुतधरवैयावृत्त्यकरादुपर्युपरितरश्रुतधरवैयावृत्त्यकरो यथोत्तरं महानिर्जरस्तावदवसेयो यावत् त्रयोदशपूर्वधरवैयावृत्त्यकराच्चतुर्दशपूर्वधरवैयावृत्त्यकरो महानिर्जरः, एवमर्थेऽपि भावनीयम्। तदुभयचिन्तायां सूत्रवैयावृत्त्यकरादर्थवैयावृत्त्यकरो महर्द्धिकः नवरं **निशीथकल्पव्य**वहारार्थधराणां वैयावृत्त्यकरात् कालिकश्रुतवैयावृत्त्यकरो महानिर्जरः, तथा [ग्लानवैयावृत्त्यकरात्]श्रुतज्ञानिवैयावृत्त्यकरः । तथा **भावः** परिणामस्तस्मिन् **शुद्धे अशुद्धे** च तदनुसारेण निर्जरा प्रवर्त्तते तथा **सूत्रार्थे** युगपच्चिन्त्यमाने यथोत्तरं बलिकाः, तथा **मण्डली** च सूत्रार्थावधिकृत्य विचारणीया॥ २६११॥

इहाचार्यः प्रस्तुतस्तमधिकृत्य वैयावृत्त्यकरणे महतीं निर्जरामाह—

**पावयणी खलु जम्हा, आयरितो तेण तस्स कुणमाणो ।**
**महतीए निज्जराए, वट्टति साहू दसविहम्मि ॥ २६१२॥**

**प्रवचनी** प्रावचनिकः **खलु यस्मादाचार्यस्तेन तस्य** वैयावृत्त्यं **कुर्वन् साधुर्महत्यां निर्जरायां वर्त्तते** । एवं **दशविधेऽ**पि वैयावृत्त्ये महानिर्जराकत्वं भावनीयम् ॥ २६१२॥

सम्प्रति यदुक्तं 'भावे शुद्धे अशुद्धे च तदनुसारतो निर्जरा भवतीति' तत्र शुद्धो भावो व्यवहारतः शुद्धवस्तुप्रभावाद् भवतीति प्रतिपिपादयिषुराह—

**जारिसगं जं वत्थुं, सुयं च तिण्हं व ओहिमादीणं ।**
**तारिसतो च्चिय भावो, उप्पज्जति वत्थुतो तम्हा ॥ २६१३॥**

**यादृशं यद् वस्तु** प्रतिमादिकं, यस्य यावच्च **श्रुतं, त्रयाणां चावध्यादीनां** स्वस्थाने ये विशेषा**स्तस्मात् वस्तुनः** श्रुताद् विशेषाद्वा **तादृशाद् भावः** परिणामो व्यवहारतस्**तादृश उत्पद्यते** तदनुसारेण च निर्जरा, ततः पूर्वश्रुतचिन्तायामर्थचिन्तायां तथा जिनानां च यथोत्तरं

बलिका निर्जरोक्ता ॥ २६१३ ॥

तथा चैनमेव व्यवहारनयं प्रतिपिपादयिषुराह—

**गुणभूइट्ठे दव्वे[1], जेण मत्ताहियत्तणं भावे ।**
**इति वत्थूतो इच्छति, ववहारो निज्जरं विउलं ॥ २६१४ ॥**

यद् यतो **गुणभूयिष्ठं द्रव्यं** ततस्तस्मिन् **येन** कारणेन **मात्राधिकत्वं भावे** परिणामे भवति **इति** अस्मात् कारणाद् **वस्तुतः** प्रतिमा-श्रुतादेर्यथोत्तरं गुणभूयिष्ठादिषु **विपुलां निर्जरामिच्छति व्यवहारो** व्यवहारनयः ॥ २६१४ ॥

एतदेव स्पष्टतरं भावयति—

**लक्खणजुत्ता पडिमा, पासादीया समत्तऽलंकारा ।**
**पल्हायति जह व मणं, तह निज्जरमो वियाणाहि ॥ २६१५ ॥**



---

१. ला. दव्वम्मि - पु. प्रे. ॥

या **प्रतिमा** जिनप्रतिमा **लक्षणयुक्ता प्रसादीया** मनःप्रसादकारणं **समस्ताऽलङ्कारातां** पश्यतो **यथैव मनः प्रह्लादते तथा निर्जरां विजानीहि** यद्यधिकं मनःप्रह्लत्तिस्ततो महती निर्जरा मन्दमनःप्रह्लत्तौ तु मन्दा इति भावः ॥२६१५॥

**सुयवं अतिसयजुत्तो, सुहोचितो तहवि तवगुणुज्जुत्तो ।**
**जो सो मणप्पसातो, जायइ सो निज्जरं कुणति ॥ २६१६॥**

**श्रुतवा**नेष अत्राप्यनेके भेदास्तथा **अतिशययुक्तो**ऽवध्याद्यतिशयोपेतः, अत्राप्यवध्यादिविषये बहवस्तरतमविशेषाः, **सुखोचितो**ऽपि तपसि सबाह्याभ्यन्तरे गुणे ज्ञानादौ उद्युक्तस्**तपोगुणोद्यत** इत्येवं योऽसौ यादृशो **मनःप्रसत्ति**परिणामो **जायते स** तादृशीं निर्जरां करोति तस्माद्वस्तुतो निर्जरेति व्यवहारनयः ॥ २६१६॥



तदेवमुक्तं व्यवहारनयमतमधुना निश्चयनयमतमाह—

**निच्छयतो पुण अप्पे, जस्स वत्थुम्मि जायते भावो ।**
**सो निज्जरगो इहइं, जिणगोयमसीह आहरणं ॥ २६१७॥**

**निश्चयतः पुनरल्पेऽ**पि महागुणतरा हीनगुणेऽपि **वस्तुनि यस्य जायते** तीव्रः शुभो **भाव**स्तस्मात् महागुणतरविषयभावयुक्तात् **स** हीनगुणविषयतीव्रशुभभावो **निर्जरको** महानिर्जरतरः सद्भावस्यातितीव्रशुभत्वात्। **अत्र जिनगौतमसिंह**जीव **आहरणम्** तच्चैवं '**ति**विट्ठुत्तरे भयवया **व**द्धमाणसामिणा सीहो विहतो अद्धितिं करेइ 'खुड्डुलगेणं निहतो मि' त्ति परिभवात् । **गोय**मेणं सार्हित्तणेणमणुसासितो 'मा अद्धितिं करेह, तुमं पसुसीहो नरसीहेण मारियस्स तुज्झ को परिभवो?' एवं सो अणुसासिज्जंतो मतो, ततो संसारं भमिऊण भयवतो **व**द्धमाणसामिस्स, चरमतित्थगरभवे **रायगि**हे नयरे **क**विलस्स बंभणस्स घरे बडुतो जातो । सो अण्णया समोसरणे आगतो य भयवंतं दट्ठूण धमधमेइ ततो भयवया गोयमसामी पेसितो जहा 'उवसामेहि' ततो गतो अणुसासितो य जहा 'एस महप्पा तित्थंकरो एयम्मि जो पडिनिवसइ सो दुग्गतिं जाइ' एवं सो उवसामितो तस्स दिक्खा गोयमसामिणा दिण्णा॥ २६१७॥

एतदेवाह—

**सीहो तिविट्ठुनिहतो, भमिउं रायगिहं कविल बडुग त्ति।**
**जिणवीरकहणमणुवसमणे गोयमोवसमदिक्खा य ॥ २६१८॥**

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सिंहस्त्रिपृष्ठेन निहतः** स संसारं **भ्रमित्वा राजगृहे कपिलस्य** ब्राह्मणस्य **बटुकोऽ**भूत्। **जिनस्य वीरस्य कथनं,** तथापि तस्याऽ**नुपशमः गौतमेन** चानुशासने कृतेऽभू**दुपशमो दीक्षा च**। अत्र भगवदपेक्षया हीनगुणेऽपि गौतमे तस्य गुरुः परिणामोऽजायतेति महती निर्जराऽभवदिति ॥ २६१८॥

सम्प्रति 'सुत्तत्थे' इत्यस्य व्याख्यानमाह—

**सुत्ते अत्थे तदुभये, पुव्विं भणिया जहोत्तरं बलिया ।**
**मंडलिए पुण भयणा, जइ जाणइ तत्थ भूयत्थं ॥ २६१९॥**

**सूत्रेऽर्थे तदुभये** यस्मिन् स्वस्थाने निर्जरा **पूर्वं** यथोत्तरं **बलिका** बलवतीति **भणिता**। सम्प्रति पुनः सूत्रा-ऽर्थ-तदुभयेषु युगपच्चिन्त्यमानेषु यथोत्तरं निर्जरा बलवती। साम्प्रतं 'मण्डली चेव' त्ति व्याख्यानार्थमाह—**मंडलिए पुण** इत्यादि, **मण्डल्याः पुनर्भजना** विकल्पना, **यदि जानाति तत्र** मण्डल्यां **भूतार्थं** सद्भूतमर्थं तदा स महानिर्जराकः । इयमत्र भावना-मण्डल्यां पठन्ति पाठयन्ति च। तत्राऽऽवश्यकादि पठतां यथोत्तरं पाठिनो बलिकाः। अथ जानाति वैयावृत्त्यकरो यथा अधस्तनसूत्रपाठको ज्ञानादिभिर्गुणैरधिकतरस्ततोऽधस्तनश्रुतपाठकस्य



For Private And Personal Use Only

वैयावृत्त्यकरणे महती निर्जरा। ददतां मध्ये य उपरितनश्रुतवाचकः स ज्ञानादिभिरधिकतर इति तद्वैयावृत्त्यकरणे महती निर्जरा। अथ जानाति वैयावृत्त्यकरो यथा अधस्तनश्रुतवाचको ज्ञानादिभिरधिकतरस्ततोऽधस्तनश्रुतवाचकस्य वैयावृत्त्यकरणे बलवती निर्जरा, वाचकप्रतीच्छकानां मध्ये यो वाचकस्तद्वैयावृत्त्यकरणे महती निर्जरा। अथ वैयावृत्त्यकरो जानात्येष प्रतीच्छक आचार्यो वाच्यते ततः प्रत्युज्ज्वालनामात्रं, यावता सर्वमेतस्याऽऽयाति सूत्रतोऽर्थतश्चाधिकतर इति तदा तस्य प्रतीच्छकस्य वैयावृत्त्यकृतौ महती निर्जरा ॥ २६१९॥

इह सूत्रेऽर्थे तदुभये च यथोत्तरं बलवती निर्जरेत्युक्तं तत्र यथोत्तरं निर्जराया बलवत्तां भावयति-

**अत्थो उ महिड्ढितो कडकरणेणं घरस्स निप्फत्ती ।**
**अब्भुट्ठाणे गुरुगा, रण्णो याणे य देवी य ॥ २६२० ॥**



सूत्रात् केवलात् अर्थाद्वा ससूत्रो**ऽर्थो महर्द्धिकः**। किं कारणमिति चेद्? उच्यते - अत्र **कृतकरणेन गृहस्य निष्पत्ति**र्दृष्टान्तः। इतश्च सूत्रादर्थः ससूत्रो महर्द्धिकः। सूत्रमण्डल्यामा-

चार्यादयः प्राघूर्णकप्रभृतीनामभ्युत्थानं कुर्वन्ति। अर्थमण्डल्यां पुनर्यस्य समीपे अनुयोगं श्रुतवान् तमेकं मुक्त्वाऽन्यस्य दीक्षागुरोरप्यभ्युत्थाने चत्वारो गुरुकाः प्रायश्चित्तम्। ततः सूत्रादर्थो बलीयान्। अत्रार्थे **राज्ञः** **शातवाहनस्य** **याने** निर्गमने **देवी**दृष्टान्तः, एष गाथाक्षरार्थः ॥ २६२० ॥

साम्प्रतमेनामेव विवरीषुः कृतकरणेन गृहस्य निष्पत्तिरिति दृष्टान्तं भावयति-

**आराहितो नरवती, तिहिं उ पुरिसेहि तेसि संदिसति ।**
**अमुगपुरे सयसहस्सं, घरं च एएसि दायव्वं ॥ २६२१ ॥**
**पट्टग घेत्तूण गतो, उंडि बितियो उ तइयओ उभयं ।**
**निप्फलगा दोण्णि तहिं, मुद्दा पट्टो उ सफलो उ ॥ २६२२ ॥**



एको **नरपतिस्त्रिभिः** **पुरुषैराराधितस्तु** परितुष्टः सन् स नरपति**स्तेषां** प्रत्येकं **सन्दिशति** यथा **अमुकपुरे** सुन्दरं **गृहं** **शतसहस्रं** **च** दीनाराणामि**त्येषां** प्रत्येकं **दातव्य**मिति । तत्रैकोऽमुं संदेशं **पट्टके** **गृहीत्वा** लेखयित्वा **गतः** **द्वितीय** **उण्डं** मुद्रां गृहीत्वा गतः,**तृतीय** **उभयं** पट्टके लेखापयित्वा गतः। तत्र येन पट्टके लेखापितं न तूपरि मुद्रा दापिता येन पट्टकव्यतिरेकेण

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुद्राप्रतिबिम्बमात्रं गृहीतं, तौ **द्वावपि निष्फलौ** जातौ। तथाहि-ते त्रयोऽपि तन्नगरं गताः,तत्र य आयुक्तस्तस्य समीपमुपगताः, पट्टकं मुद्रामुभयं च दर्शयन्ति । तत्राऽऽयुक्तेन प्रथमो भणितो 'मुद्रां न पश्यामि कथं ददामि?' द्वितीयो भणितो 'जानामि राज्ञो मुद्रां न पुनर्जानामि राज्ञः संदेशं किं दातव्यमिति' एवं तौ निष्फलौ जातौ। यस्य तु तृतीयस्य **मुद्रा पट्टकश्च** स **सफल**स्तस्याऽऽयुक्तेन यथाज्ञप्तं दानात् ॥ २६२१॥ २६२२॥

एष दृष्टान्तः, साम्प्रतमुपनयमाह—

**एवं पट्टगसरिसं, सुत्तं अत्थो य उंडियत्थाणे ।**
**उस्सग्गऽववायत्थो, उभयसरिच्छो य तेण बली ॥ २६२३॥**

**एवममुना** प्रकारेण **पट्टकसदृशं** पट्टकस्थानीयं **सूत्रम् उंडिका** मुद्रा तत्**स्थानीयोऽर्थः उत्सर्गापवादस्थ उभयसदृक्षस्तेन बली** तस्योभयस्य भावात् ॥ २६२३॥

सम्प्रति 'अब्भुट्ठाणे गुरुगा' इत्यस्य व्याख्यानार्थमाह —

**सुत्तस्स मंडलीए, नियमा उट्ठंति आयरियमादी ।**
**मोत्तूण पवायंतं, न उ अत्थे दिक्खणगुरुं पि ॥ २६२४ ॥**



For Private And Personal Use Only

**सूत्रमण्डल्यां** वाचयन्त **आचार्यादय** आचार्योपाध्यायप्रभृतयः प्राघूर्णकादीनामागच्छतां सर्वेषामपि **नियमादुत्तिष्ठन्ति** अभ्युत्थानं कुर्वन्ति । **अर्थ**मण्डल्यां पुनरुपविष्टः सन् यस्य समीपेऽनुयोगः श्रुतस्तमेकं **प्रवाचयन्तं मुक्त्वा** अन्यं **दीक्षणगुरुमपि** [नाभ्युत्तिष्ठति यदि] अभ्युत्तिष्ठति तदा तस्य प्रायश्चित्तं चत्वारो गुरुकाः। श्रोतारोऽपि यद्याचार्ये अनभ्युत्तिष्ठत्यभ्युत्तिष्ठन्ति तदा तेषामपि प्रायश्चित्तं चतुर्गुरुकम्। यदि पुनर्यस्य समीपेऽनुयोगं श्रुतवान् तस्य नाभ्युत्तिष्ठति तर्हि तदापि तस्य चतुर्गुरुकम्। अत्र दृष्टान्तो राज्ञो याने देवी ॥ २६२४॥ तं [एव] भावयति

**पतिलीलं करेमाणी, नोट्टिया सालवाहणा ।**
**पुहवी नाम सा देवी, सो य रुट्ठो तहिं निवो ॥ २६२५॥**

राज्ञः शातवाहनस्य[१] पृथिवी नाम अग्रमहिषी, अन्यदा सा क्वाऽपि निर्गते राज्ञि शेषाभिरन्तःपुरिकाभिः देवीभिः संपरिवृता शातवाहनवेषमाधाय राज्ञ आस्थानिकायामुपविष्टा, पतिलीलां विडम्बमानाऽवतिष्ठते, राजा प्रत्यागतः प्रविष्टः,तस्मिन् प्रदेशे **सा च पतिलीलां**

---

**१. शालवाहनस्य - पु. प्रे. ॥**

**कुर्वती पृथिवी नाम देवी सातवाहनं** राजानमायान्तमपि दृष्ट्वा नोत्थिता, तस्या अनुत्थाने शेषा अपि देव्यो नाभ्युत्थितवत्यस्ततः **स नृपो** राजा **तत्र रुष्टो** ब्रूते-त्वं तावन्महादेवी, ततो महादेवीवातेन नाभ्युत्थिता, एताः किं त्वया वारिता यन्नाभ्युत्थानमकार्षुः, ततो न सुन्दरमेतदिति॥ २६२५॥

**ततो णे आह सा देवी अत्थाणीए तवाऽणहा ।**
**दासा वि सामिज्जंतं[1], नोट्ठंति अवि पत्थिवं ॥ २६२६॥**

**ततो** राज्ञोक्ता तदनन्तरं **सा** पृथिवी नाम **देवी** राजानमाह- **तवाऽऽस्थानिकायामुपविष्टा दासा अपि अनघाः** सम्पूर्णगुणा **अपि पार्थिवमपि स्वामिनमागच्छन्तं नाभ्युत्तिष्ठन्ति** तवाऽऽस्थानिकायाः प्रभाव एष॥ २६२६॥

तथाहि—

**तं वा वि गुरुणो मोत्तुं, न वि उट्ठेसि कस्सइ ।**
**न ते लीला कया होंति, उट्ठुंती हं स तोसीतो ॥ २६२७ ॥**

१. सामियं एंतं -ला. ॥

**त्व**मप्यस्यामास्थानिकायामुपविष्टो **गुरून् मुक्त्वा**ऽन्यस्य **कस्यापि** महीयसोऽपि **नोत्तिष्ठन्ति**(सि)अहमपि तवास्थानिकायां त्वदीयां लीलां धरन्ती समुपविष्टा ततो न सपरिवाराऽप्यभ्युत्थिता, यदि पुन**स्ते** तव **लीला न कृता स्यात्** ततोऽहम**भ्युत्तिष्ठेय**मित्येवं राजा देव्या **तोषितः**। एवमत्रापि तीर्थकरस्थानीय आचार्योऽर्थमण्डल्यामुपविष्टः सन् न कस्याप्यभ्युत्तिष्ठति ॥ २६२७ ॥

अमुमेवार्थं गौतमदृष्टान्तेन दृढयति—

**कहेंतो गोयमो अत्थं, मोत्तुं तित्थगरं सयं ।**
**न वि उट्ठेति अन्नस्स, तग्गयं चेव गम्मति ॥ २६२८॥**

न खलु भगवान् **गौतमोऽर्थं कथयन् स्वक**मात्मीयं **तीर्थंकरं मुक्त्वा अन्यस्य** कस्यापि **उत्तिष्ठति** अभ्युत्थानं कृतवान् । **तद्गतं** चेदानीं सर्वैरपि **गम्यते** तदनुष्ठितं सर्वमिदानीमनुष्ठीयत॥ ततोऽर्थं कथयन् न कस्याप्युत्तिष्ठति ॥ २६२८॥

सम्प्रति श्रवणविधिमाह—

**सोयव्वे उ विही इणमो, अविक्खेवादि होंति नायव्वो ।**
**विक्खेवम्मि य दोसा, आणादीया मुणेयव्वा ॥ २६२९॥**

**श्रोतव्ये पुनरयं विधिः अव्याक्षेपादिर्भवति ज्ञातव्यः**, आदिशब्दात् विकथादिपरिग्रहः, **व्याक्षेपे** पुनराज्ञादय आज्ञाऽनवस्था मिथ्यात्व-विराधनारूपा **दोषा ज्ञातव्याः** । अत एवाभ्युत्थानमपि न क्रियते, तस्मिन् सति व्याक्षेपादिसम्भवात् ॥ २६२९॥

तथा चैतदर्थमेतद्द्वारगाथामाह—

**काउस्सग्गे विक्खेवया य, विकहा विसोत्तिया पयतो ।**
**उवणयवाउलणा वि य, अक्खेवो चेव आहरणे ॥ २६३०॥**

**आरोवणा य परूवणा उग्गह तह निज्जरा य वाउलेण ।**
**एएहि कारणेहिं, अब्भुट्ठाणं तु पडिकुट्ठं ॥ २६३१॥**

अनुयोगारम्भनिमित्तं **कायोत्सर्गे** कृते एतैः कारणैरभ्युत्थानं प्रतिक्रुष्टं निराकृतम्। कैः

कारणैः ? अत आह- **विक्खेवया य** इति व्याक्षेपस्य व्याक्षेपशब्दस्य भावः प्रवृत्तिनिमित्तं **व्याक्षेपता,** व्याक्षेप इत्यर्थः। अभ्युत्थाने क्रियमाणे व्याक्षेपो भवति, व्याक्षेपाच्च **विकथा** चतुर्विधा प्रवर्त्तते, तत्प्रवृत्तौ चेन्द्रियैर्मनसा **विश्रोतसिका** संयमस्थानप्लावनमिति भावः। तस्मादभ्युत्थानमकुर्वन् **प्रयतः** शृणुयात्, प्रयतो नाम कृताञ्जलिप्रग्रहो दृष्ट्या सूरिमुखारविन्दमवेक्षमाणो बुद्ध्युपयुक्तः,तथाऽभ्युत्थाने क्रियमाणे उपनयस्य विषये व्याकुलना **उपनयव्याकुलना** उपनयः कस्याप्यर्थेन क्रियते अन्यथा वा क्रियेत, उपनयग्रहणमुपलक्षणं तेन यद्ग्रहणं ज्ञातं तत् व्याकुलनात् भ्रश्यति, पृच्छा वा कर्तुमारब्धा विस्मृतिमुपयाति, कालो वा व्याख्यानस्य त्रुट्यतीति। तथा निरन्तरमविच्छेदेन भाषमाणस्य शृण्वतो महान् **आक्षेप**स्तीव्रशुभपरिणामरूपो यतो जायते, अभ्युत्थाने च तद्व्याघातः। तथा च सति शुभपरिणामभावतो योऽवध्यादिलाभः सम्भाव्यते तस्य विनाशः। अत्रार्थे चाऽऽ**हरणं** ज्ञातं वक्तव्यम्। तथा **आरोपणायाः** प्रायश्चित्तस्य **प्ररूपणा** क्रियमाणे अभ्युत्थाने व्याघातो भवति। व्याघाताच्च सम्य**गवग्रहो** ग्रहणं न भवति, न खलु व्याक्षिप्तोऽवग्रहीतुं शक्नोति किन्त्वव्याक्षिप्त इति प्रतीतमेतत्, तथा अभ्युत्थाने क्रियमाणे **व्याकुलना,** ततः सम्यक्श्रुतोपयोगो न भवति तदभावाच्च न ज्ञानावरणीयस्य कर्मणो **निर्जरा**। **एतैः कारणैरभ्युत्थानं प्रतिकुष्टम्** ॥ २६३०॥

गाथा २६२८-२६३३ वाचनाकाले व्याक्षेपनिषेधः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२६३१ ॥

साम्प्रतमेतदेव गाथाद्वयं विवरीषुः प्रथमतः 'काउस्सग्गे विक्खेवया य' इति भावयति—

**उच्चारियाए नंदीए, विक्खेवे गुरुतो भवे ।**
**अप्पसत्थे पसत्थे य, दिट्ठंतो हत्थिलावका ॥ २६३२ ॥**

अनुयोगारम्भार्थं कायोत्सर्गे कृते **नन्द्यां** ज्ञानपञ्चकरूपाया**मुच्चारिता**याभ्युत्थानेनाऽन्येन वा प्रकारेण यो **व्याक्षेपं** करोति तस्य प्रायश्चित्तं **गुरुको** मासः। तस्मात् व्याक्षेपो न कर्त्तव्यः। अत्र **अप्रशस्ते** व्याक्षेपकरणे **प्रशस्ते च** व्याक्षेपाकरणे **दृष्टान्तो हस्तिलावकाः**, हस्ती च शालीनां लावकाश्च हस्तिलावकाः ॥ २६३२ ॥

तत्राऽप्रशस्ते प्रतिपादयति—

**जह सालिं लुणावेंतो, कोई अत्थारिएहिं उ ।**
**सेयं हत्थिं तु दावेइ, धाविया ते य मग्गओ ॥ २६३३ ॥**



For Private And Personal Use Only

**न लुओ अह साली उ, वक्खेवेण तेण उ ।**
**वक्खेवे रयाणं, तु पोरिसी एव भज्जइ ॥ २६३४॥**

**जहा सालिं लुणावेंतो कोऽपि** कुटुम्बी निजे क्षेत्रे **अत्थारिएहिं तु** ये मूल्यप्रदानेन शालिलवनाय कर्मकराः क्षेत्रे क्षिप्यन्ते ते **अस्तारिकास्तैर्लावयन्** कथमपि सप्ताङ्गप्रतिष्ठितं **श्वेत**मारण्य**हस्तिन**मागतं दृष्ट्वा **दर्शयति**। दर्शिते च **ते** हस्तिनो **मार्गतः** पृष्ठतो **धाविता** आगतैरपि हस्तिनो रूपेणाऽऽक्षिप्तैर्हस्तिरूपं वर्णयद्भि**स्तेन व्याक्षेपेणाथ शालिर्न लूनः** । एवमिहापि अभ्युत्थानेन **व्याक्षेपे रतानां पौरुषीभङ्गो** भवति।, व्याख्यानं पुनर्न किमपि याति, तस्माद् व्याक्षेपो न विधेयः।

प्रशस्ते व्याक्षेपाऽकरणे दृष्टान्तः स्वयं भावनीयः, स चैवं- एकः कौटुम्बिकः शालिक्षेत्रं लावयति, तस्य सत्कया दास्या शालिं लुनन्त्या सप्ताङ्गप्रतिष्ठितः श्वेतो वनहस्ती चरन् दृष्टः, दास्या ज्ञातं यदि शालिलावकानां कथयिष्यामि ततो हस्तिनं दष्ट्वा हस्तिनो रूपेणाऽऽक्षिप्ता हस्तिनो रूपं वर्णयन्तम् आशिष्यन्ते, एष च हस्ती दिनेऽस्मिन्नवकाशे दृश्यते ततः शालिर्न लविष्यते, यदा तु शालिः परिपूर्णो लूनोऽभवत् तदा सा दासी स्वामिनः शालिलावकानां

चाऽचकथत्? ततस्तैरुक्तं किं तदा न आख्यातम् दासी प्राह-शालिलवितव्यव्याघातो भविष्यतीति हेतोः। तत एवमुक्ते कौटुम्बिकः परितुष्टः,तेन च परितुष्टेन मस्तकप्रक्षालनतो दासी अदासी कृता। एवमिहापि व्याक्षेपो न करणीयः, तथा च सति भगवदाज्ञापरिपालनतः कर्मक्षयेण त्रिलोकमस्तकस्थो भवतीति ॥ २६३३ ॥ २६३४ ॥

सम्प्रति विकथादिपदव्याख्यानार्थमाह—

**विकहा चउव्विहा वुत्ता, इंदिएहि विसोतिया।**
**अंजलीपग्गहो चेव, दिट्ठी बुद्धुवजुत्तया ॥ २६३५॥**

**विकथा** स्त्रीकथादिभेदाच्चतुर्विधोक्ता, **विश्रोतसिका इन्द्रियैः**,उपलक्षणमेतत् मनसा वाचा प्रयतता। **अञ्जलिप्रग्रहो** गुरुमुखे **दृष्टिर्बुद्ध्युपयुक्तता** च ॥२६३५॥

उपनयस्य व्याकुलनेति व्याख्यानयति—

**नस्सते उवणतो सो, उ अन्नहा वोवणिज्जइ ।**
**नायं वाकरणं वा वि, पुच्छा अद्धा व भस्सइ ॥ २६३६॥**

अभ्युत्थानेनान्येन वा व्याकुलतायां **स** दर्शित **उपनयो नश्यति** विस्मृतिं याति, यदि **वा** व्याकुलतया **अन्यथोपनीयते, ज्ञातं वा व्याकरणं, पृच्छा** वा कर्तुमारब्धा, **अद्धा** वा पौरुषीलक्षणा **भ्रस्यति** ॥ २६३६ ॥

आक्षेपव्याख्यानार्थमाह—

**भासतो सावतो वा वि, तिव्वसंजायमाणसो ।**
**लभंतो ओहिलंभादी, जहा मुंडिवगो मुणी ॥ २६३७ ॥**

निरन्तरमविच्छेदेन **भाषकः श्रावको वा** उत्तरोत्तरविशिष्टार्थावगाहनतस्तीव्रसञ्जातमानसो जातपरमाक्षेपो यद्यभ्युत्थानेन व्याक्षेपो नाभविष्यत् ततो**ऽवधिलाभादि**कमलप्स्यत, **यथा मुण्डिवको मुनि**स्तथा[च-] मुण्डिवक आचार्यः परमकाष्ठीभूते शुभध्याने प्राप्तोऽवधिमलप्स्यत यदि तस्य **पुष्यमित्रेण** ध्यानविघ्नो नाऽकरिष्यत् परं सर्वं साधुसाध्वीप्रभृत्याकुलमभवदिति तेन ध्यानव्याघातः कृतः ॥ २६३७ ॥

'अधुना आरोवणा परूवणे'ति व्याख्यानार्थमाह—

**आरोवणमक्खेवं, व दाउकामो तहिं तु आयरितो ।**
**वाउलणाए फिट्टए, उग्गहिउमणो न ओगेण्हे ॥ २६३८॥**

**आरोवणां** प्रायश्चित्तं तत्रार्थमण्डल्यामाचार्यो **दातुकामः** प्ररूपयितुकाम इति तात्पर्यार्थः। यद्यभ्युत्थानं करोति ततो **व्याकुलतया स्फेटति** व्याकुलने न प्रायश्चित्तप्ररूपणा तिष्ठतीति भावः। तथा **अवग्रहीतुमना** अभ्युत्थानेन व्याकुलनातो **नावगृह्णाति** ॥२६३८॥

**एगग्गो ओगिण्हइ, वक्खिप्पंतस्स विस्सुतिं जाति ।**
**इंदपुर इंददत्ते, अज्जुणतेणे य दिट्ठंता ॥ २६३९॥**

**एकाग्रः** सन् अवगृह्णाति, अभ्युत्थानेन पुन**र्व्याक्षिप्यमानस्याव**गृहीतमपि **विस्मृतिं याति** कुतोऽनवगृहीतार्थावग्रहणं ? व्याक्षेपाच्च विस्मृतिगमने **इन्द्रपुरे** पत्तने **इन्द्रदत्तस्य** राज्ञः सुता दृष्टान्तः। तथा च तेषां कला अभ्यस्यतां प्रमादविकथादिव्याक्षेपान्न किमप्यवगृहीतमभूत्, यदपि किञ्चिदपि गृहीतं तदपि विस्मृतिमुपगतमत एव तै राधावेधो न कर्त्तुं शकितः । तथा **अर्जुनस्तेनश्च दृष्टान्तः**। तथाहि-सोऽर्जुनकस्तेनोऽगडदत्तेन सह युध्यमानो न कथमप्यगडदत्तेन

पराजेतुं शक्यते, ततो निजभार्याऽतीवरूपवती सर्वालङ्कारविभूषिता रथस्य तुण्डे निवेशिता, ततः स्त्रीरूपदर्शनव्याक्षेपात् युद्धकरणं विस्मृतिमुपगतमिति सोऽगडदत्तेन विनाशितः। एवमिहापि व्याक्षेपात् श्रुतोपयोगो विनाशमाप्नोति ॥ २६३९॥

**एए चेव य दोसा, अब्भुट्ठाणे वि होंति नायव्वा ।**
**नवरं अब्भुट्ठाणं इमेहिं, तिहि कारणेहिं तु ॥ २६४० ॥**

यस्मात् श्रवणकर्त्तव्ये व्याक्षेपादिषु क्रियमाणेष्वेतेऽनन्तरोक्ता दोषास्तस्माद् व्याक्षेपादिरहितैः श्रोतव्यम्। **एते च** व्याक्षेपादयो **दोषा अभ्युत्थानेऽपि** क्रियमाणे **भवन्ति** तस्मादभ्युत्थानमपि न कर्त्तव्यम्, **नवरमभ्युत्थानमेभि**र्वक्ष्यमाणै**स्त्रिभिः कारणैः** कर्त्तव्यम् ॥ २६४०॥

तान्येवाह—

**पगयसमत्ते काले, अज्झयणुद्देसअंगसुयखंधे ।**
**एएहिं कारणेहिं, अब्भुट्ठाणं तु अणुजोगो ॥ २६४१ ॥**

**प्रकृते समाप्ते** तथा **काले** समाप्ते **अध्ययनोद्देशाङ्गश्रुतस्कन्धेषु** वा समाप्तेषु यदि

प्राघूर्णकाद्यागमनं भवेत् तदा **एभिः कारणैरभ्युत्थानमनुयोगो** भवति॥ २६४१॥

तत्र कालोऽध्ययनादिकं च प्रतीतं न प्रकृतमिति कल्पे व्यवहारे च प्रकृतप्रतिपादनार्थमाह—

**कप्पम्मि दोण्णि पगया, पलंबसुत्तं च मासकप्पे य ।**
**दो चेव य ववहारे, पढमे दसमे य जे भणिया ॥ २६४२॥**

**कल्पे** कल्पाध्ययने **द्वे प्रकृते** तद्यथा **प्रलम्बसूत्रं मासकल्पश्च** मासकल्पसूत्रं च, **व्यवहारे च द्वे** प्रकृते **ये भणिते प्रथमे दशमे** चोद्देशके। तत्र प्रथमे आरोपणासूत्रं, दशमे पञ्चविध-व्यवहारसूत्रम् ॥ २६४२॥

न केवलमेतदेव प्रकृतं किं त्वन्यदपि । तथा चाह—

**पेढियातो य सव्वाओ य सव्वातो चूलियातो तहेव य ।**
**निज्जुत्ती कप्पनामस्स ववहारस्स तहेव य ॥ २६४३॥**

**सर्वाः** प्रकल्पकल्पादिगताः **पीठिकास्तथा सर्वाश्चूलिकास्तथा कल्पनाम्नो व्यवहारस्य** च **तथा चैवे**तिवचनादन्येषां च **दशवैकालिकप्रभृतीनां** च **निर्युक्तयः** प्रकृतानि ॥ २६४३॥

अत्रैवाऽऽदेशान्तरमाह—

**अण्णो वि य आएसो, जो रायणिओ उ तत्थ सोयव्वे ।**
**अणुयोगधम्मयाए, किइकम्मं तस्स कायव्वं ॥ २६४४॥**

**अन्योऽपि चाऽऽदेशो** मतान्तरं, **तत्र श्रोतव्ये यो रात्निको** रत्नाधिकः अनुभाषक इत्यर्थः, तस्य नन्द्यामुच्चारितायाम**नुयोगधर्मतया कृतिकर्म** वन्दनं कर्त्तव्यम् ॥ २६४४॥

तथा—

**केवलिमादी चोद्दस, दस नव पुव्वी य उट्ठणिज्जो उ ।**
**जे तेहि ऊणतरगा, समाण-अगुरुं न उट्ठंति ॥ २६४५॥**

अर्थमपि कथयता समागच्छन् **केवली** अभ्युत्थातव्यः, **आदि**शब्दात् मनःपर्यवज्ञानी अवधिज्ञानी च परिगृह्यत॥ तथा यो येभ्यो नवपूर्वधरादिभ्य **ऊनतर**स्तेन नवपूर्वधरादि-**रभ्युत्थानीय**ः। तथाहि- कथको यदि कालिकश्रुतधारी तर्हि तेनार्थमपि कथयता **नव**पूर्वी **चतुर्दश**पूर्वी **चाभ्युत्थातव्य**ः, नवपूर्विणा दशपूर्वी, दशपूर्विणा चतुर्दशपूर्वीति। तथा यदि

समागच्छन् **समानः** समानश्रुतोऽगुरुश्च तदा तं **नाभ्युत्तिष्ठन्ति** ॥ २६४५॥

तदेवं प्रवचने निर्जरा चेति द्वारद्वयं गतम्, इदानीं सापेक्षद्वारमाह—

**सावेक्खे निरवेक्खे, गच्छे दिट्ठंतो गामसगडेणं ।**
**राउलकज्जनिउत्तं, जह गामेणं कयं सगडं ॥ २६४६॥**

**अस्सामिबुद्धियाए, पडियं च न वि य रक्खंति ।**
**रण्णाणत्ते दंडो, सयं च सीयंति कज्जेसु ॥ २६४७॥**

आचार्यस्य शिष्यैः प्रातीच्छिकैश्च सर्वं कर्त्तव्यं, ते च तथाकुर्वन्तः सापेक्षा उच्यन्ते; ये तु न कुर्वन्ति ते निरपेक्षाः। तत्र **सापेक्षे निरपेक्षे** च **गच्छे दृष्टान्तो ग्रामशकटेन** तद्यथा-एकस्मिन् ग्रामे **ग्रामेण** ग्रामेयकैः पुरुषैः **राजकुलकार्यनियुक्तं शकटमेकं कृतम्**। ततो यत्ते राजकुलेनाज्ञाप्यन्ते धान्यं घृतघटादि वा नेतव्यमानेतव्यं वा तस्मिन् शकटे आरोप्याऽऽनयन्ति नयन्ति वा। तथा नास्य कश्चित् स्वामीत्यस्वामिबुद्ध्याऽऽत्मनोऽपि कार्याणि तेन कुर्वन्ति। **अस्वामिबुद्ध्यैव पतितं** शटितं वा तस्य शकटस्य **नापि रक्षन्ति,** ततः कालेन गच्छता

तद् भग्नम्। अन्यदा राजकुलेन ते आज्ञप्ता 'धान्यमानयत' तैः शकटाऽभावान्नानीतं तत्, आज्ञाभङ्गोऽकारीति **तेषां दण्डः** कृतः, कार्येषु समापतितेषु **स्वयं ते सीदन्तो** दृश्यन्ते ॥ २६४६ ॥ २६४७ ॥

एष दृष्टान्तोऽयमर्थोपनयः—

**एंव[1] न करेंति सीसा, काहिंति पडिच्छयंति काऊण ।**
**ते वि य सीसत्ति ततो, हिंडणपेहादिसुं सिग्गो ॥ २६४८ ॥**

**एवं** ग्रामेयकदृष्यान्तप्रकारेण **शिष्याः प्रातीच्छिकाः करिष्यन्तीति कृत्वा न कुर्वन्तीति, तेऽपि च** प्रातीच्छिकाः **शिष्याः** करिष्यन्तीति बुद्ध्या न कुर्वते। अतः सीदन् आचार्यः स्वयं भिक्षामटति स्वयं चोपकरणप्रेक्षादिकं विधत्ते इति **हिण्डने प्रेक्षादौ च सिग्नः[2]** परिश्रान्तः। तेषां च शिष्य-प्रातीच्छिकानां दण्डः प्रायश्चित्तं दीर्घसंसारिता वा ॥ २६४८ ॥
तदेवं निरपेक्षे दृष्टान्तः। सम्प्रति सापेक्षे भावयति—

गाथा २६४८-२६५३ आचार्यस्य भक्तेर्महत्त्वम्

१. एवं - मु. ॥ २. सिग्रः - मु. ॥



For Private And Personal Use Only

**बितिएहिं उ सारवियं, सगडं रण्णा य उक्करा उ कया ।**
**इय जे करेंति गुरुणो, निज्जरलाभो य कित्ती य ॥ २६४९ ॥**

अपरस्मिन् ग्रामे **द्वितीयकैः** ग्रामेयकै राजकुलकार्यनियुक्तं शकटं कृतं तेन राजकीयं धान्यं घृतघटाद्यानयन्ति नयन्ति च। तच्च **शकटं** तैः सम्यक् **सारापितं** ततो न कदाचिदाज्ञाभङ्गः कृत इति परितुष्टेन **राज्ञा** ते **उत्कराः** करविहीनाः कृताः । एष दृष्टान्तोऽयमर्थोपनयः **इति** एवमुक्तेन प्रकारेण **ये** शिष्याः प्रातीच्छिकाश्चात्मानुग्रहबुद्ध्या **गुरोः** कृत्यं **कुर्वन्ति** तेषां महती निर्जरा भूयान् ज्ञानादिलाभः **कीर्त्तिश्च** । गतं सापेक्षद्वारम् ॥ २६४९ ॥

सम्प्रति भक्तव्यवच्छेदद्वारमाह—

**दव्वे भावे भत्ती, दव्वे गणगा उ दूति जाराणं ।**
**भावम्मि सीसवग्गो, करेति भत्तिं सुयधरस्स ॥ २६५० ॥**

आचार्यस्य भक्तौ क्रियमाणायां तीर्थस्याऽव्यवच्छेदो भक्तावक्रियमाणायां तु तीर्थव्यवच्छेदः। सा च **भक्तिर्द्विधा-द्रव्ये भावे** च। अत्र या नाम **गणिका** भुजङ्गानां भक्तिं कुर्वन्ति **दूतयो**

वा **जाराणां** सा **द्रव्ये** द्रव्यभक्तिः। **भावे** भावविषया भक्तिः पुनरियं यत् **शिष्यवर्गः श्रुतधरस्य भक्तिं करोति** ॥ २६५० ॥

यद्यपि चान्योऽपि गुरोर्भक्तिं करोति तथापि ममापि निर्जरा स्यादित्यात्मनाऽनुग्रहबुद्ध्या-ऽन्येनापि भक्तिः कर्त्तव्येति **लोहार्यगौतम**दृष्टान्तेन भावयति—

**जइ वि य लोहसमाणो, गेण्हइ खीणंतराइणो उंछं ।**
**तह वि गोयमसामी, पारणए गेण्हइ गुरुणो ॥२६५१॥**

**यद्यपि च लोहसमानो** लोहार्यः **क्षीणान्तरायस्य** भगवतो **वर्द्ध**मानस्वामिनः सदैव उञ्छम् एषणीयं भक्तादिकं **गृह्णाति** तस्य भगवद्वैयावृत्त्यकरत्वात्।

उक्तं च–

धण्णो सो लोहज्जो, खंतिखमाए वरलोहस[1]रवण्णो ।
जस्स जिणो पत्तातो, इच्छइ पाणीहि भोत्तुं जे ॥ १ ॥

१. °सरिवण्णो - मु. ।

**तथापि गौतमस्वामी** स्वपारणके **गुरोर्वर्द्ध**मानस्वामिनो योग्यं **गृह्णाति**। एवमन्येनाप्य-वैयावृत्त्यकरभावेऽपि यथायोग्यं गुरोः कर्त्तव्यम्॥ २६५१॥

तदेवं भक्तिर्व्याख्याता, अधुना तस्यां क्रियमाणायां यथा तीर्थस्याव्यवच्छेदो भवति तथा भावयति—

**गुरु अणुकंपाए पुण, गच्छो अणुकंपितो महाभागो ।**
**गच्छाणुकंपयाए, अव्वोच्छित्ती कया तित्थे ॥ २६५२॥**

**गुरोरनुकम्पया** अनुग्रहेण **गच्छो महाभागो** महाचिन्त्यशक्तिर**नुकम्पितो**ऽनुगृहीतो भवति। **गच्छानुकम्पया च अव्यवच्छित्तिस्तीर्थस्य कृता** ॥२६५२॥

**किह तेण न होइ कयं, वेयावच्चं दसविहं जेण ।**
**तस्स पयोत्ता अणुकंपितो उ थेरो थिरसहावो ॥ २६५३॥**

**कथं तेन दशविधं वैयावृत्त्यं न भवति कृतं येन स्थविर** आचार्यः **स्थिरस्वभावो**ऽ-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नुत्सुकः,**तस्य** दशविधवैयावृत्त्य**प्रयोक्ताऽनुकम्पितो**ऽनुगृहीतः। तत्करणे कृतं तेन दशविधमपि वैयावृत्त्यं तत्प्ररूपणायास्तदधीनत्वादिति भावः ॥ २६५३॥

तदेवमव्यवच्छेदोऽपि भावितोऽधुना 'अतिसेसा पंच आयरिए' इति व्याख्यानयति—

**अण्णे वि अत्थि भणिया, अतिसेसा पंच होंति आयरिए ।**
**जो अण्णस्स न कीरइ, न याऽतिचारो असति सेसे ॥ २६५४॥**

**अतिशेषाः पञ्च भवन्त्याचार्ये** इत्येनन वचनेनान्**येऽप्यति**शयाः पञ्चाऽर्थतो **भणिताः सन्ति** । **यः** पञ्चानामन्यतरोऽ**प्यन्यस्या**ऽनाचार्यस्य **न क्रियते, न च शेषे**ऽनाचार्ये पञ्चानामनेकतरस्मिन्नप्यतिशये **असति** अक्रियमाणे **अतीचारः** । आचार्यस्य तु पञ्चाप्यतिशयाः कर्त्तव्याः, पञ्चानामेकतरस्मिन्नप्यक्रियमाणेऽतीचारः ॥ २६५४॥

तानेव पञ्चातिशयानाह—

**भत्ते पाणे धावण, पसंसणा हत्थ-पायसोए य ।**
**आयरिए अतिसेसा अणतिसेसा अणायरिए ॥ २६५५॥**



For Private And Personal Use Only

उत्कृष्टं **भक्त**मुत्कृष्टं **पानं,** मलिनमलिनोपधि**धावनं, प्रशंसनं, हस्तपादशौचं च** । एते पञ्चातिशेषा **अतिशया आचार्ये । अनाचार्ये त्वनतिशया** अनाचार्ये एते न कर्तव्या इति भावः॥ २६५५॥

सम्प्रति भक्तादिव्याख्यानार्थमाह—

**कालसहावाणुमयं, भत्तं पाणं च अच्चितं खेत्ते ।**
**मलिणमलिणा य जाया, चोलादी तस्स धोवंति ॥ २६५६॥**

ये तु **कालानुमतं स्वभावानुमतं च** कालानुकूलं स्वभावानुकूलं चेत्यर्थः, **भक्त**माचार्ये प्रदेयमिति प्रथमोऽतिशयः। तथा यत् यत्र क्षेत्रे **अर्चितं पानीयं** तत्सम्पाद्यमाचार्यस्येति द्वितीयो अतिशयः। तथा **चोलादीनि मलिनमलिनानि जातानि तस्या**ऽऽचार्यस्य **प्रक्षाल्यन्ते** ॥ २६५६॥

किं कारणमितिचेद्? अत आह—

**परवादीण अगम्मो, नेव अवण्णं करेंति सुइसेहा ।**
**जह अकहितो वि नज्जइ, एस गणी उज्जपरिहीणो ॥ २६५७॥**

यथा **परवादिनामगम्यो** भवति यथा च **शुचिशैक्षाश्चोक्षशिष्या अवज्ञां न कुर्वते यथा** च **अकथितोऽपि ज्ञायते एष गणी** आचार्यः। तथाऽनुद्यमसौदर्यं तत्परिहीनो मलिनवस्त्र-प्रक्षालनेन कर्त्तव्यः न च विभूषादोषप्रसक्तिः ॥ २६५७॥

यत आह—

**जह उवगरणं सुज्झइ, परिहरमाणो अमुच्छितो साहू ।**
**तह खलु विसुद्धभावो, विसुद्धवासाण परिभोगे ॥ २६५८॥**

**यथा साधुरुपकरणं** धर्मोपकरण**ममूर्च्छितः** सन् **परिहरन्** परिभोगयन् **शुद्ध्यते** न परिग्रहदोषेण लिप्यते अमूर्च्छितत्वात् **तथा**ऽऽचार्योऽपि **विशुद्धवाससां परिभोगे विशुद्धभावः** सन् शुद्ध्यतीति। एष तृतीयोऽतिशयः ॥ २६५८॥

सम्प्रति प्रशंसनमाह—

**गंभीरो मद्दवितो, अब्भुवगयवच्छलो सिवो सोमो ।**
**वित्थिण्णकुलुप्पण्णो, दाया य कयण्णुतो सुयवं ॥ २६५९॥**

**खंतादिगुणोवेतो, पहाणणाण-तव-संजमावसहो ।**
**एमाइसंतगुरुगुणविकत्थणं संसयातिसयो ॥ २६६० ॥**

**गम्भीरोऽ**परिस्रावी **मार्दवितो** मार्दवोपेतः,तथाऽ**भ्युपगतस्य** शिष्यस्य प्रतीच्छकस्य **वत्सलो** यथोचितवात्सल्यकारी, तथा **शिवोऽ**नुपद्रवः,तथा **सोमः** शान्ताकृतिः, तथा **विस्तीर्णकुलोत्पन्नो दाता कृतज्ञः श्रुतवान्** तथा **क्षान्त्यादिगुणोपेतः प्रधानज्ञानतपः - संयमानामावासो** गृहम्, **एवमादीनां सतां गुरुगुणानां विकत्थनं** श्लाघनमेष चतुर्थः **प्रशंसनातिशयः** ॥ २६५९ ॥ २५६० ॥

अधुना प्रशंसनस्य फलमाह—

**संतगुणकित्तणया, अवण्णवादीण चेव पडिघातो ।**
**अवि होज्ज संसतीणं, पुच्छाभिगमे दुविहलाभो ॥ २६६१ ॥**

सद्गुणोत्कीर्त्तनायां महती निर्जरा भवति, तथा **सद्गुणकीर्त्तनया अवर्णवादिनां प्रतिघातः** कृतो भवति, **अपि भवेदयं** महान् गुणो गुणवन्तमाचार्यं श्रुत्वा बहूनां राजेश्वरतलवरप्रभृतीनां

**संशयिनां पृच्छार्थाऽभिगमो** भवति, पृच्छानिमित्तमाचार्यसमीपमागच्छन्ति। आगताश्च धर्मं श्रुत्वा अगारधर्ममनगारधर्मं वा प्रतिपद्यन्ते इति **द्विविधलाभः** ॥ २६६१॥

पञ्चमातिशयप्रतिपादनार्थमाह—

**करचरणनयणदसणाइधोवणं पंचमो उ अतिसेसो ।**
**आयरियस्स उ सययं, कायव्वो होति नियमेण ॥ २६६२॥**

**कर-चरण-नयन-दशनादिप्रक्षालनं पञ्चमोऽतिशयः सततमाचार्यस्य नियमेन भवति कर्त्तव्यः** ॥ २६६२॥

अत्र पर आह—

**मुख-नयण-दंत-पायादिधोवणे को गुणो त्ति ते बुद्धी ।**
**अग्गि-मति-वाणिपडुता, होइ अणोतप्पया चेव ॥ २६६३ ॥**

**मुख-नयन-दन्त-पादादिधावने को गुण इति** एषा ते **बुद्धिः** स्यात् अत्रोच्यते-मुखदन्तादिप्रक्षालनेऽग्निपटुता जाठराऽग्निप्राबल्यं **मतिपटुता वाक्पटुता** च, नयनपादादिप्रक्षालने

**अणोत्तप्पया** अलज्जनीयशरीरता **भवति** । एष गुणो मुखादिप्रक्षालने, एते चाऽतिशयाः पञ्च, उपलक्षणमन्यदपि यथायोगमाचार्यस्य कर्त्तव्यम् ॥ २६६३॥

तथा च —

**असढस्स जेण जोगाण संधणं जह उ होइ थेरस्स ।**
**तं तह करेंति तस्स उ, जह से जोगा न हायंति ॥ २६६४॥**

**यथा स्थविरस्याऽशठस्य** सतो **येन** क्रियमाणेन **योगानां सन्धानं भवति तत्तस्या**चार्यस्य साधवः **कुर्वन्ति तथा [ यथा ] से** तस्याचार्यस्य **योगा न हीयन्ते** न हानिमुपगच्छन्ति ॥२६६४॥

**एए पुण अतिसेसे, उवजीवे यावि कोवि दढदेहो ।**
**निदरिसणं एत्थ भवे, अज्जसमुद्दा य मंगू य ॥ २६६५॥**

**एतान् पुनरतिशयान्** कोऽप्याचार्यो **दृढदेहः** सन् नोपजीवति यस्त्वदृढदेहः सोऽशठो भूत्वा **उपजीवति** न तु तैरतिशयैः गर्वं करोति हर्षं वा मनसि मन्यते **अत्र निदर्शनं** भवत्याचार्य**समुद्रा मङ्गवा**चार्याश्च ॥ २६६५ ॥

एतदेव निदर्शनद्वयं भावयति—

**अज्ज समुद्दा दुब्बल, कितिकम्मा तिण्णि तस्स कीरंति ।**
**सुत्तत्थपोरसि समुट्ठियाण तइयं तु चरमाए ॥ २६६६॥**

**आर्यसमुद्राः** सूरयो **दुर्बला** दुर्बलशरीराः,ततस्तेऽतिशयानुपजीवितवन्तोऽनुपजीवने योगसन्धानकरणाऽशक्तेः,तथा च तस्य प्रतिदिवसं **त्रीणि कृतिकर्माणि** विश्रामणारूपाणि क्रियन्ते, तद्यथा-द्वे **सूत्रार्थपौरुषीसमुपस्थितानां, तृतीयं** कृतिकर्म **चरमायां** पौरुष्याम्, इयमत्र भावना-सूत्रपौरुषीसमाप्त्यनन्तरं यावन्निषद्या क्रियते तावत् प्रथमा विश्रामणा, द्वितीया अर्थपौरुषीसमाप्त्यनन्तरं, तृतीया चरमपौरुषीपर्यन्ते कालप्रतिक्रमणानन्तरम् ॥ २६६६ ॥

**सड्ढकुलेसु य तेसिं, दोच्चंगादी उ वीसु घेप्पंति ।**
**मंगुस्स न किइकम्मं, न य वीसुं घेप्पए किंचि ॥ २६६७॥**

**श्राद्धकुलेषु** भक्तेषु **तेषामार्यसमुद्राणामाचार्याणां** योग्यानि कूरादीनि **द्वितीयाङ्गादौ** मात्रकादौ **विष्वक् गृह्यन्ते** आर्यमङ्गोः पुनराचार्यस्य **न कृतिकर्म** क्रियते नापि तद्योग्यं

पौद्गलिकादि **किञ्चित् विष्वक्** मात्रके **गृह्यते** किन्तु, यदि श्राद्धकुलेष्वतिभक्तेषूत्कृष्टं लभ्यते तदपि गृहीत्वाऽज्ञातोञ्छपतद्ग्रहे क्षिप्यते, विष्वगानीतमपि न भुङ्क्ते । तौ च द्वावप्याचार्यौ विहरन्तावेव यदा **सोपारके** गतौ, तत्र च द्वौ श्रावकौ एकः **शाकटिको**ऽपरो **वैकटिको** नाम सुरासन्धानकारी। तौ च द्वावपि श्रावकावार्यसमुद्राणां योग्यमतिशायि पौद्गलिकप्रभृतिकं विष्वक् मात्रके गृह्यमाणमार्यमङ्गूनां पुनर्योग्यमेकस्मिन्नेव पतद्ग्रहे गृह्यमाणं पश्यतः, दृष्ट्वा चाऽऽचार्यमङ्गुसमीपमागच्छतः ॥ २६६७॥

**बेंति ततो णं सड्ढा, तुज्झ वि वीसुं न घिप्पए कीस ।**
**तो बेंति अज्जमंगू, तुब्भे च्चिय एत्थ दिट्ठंतो ॥ २६६८ ॥**

**ततः** समीपाऽऽगमनानन्तरं तौ **श्रावकौ ब्रुवाते किं ना**ऽऽर्यसमुद्राणामिव **युष्माकमपि विष्वक्** प्रायोग्यं **गृह्यते ? ततो ब्रुवन्त्यार्यमङ्गव** आचार्या **अत्रार्थे यूयमेव दृष्टान्ताः** ॥ २६६८ ॥

कथमित्याह—

**जा भंडिदुब्बला ऊ, तं तुब्भे बंधहा पयत्तेण ।**
**न वि बंधह बलिया ऊ, दुब्बलबलिए व कुंडी वि ॥ २६६९ ॥**

अहो शाकटिक ! **या** तव **भण्डी** गन्त्री **दुर्बला तां यूयं प्रयत्नेन बध्नीथ** ततः सा वहति। यदि पुनरबद्ध्वा वाह्यन्ते तदा विनश्यति, या पुन**र्बलिका** तां **नैव बध्नीथ**। बन्धनव्यतिरेकेणापि तस्या वहनात्। वैकटिकं प्रति ब्रूते 'भो वैकटिक! या तव कुण्डी दुर्बला तां वंशदलैर्बद्ध्वा तत्र मद्यं संधत्थ या तु बलिका कुण्डी तस्यां बन्धमकृत्वाऽपि तत्र सन्धानं कुरुथ'। **दुब्बलबलिए व कुंडी वि** एवं कुण्ड्यपि दुर्बला बलिका च भण्डीवत् वक्तव्या॥ २६६९॥

उक्तो दृष्टान्तः, साम्प्रतमुपनयमाह—

**एवं अज्जसमुद्दा, दुब्बलभंडीव संठवणयाए ।**
**धारेंति सरीरं तू, बलि भंडी सरिसग वयं तु ॥ २६७०॥**

**एवमुक्तेन** प्रकारेण [ **आर्यसमुद्राः** ] **दुर्बलभण्डीव** दुर्बला गन्त्रीवाऽऽत्मीयं **शरीरं संस्थापनया धारयन्ति** नेतरथा, ततस्तेषां योग्यं विष्वक् मात्रके गृह्यते, **वयं तु बलिकभण्डीसदृशाः** ततो न शरीरस्य संस्थापनामपेक्षामहे ॥ २६७०॥

**निप्पडिकम्मो वि अहं, जोगाणि तरामि संधणं काउं ।**
**नेच्छामि य बितियंगे, वीसु इति ते बेंति मंगू ॥ २६७१॥**

**निष्प्रतिकर्माप्यात्मयोगानां सन्धानं कर्तुं शक्नोमि** ततो **नेच्छामि द्वितीये अङ्गे** मात्रके **विष्वक्** गृह्यमाणमिति **ते मङ्गवाचार्या ब्रुवते** ॥ २६७१ ॥

**न तरंती तेण विणा, अज्जसमुद्दा उ तेण वीसं तु ।**
**इय अतिसेसायरिए, सेसा पंतेण लाढेंति ॥ २६७२ ॥**

आर्यसमुद्राः पुनराचार्या**स्तेन विष्वक्** प्रायोग्यग्रहणेन **विना** योगानां सन्धानं कर्तुं **न शक्नुवन्ति** तेन तत्प्रायोग्यं विष्वक् गृह्यते, एवं शेषाणामपीति, तस्मात् कारणात् **अतिशेषा** अतिशया **आचार्ये** भवन्ति। **शेषाः** पुनः साधवः **प्रान्तेन लाटयन्ति** आत्मानं यापयन्ति ॥ २६७२ ॥

गतस्तृतीयोऽतिशयः। सम्प्रति चतुर्थं पञ्चमं वाऽतिशयं 'अंतो उवसयस्स एगरायं वा दुरायं वा' [सूत्र ३] इत्यादिलक्षणं विभावयिषुरिदमाह—

**अंतो बहिं च वीसुं, वसमाणो मासियं तु भिक्खुस्स ।**
**संजमआयविराहण, सुण्णे असुभोदतो होइ ॥ २६७३ ॥**

यदि **भिक्षुरु**पाश्रयस्या**ऽन्तः** अपवरके **विष्वक् वसति** यदि वा **बहि**रुपाश्रयात् शून्यगृहादिषु तदा तस्य प्रायश्चित्तं **मासिकं** लघु, न केवलमिदं प्रायश्चित्तं किन्तु दोषाश्च। तानेवाह—अन्तर्बहिर्वा **शून्ये** स्थाने वसतो**ऽशुभोदयो**ऽशुभकर्मोदयो भवति तद्भावाच्चा**त्म-विराधना संयमविराधना** च॥ २६७३॥

तामेव भावयति-

**तब्भावुवयोगेणं, रहिए कम्मादि संजमे भेदो ।**
**मेराऽवलंबिया मे, वेहाणसमादि निव्वेदो ॥ २६७४॥**

तस्य भावस्तद्भावः, पुंवेद इत्यर्थः। तस्मिन्नुपयोगस्तद्भावोपयोगस्तेन **तद्भावोपयोगेन** विजने स्थाने वर्तमानः सहाय**रहितो** हस्त**कर्म्मादि** कुर्यात्, एवं **संयमे** संयमस्य भेदो विराधना, तथा कोऽप्यतिप्रबल पुंवेदोदयपीडित एवं चिन्तयेत् यथा मया **मर्यादा** सकलजनसमक्षं गुरुपादसमीपे**ऽवलम्बिता** सम्प्रति चाहमतिपीडित आसितुं न शक्नोमि ततो निर्वेदात् **वैहानस**मुल्लम्बनम् आदिशब्दादन्यद्वा आत्मघातादिकमाचरेत् । एषा आत्मविराधना। तस्माद्

बहिरन्तर्वा एकाकिना न स्थातव्यम् ॥ २६७४॥

आह यदि संयमान्निर्गतभावस्ततस्तस्य सहाया अपि किं करिष्यन्ति तत आह—

**जइ वि य निग्गयभावो, तहवि य रक्खिज्ज एस अण्णेहिं ।**
**वंसकडिल्ले छिण्णो, वि वेणुतो पावए न महिं ॥ २६७५॥**

**यद्यपि च** स संयमा**न्निर्गतभावस्तथापि सोऽन्यैर्**हस्तकर्मादि वैहानसादि वा समाचरन् **रक्ष्यते**ऽत्रैवार्थे प्रतिवस्तूपमामाह—

**वंशकडिल्ले** वंशगहने **छिन्नोऽपि वेणुको** वंशो **महिं न प्राप्नोति, अन्यैर**न्यैर्वंशैरपान्तराले स्खलितत्वात् एवं संयमभावान्निर्गतोऽपि शेषसाधुभिः सर्वथा पतन् रक्ष्यते ॥ २६७५॥

तदेतद्भिक्षोरुक्तम्। इदानीं गणावच्छेदकाऽऽचार्ययोराह—

**वीसु वसंते दप्पा, गणिआयरिए य होंति एमेव ।**
**सुत्तं पुण कारणियं, भिक्खुस्स वि कारणेऽणुन्ना ॥ २६७६॥**

**विष्वक् दर्पात्** कारणमन्तरेण [**वसति** सति] **गणिनि** गणावच्छेदके **आचार्ये च एवमेव** भिक्षोरिव प्रायश्चित्तं संयमात्मविराधने च **भवतः**। यद्येवं तर्हि सूत्रमनवकाशमत आह-**सूत्रं पुनः कारणिकं** कारणमधिकृत्य प्रवृत्तं, ततो नाऽनवकाशम्। न केवलं गणावच्छेदकाऽऽचार्ययोः कारणे वसतेरन्तर्बहिर्वा वसनमनुज्ञातं किन्तु भिक्षोरपि कारणे बहिरन्तर्वा वसनस्यानुज्ञा ॥ २६७६ ॥

अथ किं तत् कारणं यदधिकृत्य सूत्रं प्रवृत्तमत आह—

**विज्जाणं परिवाडी, पव्वे पव्वे य देंति आयरिया ।**
**मासद्धमासियाणं, पव्वं पुण होइ मज्झं तु ॥ २६७७॥**

**आचार्याः पर्वणि पर्वणि विद्यानां परिपाटीर्ददति** विद्याः परावर्त्तन्ते इति भावः। अथ पर्व किमुच्यते तत आह- **मासार्द्धमासयोर्मध्यं पुनः पर्व** भवति ॥ २६७७॥

एतदेवाह—

**पक्खस्स अट्ठमी खलु, मासस्स य पक्खियं मुणेयव्वं ।**
**अण्णं पि होइ पव्वं, उवरागो चंदसूराणं ॥ २६७८॥**

अर्द्धमासस्य **पक्षात्मकस्य** मध्यमष्टमी सा **खलु** पर्व, मासस्य मध्यं **पाक्षिकं** पक्षेण निवृत्तं **ज्ञातव्यं,** तच्च कृष्णचर्तुदशीरूपमवसातव्यम् । तत्र प्रायो विद्यासाधनोपचारभावात्। **'बहुलादिका मासा'** इति वचनाच्च न केवलमेतदेव पर्व किन्त्व**न्यदपि पर्व भवति** यत्रोपरागो ग्रहणं **चन्द्रसूर्ययोः**। एतेषु पर्वसु विद्यासाधनप्रवृत्तिः। यद्येवं तत एकरात्रग्रहणम् ॥ २६७८॥ तत आह—

**चाउद्दसी गहो होइ कोइ अहवा वि सोलसिग्गहणं ।**
**वत्तं तु अणज्जंते, होइ दुरायं तिरायं वा ॥ २६७९॥**

**कोऽपि** विद्याया **ग्रहश्चतुर्दश्यां भवति। अथवा षोडश्यां** शुक्लपक्षप्रतिपदि विद्याया ग्रहणम्। किमुक्तं भवति द्विकोऽपि विद्याग्रहश्चतुर्दश्यां कृतः कोऽपि प्रतिपदि क्रियते इत्येवं त्रिरात्रवसनम्। अथवा एकेन दिवसेन **व्यक्तमज्ञायमाने** विद्याग्रहणे भवति **द्विरात्रं त्रिरात्रं** विष्वग्वसनमिति॥ २६९६॥

यदुक्तं सूत्रे 'तिरायं वे'ति तत्र वाशब्दव्याख्यानार्थमाह—

**वासद्देण चिरं पी, महपाणादीसु सो उ अच्छेज्जा ।**
**ओयविए भरहम्मी, जह राया चक्कवट्टादी ॥ २६८०॥**

**वाशब्देनेदं** सूच्यते-**चिरमपि** कालं **महाप्राणादिषु** ध्यानेषु **स तिष्ठेत्** । स हि यावन्नाद्यापि विशिष्टलाभो भवति तावन्न निवर्त्तते ध्यानाद् । अत्रैव दृष्टान्तमाह-**यथा राजा चक्रवर्त्यादिः** आदिशब्दाद्वासुदेवपरिग्रहः। **ओयविए** प्रसाधिते **भरते** अर्द्धभरते वा [तावन्न] निवर्त्तते, यावदवध्यादिलाभो न भवतीति ॥ २६८०॥

अथ महाप्राणध्याने कः कियन्तं कालमुत्कर्षतः तिष्ठतीति प्रतिपादनार्थमाह—

**बारस वासा भरहाहिवस्स छच्चेव वासुदेवाणं ।**
**तिण्णि य मंडलियस्सा, छम्मासा पागयजणस्स ॥ २६८१॥**

महाप्राणध्यानमुत्कर्षतो **भरताधिपस्य** चक्रवर्त्तिनो **द्वादश वर्षाणि** यावद् भवति, **षड्वर्षाणि** यावत् **वासुदेवानां** बलदेवानामित्यर्थः, **त्रीणि** वर्षाणि **माण्डलिकस्य, षण्मासान्** यावत् **प्राकृतजनस्य** ॥ २६८१॥

**जे जत्थ अहिगया खलु, अस्स[१] दंडक्खमाइया रण्णा ।**
**तेसिं भरणम्मि ऊणे, भुंजति, भोए अदंडादी ॥ २६८२॥**

**ये** अस्सदंडक्खमाइया महाऽश्वपत्यादयो **यत्रा**ऽश्वभरणादौ **राज्ञा अधिकृता** व्यापारिताः **तेषां** अश्वादीनां **भरणे ऊने** सति **भोगान् अदण्डादीन्** दण्डादिरहितान् **भुङ्क्ते**, न तस्य तथा भोगान् भुञ्जानस्य दण्डोऽपराधो वा, अद्याप्यश्वादिभरणाभावात् । एष दृष्टान्त उक्तः ॥ २६८२॥

सम्प्रति दार्ष्टान्तिकयोजनामाह—

**इय पुव्वगयाधीते, बाहुसनामेव तं मिणे पच्छा ।**
**पियइत्ति व अत्थपए, मिणइ ति व दो वि अविरुद्धा ॥ २६८३॥**

**इति** एवममुना दृष्टान्तप्रकारेण **पूर्वगते अधीते बाहु सनामेव** भद्रबाहुरिव **तत्** पूर्वगतं **पश्चात्** महापानध्यानबलेन **मिनोति** निःशेषमात्मेच्छया तावन्न निवर्त्तते ततश्चिरकालमपि वसति



१. अस्सादद्धक्खमाइया - मु. । अस्सादब्भक्खभाइयाला. अस्सदद्दुक्खमासाइया - पु.प्रे. ।

न तस्य कोऽप्यपराधः प्रायश्चित्तदण्डो वा । सम्प्रति महापानशब्दस्य व्युत्पत्तिमाह—**पिबतीति वा मिनोतीति वेति द्वावपि** शब्दावेता**वविरुद्धौ,** तत्त्वत एकार्थावित्यर्थः । तत एवं व्युत्पत्तिः पिबति अर्थपदानि यत्र स्थितस्तत् पानं, महच्च तत् पानं च महापानमिति ॥ २६८३॥

**वा अंतो गणीव गणो वा वक्खेवो मा हु होज्ज अग्गहणं ।**
**वसभेहिं परिक्खित्तो उ अच्छंते कारणे तेहिं ॥ २६८४॥**

**अन्तर्गणी गणो वा** वाशब्दादेवं बहिः । इयमत्र भावना-यद्याचार्यो वसतेरन्तस्ततो गणो बहिर्वसति अथ गणोऽन्तस्तत आचार्यो बहिः, किंकारणमाचार्यो गणश्च विष्वक् वसतिस्तत आह— **वक्खेवो** इत्यादि, आचार्यस्य विद्यादि गुणयतो **व्याक्षेपो मा भूत्, अग्रहण**मिति अयोग्यानां वि[1]द्यादीनां ग्रहणं [मा]भूयात् । एताभ्यां कारणाभ्यां वृषभैः परिक्षिप्तोऽन्तर्बहिर्वा विष्वगाचार्यो वसति ॥ २६८४॥

**सूत्रम्— गणावच्छेइयस्स णं गणंसि दो अइसेसा पण्णत्ता, तं जहा-गणावच्छेइए अंतो उवस्सयस्स [2]एगरायं वा दुरायं वा एगओ वसमाणे नाइक्कमइ । गणावच्छेइए बाहिं उवस्सयस्स [3]एगरायं वा दुरायं वा एगओ वसमाणे नाइक्कमइ । ३।**



१.कर्णात् पठनातो वि॰ आहोर - मु. ॥ २-३. एगओ K. मु. - श्युब्रींग च नास्ति ।

'गणावच्छेइयस्स णं गणंसि' इत्यादि, **गणावच्छेदकस्य गणे** गणमध्ये **द्वावतिशयौ** भवतः, **तद्यथा-गणावच्छेदक उपाश्रयस्यान्तरेकरात्रं द्विरात्रं वा वसन् नातिक्रामति** नातीचारभाग् भवति । तथा **गणावच्छेदको बहिरुपाश्रयादेकरात्रं वा द्विरात्रं वा वसन् नातिक्रमति**। एतौ च द्वावप्यतिशयौ सूत्रोक्तौ गणावच्छेदकस्य तस्य द्रष्टव्यौ यो नियमादाचार्यो भविष्यति। यः पुनर्गणावच्छेदकत्वे वर्त्तमान आचार्यपदस्यानर्हस्तस्यैतौ द्वावप्यतिशयौ न कल्पेते। **भाष्यम्—**

**पंचेते अतिसेसा, आयरिए होंति दोण्णि उ गणिस्स ।**
**भिक्खुस्स कारणम्मि उ, अतिसेसा पंचवी भणिया ॥ २६८५॥**

**एते** अनन्तरसूत्रोदिताः **पञ्चातिशया आचार्ये** भवन्ति, **द्वौ गणिनः** गणावच्छेदकस्य, **भिक्षोः** पुनः **कारणे पञ्चाप्यतिशया भणिताः** ॥ २६८५॥

एतदेवाह—

**जे सुत्ते अतिसेसा, आयरिए अत्थतो वा जे भणिया ।**
**ते कज्जे जयसेवी, भिक्खू वि न बाउसी भवति ॥ २६८६॥**

**ये अतिशेषा आचार्य** आचार्यस्य **सूत्रे** साक्षादभिहिताः **ये** चान्ये पञ्चाऽर्थतो **भणिताः**,तान् दशाप्यतिशयान् **कार्ये** कारणे समागच्छति '**कज्जं ति वा कारणं ति वा एगट्ठमि**'ति वचनात्। **जयसेवी**ति यतनया सेवमानो **भिक्षुरपि न बकुशी भवति,** न बकुशत्वदोषेण गृह्यते इति भावः ॥ २६८६ ॥

किं तत् कार्यम्? अत आह—

**बालाऽसहूमतरंतं, सुइवादिं पप्प इड्ढिवुड्ढं वा ।**
**दस वि भइयातिसेसा, भिक्खुस्स जहक्कमं कज्जे ॥ २६८७॥**

**बालाऽसहमतरन्तं** ग्लानं **शुचिवादिनं ऋद्धिवृद्धं वा प्राप्य दशाप्यतिशेषा भिक्षोः कार्ये** समापतिते **यथाक्रमं भजिता** विकल्पिता भवन्तीति भावः । तथाहि-बालस्य हस्तपादादयः प्रक्षाल्यन्ते, अन्ये चातिशया यथासम्भवं तस्य क्रियन्ते । 'असहो' नाम असमर्थस्तस्यापि यथायोगमतिशयाः क्रियन्ते, तथा अतरन् ग्लानः, शुचिवादी शौचप्रधानः

शिष्यः, ऋद्धिवृद्धो राजादिप्रव्रजित इति एषामपि दशाप्यतिशया यथायोगं विधेयाः ॥ २६८७॥

सूत्रम्— **से गामंसि वा नगरंसि वा जाव[1] रायहाणिंसि वा (सन्निवेसंसि वा) एगवगडाए एगदुवाराए एगनिक्खमणपवेसाए नो कप्पइ बहूणं अगडसुयाणं एगयओ वत्थए ।**

**अत्थि यांइं[2] केइ आयारपकप्पधरे, नत्थि णं केइ छेए वा, परिहारे वा,**

**नत्थि यांइं[3] णं केइ आयारपकप्पधरे से संतरा छेए वा परिहारे वा ॥ ४ ॥**

'से गामंसि वा नगरंसि वा' इत्यादि, अत्र सम्बन्धप्रतिपादनार्थमाह—

**कप्पति गणिणो वासो, बहिया एगस्स अतिपसंगेण ।**
**मा अगडसुया वीसुं, वसेज्ज अह सुत्तसंबंधो ॥ २६८८॥**

---

१. जाव सन्निवेसंसि वा - K॥ २-३ याइं ण्हं केइ - श्युब्रींग । याइंत्थं केइ - गुरुप्राण° पाठः ॥ या इण्हं केइ K॥

**कल्पते गणिनो** गणावच्छेदिनो **वासो बहिरेकस्यै**काकिन इति श्रुत्वा **मा अतिप्रसङ्गेनाऽकृतश्रुता** अपि **विष्वक् वसेयु**स्ततस्तेषां विष्वक् वासप्रतिषेधार्थमिदं सूत्रमित्येष **सूत्रसम्बन्धः** ॥ २६८८॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या —

**से** शब्दोऽथशब्दार्थः, **ग्रामे वा नगरे वा याव**त्कारणात् खेडंसि वा इत्यादिपरिग्रहः, **राजधान्यां वा, एगवगडाए** एको वगडः परिक्षेपो यस्याः सा **एकवगडा,** तस्यां तथा एकस्मिन् प्रदेशे निष्क्रमणप्रवेशो यस्याः सा **एकनिष्क्रमणप्रवेशा,** तस्यां **न कल्पते बहूनामकृतश्रुतानाम्** अगीतार्थानामित्यर्थः, **एकत** एकस्यां वसतौ **वस्तुम्, अस्ति चात्र** एतेषां मध्ये **आचारप्रकल्पधर**स्तर्हि **नास्त्यमीषां कश्चित् छेदः परिहारो वा** वाशब्दादन्यदपि प्रायश्चित्तम्। अथ **नास्ति कश्चिद**त्र एतेषां मध्ये **आचारप्रकल्पधर**स्तर्हि **एतेषामन्तरा** तस्मात् स्थानादिप्रतिक्रमणलक्षणात् **छेदः परिहारो वा**। एष सूत्रसङ्क्षेपार्थः । अधुना **भाष्यविस्तरः**—

गाथा २६८९-२६९३ गीतार्थनिश्रां विना न स्थेयम्

**एगम्मि वी असंते, ण कप्पती कप्पती य संतम्मि ।**
**उउबद्धे वासासु य, गीयत्थे देसिए चेव ॥ २६८९॥**



For Private And Personal Use Only

तेषां बहूनामकृतश्रुतानामेकतो वसता**मेकस्मिन्नपि** गीतार्थे **असति** विद्यमाने **ऋतुबद्धे वर्षासु च** वस्तुं **न कल्पते** । यदि वसति तत ऋतुबद्धे काले प्रायश्चित्तं मास लघु, वर्षाकाले चतुर्लघुकम् अथैकोऽप्यस्ति गीतार्थस्तर्हि तस्मिन् ऋतुबद्धे वर्षासु च वस्तुं **कल्पेत** न तत्र प्रायश्चित्तमिति भावः। किं कारणं गीतार्थेन सह संवसतां न प्रायश्चित्तम्? अत आह-**गीतार्थो देशक एव** भवति । इयमत्र भावना-यथा केचित् पुरुषा अटव्यां विप्रनष्टाः केनचिद्देशकेन दृष्टास्ते भणिता 'मा इतो व्रजन्तोऽटवीं प्रविशत, अहं भवतो निस्तारयामि' ततस्तेन ऋजुकेन पथा नगरं प्रापिताः। एवं गीतार्थोऽपि मोक्षपथविप्रनष्टानां मोक्षपथप्रदर्शक इति तेन सह संवसतां कालद्वयेऽपि नास्ति प्रायश्चित्तमिति॥ २६८९॥



सम्प्रति परस्य प्रश्नावकाशमाशङ्कमान इदमाह—

**किह पुण होज्ज बहूणं, अगडसुयाणं तु एग्गतो वासो ।**
**होज्जाहि कक्कडम्मी, खेत्ते अरसादिचइयाणं ॥ २६९०॥**

**कथं** केन कारणेन **पुनर्बहूनामकृतश्रुतानामेकत्र वासो भवेत्?** सूरिराह-**कर्कशक्षेत्रे अरसादित्याजितानां भवे**देकत्र वासः। तथा हि- ते साधवो महति गच्छे वर्त्तमाना नगरे

रुक्षैररसविरसादिभिराहारैर्निर्भर्त्सिताः सम्प्रधारयन्ति- 'कियच्चिरं वयं रुक्षाहारा योगसंस्तरणं कर्त्तुं शक्नुमः ?,तस्मात् गच्छामः' एवं चिन्तयित्वा गच्छादपक्रामन्ति, एवं तेषामकृतश्रुतानां बहूनामेकत्र वासः ॥ २६९० ॥

**चइयाणं सामत्थं, संघयणजुयाणमाउलाणं पि ।**
**उउवासे लहु लहुगा, सुत्तमगीयाणमाणादी ॥ २६९१ ॥**

अरसविरसादिभिराहारैस्त्याजितानामाकुलानां **संहननयुतानामपि,** अपिशब्दो भिन्नक्रमत्वादत्र योजितः एवं सामर्थ्यपर्यालोचनं भवति, यथा-'कियन्तं कालं वयं रूक्षाहाराः स्थास्यामः? तस्मादपक्रमामो गच्छाद्' इति एवं चिन्तयित्वा यदि **ऋतुबद्धे** काले वसन्ति तदा प्रायश्चित्तं मासलघु **वर्षा**काले चतु**र्लघुकम्** । एव**मगीतार्थानां** विषयेऽधिकृतं **सूत्रम्,** न केवलमधिकृतं प्रायश्चित्तं किन्तु **आज्ञादय**श्च॥ २६९१ ॥

तानेव मिथ्यात्वादीन् दोषान् द्वारगाथया संजिघृक्षुराह—

**मिच्छत्त१सोहि२सागारियाइ ३ गेलण्णे ४अहव कालगए ५ ।**
**अद्धाण ६ओम७संभमभए य रुद्धे य ओसरिए ॥ २६९२ ॥** दारगाहा ।

तेषामगीतार्थानां मतिभेदादिना **मिथ्यात्वं** स्यात्, तथा **शोधिस्तैर्न** ज्ञायते, तथा **सागारिकायां** वसतौ ये दोषाः परिहार्यास्तेषामपरिज्ञानं, तथा **ग्लानत्वेऽथवा कालगतेऽध्वनि** मार्गे **अवमेऽवमौदर्ये** अग्न्यादि**सम्भ्रमे** बोधिकम्लेच्छस्तेन**भये** अकालवर्षेण **रुद्धे** तथा **अपसृते** पथि गच्छतां कस्मिंश्चित् मन्दगतित्वात् स्फिटिते या यतना तां न जानन्ति। एष द्वारगाथासङ्क्षेपार्थः ॥ २६९२॥

साम्प्रतमेनामेव विवरीषुः प्रथमतो मिथ्यात्वद्वारमाह—

**मतिभेया पुव्वोग्गह, संसग्गीए य अभिनिवेसेण ।**
**गोविंदे य जमाली, सावगतच्चन्निए गोट्ठे ॥ २६९३॥**

कस्यापि **मतिभेदात्** मिथ्यात्वं स्यात्, कस्यापि **पूर्वव्युद्ग्रहात्,** कस्यापि संसर्गात्, कस्यचि**दभिनिवेशेन** । अत्रार्थे निदर्शनान्याह- **गोविंदे य** इत्यादि, अत्र **गोविन्द-जमालि**शब्दयोः व्यत्ययेनोपन्यासो गाथानुलोम्यात्, परमार्थतः पुनरेवं पाठः- जमालिर्गोविन्दः **श्रावकः तच्चन्नियः** श्रावकभिक्षुः **गोष्ठो** गोष्ठामाहिलः, एतानि यथाक्रमं निदर्शनानि॥ २६९३॥

तथा चाह—

**मतिभेएण जमाली, पुव्वग्गहिएण होति गोविंदो।**
**संसग्गि सावगभिक्खू[१], गोट्ठामाहिलऽभिनिवेसेणं ॥ २६९४॥** दारं १।

**मतिभेदेन** मिथ्यादृष्टिर्जायते यथा **जमालिः**, **पूर्वगृहीतेन भवति** मिथ्यादृष्टिर्यथा **गोविन्दः**, **संसर्ग्या** यथा **श्रावकभिक्षुः**, **अभिनिवेशेन** यथा **गोष्ठामाहिलः**, एतानि च निदर्शनानि सुप्रतीतानि इति न कथ्यन्ते। गतं मिथ्यात्वद्वारम् १ ॥ २६९४॥

अधुना शोधिद्वारं सागारिकद्वारं चाह—

**आवण्णमणावण्णे, सोहिं न वियंति ऊणमहियं वा ।** दारं २।
**जे य वसहीइ दोसा, परिहरंति न ते अयाणंतो ॥ २६९५॥** दारं ३।

अकृतश्रुता आलोचिते परेण एष प्रायश्चित्तप्राप्तो न वेति न जानन्ति, अजानन्त**श्चापन्नेऽनापन्ने** वा प्रायश्चित्तं **शोधिं** नैव ददति यदि वा **ऊनामधिकां** वा ददति। गतं शोधिद्वारम् २ अधुना सागारिकद्वारमाह-**ये च वसतौ दोषास्तानजानन**कृतश्रुतो **न परिहरति** ३॥ २६९५॥

---

१. **सागभिक्खू - पु. प्रे. । सावभिक्खू - ला.** ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्प्रति ग्लानत्वादिद्वारचतुष्टयमाह—

**गेलेण्णे वोच्चत्थं, करेंति** दा. ४ **न य मयविधिं वि याणंति** दा.५।
**अद्धाणमडंति सया, जयण न याणे** दा.६ **व ओमे । वि** दा ७॥ **२६९६॥**

**ग्लानत्वे**ऽज्ञानतो **विपर्यासं कुर्वन्ति,** अनागाढे आगाढकृत्यमागाढेऽनागाढकृत्यम्, उभयत्राऽपि प्रायश्चित्तं चतुर्गुरुकम्, गतं ग्लानद्वारम् दा.४। अथ कालगतद्वारमाह–**न च मृतस्य विधिं** बन्धनछेदनादिकं परिष्ठापनाविधिं वा जानन्ति मृतस्योपधिरुपहत इति [मत्वा] त्यज्यते। दा.५। सम्प्रत्यध्वद्वारमाह—**अध्वानं** पन्थानमजानन्तः सदा सर्वकालं रात्रौ दिवसे **चाऽटन्ति, न** च कारणतो रात्रावपि गमने **यतनां जानन्ति** दा.६। एव**मवमेपि** अवमौदर्येऽपि वक्तव्यं, तत्रापि यतनां न जानन्तीति भावः। दा.७॥ २६९६॥

सम्भ्रमादिद्वारकदम्बकमाह—

**अगणादिसंभमेसु य, बोहिगमेच्छादिएसु य भएसु ।**
**रायदुट्ठाईसु य, विराहगाजयण याणंता ॥ २६९७॥**



For Private And Personal Use Only

**अग्न्यादिसम्भ्रमेषु** तथा **बोधिकाः** स्तेना **म्लेच्छाः** प्रतीताः **आदिशब्दात्** परचक्रादिपरिग्रहः। तदा**दिकेषु भयेषु, राज्ञः द्विष्टादिषु च** भयेषु, राजद्विष्टं राजप्रद्वेषः, आदिशब्दात् अशिवादिपरिग्रहः। तथा भिक्षाचर्यां गते, अकालवर्षतो नदीपूरेणावरुद्धे पथि, सह व्रजतां मन्दगतित्वादपसृते **यतनामजानन्तः** संयमात्म**विराधका** भवन्ति ॥२६९७॥

तथा—

**संभमनदिरुद्धस्स वि, उन्निक्खंतस्स अहव फिडियस्स ।**
**ओसरियसहायस्स व, छड्डे उवहिं उवहतो त्ति ॥ २६९८॥**

अग्न्यादि**सम्भ्रम**वशादेकाकिनः तथा **नदीनिरुद्धस्य उन्निष्क्रान्तस्य अथवा** मन्दगतित्वात् सार्थात् **स्फिटितस्य अपसृतसहायस्य वा** अपगतसहायस्य **उपधिमुपहत इति** कृत्वा **छर्दयति** त्यजत्यबहुश्रुतः ॥ २६९८॥

**एएण कारणेणं, अगडसुयाणं बहूण वि न कप्पो ।**
**बितियपए रायदुट्ठे, असिवोम गुरूण संदेसा ॥ २६९९॥**

**एतेन** अनन्तरोदितेन **कारणेनाकृतश्रुतानां बहूनामप्येकत्र** वासो **न कल्पते। द्वितीयपदे** अपवादपदे पुनः कल्पते, क्वेत्याह-**राजद्विष्टे-[ अशिवे ]अवमौदर्ये गुरूणां सन्देशाच्च** । तथाहि-राजप्रद्वेषवशात् एकाकी आत्मद्वितीय आत्मतृतीयो वा भवेत् । **एवमशिवे**ऽवमौदर्ये च भावनीयम्, तथा गुरोः सन्देशवशात् आगाढकारणे गीतार्थानामभावेऽगीतार्था अपि व्रजन्ति इति ॥ २६९९ ॥

**तह नाणादीणट्ठा, एएसिं गीतो दिज्ज एक्केक्को ।**
**असती एगागी वा, फिडिया वा जाव न मिलंति ॥२७००॥**

**तथा ज्ञानादीनामर्थाय** ज्ञाननिमित्तं दर्शननिमित्तं चारित्रनिमित्तं वैयावृत्त्यकरणनिमित्तं वा चलितानां तेषां गीतार्थानामभावे अगीतार्था अपि गच्छन्ति, स्पर्द्धकपतौ वा कालगते आचार्यसमीपम् अथवा सार्थात् मन्दगतितया **स्फिटिता यावन्नाद्यापि मिलन्ति** तावदेकत्र बहूनामकृतश्रुतानामपि वासो न विरुध्यते ॥२७००॥

**एगाहिगमद्धाणे व अंतरा अपांतरो तत्थ होज्ज वाघातो।**
**तेणच्छेज्जा तत्थ वि, सेहस्स नियल्लगा बेंति ॥ २७०१॥**

**तत्तो वि पलाविज्जइ, गीयत्थ बिइज्जवं तु दाऊण ।**
**असतीए संगारो, कीरइ अमुगत्थ मिलियव्वं ॥ २७०२॥**

कोऽपि साधुः गीतार्थाभावे आचार्येण क्वचित् प्रयोजने प्रेषितो भणितश्चाद्यैव प्रत्यागन्तव्यमित्येव**मेकाहिगमे** एकदिनगमागमेऽ**ध्वनि अन्तराले तत्र व्याघातो भवेत्, तेन** कारणेन स यत्र प्रेषितस्**तत्रैवासीत्** न प्रत्यागच्छति, अथ च तस्य स्वज्ञातय उत्प्रव्राजननिमित्त-माचार्यसमीपमागताः अपश्यन्तः सर्वतः समन्तात् निरीक्षन्ते, निरीक्षमाणाश्च तत्र गता यत्र स तिष्ठति । ततो येषां समीपे स प्रेषितस्तत्साधुभिर्ज्ञातं यथा **शैक्षस्य निजकाः** समायातास्तिष्ठन्ति ते च **ब्रुवते**- 'वयमात्मीयमुत्प्रव्राजयिष्यामः' ततः **स ततोऽपि** स्थानात् **द्वितीयं गीतार्थं दत्त्वा पलाय्यते** दूरं यत्र तन्निजकानां गतिविषयो नास्ति। **असति** गीतार्थे अगीतार्थोऽपि सहायो दीयते, तेषां च **सङ्केतः क्रियते** यथा-**अमुकप्रदेशे मिलितव्यम्,** अगीतार्थस्यापि सहायस्याभावे एकाक्यपि प्रेष्यते तत्रापि सङ्केतः कर्त्तव्यः एवमेकाकिनस्त्रिप्रभृतीनां वा बहूनां ऋतुबद्धे वर्षासु च वासो भवति ॥२७०१॥ २७०२॥

**रायदुट्ठादीसु व, सव्वेसुं चेव होइ संगारो ।**
**ण्हाणादि व ओसरणे, गीयत्थबिइज्जगं मग्गे ॥ २७०३॥**

**असती एगागी उ निब्बंधे बहूण अगीयाणं ।**
**सामायारीकहणं मा बहिभावं निरुंभंता ॥ २७०४ ॥**

**राजद्विष्टादिषु** राजद्विष्टाऽशिवाऽवमौदर्यसम्भ्रमादिषु **सर्वेषु भवति सङ्केतः** कर्त्तव्यः । तथा **स्नानादि**निमित्तं जिनप्रतिमास्नानरथनिर्याणादिनिमित्तं समवसरणं भूयसामाचार्यादीनां मिलनं भविष्यतीति **समवसरणे** श्रुते कोऽप्याचार्यसमीपमागत्य **द्वितीयं गीतार्थं मार्गयति,** तस्य द्वितीयो गीतार्थो दातव्यः। **असति** अविद्यमाने गीतार्थे अविद्यमानता च द्विधा-सदभावेन असदभावेन वा, सदभावो नाम सन्ति गीतार्थाः परं ग्लानादिप्रयोजनव्यापृताः, असदभावो मूलत एव गीतार्था न सन्ति। तत्र सदभावेन [असदभावेन]वा अविद्यमाने गीतार्थे स प्रतिषेधनीयो यथा नास्ति द्वितीयो गीतार्थः। अथ स **निर्बन्धं** करोति तर्हि **स एकाकी** प्रेष्यते यदि वा **बहवोऽगीतार्थाः** सहाया दीयन्ते। बहूनामपि स्नानदर्शनादिनिमित्तं गमनेच्छाभावात् तेषां च बहूनामगीतार्थानां या पथि सामाचारी या च समवसरणे प्रविष्टानां, तस्याः **कथनम्**। अथ कस्मात् ते निर्बन्धेऽपि कृते मुत्कल्यन्ते ? तत आह **मा निरुध्यमाना बहिर्भावं** व्रजेयुरिति कृत्वा ॥ २७०३ ॥ २७०४ ॥

सूत्रम्— से गामंसि वा जाव रायहाणिंसि वा अभिनिव्वगडाए अणिनिदुवाराए अभिनिक्खमणपवेसाए नो कप्पइ बहूणं अगडसुयाणं एगओ वत्थए।

अत्थि याइं[1] णं केइ आयारपकप्पधरे, जे तत्तियं रयणिं संवसइ, नत्थि णं केइ छेए वा परिहारे वा।

नत्थि याइं णं केइ आयारपकप्पधरे जे तत्तियं रयणिं संवसइ, सव्वेसिं तेसिं तप्पत्तियं छेए वा परिहारे वा॥ ५॥

''से गामंसि वा'' इत्यादि। अथास्य सूत्रस्य कः सम्बन्धः? इत्यत आह—

अण्णग्गामे वासं, नाऊण निवारियं अगीयाणं ।
सग्गामे मा वीसुं, वसेज्ज अगडा अयं लेसो ॥ २७०५॥

अन्यस्मिन् ग्रामे अगीतार्थानां वासं निवारितं ज्ञात्वा मा स्वग्रामे विष्वगपि वासः

१. याइंण्हं - श्युब्रींग । याइण्हं K॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कल्पते इति मन्यमाना **अकृता** अकृतश्रुताः स्वग्रामे **विष्वक् वसेयुः** अतस्तन्निषेधार्थमिदं सूत्रमित्य**यं** सूत्रसम्बन्ध**लेशः** ॥ २७०५ ॥

अथवाऽयमन्यः सम्बन्धः—

**अगडसुया वाहिकया, समागमो एस होइ दोण्हं पि ।**
**सच्छंदअणिस्सिया वा, निस्सियजयणा विहं भणिया ॥ २७०६ ॥**

अनन्तरसूत्रे **अकृतश्रुता अधिकृता** अस्मिन्नपि सूत्रे त एवाकृतश्रुताः प्रोच्यन्ते इत्ये**ष द्वयोरपि** सूत्रयोः **समागमः** सम्पर्कः । अथवाऽधस्तनानन्तरं सूत्रे **स्वच्छन्दतोऽनिश्रिता** उक्ताः अस्मिन् पुनः गीतार्थ**निश्रितानां यतना भणिता** ॥ २७०६ ॥ अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**से गामंसि वा** इत्यादि, पूर्ववत् नवर**मभिनिव्वगडाए** अभि प्रत्येकं नियतो वगडः परिक्षेपो यस्यां सा अभिनिव्वगडा एतस्यां, पृथक् परिक्षेपायामित्यर्थः । तथा **अभि** प्रत्येकं **नियतं द्वारं** यस्याः सा, तथा तस्यां, तथा **अभि** प्रत्येकं **निष्क्रमणप्रवेशौ** निष्क्रमणप्रवेशस्थानं यस्याः सा, तथा तस्यां वसतौ **बहूनामकृतश्रुतानामेकतो वस्तुम्। अस्ति चात्र**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कश्चिदाचारप्रकल्पधरो यस्तृतीयां रजनिं** गत्वा तैः **समं वसति** तर्हि **तेषा**मापन्नः समापन्नो **नास्ति कश्चित् छेदः परिहारो** वा। **नास्ति कश्चिदाचारप्रकल्पधरो यस्तृतीयां रजनीं** गत्वा तैः **समं वसति** तर्हि तेषां सर्वेषामपि तत्प्रत्ययमगीतार्थैः सह संवसनप्रत्ययं **छेदः परिहारो वा** । एष सूत्रसङ्क्षेपार्थः ॥ अधुना **भाष्यविस्तरः**—

**गामे उवस्सए वा, अभिनिव्वगडाए दोस ते चेव ।**
**नवरं पुण नाणत्तं, तइदिवसे गीयसंवसणा ॥ २७०७॥**



**ग्रामे वा** एकस्मिन्**नुपाश्रये** विष्वक् **अभिनिव्वगडायां** पृथक् परिक्षेपायाम्,उपलक्षणमेतत् पृथग्द्वारायां पृथग्निष्क्रमणप्रवेशायां येऽनन्तरसूत्रे मिथ्यात्वादयो **दोषा** उक्ता**स्त एवा**ऽन्यूनातिरिक्ता द्रष्टव्याः। **नवरं पुनर्नानात्व**मिदमस्मिन् सूत्रे यदि गीतार्थनिश्रया वसन्ति तर्हि **तृतीयदिवसे गीतसंवसनं** गीतार्थेन सह संवसनं कर्त्तव्यम्। आचार्यस्तृतीयदिवसे तेषां शोधिनिमित्तं गीतार्थमेकं प्रेषयति, एवं च तेषां नास्ति प्रायश्चित्तम् ॥ २७०७॥

अत्र पर आह—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एवं च भवे दोसा, दोसुं दिवसेसुं जे भणियपुव्विं ।**
**कारणियं पुण वसही, असती भिक्खोभये जयणा ॥ २७०८ ॥**

ननु यदि तृतीये दिवसे गीतार्थेन सह संवसन**मेवमपि** ये **पूर्वं भणिता** मिथ्यात्वादयो **दोषास्ते द्वयोर्दिवसयोर्भवन्ति** । आचार्य आह–सत्यमेतत् केवलमिदं सूत्रं **कारणिकं** कारणवशप्रवृत्तमतो न दोषः । किं पुनस्तत्कारणमत आह–**वसही असती** इत्यादि, वसतिरेकत्र सर्वेषां न विद्यते यदि वा **भिक्षा** सर्वेषामेकत्र न भवति । अथवा **उभय**मेकत्र सर्वेषां न सम्भवति । तत एतेषां त्रयाणां कारणानामन्यतमेन कारणेन पृथक् पृथक् वसन्ति । तत्र च **यतना** कर्त्तव्या । यतनया च संवसतां प्रायश्चित्ताभावः ॥ २७०८ ॥

गाथा २७०७-२७११ कारणे विष्वक्वसने यतना

तामेव यतनामाह—

**संकिट्ठावसहीए, निवेसणस्संतो अण्णवसहीए ।**
**असतीए वाडगंतो, तस्स असती होज्ज दूरे वा ॥ २७०९ ॥**

**स्वग्रामे सङ्क्लिष्टाया**मतिसङ्कटायां **वसतौ** सर्वेषामेकत्र स्थानं न भवति तदा



For Private And Personal Use Only

एक**निवेशनस्यान्तः** पृथग् **अन्यस्यां वसतौ** स्थातव्यम् **असत्ये**कनिवेशनस्यान्तरन्यस्याः वसतेरभावे **वाटकस्याऽन्तः** पृथगन्यस्यां वसतौ वसन्ति । अथवा वाटकस्याप्यन्तः पृथगन्य-वसतिर्न लभ्यते तदा वाटकस्य बहिर्हस्तशताभ्यन्तरे पृथगन्या वसतिर्गवेषणीया, तस्य हस्तशतस्याभ्यन्तरे वसतेरभावे **दूरेऽपि** वसतिरन्या **स्यात्** ॥ २७०९ ॥

तत्र हस्तशताभ्यन्तरं यावत् यतनाविधिमाह—

**वीसुं पि वसंताणं, दोण्णि वि आवासगा सह गुरूहिं।**
**दूरे पोरिसिभंगे, उग्घाडाऽऽगंतु विगडेंति ॥ २७१० ॥**

निवेशने पाटकहस्तशताभ्यन्तरे **विष्वगपि वसता**मेष विधिर्दिवसे दिवसे **द्वे अप्यावश्यके** प्राभातिकवैकालिकप्रतिक्रमणलक्षणे **सह गुरुभिः** कर्त्तव्ये, भिक्षामटित्वा ततः सन्निवृत्ता आचार्यस्य समीपे समागत्या-ऽऽलोचयन्ति, अथ हस्तशतस्य बहिर्वसतिर्लब्धा तर्हि गुरुसमीपे चतुर्थपौरुष्यामालोचनं कृत्वा वैकालिकमावश्यकं स्वकीयायां वसतौ कुर्वन्ति । ततः प्रातरप्यावश्यकं तत्र कृत्वा गुरुसमीपमागत्य प्रत्याख्यानं गृह्णन्ति । **दूरे** इत्यादि, यदि पुनः

दूरे अन्यस्मिन् ग्रामे स्थिता भवेयुस्ततो यदि गुरुसकाशमागच्छतां गच्छतां च **पौरुषीभङ्गः**। तत **उद्घाटायां** पौरुष्यामा**गत्या**ऽऽचार्यसमीपे [**विकटयन्ति**]आलोचयन्ति प्रत्याख्यानं च गृह्णन्ति पूर्वार्द्धिकाः, एतद्दूरे स्थितानामविशेषेणोक्तम् ॥ २७१० ॥

अधुना विशेषमभिधित्सुराह—

**गीयसहाया उ गया, आलोयण तस्स सो वि य गुरूणं ।**
**अकडा पुण पत्तेयं, आलोयंती गुरुसगासे ॥ २७११ ॥**

यदि तेषां दूरस्थितानां कोऽपि गीतार्थः सहायोऽस्ति तर्हि ते **गीतसहाया** गीतार्थसहाया दूरे **गताः** सन्तस्तस्य गीतार्थस्य पुरत आलोचयन्ति, **स पुन**र्गीतार्थ उद्धाटायां पौरुष्यां **गुरूणां** समीपमागत्य विकटयति[1] । अथ नास्ति कोऽपि तेषां गीतार्थः सहायस्तर्हि ते केवला **अकृता** अकृतश्रुता उद्धाटायां पौरुष्यां **गुरुसकाशे** समागत्य प्रत्येकं प्रत्येक**मालोचयन्ति** ॥ २७११ ॥

१. विकथयति -पु.प्रे.। कथयति - मु. ॥

**एंताण य जंताण य, पोरिसिभंगो तओ गुरु वयंती ।**
**थेरे अजंगमंमि व, मज्झण्हे वावि आलोए ॥ २७१२॥**

यदि दूरे वसतिर्लब्धा उद्घाटायां च पौरुष्या**मागच्छतां गच्छतां च पौरुषीभङ्गस्ततो गुरवः** स्वयं तेषामकृतश्रुतानां समीपं **व्रजन्ति**। आचार्यो वृद्धत्वेन [अजङ्गमत्वेन] वा गन्तुमशक्तस्ततः **स्थविरे अजङ्गमे** वाचार्ये ते अकृतश्रुता **मध्याह्ने** गुरुसमीपमागत्या**ऽऽलोचयन्ति** ॥ २७१२ ॥

**एवं पि दुल्लहाए, पडिवसहठिया न एंति पतिदिवसं ।**
**समणुण्णदढधिई य अतरुणे बहिया विसज्जंति ॥ २७१३॥**

**एवमपि** अनेनापि **दुर्लभायां** वसतौ दूरे **प्रतिवृषभस्थिता न प्रतिदिवसं** गुरुसमी**पमागच्छन्ति** । अर्थादापन्नं द्वितीये दिवसे आलोचका आगच्छन्ति । अथ कीदृशास्ते प्रतिवृषभाः यानाचार्यः प्रेषयति? तत आह—**समणुण्णे**त्यादि, समनोज्ञा नाम येषां परस्परं प्रीतिस्तान् समनोज्ञान् **दृढधृतीन् अतरुणान्** मध्यमवयसो **बहिः** प्रतिवृषभानाचार्या **विसर्जयन्ति**॥ २७१३ ॥

तदेवं वसत्यलाभे यतना उक्ता, सम्प्रति भिक्षाया अलाभे यतनामाह—

**दुल्लभभिक्खे जतिउं, सग्गामुब्भामपल्लियासुं च ।**
**अतिखेयपोरिसिवहेन वा वि ठायंति तो वीसुं ॥ २७१४॥**

**दुर्लभे भैक्षे** यदि **स्वग्रामे उद्भ्रामक**भिक्षाचरप्रत्यासन्नग्रामे **पल्लिकादिषु** च यतन्ते तथापि **यतित्वापि** नास्ति संस्तरणम् अथवा **अतिशयेन** महता काल**क्षेपेण** यदि पर्याप्तं कथमपि लभ्यन्ते **पौरुषीवधेन** द्वितीय-चतुर्थपौरुषीभङ्गेन, ततो **विष्वक्** अन्यक्षेत्रेऽपि गीतार्थाभावेन अकृतश्रुता अपि **तिष्ठन्ति** । ते च विष्वक्क्षेत्रेषु तथा तिष्ठन्ति यथाचार्यस्पर्द्धकेन सह त्रीणि स्पर्द्धकानि भवन्ति॥ २७१४॥

**उभयस्स अलंभम्मि वि, गीताऽसति विसु ठंति अगडसुया ।**
**दुसु तीसु व ठाणेसुं, पतिदिवसाऽऽलोए आयरितो ॥ २७१५॥**

**उभयस्य** वसतेः भैक्षस्य वा **अलाभे गीतार्थस्याभावे अकृतश्रुता** अपि **विष्वक् तिष्ठन्ति**। कथमित्याह-**द्विषु त्रिषु वा स्थानेष्वा**चार्यस्थानेन सहोत्कर्षतस्त्रिषु स्थानेषु इत्यर्थः,तत्र

भैक्षाऽलाभे उभयालाभे वा विष्वक्स्थितानां **प्रतिदिवसमाचार्य**स्तेषामन्तिकं गत्वा ताना**लोकते** प्रतिपृच्छादिदानेन तेषां सारां करोतीत्यर्थः ॥ २७१५॥

किं कारणमाचार्येण प्रतिदिवसं तेषां समीपं गन्तव्यमत आह—

**सइरीभवंति अणवेक्खणाए जह भिन्नवाहणा लोए ।**
**पडिपुच्छसोधिचोयण, तम्हा उ गुरू सया वयई ॥ २७१६ ॥**

**[ लोके ] भिन्नप्रवहणा स्वैरिणो भवन्ति** एवं तेऽपि[**उपेक्षणायां**]स्वैरिणो जायन्ते तस्मात् **प्रतिपृच्छा-शोधि**शिक्षादिदानाय **गुरुः सदा** तेषामन्तिकं **व्रजति**॥ २७१५॥

तस्य पुनराचार्यस्य तेषां समीपं व्रजतस्तैर्यत् कर्त्तव्यं तदाह—

**तण्हाइयस्स पाणं, जोग्गाहारं च नेंति पच्चोणिं ।**
**किइकम्मं च करेंती, मा जुन्नरहो व सीएज्जा ॥ २७१७॥**

येषां समीपमाचार्यो गच्छति ते आचार्यस्य **पच्चोणिं** सम्मुखं **तृष्णार्दितस्य** अतिशयतृषितस्य योग्यं **पानं** पानीयं **योग्यमाहारं च** प्रथमालिकानिमित्तं **नयन्ति कृतिकर्म्म**

च विश्रामणां **कुर्वन्ति,** माऽन्यथा **जीर्णरथ इव स सीदेत्** ॥ २७१७॥

अथ तस्याऽऽचार्यस्य नित्यसहायो न विद्यते तत आह—

**असती निच्चसहाये, गेण्हइ पारंपरे च अण्णोण्णे ।**
**ते विय अण्णेहि समं, तं मेलेउं नियत्तंते ॥ २७१८॥**

**असति** अविद्यमाने **नित्यसहाये** अवस्थितसहाये, यः सकलं दिवसमाचार्येण सह हिण्डते, ततः **पारम्पर्येणाऽन्यानन्यान्** सहायान् गृह्णाति । तद्यथा— एके साधवस्तावन्नयन्ति यावद् द्वितीयं स्पर्द्धकं ततस्ते तैः **समं मेलयित्वा प्रतिनिवर्त्तन्ते,** ततोऽप्यन्ये साधवस्तावन्नयन्ति यावत् तृतीयं स्पर्द्धकं, ततस्तेऽपि तैः सह मेलयित्वा प्रतिनिवर्त्तन्ते । तानि च स्पर्द्धकान्याचार्यस्पर्द्धकेन सह त्रीणि स्पर्द्धकानि भवन्ति ॥ २७१८॥

अथ कथमाचार्य एकदिवसेन त्रयाणामकृतश्रुतस्पर्द्धकानां शोधिं करोति ?। तत आह—

**एगत्थ वसितो संतो, तेसिं दाऊण पोरिसिं ।**
**मज्झण्हे बितिय गंतुं, भोत्तुं तत्थावरं वए ॥ २७१९॥**

आत्मीये स्पर्द्धके **उषितः सन्** आचार्यः सूत्र**पौरुषीं दत्त्वा मध्याह्ने द्वितीयं** स्पर्द्धकं गच्छति **तत्र गत्वा भुक्त्वा** शोधिं च कृत्वा तदनन्तर**मपरं** तृतीयं स्पर्द्धकं **व्रजति,** तत आलोचनादिशोधिं कृत्वा तत्रैव वसति ॥२७१९॥

**एवमेगेण दिवसेण, सोहिं कुणइ तिण्ह वि ।**
**पडिपुच्छ गंतु बलवं, आह सुत्तमवत्थयं ॥ २७२०॥**

**एवमेकेन दिवसेना**चार्य**स्त्रयाणामपि** स्पर्द्धकानां **शोधिं करोति,** यदि स **प्रतिपृच्छां** प्रत्येकं पृच्छां सारां कर्त्तुं **गन्तुं बलवान्** । अत्र पर **आह**-यद्येवं तर्हि 'तइयरयणिं संवसति' त्ति[यत्सूत्रं] तदिदानी**मपार्थकम्** अवकाशाभावात् ॥ २७२०॥

**सुत्तनिवातो थेरे, कलाव काउं तिहेण वा सोहिं ।**
**बिइयपयं च गिलाणे, कलाव काऊण आगमणं ॥ २७२१ ॥**

आचार्यः प्राह-अधिकृतस्य **सूत्रस्य निपातोऽ**वकाशः **स्थविरे,** तथाहि-यद्याचार्यः स्थविरतया दुर्बलत्वेन वा प्रतिदिवसं **त्रिषु** स्पर्द्धकेषु **शोधिं कर्त्तुं** न शक्नोति तत एकैकस्मिन् स्पर्द्धके तृतीयां रात्रिं वसति। तथा चाह— आचार्यस्य प्रतिदिवसमनागमे **त्र्यहेण** वाऽपराधान्

**कलापं कृत्वा** पिण्डयित्वा **शोधि**माचार्यस्य समीपे कुर्वन्ति। तथाहि-एकस्मिन् स्पर्द्धके उषित्वा तत्र पौरुषीं दत्त्वा द्वितीये स्पर्द्धके समायाति तत्रैव वसति। यत्र यत्र वसति तत्रत्यास्तत्रत्याः साधवो येऽपराधा अभूवन् ते एकत्र पिण्डयित्वा आचार्यपुरत आलोचयन्ति। आचार्यस्तु शोधिं ददात्यप्रमादार्थं चोपदेशं प्रयच्छति। अत्रापि **द्वितीयपद**मपवादपदं **ग्लाने** सत्याचार्ये अपराधान् **कलापं कृत्वा** पिण्डयित्वा इत्यर्थः, स्पर्द्धकसाधूना**मागमन**माचार्यसमीपे। इयमत्र भावना-यद्याचार्यो ग्लानत्वेनाऽतिवृद्धत्वेन वाऽजङ्गमः, न शक्नोति तेषां समीपमागन्तुं तदा इतरे स्पर्द्धकद्वयसाधवो यथा मयूरः स्वपिच्छान् कलापयति एकत्र पिण्डयति, एवमपराधानेकत्र पिण्डयित्वा हृदये सम्यगवधार्य गुरुसमीपमागत्यालोचयन्ति, आलोचितेषु अपराधेषु यदि प्रायश्चित्तं दातव्यं भवति तदा प्रायश्चित्तमाचार्यो दत्त्वा प्रमादाभावार्थमुपदेशं च दत्त्वा विसर्जयति॥ २७२१॥

एतदेव सविस्तरमाह—

**एवं अगडसुयाणं, वीसु ठियाणं तु तीसु गामेसु ।**
**लहुया असंथरंते, तेसि अणिंताण वी लहुतो ॥ २७२२ ॥**

सर्वेषां यद्याचार्येण समं नास्ति क्षेत्रं यत्र वसतिः संस्तरणं च भवति, अथवाऽस्ति वसतिः संस्तरणं न विद्यते, यदि वाऽस्ति संस्तरणं न पुनर्वसतिः। **एवमेतैः** कारणै**स्त्रिषु** विष्वक् **ग्रामेषु विष्वक् स्थिता अकृतश्रुता**स्तेषा**मसंस्तरणे** तथास्थितानां यद्याचार्यो द्वयोरितरयोः स्पर्द्धकयोः प्रतिदिवसं सारां न करोति तदा प्रायश्चित्तं चत्वारो **लघुकाः**। स्पर्द्धकस्य साधवो यद्याचार्यमनागच्छन्तं न गवेषयन्ति तदा **तेषामप्यनागच्छतां** (गवेषयतां) **मासलघुः** ॥ २७२२ ॥

**एगदिणं एक्केक्के, तिठाणट्ठाण दुब्बलो वसति ।**
**अह सो अजंगमो च्चिय, ताहे इयरे तहिं एंति ॥ २७२३ ॥**

अथ ग्लानत्वेन वृद्धत्वेन वा दुर्बलतथा न प्रतिदिवसं त्रिषु स्पर्द्धकेष्वागन्तुं शक्नोति तदा स **दुर्बल आचार्यः त्रिस्थानस्थानां** स्पर्द्धकाना**मेकैकस्मिन्** स्पर्द्धके **एकैकं दिनं वसति**। यथा च वसति तथा प्रागेवोक्तम्। अथ स आचार्योऽतिवृद्धत्वेन ग्लानत्वेन[वा]**ऽजङ्गमो** जातस्त**त इतरे** स्पर्द्धकद्वयसाधवस्**तत्रा**ऽऽचार्यसमीपे **आगच्छन्ति,** तेषामपि विधिर्मूलगाथायामुक्तः ॥ २७२३ ॥

अथवा तत्रान्यः प्रकारस्तमेवाह—

**एइ व पडिच्छए वा, मेहावि कलावकाउमवराधे ।**
**अतिदूरे पुण पणए, पक्खे मासे परतरे वा ॥ २७२४॥**

यस्तेषां स्पर्द्धकसाधूनां मध्ये कोऽपि साधु**र्मेधावी** सर्वेषां साधूनामपराधान् हृदये धारियतुमलं तेन स्पर्द्धकसाधव आलोचयन्ति तद्यथा-स तेषा**मपराध**पदानि **कलापं कृत्वा** हृदये संपिण्ड्याचार्यसमीपमागत्याऽऽलोचयति। तानि चाऽऽचार्यः श्रुत्वा यद्यापन्नाः प्रायश्चित्तं ततो यत् येनापन्नं प्रायश्चित्तं तमेनमित्थं वाहयेदिति भणित्वा प्रेषयति। सोऽपि च साधुस्तेषां तत् कथयति प्रायश्चित्तं च, तेऽपि साधवस्तद्वहन्ति। **पडिच्छए व** त्ति, अथवा आचार्य आत्मीयात् स्पर्द्धकात् विनिर्गत्य येन प्रदेशेन इतरौ स्पर्द्धकावागच्छतस्तस्मिन् प्रदेशे अन्तरा प्रतीक्षमाणस्तिष्ठति, तत्र स्पर्द्धकसाधव आगच्छन्ति एको वा मेधावी, अत्राप्यालोचनादिकं तथैव । **अइदूरे**त्यादि, यद्यतिदूरे स्थितास्तदा **पञ्चमे** पञ्चमे दिवसे यदि वा **पक्षेण** अथवा **मासेन** मासेन **परतरे वे**ति, परतरेण वा द्व्यर्धमासादिना समागच्छन्ति आगत्य चाचार्यादिसमीपे शोधिं कुर्वन्ति ॥ २७२४॥

**सूत्रम्— से गामंसि वा जाव रायहाणिंसि वा अभिनिव्वगडाए अभिनिदुवाराए**

**अभिनिक्खमणपवेसणाए नो कप्पइ बहुसुयस्स बब्भागमस्स एगाणियस्स भिक्खुस्स वत्थए, किमंग पुण अप्पसुयस्स अप्पागमस्स ? ॥ ६ ॥**

'से गामंसि वा' इत्यादि । अत्र सम्बन्धप्रतिपादनार्थमाह—

**अगडसुयाण न कप्पति, वीसु मा अइप्पसंगतो सुयवं ।**
**एगाणितो वसेज्जा, निकायणं चेव पुरिसाणं ॥ २७२५ ॥**



गीतार्थस्यापि पृथक् वसतौ निवासनिषेधः

अनन्तरसूत्रे **अकृतश्रुतानां न कल्पते विष्वक्** वास इति श्रुत्वा **माऽतिप्रसङ्गतः श्रुतवान् एकाकी वसेदि**त्येवमर्थमिदं सूत्रम्। तथा **निकाचनं** च नियमश्च पुरुषाणामकृतश्रुतानां कृतमनेन सूत्रेण, तथाहि-यदि कृतश्रुतस्यापि न कल्पते एकाकिनो वासः किमङ्ग पुनरकृतश्रुतस्य? सुतरामेकाकिनो न कल्पते वास इत्येष सूत्रसम्बन्धः ॥ २७२५ ॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

अथ **ग्रामे वा** नगरे वा **यावद् राजधान्यां वा अभिनिर्वगडायामभिनिर्द्वारायामभि-निष्क्रमणप्रदेशाया**मेतेषां त्रयाणामपि पदानां व्याख्यानं पूर्ववत्, **न कल्पते बहुश्रुतस्य** सूत्रापेक्षया [ **बह्वागमस्य अर्थापेक्षया** ] **एकाकिनो भिक्षोर्वस्तुं, किमङ्ग पुनरल्पागम-**

**स्याल्पश्रुतस्येति** सूत्रसङ्क्षेपार्थः ॥ सम्प्रति **भाष्यविस्तरः**—

**अंतो वा बाहिं वा, अभिनिव्वगडाए ठायमाणस्स ।**
**गीयत्थे मासलघु, गुरुतो मासो अगीयत्थे ॥ २७२६ ॥**

**अन्तरुपाश्रयस्य अभिनिर्वगडायां** पृथक् परिक्षेपायां वसतौ यथा एकस्यां वलभ्यां विष्वक् अपवरके **बहि**रुपाश्रयस्याभिनिर्वगडायामन्यस्मिन्[1] प्रतिश्रये यदि गीतार्थो भिक्षुर्वसति तदा तस्य तत्र **तिष्ठतो गीतार्थस्य** प्रायश्चित्तं **मासलघु अगीतार्थस्य गुरुको मासः** ॥ २७२६ ॥

साम्प्रतमन्तर्बहिर्वा गृहस्य या अभिनिर्वगडा तस्याः प्रकारानाह-

**अंतो निवेसणस्स, साहीमादीव जाव सग्गामो ।**
**घरवगडाए सुत्तं, एमेव य सेसवगडासु ॥ २७२७ ॥**

**निवेशनस्य** गृहस्याऽन्तरभिनिव्वगडो अथवा निवेशनात् बहिरन्या वसतिरभिनिर्वगडा तस्यां मुख्यतो द्रष्टव्यम्, **एवमेव शेषवगडासु** निवेशनाद्बहिरभिनिर्वगडाप्रकारेषु च। तत्र गीतार्थानामगीतार्थानां भिक्षूणामेकाकिनां वसतां प्रायश्चित्तं तदेव प्रागुक्तम् ॥ २७२७ ॥

१. निर्विग॰ सं. । एवमग्रेऽपि

न केवलं प्रायश्चित्तं किन्त्वन्येऽपि च दोषाः। तथा चाह—

**आणादिणो य दोसा, विराहणा होइ संजमायाए ।**
**लज्जा-भय-गोरव धम्मसड्ढारक्खा चउद्धा ॥ २७२८॥**

अन्तर्निवेशनस्याभिनिर्वगडायां वसतौ तिष्ठत **आज्ञादयो दोषाः** । तथा **संयमविराधना** आत्मविराधना । एते यथा प्राक्‌चतुर्थपञ्चमातिशये भाविते, तथा भावनीये। यदि पुनरनभिनिर्वगडायां वसतौ वसति तदा पापं कर्त्तुमिच्छतो **लज्जातो भयतो गौरवतो धर्मश्रद्धातो वा** रक्षा **चतुर्विधा** स्यात्। किमुक्तं भवति? अनभिनिर्वगडायां वसतौ वसन् संयमविराधनारूपमात्मविराधनारूपं वा पापं लज्जादिभ्यो न कुर्यादपि ॥ २७२८॥

तत्र प्रथमतो लज्जाद्वारं भावयति—

**लज्जणिज्जो उ होहामि, लज्जए वा तमायरं ।**
**कुलागमतपस्सी वा, सपक्खपरपक्खतो ॥ २७२९॥**

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्यहं हस्तकर्माद्यन्यद्वा पापं समाचरिष्यामि तदा **लज्जनीयो भविष्यामि,** लज्जितश्च कथं कुलस्य गणस्य सङ्घस्य आगमज्ञस्य वा तपस्विनो वा स्वपक्षस्य श्रावकादेः परपक्षस्य वा परतीर्थिकादिरूपस्य मुखं दर्शयिष्यामि? **अथवा तत्पापमाचरन् कुलागमतपस्विस्वपक्ष-परपक्षेभ्यो लज्जते।** यथा अहमेवमाचरन् कथमात्मीयं मुखं तेषां दर्शयिष्यामि? एवं लज्जातः पापं न करोति ॥ २७२९॥

सम्प्रति भयद्वारभावनार्थमाह—

**असिलोगस्स वा वाया, जो अतिसंकति कम्मसं ।**
**तहावि साहु तं जम्हा, जसो वण्णो य संजमो ॥ २७३०॥**

**अश्लोकस्य वा** अवर्णस्य वा **वादात्** प्रवादात् **यः कर्म** अशुभासेवनारूप**मतिशयेन शङ्कते**, अपकीर्त्तिप्रवादभयान्न कुरुते इत्यर्थः। **तथापि** तस्य **तत्** अशुभकर्मानाचरणं **साधु,यस्मा**त्तेन यशोऽभिकाङ्क्षितं, **यशो वर्णः संयम** इत्येकार्थम्। **'जसो त्ति वा संजमो त्ति वा वण्णो त्ति वा एगट्ठं'** इतिवचनात् । ततः परमार्थतः संयमोऽपेक्षित इति तदनाचरणं श्रेयः॥ २७३०॥



For Private And Personal Use Only

सम्प्रति यशः संयम इत्येकार्थतायां भगवद्वचनमुपदर्शयति—

**जसं समुपजीवंति, जे नरा वित्तमत्तणो ।**
**अलेस्सा तत्थ सिज्झंति, सलेसा उ विभासिया ॥ २७३१ ॥**

**ये नरा** मनुष्या **वृत्तमात्मन** इच्छन्ति **ते यशः समुपजीवन्ति** संयममुपजीवन्ति इत्येतत् **व्याख्याप्रज्ञप्तौ** राशियुग्मशते भणितम् । तथा च तद्ग्रन्थः– '**मणुस्सा णं भंते ! किं आयजसं उवजीवंति**'? आत्मसंयममित्यर्थः, '**आय अजसं उवजीवंति**' आत्माऽसंयममित्यादि। एवं यशःसंयमावेकार्थावुक्तौ । **तत्र** ये **अलेश्याः** शैलेशीप्रतिपन्नास्ते नियमात् **सिध्यन्ति, सलेश्याः पुनर्विभाषिता** विकल्पिताः, केचित् सिध्यन्ति केचित् न सिध्यन्ति इत्यर्थः । तत्र ये भव्यास्ते सिध्यन्ति। तत्राहमशुभकर्म समाचरन्न भव्यो भविष्यामीति भयतो नाशुभकर्म समासेवते ॥२७३१ ॥

**दाहिंति गुरू दंडं, जइ नाहिंति तत्ततो ।**
**तं च वोढुं न चाइस्सं, घायमादी उ लोगतो ॥ २७३२ ॥**

यदि परस्त्र्यादिकं सेविष्ये ततो **यदि गुरवस्तत्त्वतो ज्ञास्यन्ति** तदा **दण्डं** प्रायश्चित्तमुग्रं

**दास्यन्ति**। तथा उग्रं प्रायश्चित्तं **वोढुमहं** न शक्ष्ये नापि **लोकतः** परयुवतिभर्त्रादिलक्षणात् **घातादिकं** घातवधादिकं सोढुं शक्ष्ये इति भयतो नाऽऽसेवतेऽशुभकर्म ॥२७३२॥ गतं भयद्वारमधुना गौरवद्वारमाह—

**जो हं सइरकहासुं पि, चकामि गुरुसन्निहों[1]।**
**सोऽहं कहमुवासिस्सं, तमणायारदूसितो ॥ २७३३ ॥**

**योऽहं स्वैरकथास्वपि गुरुसन्निधौ** गौरवेण **चकास्मि सोऽहमनाचारदूषितस्तं** गुरुं **कथमुपासिष्ये** अनाचारदूषिततया तथारूपगौरवासम्भवात् ॥ २७३३ ॥

**लोए लोउत्तरे चेव, गुरुवो मज्झ सम्मता ।**
**मा हु मज्झावराहेण, होज्ज तेसिं लहुत्तया ॥ २७३४ ॥**

**मम गुरवो लोके लोकोत्तरेऽपि च सम्मताः**। ततो **ममापराधेन मा तेषां लघुता भूयात्** ॥ २७३४ ॥

१. सन्निहि-ला. ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा—

**माणणिज्जो उ सव्वस्स, न मे कोइ न पूयए ।**

**तणाण लहुतरो होहं, इति वज्जेति पावगं ॥ २७३५॥**

अहं सर्वस्यापि **माननीयो न मां कश्चिन्न पूजयति**। यदि पुनरधुना पापमाचरिष्यामि ततस्**तृणेभ्यो**ऽपि **लघुतरो भविष्यामीति** हेतोः **पापं** मैथुनासेवनादिकं **वर्जयति** ॥ २७३५ ॥

गतं गौरवद्वारम् । अधुना धर्मश्रद्धाद्वारमाह—

**आयसक्खियमेवेह, पावगं जो विवज्जए ।**

**अप्पेव दुट्ठसंकप्प, रक्खा सा खलु धम्मतो ॥ २७३६॥**

**यः पापकर्मा**ऽऽ**त्मसाक्षिकमेव विवर्जयति** स परमार्थतो धर्माधिकारीत्येवं मन्यमानस्य, अपिः सम्भावनायां, **दुष्टसंकल्पस्य रक्षा** मूलत एवानुत्थानमुत्थितस्य विफलीकरणं वा, **सा खलु धर्मतो** भवति॥ २७३६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्मश्रद्धाया एव महत्फलमुपदर्शयति—

**निस्सग्गुस्सग्गकारी य, सव्वतो छिन्नबंधणो ।**
**एगो वा परिसाए वा, अप्पाणं सोऽभिरक्खइ ॥ २७३७॥**

यस्तीव्रधर्मश्रद्धाभावतो **निसर्गत** एव स्वभावत एव **उत्सर्गकारी सर्वतः छिन्नबन्धनः** सर्वत्र ममत्वरहित इत्यर्थः, **स एको वा** एकाकी वा **पर्षदि वा** व्यवस्थित **आत्मानमभिरक्षति**॥ २७३७॥

तदेवमनभिनिर्वगडायां वसतौ वसतो लज्जादीनि संयमविराधनारक्षकाण्युक्तानि, अभिनिर्वगडायां पुनर्वसतः शुभोऽशुभो वा मनःपरिणाम उपजायते । तथा चाह—

**मणपरिणामो वीय, सुभासुभे कंटएण दिट्ठंतो ।**
**खिप्पं करणं जह लंखियव्व तहियं इमं होइ ॥ २७३८॥**

यथा गङ्गादीनां नदीनां वातेनाऽनन्तराऽनन्तरमनेका वीचय उत्पद्यन्ते एवं जीवस्यान्योऽन्यः **मनःपरिणाम** उपजायते । स च द्विधा—**शुभोऽशुभश्च। दृष्टान्तः कण्टकेन** वृश्चिकलाङ्गुलेन,



For Private And Personal Use Only

**यथा** वा **लङ्खिकायाः क्षिप्रं करणं तथैवेदं भवति।** एवं जीवस्य शुभोऽशुभश्च परिणामः क्षणेनोपजायते क्षणेन वाऽपैति इत्यर्थः ॥ २७३८॥

अथ कथं मनसोऽनवस्थानमत आह—

**परिणामाणवत्थाणं, सति मोहे उ देहिणं ।**
**तस्सेव उ अभावेण, जायते एगभावया ॥ २७३९॥**

मनः**परिणामानामनवस्थानं देहिनां** प्राणिनां **सति** विद्यमाने मोहे भवति । **तस्यैव तु** मोहस्या**ऽभावेन जायते एकभावता** मनःपरिणामस्य एकरूपता। तदेवं मनःपरिणामो वीचिरूपो व्याख्यातः॥ २७३९॥

इदानीं शुभाऽशुभपरिणामप्रतिपादनार्थमाह—

**जहाऽवचिज्जए मोहो, सुद्धलेसस्स झायणो ।**
**तहेव परिणामो वि, विसुद्धो परिवड्ढए ॥ २७४०॥**

**यथा शुद्धलेश्याकस्य ध्यायिनो** धर्मध्यायिनः शुक्लध्यायिनो वा **मोहोऽपचीयते तथैव विशुद्धपरिणामो** विवर्द्धते ॥ २७४० ॥

उक्तः शुभपरिणामः। अशुभपरिणामप्रतिपादनार्थमाह—

**जहा य कम्मिणो कम्मं, मोहणिज्जं उदिज्जइ ।**
**तहेव संकिलिट्ठो से, परिणामो विवड्ढती ॥ २७४१ ॥**

**यथा च कर्मिणः** संक्लिष्टलेश्यास्थानवर्त्तिन आर्त्तध्यायिनो रौद्रध्यायिनश्चेत्यर्थः, **कर्म मोहनीयं** कषायनोकषायरूप**मुदीर्यते तथैव से** तस्य **संक्लिष्टः परिणामो विवर्द्धते** ॥ २७४१ ॥

सम्प्रति शुभाऽशुभपरिणामविवर्धनं[1] दृष्टान्तेन भावयति—

**जहा य अंबुनाहम्मि, अणुबद्धपरंपरा ।**
**वीई उपज्जए एवं, परिणामो शुभोऽशुभो ॥ २७४२ ॥**

---

१. °विवर्तनं-मु. ॥

**यथा अम्बुनाथे** समुद्रे **अनुबद्धपरम्परा वीचिरुत्पद्यते एवं** जीवस्य **परिणामः शुभोऽशुभ**श्चानुबद्धपरम्पराक उपजायते॥ २७४२॥

शुभाशुभपरिणामवैचित्र्यमेव दृष्टान्तेन विभावयिषुः कण्टकदृष्टान्तं प्रागुपन्यस्तं भावयति—

**कण्हगोमी जहा चित्ता, कंटकं वा विचित्तियं ।**
**तहेव परिणामस्स, विचित्ता कालकंडया ॥ २७४३॥**

**कृष्णगोमी** कर्णशृगाली यथा सा कृष्णादिभि रेखाभि**श्चित्रा** विचित्रवर्णा भवति। वृश्चिकस्य महाविषस्य लाङ्गूलं **कण्टक** उच्यते । यथा स कृष्णादिरेखाभिश्चित्रितो नानाप्रकारो भवति तथैव परिणामस्य विचित्राणि **कालभेदेन कण्डकान्य**सङ्ख्येयस्थानात्मकानि भवन्ति । अथ कथं शुभादशुभे अशुभाद्वा शुभे परिणामे याति ? तत्र लङ्खिकादृष्टान्तमाह—

**लंखिया जहा खिप्पं, उप्पतित्ता समोयए ।**
**परिणामो तहा दुविहो, खिप्पं एति अवेति य ॥ २७४४ ॥**

**यथा** वा **लङ्खिका** क्षिप्रमुत्प्लुत्य क्षिप्रमेव **समवपतति, तथा परिणामो द्विविधः**

शुभोऽशुभश्च **क्षिप्रमागच्छति अपैति च** ॥ २७४४॥

एवं शुभादशुभेऽशुभाद्वा शुभे परिणामे कियन्ति सङ्ख्ययाऽध्यवसायस्थानानि? इति चेद् अत आह—

**लेस्साठाणे उ एक्केक्के, ठाणा संखमतिच्छिया ।**
**किलिट्ठेणेतरेणं वा, जे उ भावेण खुंदती ॥ २७४५॥**

**एकैकस्मिन् लेश्यास्थाने सङ्ख्यामतिक्रान्तानि** सङ्ख्यातीतानि **स्थानानि** परिणामस्थानानि भवन्ति यानि **क्लिष्टेन** संक्लिष्टेन **इतरेण** विशुद्धेन भावेन [ **वा** ] **खुन्दति** आस्कन्दति प्राप्नोतीत्यर्थः। अथ कः संक्लिष्टः को वा इतरो भावः? इति चेत् उच्यते-इह कृष्णलेश्यापरिणामात् नीललेश्यापरिणामो विशुद्धः, नीललेश्यापरिणामादपि कापोतलेश्यापरिणामो विशुद्धः। तस्मादपि तेजोलेश्यापरिणामो विशुद्धः। ततोऽपि पद्मलेश्यापरिणामः, ततोऽपि शुक्ललेश्यापरिणामः। तथा शुक्ललेश्यापरिणामात् पद्मलेश्यापरिणामः क्लिष्टः। तस्मादपि पद्मलेश्यापरिणामात् तेजोलेश्यापरिणामः क्लिष्टः। तस्मादपि कापोतलेश्यापरिणामः क्लिष्टः ततोऽपि नीललेश्यापरिणामः। तस्मादपि

कृष्णलेश्यापरिणामः । उक्तं च- "**क्रमशः स्थितासु लेश्यागतासु जीवस्य भावपरिणतिष्ववपतना [ द् ] उत्पतनाद्वा संक्लिश्येद्वा विशुध्येद्वा**" [ ] ॥ २७४५ ॥

सम्प्रत्येकैकस्मिन् लेश्यास्थाने परिणामसङ्ख्यातीतत्वं भावयति—

**भवसंघयणं चेव, ठितिं वाऽऽसज्ज देहिणं ।**
**परिणामस्स जाणिज्जा, विवड्ढी जस्स जत्तिया ॥ २७४६ ॥**

भव एव संहननं **भवसंहननं** दृढं भवं देहभवं वाधिकृत्येत्यर्थः। तथा **स्थितिं** च जघन्यादिभेदभिन्नामा**श्रित्य देहिनां** नारकादीनां **यस्य परिणामस्य** कृष्णलेश्यादिरूपस्य **यावती विवृद्धिस्**तस्य तावतीं **जानीयात्**। तथाहि-नारकाणां देवतानां च जघन्यायां स्थितौ कृष्णलेश्यापरिणामा नानाजीवापेक्षया तरतमभेदेन चिन्त्यमाना असङ्ख्येयाः। एवं समयाधिकायामपि जघन्यस्थितौ द्विसमयाधिकायामपि जघन्यस्थितावेवं तावद् वाच्यं यावदुत्कृष्टं स्थितिस्थानम्। एवं कृष्णलेश्यायां परिणामा असङ्ख्येया भवन्ति। एवं नीललेश्या[ दि ]गतस्य॥ २७४६ ॥

विशुद्धस्य भावस्य फलमाह—

**विसुज्झंतेण भावेण, मोहो समवचिज्जइ ।**
**मोहस्सावचए वावि, भावसुद्धी वियाहिया ॥ २७४७॥**

**विशुद्ध्यता भावेन** लेश्यागतेन **मोहो** मोहनीयं कर्म **समपचीयते** हानिमुपगच्छति, मोहस्यापचये वाऽपि **भावशुद्धि**र्जीवस्य परिणामविशुद्धि**र्व्याख्याता** प्रतिपादिता यया कालक्षेपमृते केवलश्रिया लाभो भवति॥ २७४७॥

'अथ मोहनीयं कर्म उदयप्राप्तं शुभपरिणामेन क्षपयितुं शक्यते किंवा न?' इति। 'शक्यते' इति ब्रूमः। तथा चाह—

**उक्कढंतं जहा तोयं, सीयलेण झविज्जए ।**
**गदो वा अगदेणं तु, वेरग्गेण तहोदओ ॥ २७४८॥**

**यथा उत्क्वथ्यमानं तोयं शीतलेन** तोयेन **क्षप्यते । गदो वा अगदेन तथा** मोहनीयस्योदयो **वैराग्येण** क्षप्यते ॥ २७४८॥

तदेवमुक्तं प्रसक्तानुप्रसक्तम्, अधुना प्रकृते योजनामाह—

**असुभोदयनिप्फण्णा, संभवंति बहुविहा ।**
**दोसा एगाणियस्सेवं, इमे अन्ने वियाहिया ॥ २७४९ ॥**

**अशुभोदयेन** अशुभकर्मोदयेन **निष्पन्ना** अन्तरुपाश्रयस्याभिनिर्वगडायां वसतावेवमेकाकिनो **बहुविधा दोषाः**। तदेवमन्तरुपाश्रयस्याभिनिर्वगडायां दोषा उक्ताः । सम्प्रति बहिरुपाश्रयस्याभिनिर्वगडायां दोषानाह—**इमे** वक्ष्यमाणा **अन्ये** दोषा **एकाकिनो व्याख्याताः** प्रतिपादिताः ॥ २७४९ ॥

तानेव द्वारगाथया संजिघृक्षुराह—

**मिच्छत्त१सोहि२सागारियादि३ गेलण्ण४ खद्ध५पडिणीए६ ।**
**बहिपेल्लणि७त्थि८ वाले९, रोगे१० तह सल्लमरणे य११ ॥२७५० ॥** दारगाहा ॥



एकाकिनो **मिथ्यात्वगमनं**१,तथा **शोधेरभावः**२,तथा **सागारिकप्रवेशो** वसतौ, **आदिशब्दात्** चलत्कुट्यां वसतौ कुड्यादिप्रपतनत आत्मविराधनेति परिग्रहः३,तथा **ग्लानत्वे**

प्रतिजागरणाभावः४,तथा एकाकिनो मन्दाग्निर्निवारकाभावात् **प्रचुरभक्षण**सम्भवः५ तथा च ग्लानत्वादिभावः । तथा एकाकी प्रत्यनीकस्य गम्यो भवति ६। तथा उद्भ्रामका दण्डपाशादयो नगररक्षा एकाकिनं 'चौरो वा हेरिको वा न ज्ञायते कथमन्यथा एकाकी?' इति विचिन्तयन्तो **बहिः प्रेरयेयुः** । ग्रामान्नगराद्वा बहिर्निष्काशयेयुरिति भावः७। तथा **स्त्री**दोषा एकाकिनो जायन्ते ८ तथा **व्यालेन** दष्टस्य भैषजाकरणसम्भवः९। **रोगस्य** च वृद्धिगमनम् १०। **तथा सशल्यस्य** सतो **मरणम्** ११ इत्येष द्वारगाथासङ्क्षेपार्थः ॥ २७५०॥

साम्प्रतमेनामेव विवरीषुः प्रथमतो मिथ्यात्वद्वारं शोधिद्वारं चाह—

**उगाढमप्पसहायं तु, पण्णवेंति कुतित्थिया** । दारं १
**समावण्णो विसोहिं च कस्स पासे करिस्सइ?॥ २७५१** ॥ दारं २

**ओगाढमप्यसहायं कुतीर्थिकाः प्रज्ञापयन्ति** अतो मिथ्यात्वगमनं तथा **समापन्नः** प्रायश्चित्तं **कस्य पार्श्वे शोधिं करिष्यति** नैव कस्यचित् पार्श्वे, ततः शोध्यभावः॥ २७५१॥

सम्प्रति सागारिकद्वारं ग्लानद्वारं चाह—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भया आमोसगादीणं, सेज्जं वयति सारियं । दारं ३।**

**असहायस्स गेलण्णे, को से किच्चं करिस्सइ ? ॥ २७५२॥** दारं ४।

[1] **आमोषकादीनां भयात्** तस्मिन्नेकाकिनि सति शून्यां **शय्यां** वसतिं दृष्ट्वा तां **सागारिको व्रजति**। द्वारगाथायामादिशब्दस्य व्याख्यानं तत्रैव कृतम् । तथा **असहायस्य से** तस्य **ग्लानत्वे** सति **कः कृत्यं करिष्यति?** ॥ २७५२॥

खद्धप्रत्यनीकप्रेरणद्वाराण्याह—

**मंदग्गी भुंजए खद्धं, ऊसढं ति निरंकुसो ।** दारं ५ ।

**एगो परुट्ठगम्मो य, पेल्ले उब्भामया व णं ॥ २७५३॥** दारं ७।



एकाकी निवारकाऽभावात् **निरङ्कुशः, ऊसढं** ति उत्कृष्टमिति कृत्वा **मन्दाग्निः प्रचुरं भुङ्क्ते** ततो ग्लानत्वादिदोषसम्भवः। तथा **एको**ऽसहायः **प्ररुष्टस्य** प्रत्यनीकस्य **गम्यो** भवति। तथा **उद्भ्रामका** नगरादिरक्षका एकाकिनममुं चौरादिरिति कृत्वा नगरादेर्बहिः **प्रेरयेयुः** ॥ २७५३ ॥

---

१. आमर्शादीनां भयेन- पु. प्रे. ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अधुना स्त्रीद्वारमाह—

**वभिचारिम्मि परिणते, निंतिं दट्ठूण समणवसहीतो ।**
**पंतावणादगारो, उड्डाहो पदोसमादी ॥ २७५४॥**

**व्यभिचारी** नाम जारस्तस्मिन् **परिणते** सा स्त्री केनापि कारणेन संयतवसतिं गता भवेत्, ततः **श्रमणवसतेस्तां निर्गच्छन्तीं दृष्ट्वा अगारस्तस्या** भर्त्ता अन्यो वा निजकोऽनिजको वा तस्यामासक्तः **प्रान्तापनादि** मारणादि कुर्यात् । तथा च सति प्रवचनस्य **उड्डाहः**। प्रान्तापनाद्यभावे तस्य दर्शनस्य वा सकलस्योपरि **प्रद्वेष** उपजायते, तथा च सति तस्याऽन्यस्य वा भक्तपानादिव्यवच्छेद इत्यादयो दोषाः ॥ २७५४॥

सम्प्रति व्यालद्वारं रोगद्वारं चाह—

**वालेण वा वि डक्कस्स, को से कुणइ भेसजं?।** दारं ९।
**दीहरोगे विवड्ढिं च, गते किं सो करिस्सइ ॥ २७५५ ॥** दारं १०।



For Private And Personal Use Only

**व्यालेन** सर्पादिना **दष्टस्य से** तस्य **को भैषजं करोति?** नैव कश्चिदेकाकित्वात् । तथा दीर्घरोगे कृत्याकरणतो विवृद्धिं गते स पश्चात् किं करिष्यति? नैव किञ्चित् केवलं मरिष्यतीत्यर्थः ॥ २७५५ ॥

शल्यमरणमाह—

**सल्लुद्धरणविसोही, मए य दोसा बहुस्सुए वा वि ।**
**सविसेसा अप्पसुए, रक्खंति परोप्परं दो वि ॥ २७५६ ॥**

**शल्योद्धरणविशोधि**रेकाकिनः शल्योद्धरणाभावस्ततो **मृते**ऽपि **च** सशल्ये तस्मिन् **दोषाः।** तथाहि—सशल्यो यो म्रियते स दीर्घकालं संसारमनुपरिवर्त्तते इति **बहुश्रुते चाप्ये**काकिनि मृते दोषाः। तथाहि-सोऽप्येकाकी मृतो गृहिणा बलीवर्द्दाभ्यां मल्लेन राजकुलेन वा निष्काश्यते तथा वा लोकनिन्दाप्रवृत्तेः प्रवचनव्याघातः। **सविसेसा अप्पसुए** इति, अल्पश्रुते एकाकिनि सविशेषा दोषाः। तथाहि-बहुश्रुत आलोचनार्हाभावे सिद्धानामन्तिके आलोचयति, अल्पश्रुतस्त्वमुं विधिं न जानातीति सशल्य एव म्रियते, यदि पुनर्द्वावपि बहुश्रुताऽल्पश्रुतावभिनिर्वगडायां वसतौ परस्परं सम्भूय वसतस्तदा **द्वावपि** तौ **परस्परं रक्षयतः** ॥ २७५६ ॥

अधुना 'सविसेसा अप्पसुए' इत्येतद् व्याख्यानयति—

**अप्पेव जिण-सिद्धेसु, आलोएही बहुस्सुतो ।**
**अगीतो तमजाणंतो, ससल्लो जाति दुग्गतिं ॥ २७५७॥**

**अप्येवमेव**मपि एकाक्यपीत्यर्थः, **बहुश्रुतो जिनेषु** अर्हत्सु **सिद्धेषु** च मनसि सम्प्रधारितेषु तेषां पुरत **आलोचयिष्यति। अगीतो** अबहुश्रुतः पुनस्तं विधि**मजानन् सशल्यो** मृत्वा **याति दुर्गति**मतः सविशेषा [दोषा] अल्पश्रुते ॥ २७५७॥

सम्प्रति 'रक्खंति परोप्परं दो वि' त्ति व्याख्यानार्थमाह—

**सीहो रक्खति तिणिसे, तिणिसेहि व रक्खतो तहा सीहो ।**
**एवण्णमण्णसहिया, बिइयमद्धाणमादीसु ॥ २७५८॥**

**सिंहो रक्षति तिनिशान्** तिनिशवृक्षगुहां, **तिनिशैरपि तिनिश**वृक्षगुहयाऽपि **सिंहो रक्ष्यते।** एवमभिनिर्वगडायां वसतौ वसन्ता**वन्योन्यसहितौ** परस्परं रक्षयतः । अत्रैवाऽपवादपदमाह—

**द्वितीयपदमपवादपदमध्वानं** प्रतिपन्नः कारणेनैकाकी अन्यसम्भोगिकानां पार्श्वस्थादीनां वा वसतेर्विष्वक् अपवरके निवेशनादिषु वा वसेत्, **आदि**शब्दादशिवादिगृहीतो वा विष्वक् तिष्ठेत् ॥ २७५८ ॥

**सूत्रम्- से गामंसि वा जाव रायहाणिंसि वा एगवगडाए, एगदुवाराए, एगनिक्खमणपवेसाएं कप्पइ बहुसुयस्स बब्भागमस्स एगाणियस्स भिक्खुस्स वत्थए, उभओ कालं भिक्खुभावं पडिजागरमाणस्स ॥ ७ ॥**

'से गामंसि वा जाव रायहाणिंसि वा' इत्यादि, अस्य सूत्रस्य सम्बन्धप्रतिपादनार्थमाह—

**कारणतो वसमाणो, गीतोऽगीतो व होति निद्दोसो ।**
**पुव्वं च वण्णिया खलु, कारणवासिस्स जयणा उ ॥ २७५९ ॥**

**कारणतो गीतार्थोऽगीतार्थो** वा यतनया **वसन् निर्दोषो भवति** । सा च **यतना कारणत** एकाकिनो **वसनशीलस्य पूर्वमुक्ता** एतदर्थख्यापनार्थमिदं सूत्रम् ॥ २७५९ ॥

अधुना सूत्रत एव सम्बन्धमाह—

**सुत्तेणेव उ सुत्तं, जोइज्जइ कारणं तु आसज्ज ।**
**संबद्धघरुव्वरए, कप्पति वसियं बहुसुयस्स ॥ २७६०॥**

**सूत्रेणैव सूत्रं योज्यते** सम्बध्यते तद्यथा-अनन्तरसूत्रेणैकाकिनो बहुश्रुतस्य वासो निषिद्धः,अनेन तु सूत्रेणेदं प्रतिपाद्यते कारणमाश्रित्याऽध्वप्रतिपत्त्यादिकं **सम्बद्धगृहोद्वरके बहुश्रुतस्य वस्तुं कल्पते** इत्येष सूत्रसम्बन्धः ॥२७६०॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या।

**अथ ग्रामे वा नगरे वा यावद्राजधान्यामेकवगडाया**मेकपरिक्षेपाया**मेकद्वारायामेक-निष्क्रमणप्रवेशायां** वसतौ **बहुश्रुतस्य बह्वागमस्य भिक्षोर्वस्तुं कल्पते,** केवल**मुभयकालं भिक्षुभावं प्रतिजाग्रतो** भिक्षुभावश्चारित्रं तस्याविराधनार्थं या सामाचारी तां कुर्वत इत्येष सूत्रसङ्क्षेपार्थः ॥ अधुना **भाष्यनिर्युक्ति**विस्तरः। तत्र 'भिक्खुभावं पडिजागरणमाणस्सेति' व्याख्यानार्थमाह **भाष्यकृत्**—

सूत्र ७ गाथा २७५९-२७६४ कारणे पृथग्वासानुज्ञा

**चरणं तु भिक्खुभावो, सामायारी य जा तदट्ठाए ।**
**पडिजागरणं करणं, उभयो कालं अहोरत्तं ॥ २७६१॥**



For Private And Personal Use Only

भिक्षोर्यथावस्थितस्य भावो **भिक्षुभावश्चरणं, तदर्थं** तस्य चारित्रस्याविराधनार्थं **या सामाचारी** तस्याः **प्रतिजागरणं** नाम **करणमुभयकालमह्नि रात्रौ** च । आचार्योऽपि तस्यैवं भिक्षुभावं प्रतिजाग्रतो गोसे रात्रिकं पृच्छति, दिवसेऽपि भक्तपानादिचिन्तां करोति, विकाले च दैवसिकं पृच्छति, सुखेन वृत्तस्तव दिवस इति। एवमुभयकालमाचार्यस्तं प्रतिजागर्ति॥ २७६१ ॥

सम्प्रति **निर्युक्तिविस्तरः**—

**वक्खारे कारणम्मी, निक्कारण पुव्ववण्णिया दोसा ।**
**किं पुण होज्जा कारण, तद्दोसाई मुणेयव्वा ॥ २७६२॥**

**वक्खारो** नाम एकस्यां वलभ्याम् अभिनिर्वगडो विष्वक् अपवरकस्तस्मिन् **कारणे** सति वसति। एतद्विषयमिदं सूत्रम्। यदि पुनः **कारणमृते** विष्वगपवरके वसति तदा **पूर्ववर्णिता** मिथ्यात्वादयो **दोषाः। किं पुनः भवेत्** तत्**कारणं** यद्वशात् पृथगपवरके तिष्ठति? तत आह-**त्वग्दोषादीनि** त्वग्दोषक्षयव्याध्यादीनि कारणानि **ज्ञातव्यानि**। तथाहि-त्वग्दोषिकादिकमाचार्यो यदि निष्काशयति तदा तस्य प्रायश्चित्तं चतुर्गुरुकं, तस्मान्न स निर्यूहितव्यः किन्तु पृथगपवरके स्थितः परिपालनीयः ॥ २७६२॥

स च त्वग्दोषो द्वाभ्यां प्रकाराभ्यां भवति तथा चाह—

**संदंतमसंदंते, अस्संदणसित्त-मंडलपसुत्ती ।**
**किमि पूयं रसिगा वा, पस्संदति तत्थिमा जयणा ॥ २७६३॥**

द्विविधस्त्वग्दोषस्तद्यथा-**स्यन्दमानोऽस्यन्दमानश्च**। तत्राऽ**स्यन्दमानो**ऽश्रावणः**श्वित्र प्रसुप्तिर्मण्डलप्रसुप्तिश्च** । यस्तु स्यन्दमानः स **कृमीन् प्रस्यन्दते पूतं वा रसिकां** वा **तत्र** स्यन्दमाने त्वग्दोषे **इयं** वक्ष्यमाणा **यतना** ॥ २७६३॥

तानेवाह—

**संदंतो वक्खारो, अंतो बाहिरसारणा तिण्णि ।**
**जत्थ विसीएज्ज ततो, णाणादी उग्गमादी वा ॥ २७६४॥**

**स्यन्दमाने** त्वग्दोषे**ऽन्तरे**कस्यां वलभ्यां विष्वगपवरके, तस्याऽभावे एकस्मिन्निवेशने अन्यस्यां वसतौ स्थाप्यते, तत्र च वसतस्तिस्त्रः **सारणाः** साराः कर्त्तव्या **यत्र** सको **विसीदेत**।

कास्तास्तिस्रः सारा:? इत्याह-**ज्ञानादौ** ज्ञाने दर्शने चारित्रे च अथवा **उद्गमादौ** उद्गमे उत्पादनायामेषणायां च ॥ २७६४॥

अथवा अन्यथा तिस्रः सारा:, ता एवाह—

**अहवा भत्ते पाणे, सामायारीए वावि सीयंतं ।**
**एएसु तीसु सारे, तिण्णि वि काले गुरू पुच्छे ॥ २७६५॥**

**अथवे**ति प्रकारान्तरे **भक्ते पाने सामाचार्यां** च **एतेषु त्रिषु** स्थानेषु **सीदन्तं सारयन्**त्याचार्याः। यदि वा तिस्रः सारा नाम **त्रीनपि कालान् गुरुः पृच्छति** ॥ २७६५॥

कथमित्याह—

**गोसे केरिसयं ति य, कयमकयं वा किं ते आवासं ।**
**भिक्खं लद्धमलद्धं, किं दिज्जउ वा ते मज्झण्हे ॥ २७६६॥**

**पेहियमपेहियं वा, वट्टति ते केरिसिं च अवरण्हे ।**
**निज्जूहणम्मि गुरुगा, अविही परियट्टणे वा वि ॥ २७६७॥**

**गोसे** प्रातरिदं पृच्छति—'कीदृशं ते शरीरम्?' इति, तथा 'त्वया **किमावश्यकं कृतमकृतं वा?'** तथा **मध्याह्ने** पृच्छति- **भैक्षं** त्वया लब्धमलब्धं वा? **किं**वा **तव दीयताम्?'** **इति। तथा अपराण्हे** पृच्छति-'**किं** तवोपकरणं केनापि त्वया वा **प्रेक्षितम्** किं वा **न प्रेक्षितं? कीदृशं** वा ते शरीरम्?' इति यदि पुनरेवं सारां न करोति किं त्वेवमेव **परित्यजति** तदा गुरोः प्रायश्चित्तं **चत्वारो गुरुकाः।** अनिर्यूहणेऽपि **यद्यविधिना परिवर्तनं** परिपालनं कारयति तदापि चतुर्गुरुकं प्रायश्चित्तम् ॥ २७६६॥ २७६७॥

**आणादिणो य दोसा, विराहणा होतिमेहि ठाणेहिं ।**
**पासवण-फास-लाला[१]-सेए मरुएण दिट्ठंतो ॥ २७६८॥**

न केवलं प्रायश्चित्तं किं तु **आज्ञादयश्च दोषाः।** तथा **एभिर्वक्ष्यमाणैः स्थानैर्विराधना** साधूनामात्मविराधना भवति । कैः स्थानैः? इत्याह—**प्रश्रवणेन स्पर्शेन लालया स्वेदेन**

---

१. °ला प्रस्सेए मरुयदि° ॥

च प्रस्वेदेन। तथाहि-स्यन्दमानत्वग्दोषवतः प्रस्रवणस्पर्शनेनापि व्याधिरन्यत्र सङ्क्रामति, तथा गात्रस्पर्शनेन यदि वा तेन व्याधितेन ये परिभुक्ताः पीठफलकादयस्तान् यद्यव्याधितः परिभुङ्क्ते तदा व्याधिः सङ्क्रामति, तथा लालया सह भोजने व्याधिः सङ्क्रामति । तस्य प्रस्वेदेन यदि कोऽपि स्पृश्यते तदा तस्यापि व्याधिः सञ्चरति । तत्र च दृष्टान्तो **मरुकेण** सेटुकब्राह्मणेन। तत्कथानकं **चावश्यके** प्रबन्धतः कथितमिति ततोऽवधार्यम् ॥ २७६८॥

साम्प्रतमेतदेव पश्चार्द्धं व्याचिख्यासुः प्रथमतः प्रश्रवणे यतनामाह—

**पासवण अन्न असती, भूतीए लक्खे मा हु दूसियं मोयं ।**
**चलणतलेसु कमेज्जा, एमेव य निक्खमपवेसा ॥ २७६९॥**

तस्य स्यन्दमानत्वग्दोषवतः पृथक् कायिकी भूमिः कर्त्तव्या, **अन्यस्या** विष्वक्**प्रश्रवणभूमेरसति** अभावे एकस्या एव कायिक्याभूमेस्तस्य योग्यं पृथक् अवकाशं **भूत्या लक्षयति** वृषभाः यथा साधवस्तं परिहरन्ति। तथा चाह— **मा** कोऽपि त्वग्दोषव्याधितस्य **दूषितं मोकं** प्रस्रवणं **पादैराक्रमेत्**। आक्रमणे को दोषः ? इत्यत आह–आक्रान्ते तस्य प्रस्रवणे

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**चरणतले** पादतले त्वग्दोषव्याधिः **सङ्क्रामति** । तथा तस्य त्वग्दोषव्याधितस्य येनाऽवकाशेन **निष्क्रमणं प्रवेशो** वा तमवकाशं भूत्या लक्षयेत येन साधवस्तमपि परिहरन्ति । अपरिहरणे अनन्तरोदित एव दोषः ॥ २७६९ ॥

**णिंती व सो काउ तली कमेसु, संथारतो दूर अदंसणे वि ।**
**मा फासदोसेण कमेज्ज तेसिं, तच्छिक्क वत्थादि व परिहरंति ॥ २७७० ॥**

**स** स्यन्दमानत्वग्दोषी **क्रमयोः** पादयोः **तलिके** उपानहौ कृत्वा **निर्गच्छति** प्रविशति वा, योऽपि अस्यन्दमानत्वग्दोषी तस्यापि कायिकीभूमिर्विष्वक् क्रियते न पुनः पृथग् निर्गमप्रवेशस्थानम्। सम्प्रति स्यन्दमानस्याऽस्यन्दमानस्य च स्पर्शविषयां साधारणां यतनामाह- अस्यन्दनेऽपि त्वग्दोषे, आस्तां स्यन्दमाने इत्यपिशब्दार्थः। **संस्तारको दूरे** क्रियते । **मा स्पर्शदोषेण तेषां** शेषसाधूनां व्याधिः **सङ्क्रामेदिति** हेतोः। तथा न केवलं दूरे संस्तारकः क्रियते किन्तु तेन त्वग्दोषवता यत् **स्पृष्टं वस्त्रादि तत्परिहरन्ति** पूर्वोक्तादेव दोषात् । तदेवं प्रस्रवणयतना स्पर्शयतना च सप्रपञ्चोक्ता ॥ २७७० ॥

सम्प्रति लाला-स्वेदयतनामाह—



For Private And Personal Use Only

**न य भुंजंतेगट्ठा, लालदोसेण संकमति वाही ।**
**सेओ से वज्जिज्जइ, जल्लपडलंतरकप्पा य ॥ २७७१ ॥**

**न च एकार्थे** एकस्मिन् पात्रे तेन त्वग्दोषवता सह **साधवो** भुञ्जन्ते। कुतः ? इत्याह– यतो **लालादोषेण सङ्क्रामति व्याधिः**। तथा **से** तस्य त्वग्दोषवतः **स्वेदः** प्रस्वेदो **वर्ज्यते,** तथा **जल्लः** शरीरमलः, तथा तत्सत्कानि पात्र**पटलानि** तथा **आन्तरकल्पश्च** परिह्रियते व्याधिसङ्क्रमभयात्॥ २७७१ ॥

तथा चाह—

**एएहि कमइ वाही, इत्थं खलु सेउएण दिट्ठंतो ।**
**[1]कुट्ठय कच्छुअऽशिवं, नयणामय कामलादीया ॥ २७७२ ॥**

**एतैर्ज**ल्लादिभिः **व्याधि**स्त्वग्दोषव्याधिः **क्रामति। अत्र दृष्टान्तः खलु सेडुकेन** । तत एतानि परिह्रियन्ते। किं नाम त्वग्दोष एव उतान्यस्मिन्नपि रोगे ? तत आह–**कुष्ठे** क्षयव्याधौ

१. कुट्ठक्खय कच्छुयऽसिवं-ला. ॥

**कच्छ्वां** पामायाम् **अशिवे** शीतलिकायां **नयनामये** नयनरोगे **कामलादौ** एषा अनन्ततरोदिता प्रश्रवणादिविषया यतना द्रष्टव्या ॥ २७७२ ॥

**एस जयणा बहुस्सुए अबहुस्सुए न कीरते ति वक्खारो ।**
**ठावेंति एगपासे अपरीभोगम्मि उ जतीणं ॥ २७७३ ॥**

**एषा** अनन्तरोदिता **यतना बहुश्रुते** द्रष्टव्या, **अबहुश्रुते**प्येवं, नवरं स संबद्धगृहापवरके स्थाप्यते, भिन्नस्तु वक्षारोऽपवरको न क्रियते । सम्बद्धगृहापवरकाऽभावे च वसतेरेकस्मिन् यतीनामपरिभोग्ये [प्रदेशे] तं स्थापयन्ति, अपान्तराले कटो दीयते। कटाऽभावे भूत्या अन्तरं क्रियते । अथ किं कारणमबहुश्रुतो बहिर्न क्रियते ॥ २७७३ ॥

तत आह—

**विवज्जितो उड्डुविवज्जएहिं, मा बाहिभावं अबहुस्सुतो उ ।**
**कड्डाए भूतीवंऽतरं करेंति, मा एक्कमेक्कं सहसा फुसेज्जा ॥ २७७४ ॥**

**उद्धविवर्ज**कैरहं **विवर्जितः** परिहृत इत्येव**मबहुश्रुतो मा बहिर्भा**वमुपयासीदिति भिन्ने अपवरके न स्थाप्यते किन्तु वसतेरेकस्मिन् प्रदेशे। तत्रापि **काष्ठादिना** फलकादिरूपेण, तदभावात् **भूत्या** वा **अन्तरं कुर्वन्ति**। मा **एकैकेन** त्वग्दोषेण साधवः **सहसा स्पृशेयुः** ॥ २७७४ ॥

अस्यन्दमाने त्वग्दोषे विधिविशेषमाह—

**अगलंते न वक्खारो, लालासेयादिवज्जण तहेव ।**
**उस्सास-भास-सयणाऽऽसणादीहि होइ संकंती ॥ २७७५ ॥**

**अगलति** अस्यन्दमाने त्वग्दोषे पृथक् **वक्षस्कारो**ऽपवरको **न** क्रियते। **लालास्वेदादीनाम्**, आदिशब्दादुच्छ्वास-भाषा-शयनाऽऽसनादिपरिग्रहः, **वर्जनं** तथैव यथा प्रागभिहितम्। अगलति त्वग्दोषे कस्मादुच्छ्वासादीनां वर्जनम्? अत आह—उच्छ्वास-भाषा-शयनाऽऽसनादिभिः, आदिशब्दात् पीठ-फलकादिपरिग्रहः, **सङ्क्रान्तिर्व्याधेर्भवति** ॥ २७७५ ॥

**मोत्तूण जल्लपडलं, धरेंति भाणं से काइयाइ गते ।**
**सीए व दाउ कप्पं, उवरिमधोयं परिहरंति ॥ २७७६ ॥**

यदि स त्वग्दोषव्याध्युपेतः कायिक्या व्युत्सर्गाय व्रजति भाजनं च तस्य धारयितव्यं भवति तदा **से** तस्य **कायिक्यां गतस्य मुक्त्वा** स्फेटयित्वा **जल्लपटलं** खरण्टितं पटलभाजन-मलखरण्टितपटलमन्ये साधवो **धरन्ति** यावत् स आयाति। अथ स त्वग्दोषी ग्लानः **शीते** पतति नात्मीयैर्वस्त्रैः केवलेन च संस्तरति तदा तस्य **कल्पं** वस्त्रं प्रावरणाय दीयते, सोऽपि च त्वग्दोषी आत्मीयानां वस्त्रकल्पाना**मुपरि** प्रावृणोति। तच्च समर्पितं वस्त्र**मधौतं परिहरन्ति** यदा तु तद्वस्त्रमात्मना प्रावरीतुकामास्तदा प्रक्षालयित्वा प्रावृण्वन्ति ॥ २७७६ ॥

**असहुस्सुव्वत्तणादीणि, कुव्वतो छिक्कजत्तियं ।**
**खेयमकुव्वंतो धोवेज्ज मट्टियादीहि तत्तियं ॥ २७७७ ॥**

**असहस्य** त्वग्दोषव्याधितस्याऽऽगाढं ग्लानीभूतस्य **उद्वर्तनादि** उद्वर्त्तनमुपविष्टीकरण-मित्यादि **कुर्वतो यावत् स्पृष्टं** त्वग्दोषिगात्रादिना तावत् **खेदमकुर्वन् मृत्तिकादिभिरु**द्घृष्य **प्रक्षालयेत्** ॥ २७७७ ॥

**असती मोयमहीए, कयकप्प अगलंत मत्तए निसिरे ।**
**तेणेव कए कप्पे, इयरे निसिरंति जयणाए ॥ २७७८ ॥**

**मोकमह्याः** प्रस्त्रवणभूमेर**भावे अगलति** अस्राविणि **कृतकल्पे मात्रके व्युत्सृजति** प्रस्त्रवणमन्ये साधवोऽन्यस्मिन् मात्रके, पृथक्मात्रकाभावे **तेनैव** यत्र त्वग्दोषी व्युसृष्टवान् तत्रैव **कृतकल्पे** मात्रके **इतरे** साधवो **यतनया** यथा कायिक्या मात्रस्य च शरीरावयवस्पर्शो न भवति तथा कायिकीं निसृजन्ति ॥ २७७८॥

**एसा जयणा उ तहिं, कालगते पुण इमो विही होइ ।**
**अंतरकप्पं जल्लपटलं च अगलंति उज्झंति ॥ २७७९॥**

**एषा** अनन्तरोदिता **यतना-तत्र** गलत्यगलति वा त्वग्दोषे। **कालगते पुनः** त्वग्दोषवति **विधिरयं** वक्ष्यमाणो **भवति**। तत्र प्रथमतो **अगल**त्याह-**आन्तरं कल्पं** भाजनस्य **जल्लपटल**-मुपरितनं वस्त्रमेते द्वे अपि वस्त्रे **उज्झन्ति** परिष्ठापयन्ति ॥ २७७९॥

किं कारणम्? अत आह—

**धोया वि न निद्दोसा, तेण छोड्डुंति ते दुवे ।**
**सेसगं तु कए कप्पे, सव्वं से परिभुज्जइ ॥ २७८०॥**

**प्रक्षालिते** अपि ते वस्त्रे न **निर्दोषे तेन छर्द्येते** परिष्ठाप्येते, **शेषकं तु सर्व**मपि **से** तस्य **कृते कल्पे परिभुज्यते** दोषाभावात् ॥ २७८० ॥

गलत्त्वग्दोषे विधिमाह—

**संदंतस्स विकिंचण, असतीए मोत्तु भायणुक्कोसं ।**
**लेवमत्तमवणेत्ता, अण्णमयं धोविउं लिंपे ॥ २७८१ ॥**

**स्यन्दमानस्यापि** स्यन्दमानत्वग्दोषवतो यत् किञ्चनाऽस्ति तत् सर्वं **परिष्ठाप्यते**, केवलं यदि भाजनं नास्ति सति वा भाजने यदि तद्भाजनं सलक्षणं तदा तदेकं **भाजनमुत्कृष्टं मुक्त्वा** शेषं परिष्ठाप्यते। तत्रापि **लेपमर्द्दक**(मात्र) **मपनीय** उष्णोदकादिभिः **प्रक्षाल्याऽन्यमय**मिव कृत्वा पुनर्लिम्पेत्, ततः परिभुञ्जीत ॥ २७८१ ॥

**अगलंतमत्तसेवी, असतीए कप्पे काउं भुंजंति ।**
**एसा जयणा उ भवे, सव्वेसिं तेसि नायव्वा ॥ २७८२ ॥**

यदि कायिकी भूमिर्न विद्यते बहिश्च सागारिकस्तथा शेषसाधूनामरोगाणां **मात्रकमगलन्** अस्यन्दमानत्वग्दोषवान् **सेवते**। किमुक्तं भवति ? कायिकीं तस्मिन् मात्रके व्युत्सृजति ततः **कृते कल्पे** अरोगास्तस्मिन् व्युत्सृजन्ति। यदि पुनरकृते कल्पे व्युत्सृजन्ति तदा प्रायश्चित्तं चतुर्गुरुकम्। **एषा यतना सर्वेषां** गलत्त्वग्दोषिणामन्येषां च क्षयव्याध्याद्युपेतानां **ज्ञातव्या**॥ २७८२॥

**सूत्रम्— जत्थ एए बहवे इत्थीओ य पुरिसा य पण्हावेंति, तत्थ से समणे निग्गंथे अन्नयरंसि अचित्तंसि सोयंसि सुक्कपोग्गले निग्घाएमाणे हत्थकम्मपडिसेवणपसत्ते[१] आवज्जइ मासियं परिहारट्ठाणं अणुग्घाइयं॥ ८॥**

**जत्थ एए बहवे इत्थीओ य पुरिसा य पण्हावेंति तत्थ से समणे णिग्गंथे अन्नयरंसि अचित्तंसि सोयंसि सुक्कपुग्गले निग्घाएमाणे मेहुणपडिसेवणपसत्ते[२] आवज्जइ चाउम्मासियं परिहारट्ठाणं अणुग्घाइयं ॥ ९ ॥**

'जत्थ एए बहवो इत्थीओ य पुरिसा य पण्हावेंति' इत्यादि । अस्य सम्बन्धप्रतिपादनार्थ-माह—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एगाणियस्स दोसा, कित्तिय भवे एसो उ सुत्तसंबंधो ।**
**कारणनिवासिणो वा, दुविहासेविस्स पच्छित्तं ॥ २७८३ ॥**

**एकाकिनो दोषाः के**? इति शिष्यस्य प्रश्नावकाशमाशङ्क्याधिकृतसूत्रस्योपनिपातः। **एष** भवति **सूत्रस्य सम्बन्धः**। अथवा **कारणनिवासिनो द्विविधासेविनः** सचित्तासेविनोऽचित्तासेविनश्च किं प्रायश्चित्तम्? इति परप्रश्नमुपजीव्य **प्रायश्चित्त**प्रतिपादनाय सूत्रद्वयमाह इति सम्बन्धः ॥ २७८३ ॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या-

**यत्र** यस्मिन् प्रदेशे प्रत्यक्षत उपलभ्यमानाः **स्त्रियः पुरुषाश्च प्रस्नुवन्ति** मैथुनकर्म प्रारम्भन्ते **तत्र** तस्मिन् प्रदेशे मैथुनकर्म दृष्ट्वा कश्चिदुदीर्णमोहः **स श्रमणो निर्ग्रन्थोऽन्यतरस्मिन्** [3]**अचित्ते** हस्तकर्माद्युचिते युगछिद्रनलिकादौ **स्त्रोतवति शुक्रपुद्गलान् निर्घातयन्** शुक्रपुद्गलनिर्घाताय **हस्तकर्मप्रतिसेवनाप्रसक्तो** भवति स च तथाप्रसक्त **आपद्यते**



---

१-२. वणपत्ते-k आ. प्र. श्युब्रींग आगमसुत्ताणि ( दीपरत्नसागर ) जैन शास्त्रोद्धार समिति ( घासीलालजी ) जैन साहित्य संशोधन समिति, जैनानन्द पु. ( सागरजी ) छेदसूत्र मूळपाठ ( गुरुप्राण ) संस्करणेषु॥ ३. अर्चिते- मु. पु. प्रे.॥

For Private And Personal Use Only

**अनुद्घातितं** गुरुकं **मासिकं परिहारस्थानं** प्रायश्चित्तं स्थानम्। तथा **यत्रैते बहवः स्त्रियः पुरुषाश्च प्रस्नुवन्ति** मैथुनकर्म प्रारम्भन्ते **तत्र** तद्दृष्ट्वा कश्चित् **स श्रमणो निर्ग्रन्थो अन्यतरस्मिन् अचित्ते**[1] प्रतिमादौ **स्रोतवति शुक्रपुद्गलान् निर्घातयन् मैथुनप्रतिसेवनाप्रसक्तो** भवति स च तथाप्रसक्त **आपद्यते चातुर्मासिकमनुद्घातितं** गुरुकं **परिहारस्थानम्**। इत्येष सूत्रसङ्क्षेपार्थः । अधुना **भाष्यविस्तरः**—

**बाहिं वक्खारठिए, महिलाआगम अवारणे गुरुगा ।**
**वारण वासे पेल्लणमुदये पडिसेवणा भणिया ॥ २७८४॥**

**बहिर्वक्षस्कारे**ऽपवरके **स्थिते** त्वग्दोषवति तत्र निवेशनादौ वा कृतसङ्केता स्त्री सस्त्रीको वा पुरुषः समागच्छेत्, स चाऽऽगच्छन् वारयितव्यः **अवारणे** प्रायश्चित्तं चत्वारो **गुरुकाः**। **वारणे**त्यादि, तत्र यथा वारणं तथा वक्तव्यम् । अथ बहि**र्वर्षं** गाढं पतति, उपलक्षणमेतत् स्तेनाः श्वापदानि वा बहिः विद्यन्ते तेन न निर्गच्छन्ति तदा तेष्वनिर्गच्छत्स्वधिकृतसूत्रस्यावकाशः। तथा साधोः स्त्रिया **प्रेरणा** क्रियते तदा प्रेरणायां तथा उदये वेदो**दये** सूत्रे **प्रतिसेवना भणिता**।

१. अर्चिंते- मु. पु. प्रे.॥

किमुक्तं भवति ? प्रेरणायामुदये वाऽधिकृतसूत्रस्योपनिपातः॥ २७८४॥

तत्र वारणप्रतिपादनार्थमाह—

**पडिसेहो पुव्वुत्तो, उज्जु अणुज्जू मिहुणे चउत्थम्मि ।**
**निग्गममनिग्गमे वि य, जहिं च सुत्तस्स पारंभो ॥ २७८५॥**

वारणं **प्रतिषेधः**, स च **कल्पाध्ययने चतुर्थे** उद्देशके **पूर्वमुक्तः**। तथा तस्मिन् **मिथुनमृजु** किं वा **अनृजु** इत्याद्यपि यद् वक्तव्यं तत्तत्रैवाभिहितम्। तथा सस्त्रीकस्य पुरुषस्य यथा वसते**र्निर्गमो** भवति यथा चा**ऽनिर्गम** एतदपि तत्रैव व्याख्यातम्। **'जहिं च सुत्तस्स पारंभो'** इत्येतत् पश्चाद् व्याख्यास्यते। गतं वारणद्वारम् ॥ २७८५॥

अधुना उदये प्रतिसेवनेति व्याचिख्यासुस्तान् प्रतिसेवमानान् दृष्ट्वा कोऽपि वेदोदयवशात् येषु स्थानेषु प्रतिसेवनामारभते तानि प्रतिपादयति—

**जुगछिड्डनालिगादिसु, पढमाऽऽसेवणे सोही ।**
**मूलादी पुव्वुत्ता, पंचमजामे भवे सुत्तं ॥ २७८६॥**

युगच्छिद्रे नालिकायाम्,आदिशब्दात् तथाविधाऽन्यवस्तुपरिग्रहः, तेषु **युगछिद्रनालिकादिषु प्रथममासेवने** प्रथमयामादावासेवायां **शोधिर्मूलादिका पूर्वं कल्पाध्ययने उक्ता**, सा चैवं-यदि रात्रेः प्रथमे यामे युगच्छिद्रे नालिकायां वा करकर्म करोति तदा प्रायश्चित्तं मूलं, द्वितीये यामे छेदः, तृतीये यामे षड्गुरुः, चतुर्थे यामे चतुर्गुरुः, प्रभाते दिवसस्य प्रथमे यामे रात्रिगतप्रथमयामापेक्षया पञ्चमे यामे मासगुरुः। तथा चाह-**पञ्चमे यामे भवति सूत्रम्** पञ्चमयामविषयमधिकृतसूत्रमिति भावः । एतेन यदुक्तं प्राक् 'यत्र च सूत्रस्य प्रारम्भस्तद्वक्ष्ये' [गा.२७८५] इति तद्भावितम् ॥२७८६॥

सम्प्रति द्वितीयसूत्रव्याख्यानार्थमाह—

**दुविहच्चा पडिमेयर, सन्निहितेतर अचित्त सच्चित्ते ।**
**बाहिं देवउलादिसु, सोही तेसिं तु पुव्वुत्तो ॥ २७८७॥**

**अर्चा द्विविधा** । तद्यथा—अचित्ता सचित्ता च, तत्राऽ**चित्ता** द्विविधा **प्रतिमा इतरा** च, इतरा नाम स्त्रीशरीरं निर्जीवम्, एकैका पुनर्द्विधा-सन्निहिता असन्निहिता च । एतेषु सर्वेष्वपि स्थानेषु प्रतिसेवनायां प्रथमे रात्रेर्यामे मूलं, द्वितीये छेदः, तृतीये षड्गुरुः, चतुर्थे

चतुर्गुरुः, पंचमे चतुर्गुरुः। सचित्तं स्त्रीशरीरं तत्राग्रे विधिर्वक्ष्यते। तद्ग्रामादीनामन्तरुक्तं बहिरधिकृत्याह–**बहिर्देवकुलादिषु** प्रतिमादिकमचित्तमासेवमानस्य करकर्म वा कुर्वतस्**तेषां** भावानां **शोधिः पूर्वोक्ता** अनन्तरोक्ता द्रष्टव्या। करकर्म कुर्वतः पञ्चमे यामे मासगुरुः प्रतिमाद्यचित्तासेवने चतुर्गुरुः इत्यर्थः॥ २७८७॥

सम्प्रति या प्रेरणा पूर्वमुक्ता तां भावयति—

**संगारदिन्नओ एस सो ति तं वा तहिं अपेच्छंती ।**
**पेल्लेज्ज व तं कुलडा, पुत्तट्ठा ऽऽदेज्ज रूवं वा ॥ २७८८॥**

साधुं कायिक्यादिनिमित्तं निर्गच्छन्तं दृष्ट्वा सा **कुलटा** चिन्तयेत् **स एष** आगतो येन मम **सङ्केतो** दत्तः। एवं चिन्तयित्वा तं साधुं गृह्णीयात्, साधुश्च तत्तथाग्रहणमास्वादयेत्, तथा च सति धर्मविराधना। अथवा **तं** दत्तसङ्केतं पुरुष**मप्रेक्षमाणा** तं कायिक्यादिविनिर्गतं साधुं **प्रेरयेत्**। तत्रापि धर्मविराधना। यदि वा कापि महिला तस्य साधो **रूपं** रमणीयं दृष्ट्वा 'ईदृशो मम पुत्रो भूयादिति' **पुत्रार्था** सती साधुमा**ददीत,** यदि नेच्छति ततोऽहमुड्डाहं करिष्यामि, ततो धर्मविराधना ॥ २७८८॥

अत्रैव प्रायश्चित्तविधिमाह—

**जइ सेव पढमयामे, मूलं सेसेसु गुरुग सव्वत्थ ।**
**अहवा दिव्वाईयं, सचित्तं होइ नायव्वं ॥ २७८९॥**

**यदि** प्रागुक्तप्रेरणावशात् स्त्रियं रात्रेः **प्रथमयामे सेवते** तदा प्रायश्चित्तं **मूलं**, द्वितीये यामे छेदः, तृतीये षड्गुरुकाः, चतुर्थे चत्वारो गुरुकाः, पञ्चमेऽपि चत्वारो गुरुका इति। तदेवं प्रेरणाया व्याख्यानद्वारेण सचित्तं व्याख्यातम्। अथवाऽन्यथा सचित्तं तथा चाह-**अथवा सचित्तं भवति ज्ञातव्यं दिव्यादिकं** दिव्यं तैर्यग्योनं मानुषं च ॥ २७८९॥

तदेव प्रतिपिपादयिषुराह—

**जं सासु तिहा तितयं, ना-दिव्व-पासवं च संगीयं ।**
**जह वुत्तं उवहाणं, न तं न पुण्णं इहावण्णं ॥ २७९०॥**

असवः प्राणाः, सह असवो यस्य येन वा तत् सासु सचित्तमित्यर्थः। **यत् सासु** सचित्तं तत् **त्रिधा** त्रिप्रकारं भवति दिव्यं मानुषं पाशवं च। तत्र **ना** मानुषं **त्रितयं** सचित्तं तद्यथा-जघन्यं

मध्यममुत्कृष्टं च। तत्र जघन्यं प्राकृतं, मध्यमं कौटुम्बम्, उत्कृष्टं दाण्डिकम्। यथा त्रिविधं मानुषं **दिव्य**मपि जघन्यादिभेदभिन्नं त्रिधा, **पाशव**मपि च त्रिधा जघन्यादिभेदतः, **सङ्गीतं** व्याख्यातम्, यथा **क**ल्पाध्ययने तथाऽत्रापि व्याख्येयम्। **यथा चोक्त**मत्रो**पधानं** प्रायश्चित्तं तदपि **न तत् पूर्णमिहापन्नं न** वक्तव्यम्, किन्तु वक्तव्यम्। द्वयोर्नञोः प्रकृत्यर्थगमनात् ॥ २७९० ॥

अत्रैवापवादमाह—

**बिइयपदे तेगिच्छं, निव्वीइयमाइयं अइक्कंते ।**
**ताहे इमेण विहिणा, जयणाए तत्थ सेवेज्जा ॥ २७९१ ॥**

**चिकित्सां निर्विकृतिकादिकां** प्रागुक्ता**मतिक्रान्ते** अस्थाने शब्दश्रवणतो हस्तकर्मकरणतो वा अनुपशाम्यति वेदोदये **ततो द्वितीयपदे** अपवादपदे **अनेन** वक्ष्यमाणेन **विधिना यतनया सेवेत** ॥ २७९१ ॥

तमेव विधिमाह—

**खलखिलमदिट्ठविसयं, विसत्त अव्वंग वंगणं काउं ।**
**ताहे इमंमि लेस्से, गीयत्थ जतो निलिज्जेज्जा ॥ २७९२॥**

खलं प्रतीतं, यत्र सजीवस्यापि सेवने वैराग्यमुपजायते किं पुन र्निर्जीवस्यासेवने ? तत्र निर्जीवप्रतिपादनार्थमाह—**खलखिलं** खलखिलं निर्जीवमित्यर्थः । तत् कथं सेवेत ? इत्यत आह—**अदृष्टविषयं** यथा भवत्येवं सेवेत, रात्रौ सेवेतेति भावः । पुनः कथम् ? इत्याह– विसत्त्वं विगताः सत्त्वा यत्र तत् **विसत्त्वं** विगतजनमित्यर्थः । **अव्यङ्गं** नाम यस्य क्षतं कृतं न विद्यते तस्य **व्यङ्गनं कृत्वा** क्षतं कृत्वा, अन्यथा वेतालोत्थानदोषप्रसजनात् । **ततोऽस्मिन्** निर्जीवे **लेश्ये** संश्लेष्ये, मूत्रविवरे इत्यर्थः, **गीतार्थो यतो**ऽरक्तद्विष्टः सन् **निलीयेत** शुक्रपुद्गलान्निष्काशयेत् ॥ २७९२ ॥

**सूत्रम्— नो कप्पइ निग्गंथाण वा निग्गंथीण वा निग्गंथिं अण्णगणाओ आगयं खुयायारं , सबलायारं, भिन्नायारं, संकिलिट्ठायारं तस्स ठाणस्स अणालोयावेत्ता, अपडिक्कमावेत्ता, अनिंदावेत्ता, अगरहावेत्ता, अविउट्टावेत्ता, अविसोहावेत्ता, अकरणयाए अणब्भुट्ठावेत्ता, अहारिहं पायच्छित्तं अपडिवज्जावेत्ता उवट्ठावेत्तए वा, संभुजित्तए वा, संवसित्तए वा तीसे इत्तरियं दिसं वा अणुदिसं वा उद्दिसित्तए वा**

**धारेत्तए वा** ॥ १० ॥

'नो कप्पति निग्गंथाण वा' इत्यादि। अस्य सम्बन्धप्रतिपादनार्थमाह—

**अभिनिव्वगडादीसुं, समणीणं पडिस्सगस्स दोसेण ।**
**दोसबहुला गणातो, अवक्कमे कावि संबंधो ॥ २७९३ ॥**

अनन्तरसूत्रेष्वभिनिर्वगडादिका वसतिरुक्ता, तासु च **अभिनिर्वगडादिकासु [ श्रमणीनां ]** संयतीनां मध्ये **उपाश्रयस्य दोषेण काऽपि दोषबहुला** सामाचारीप्रमादपरा सती **गणादपक्रामेत्** । तस्या अनेन सूत्रेण विधिरुच्यते इत्येष सूत्र**सम्बन्धः** ॥ २७९३ ॥

प्रकारान्तरेण सम्बन्धमाह—

**इत्थीपण्हाइ जहिं, व सेवए तेण सबलियायारा ।**
**उज्जयविहारमण्णं, उवेज्ज बिइतो भवे जोगो ॥ २७९४ ॥**

**यत्र स्त्री,** उपलक्षणमेतत् पुरुषो वा **प्रस्नौति** प्रस्पन्दते मैथुनकर्म समारभते इत्यर्थः ।

**वा**शब्दः सम्बन्धस्य प्रकारान्तरतोपदर्शने तत्र तद् दृष्ट्वा **तेन** हेतुना काचिदुदीर्णप्रबलवेदा सचित्ते वाऽचित्ते वा, तत्राऽचित्ते मृतकस्य सचित्ते पुरुषलिङ्गे तिर्यग्योनिकलिङ्गे वा **सबलिताचारा** सती अन्य**मुद्यतविहारमुपेयात्** आश्रयेत् तस्या विधिरनेनोच्यते, इत्येष **द्वितीयो योगः** सम्बन्धः ॥२७९४॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**न कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा निर्ग्रन्थीं क्षताचारां शबलाचारां संक्लिष्टाचारां** क्षतादीनां शब्दानामर्थः प्राग्वत् । **तस्य स्थानस्य अनालोचयित्वा** यस्मिन् सेविते सा क्षताचाराऽभवत् तत् स्थानमनालोच्य तस्मात् स्थानात् **अप्रतिक्राम्य** तथा तस्य स्थानस्य विषये **प्रायश्चित्तमप्रतिपाद्य उपस्थापयितुं वा संभोक्तुं वा संवस्तुं वा तस्या इत्वरां दिशमनुदिशं वा उद्देष्टुम**नुज्ञापयितुं नापि तस्याः स्वयं **धारयितुं** कल्पते इत्येष सूत्राक्षरार्थः ॥ सम्प्रति **भाष्यविस्तरः** । तत्र परप्रश्नावकाशमाह—

**जा होइ परिभवंतीह, निग्गया सीयए कहं स त्ती ? ।**
**संवासमाइएहिं, सबलिज्जइ उज्जमंता वि ॥ २७९५॥**

**या** प्रमादगणं **परिभवन्ती** धर्मश्रद्धया गृहवासादिह **निर्गता सा कथं** सीदति येन सा क्षताचारादि जाता? अत्र सूरिराह—**संवासादिभिः** सा **उद्यच्छन्त्यपि** उद्यमं कुर्वत्यपि **शबलीक्रियते**। इयमत्र भावना-सा एकाकित्वेन विहरन्ती गृहस्थादिभिः समं वसन्ती स्वशक्त्यनुसारेणोद्यमं कुर्वत्यपि छलनां प्राप्नोति, आदिशब्दात् गोचरचर्यायां विचारभूमौ वा गता सत्येकाकिनी छलनामाप्नुयादिति ॥ २७९५ ॥

अथ एकाकिनी सा कथं जाता? इत्यत आह—

**अद्धाण निग्गयादी, कप्पट्ठी संभरंती जा बितिया ।**
**आगमणदेसभंगे, चउत्थी पुण मग्गए सिक्खं ॥ २७९६ ॥**

**अध्वनि** अवमौदर्येणाऽशिवेन वा **निर्गता** अध्वनिर्गता, **आदिशब्दात्** राजद्विष्टेन वा सार्थे वा स्तेनैरभिहता निर्गतेति परिगृह्यते, एषा प्रथमा । **द्वितीया कप्पट्ठिं** दुहितरं **स्मरन्ती** एकाकिनी जाता। **तृतीया** परचक्रागमनेन **देशभङ्गे** एकाकिनी। **चतुर्थी शिक्षां मृगयमाणा** एकाकिनी जाता ॥ २७९६ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्राध्वनिर्गतादीनां व्याख्यानार्थमाह—

**गोउम्मुगमादीया, नाया पुव्वमुदाहडा ओमे।**
**ओमे असिवे य दुट्ठे, य सत्थे वा तेणऽभिहते ॥ २७९७॥**

**अवमौदर्येण** संयत्यो न संस्तरन्ति तत्र **गोज्ञातं पूर्वमुदाहृतं,** यथा अल्पं गोब्राह्मणं नन्दति, तत एतत् ज्ञातमवधार्य या यत्र संस्तरति सा तत्र गच्छति, **अशिवे** समुपस्थिते **उल्मुकज्ञात**मुदाहृतं पूर्वं **कल्पाध्ययने,** यथा-उल्मुकानि बहूनि मिलितानि ज्वलन्ति एकं द्वे वा न ज्वलतः एवमशिवमपि बहुषु गाढमुपतिष्ठति नैकस्मिन् द्वयोर्वा, ततो वृन्दघाते एकाकी जाता। एताभ्यां कारणाभ्यामध्वानं प्राप्ता। तथा राज**द्विष्टेन** पूर्वभणितेनैकाकिनी जायते । सार्थे वा **स्तेनैरभिहते** एकाकिनी जायते। ततः सा आचार्योपाध्याय-प्रवर्त्तिनीविरहिता निर्द्धर्मीभूता पार्श्वस्थादिविहारं विहृत्य पुनरपि संवेगमापन्ना कञ्चिदाचार्यमुपाध्यायं गणावच्छेदकं वा उद्देष्टुमुपस्थिता विज्ञपयति यथा-'अहं पार्श्वस्थादिव्यवहारात् प्रतिक्रामामि ततो मम सङ्ग्रहं कुरुत यावदाचार्यमुपाध्यायं वाऽऽत्मीयं पश्यामि' एवमन्यगणादागतां तस्मात् स्थानादप्रतिक्राम्य न कल्पते उपस्थापयितुं, नापि षड्विधेन सम्भोगेन यथासम्भवमार्यिकाणां संयतानां च संभोक्तुं,



For Private And Personal Use Only

नापि यावदात्मीयाचार्यादिकं न गच्छति तावदित्वर आचार्य एषा दिगित्युच्यते इत्वर उपाध्यायः प्रवर्त्तिनी वा दीयते एषा अनुदिक् । गतमध्वानं प्रतिपन्नादीति द्वारम्॥ २७९७॥

अधुना 'कप्पट्ठिं संभरंति या बिइया' इति व्याख्यानार्थमाह—

**अन्नत्थ दिक्खिया थेरी, तीसे धूया य अन्नहिं ।**
**वारिज्जंती य सा एज्जा, धूयानेहेण तं गणं ॥ २७९८॥**

**अन्यत्र** गच्छे **स्थविरा** माता **दीक्षिता, अन्यत्र** गच्छान्तरे से **तस्या दुहिता** दीक्षिता। ततः सा माता **दुहितुः स्नेहेना**ऽऽत्मीयानाचार्योपाध्यायान् पृच्छति 'व्रजामि तां दुहितरं द्रष्टुम्'। सा **वार्यमाणा**प्याचार्योपाध्यायै**र्निर्गता**, एवमेकाकिनी **सा** जाता। एकाकितया निर्द्धर्मीभूता यत्र सा दुहिता दीक्षिताऽस्ति **तं गण**मागता, दृष्टा दुहिता, संवेगमापन्ना शेषं प्राग्वत् ॥ २७९८॥

इदानीम् 'आगमनदेशभङ्गे' इति व्याख्यानार्थमाह—

**परचक्केण रुद्धम्मि, विद्दुते बोहिकाइणा ।**
**जहा सिग्घे पणट्ठासु, एज्ज एगाऽसहायका ॥ २७९९॥**

**परचक्रेण बोधिकादिना,** बोधिका म्लेच्छविशेषाः, तदादिना **विद्रुते** अभिद्रुते **राष्ट्रे** तथा **शीघ्र**मार्यिकाः प्रणष्टा **यथा** तासु **प्रणष्टासु** मध्ये सा **एका असहायिका** जाता, एकाकितया धर्मरहिता बभूव । ततो गणान्तरं दृष्ट्वा पुनः संवेगमापन्ना । शेषमध्वानं प्रतिपन्ना इव वाच्यम् ॥ २७९९ ॥

अधुना 'चतुर्थी पुनर्मृगयते शिक्षामिति' व्याख्यानार्थमाह—

**सोऊण काइ धम्मं, उवसंता परिणया य पव्वज्जं ।**
**निक्खंत मंदपुन्ना, सो चेव जहिं तु आरंभा ॥ २८०० ॥**

**श्रुत्वा काचन** संविग्नानां पार्श्वे **धर्मं** श्रुत्वा **उपशान्ता प्रव्रज्यां** प्रति **परिणता च**। सा च **निष्क्रान्ता** पार्श्वस्थादीनां समीपे, ततः सा अचिन्तयत् यस्मादारम्भादसंयमरूपात् भीताऽहं **मन्दपुण्या स एव** मे समापतित आरम्भो यस्मादत्राहं प्रव्रजिता वर्त्ते इति ॥ २८०० ॥

एतदेवाह—

**आभीरी पण्णवित्ताण, गया ते आययट्ठिया ।**
**अह तत्थेतरे पत्ता, निक्खमंति तमुज्जयं ॥ २८०१ ॥**

आयतो मोक्षस्तत्र स्थिता **आयतस्थिता** उद्यतविहारिणः संविग्ना इत्यर्थः । ते आभीरीं काञ्चन **प्रज्ञाप्यान्यत्र** विहारक्रमेण **गताः**। **अथानन्तरं तत्र** ग्रामे **इतरे** पार्श्वस्थादयः **प्राप्तास्ते तामुद्यतां निष्क्रामयन्ति,** सा च पूर्वप्रकारेणासंयमाद्भीता तत्र समाधिं न लभते ॥ २८०१ ॥

**दट्ठुं वा सोउं वा, मग्गंती तु पडिच्छिया विहिणा ।**
**संविग्ग सिक्ख मग्गति, पवित्तिणि आयरियउवज्झं ॥ २८०२ ॥**

ततः सा मूलधर्मग्राहकानाचार्यान् **मृगयन्ती द्रष्टुं श्रोतुं वा** स्नानादिसमवसरणादौ समागतान् **संविग्नशिक्षां** ग्रहणशिक्षामासेवनाशिक्षां च **मार्गयति**। अन्यां च **प्रवर्त्तिनीमन्यमाचार्यमन्यं चोपाध्यायं,** सा चैवं मार्गयन्ती **विधिना** तैः **प्रतीच्छिता** स्वीकृता कर्त्तव्या । तत्र यत्र ते दृष्टाः श्रुता वा मूलधर्मग्राहकाः ॥२८०२ ॥

यथा च तैर्विधिना प्रतीच्छनीया तदेतदभिधित्सुराह—

**ण्हाणाइएसु मिलिया, पव्वावेंते भणंति ते तीसे ।**
**होह व उज्जयचरणा, इमं व वइणिं वयं णेमो ॥ २८०३ ॥**

स्नानादिसमवसरणं गतया तया ते मूलधर्मग्राहका आचार्या दृष्टा भवेयुः श्रुता वा, यथा-अमुकग्रामनगरादौ वर्त्तन्ते, अतः **स्नानादिसमवसरणे** अन्यत्र वा गत्वा तेषां **मिलिता** शिक्षां प्रवर्त्तिन्यादिकं च याचते । ततो विधिना तस्याः प्रतीच्छनं कुर्वन्ति । तमेव विधिमाह-ते मूलधर्मग्राहका आचार्यास्**तस्याः प्रव्राजयतः** प्रव्राजकान् आचार्यान् **भणन्ति** 'यूयं **वा भवत उद्यतचरणा** अथवा इमां व्रतिनीं नयामः'॥ २८०३ ॥

**भण्णइ पवित्तिणी वा, तेऽसति विसज्जेह वतिणिमेतंति ।**
**विसज्जिते नयंती, अविसज्जंतीए मासलहुं ॥ २८०४ ॥**

तेषां प्रव्राजकानामाचार्योपाध्यायानामसति अभावे **प्रवर्त्तिनी भण्यते** यथा-'**एतां व्रतिनीं विसर्जय**' एवं भणिते यदि विसर्जयति ततो **विसर्जिते** विसर्जने कृते **नयन्ति** । अत्रैवं भणिताऽपि सती प्रवर्त्तिनी न विसर्जयति तर्हि तस्या **अविसर्जयन्त्याः** प्रायश्चित्तं **मासलघुः** ।

अत्रायं विधिः- प्रथमतः सा प्रवर्त्तिनी संयत्या भण्यते यथा विसर्जयेमां साध्वीमिति, एवमुक्ता यदि न विसर्जयति तर्हि मासलघु ॥ २८०४ ॥

**वसभे य उवज्झाए आयरियकुलेण वावि थेरेण ।**
**गणथेरेण गणेण, संघथेरेण संघेण ॥ २८०५ ॥**

**भणिया न विसज्जंती लहुयगादी सोहि जाव मूलं तु ।**
**तीय य हरिऊण ततो, अण्णो से दिज्जते उ गणो ॥ २८०६ ॥**

यदा संयत्या भणिताऽपि सा प्रवर्त्तिनी न विसर्जयति तदा **वृषभो** गीतार्थः कोऽपि साधुर्गत्वा तामापृच्छति, तत्रापि यदि **न विसर्जयत्ति** तदा प्रायश्चित्तं चतुर्लघु । ततो यः साधु**रुपाध्याय**स्थानं प्राप्तस्तेन सा आपृच्छ्यते तत्राप्यविसर्जने चतुर्गुरु। ततो यः साधु**राचार्य**स्थानं प्राप्तः स तामापृच्छति यदि न विसर्जयति तर्हि तस्याः प्रायश्चित्तं षड्-लघु। ततः **कुलेन** कुलस्थविरेण वा सा भणनीया, तत्राऽविसर्जने षड्गुरु । ततो **गणेन गणस्थविरेण** वा सा प्रज्ञापनीया तथाऽप्यमुत्कलने प्रायश्चित्तं छेदः। तदनन्तरं **सङ्घेन**

**सङ्घस्थविरेण** वा सा भणनीया, तथाऽपि चेन्न विसर्जयति तर्हि प्रायश्चित्तं तस्या **मूलम्।** अन्यच्च यदि सा सङ्घमपक्रामति ततस्**तस्याः** सकाशात् हृत्वा **से** तस्या **अन्यो गणो दीयते,** अन्यस्याः प्रवर्त्तिन्याः सा समर्प्यते इत्यर्थः ॥ २८०५॥ २८०६॥

**एमेव उवज्झाए, अविसज्जंते हवंति लहुगाई ।**
**भणंते गुरुगादी, वसभादी जाव नवमं तु ॥ २८०७॥**

**एमेव य आयरिए, अविसज्जंते हवंति गुरुगा उ।**
**वसभादिएहि भणिए, छल्लहुगादी उ जा चरिमे ॥ २८०८॥**

संयत्या भणितया स्वयं प्रवर्त्तिन्या तस्यामविसर्जितायां यदि तस्या उपाध्यायो न तां भणति यथा-विसर्जयैनां साध्वीमिति तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः। उपाध्यायातिक्रमणे यद्याचार्यो न भणति यथा-इमां विसर्जयेति तदा तस्यापि प्रायश्चित्तं चतुर्लघु । एवं तावत् प्रवर्त्तिन्यामविसर्जयन्त्यामुक्तम्, इदानीं आचार्यस्योपाध्यायस्य वा अविसर्जयतः प्रतिपाद्यते। एवमेव अनेनैव प्रकारेणो**पाध्यायेऽप्यविसर्जयति** प्रथमतो **भवन्ति** चत्वारो लघुकाः। ततो **वृषभादिक्रमेण** प्रायश्चित्तं वर्द्धमानं तावद् द्रष्टव्यं **यावत्** पर्यन्ते नवममनवस्थाप्यलक्षणं

प्रायश्चित्तम्, आचार्ये प्रथमतो **भण्यन्ते गुरुका**श्चत्वारस्ततस्तदादिकं वृषभादिक्रमेण प्रवर्द्धमानं तावदवसेयं यावत्पर्यन्ते चरमं पाराञ्चितमिति इयमक्षरयोजना। भावार्थस्त्वयं-संयत्याः प्रेषणे प्रवर्त्तिन्या विसर्जितायामविसर्जितायां वा यद्युपाध्यायो न विसर्जयति तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः। ततोऽन्येन साधुना गीतार्थेन स उपाध्यायो भण्यते, तथाऽप्यमुत्कलने चतुर्गुरुः। ततो यः साधुरुपाध्यायस्थानं प्राप्तस्तेन स प्रज्ञाप्यते, तथाऽप्यविसर्जने षड्लघु । तदनन्तरमाचार्यस्थानं प्राप्तः साधुः प्रेष्यते, तेनाप्यविसर्जने षड् गुरुः। ततः कुलेन कुलस्थविरेण वा भाव(भण)नीयस्तत्राविसर्जने छेदः। गणेन गणस्थविरेण वा भणनेऽप्यविसर्जने मूलम्। सङ्घेन सङ्घस्थविरेण प्रज्ञापनायामप्यमुत्कलनेऽनवस्थाप्यम् ॥ २८०७॥

तथा संयत्या भणने प्रवर्त्तिन्या विसर्जितायामविसर्जितायां वा यद्या**चार्यो न विसर्जयति** तदा तस्य प्रायश्चित्तं चतु**र्गुरुकम्**। तदनन्तरं तस्य समीपे **वृषभः** प्रेष्यते तस्याप्यमुत्कलने **षड् लघु** तत उपाध्यायस्थानप्राप्तेन साधुना भणनेऽप्यविसर्जने षड्गुरु, तदनन्तरमाचार्यस्थानप्राप्तसाधुः प्रेषणीयः, तस्याप्यमुत्कलने छेदः, कुलेन कुलस्थविरेण भणनेऽप्यविसर्जने मूलं, गणेन गणस्थविरेण वा अनवस्थाप्यं, सङ्घेन सङ्घस्थविरेण वा पाराञ्चितम्, सङ्घातिक्रमे तस्या गणादपहरणं सङ्घेन ॥ २८०७॥

तथा चाह—

**साहत्थमुंडियं गच्छवासिणीं बंधवे विमग्गंतीं ।**
**अण्णास्स व देइ गणो, णाण-चरणरक्खणा जत्थ ॥ २८०९॥**

पार्श्वस्थादिभिः **स्वहस्तमुण्डितां गच्छवासिनीं** पार्श्वस्थादिगच्छवासिनीं **बान्धवा** उद्यतविहारिणो ये संसारान्निस्तारयन्ति तान् **विमार्गयन्ती** अन्वेषयन्तीं **अन्यस्याचार्यस्यो-**पाध्यायस्यान्यस्याश्च प्रवर्त्तिन्याः सङ्घो **ददाति यत्र** तस्या **ज्ञानचरणरक्षणा** भवति ॥ २८०९॥

किमित्येवमत आह—

**नाणचरणस्स पव्वज्ज कारणं नाणचरणतो सिद्धी ।**
**जहि नाणचरणवुड्ढी, अज्जाठाणं तहिं वुत्तं ॥ २८१०॥**

**प्रव्रज्या कारणं ज्ञानस्य चरणस्य** च, ज्ञानचरणनिमित्तं प्रव्रज्या प्रतिपद्यते इति भावः।



For Private And Personal Use Only

यतो **ज्ञानचरणतः सिद्धिर्नान्यस्मात्** ततो **यत्र ज्ञानचरणवृद्धिस्तत्र आर्याणा**मार्यिकाणां **स्थान**मवस्थान**मुक्तं** तीर्थकरगणधरैः। पार्श्वस्थादीनां सकाशे ज्ञानचरणे न, ततस्तेभ्यस्तामपहृत्य सङ्घोऽन्यस्य ददाति ॥ २८१० ॥

**मोत्तूण इव चरिमं, इत्तिरितो होति उ दिसाबंधो उ ।**
**उसण्ण दिक्खियाए उ, आवकहाए दिसाबंधो ॥ २८११ ॥**

अत्र एतासु चतसृषु मध्ये चरमां 'चउत्थी पुण मग्गए सिक्खं'[गा २७९६]इत्येवंरूपां **मुक्त्वा** शेषाणां तिसृणामध्वनिर्गतादिकादीनां दिग्बन्ध इत्वरो भवति, चरमायाः पुनरवसन्नदीक्षिताया यावत्कथिको दिग्बन्धः ॥ २८११ ॥

**सूत्रम्— नो कप्पइ निग्गंथाण वा निग्गंथीण वा निग्गंथं अन्नगणाओ आगयं खुयायारं जाव संकिलिट्ठायारं , तस्स ठाणस्स अणालोयावेत्ता जाव अहारिहं पायच्छित्तं अपडिवज्जावेत्ता उवट्ठावेत्तए वा संभुजित्तए वा संवसित्तए वा तस्स इत्तरियं दिसं वा अणुदिसं वा उद्दिसित्तए वा धारेत्तए वा ॥ ११ ॥**

'नो कप्पति निग्गंथाण वा निग्गंथीण वा निग्गंथं अन्नगणातो आगतं'इत्यादि। अस्याक्षरगमनिका भाष्यविस्तरश्च प्राग्वत् द्रष्टव्यः। तथा चाह—

**एसेव गमो नियमा, निग्गंथाणं पि होति नायव्वो ।**
**नवरं पुण नाणत्तं, अणवट्ठप्पो य पारंची ॥ २८१२॥**

**एष एव** चानन्तरोदितो **गमः** प्रकारो **निर्ग्रन्थानाम**प्यन्यगणादागच्छतां **भवति** नियमात् **ज्ञातव्यः**। **नवरं पुनः** प्रायश्चित्ते **नानात्वम्, अनवस्थाप्यं पाराञ्चितं च** । इयमत्र भावना- येन प्रव्राजितः स क्षुल्लको भिक्षुर्वा, स चेत् संयते प्रेषिते न मुत्कलयति तदा तस्य प्रायश्चित्तं चतुर्लघु, ततो वृषभादिक्रमेण प्रायश्चित्तं पूर्वप्रकारेण वर्द्धमानं तावद् द्रष्टव्यं यावत् सङ्घेन सङ्घस्थविरेण वा भणनेऽप्यमुत्कलनेऽनवस्थाप्यं, तथा तस्य साधुना भणनेऽप्यमुत्कलने यद्युपाध्यायस्तं प्रव्राजकं न भणति यथा 'विसर्जय एनमिति' तदा तस्य प्रायश्चित्तं चतुर्लघु, आचार्यस्याभणने चतुर्गुरु। तथा उपाध्यायः साधुप्रेषणे यदि न मुत्कलयति तदा चतुर्लघु ततो वृषभादिक्रमेण पूर्ववत् वर्धमानं प्रायश्चित्तं तावद् द्रष्टव्यं यावत् सङ्घातिक्रमेऽनवस्थाप्यम्। आचार्यस्य तु चतुर्गुरुकादारभ्य तावद्वक्तव्यं यावत् सङ्घातिक्रमे पाराञ्चितम्। अत्रापि निर्ग्रन्थ्या

इव चत्वारो भेदाः॥ २८१२॥

तथा चाह—

**अद्धाण निग्गयादी, कप्पट्ठगसंभरं ततो बिइतो ।**
**आगमण देसभंगे, चउत्थतो मग्गए सिक्खं ॥ २८१३॥**

प्रथमोऽध्वनिर्गतादिकः, **द्वितीयः कल्पस्थकं** बालकं **संस्मरन्,** तृतीयः परचक्रागमनेन **देशभङ्गे, चतुर्थकः** पार्श्वस्थादिदीक्षितः **शिक्षां मार्गयति।** अमीषां च व्याख्यानं सविस्तरं प्राग्वन्निरवशेषं द्रष्टव्यम्। अत्रापि चरमं मुक्त्वा शेषाणां त्रयाणामित्वरो दिग्बन्धः,चतुर्थस्य तु यावत्कथिकः ॥ २८१३॥

*इति **श्रीमलयगिरिविरचितायां व्यवहारटीकायां***

***षष्ठ उद्देशकः समाप्तः*** *॥छ॥*

*षष्ठोद्देशके ग्रन्थाग्रं २०१० ॥छ॥*

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥
॥ अर्हं नमः ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

# ॥ सप्तम उद्देशकः ॥



For Private And Personal Use Only

व्याख्यातः षष्ठ उद्देशकः सम्प्रति सप्तम आरभ्यते तत्र चेदमादिसूत्रम्—

**सूत्रम्— जे निग्गंथा य निग्गंथीओ य संभोइया सिया, नो कप्पइ निग्गंथीणं निग्गंथे अणापुच्छित्ता निग्गंथिं अन्नगणाओ आगयं खुयायारं भिन्नायारं जाव संकिलिट्ठायारं तस्स ठाणस्स अणालोयावेत्ता जाव अहारिहं पायच्छित्तं अपडिवज्जावेत्ता पुच्छित्तए वा, वाएत्तए वा, उवट्ठावेत्तए वा, संभुंजित्तए वा, संवसित्तए वा, तीसे इत्तरियं दिसं वा, अणुदिसं वा उद्दिसित्तए वा धारेत्तए वा** ॥ १ ॥

'जे निग्गंथा य निग्गंथीओ य संभोइया सिया' इत्यादि । अस्य सूत्रस्य सम्बन्धमाह—

गाथा

**निग्गंथीणहिगारे, ओसन्नत्ते य समणुवत्तंते ।**
**सत्तमए आरंभो, नवरं पुण दो वि निग्गंथी ॥ २८१४॥**

**निर्ग्रन्थीनामधिकारे अवसन्नत्वे** षष्ठोद्देशकचरमसूत्रद्वयादनु**वर्त्तमाने सप्तमे** उद्देशके सूत्रद्वयस्या**रम्भो** भवति। तत्र यथा षष्ठोद्देशके चरमसूत्रद्वये एकस्मिन् सूत्रे निर्ग्रन्थी द्वितीये सूत्रे निर्ग्रन्थ एवमिहापि न यत आह-**नवरं** सूत्रद्वयेऽपि **द्वे अपि निर्ग्रन्थ्यौ** ॥ २८१४॥

एवमनेन सम्बन्धेनायातस्यास्य व्याख्या—

**ये निर्ग्रन्था निर्ग्रन्थ्यश्च साम्भोगिकाः** स्युस्तेषां मध्ये **निर्ग्रन्थीनां न कल्पते निर्ग्रन्थाननापृच्छ्य निर्ग्रन्थीमन्यस्माद् गणादागतां क्षताचारां भिन्नाचारां [ यावत् ] संक्लिष्टाचाराम्**[१]। अमीषां शब्दानामर्थः प्राग्वत् । यस्मिन् स्थाने सीदति स्म **तस्य स्थानस्य अनालोच्य** अप्रतिक्रम्य **प्रायश्चित्तमप्रतिपाद्य प्रष्टुं वा वाचयितुं वा उपस्थापयितुं** वा षण्णां सम्भोगानामन्यतमेन सम्भोगेन **संभोक्तुं** वा **संवस्तुं** वा **तस्य इत्वरं दिशमा**चार्यलक्षणा-**मनुदिशं वा** उपाध्यायप्रवर्त्तिनीलक्षणा**मुद्देष्टुं** वा अनुज्ञातुं नापि तस्या स्वयं **धारयितुम्** इत्येष प्रथमसूत्राक्षरार्थः ॥ सम्प्रति **भाष्यविस्तरः**—

**सुत्तं धम्मकहनिमित्तमादि घेत्तूण निग्गया गच्छा ।**
**पन्नवण चेइयाणं, पूयं काऊण आगमणं ॥ २८१५ ॥**



कस्याऽप्याचार्यस्य शिष्या, सा **सूत्र**मुपलक्षणमेतदर्थं च गृहीत्वा तथा **धर्मकथाः** पठित्वा **निमित्तं** वा अतीताऽनागतादिकं **गृहीत्वा, आदि**शब्दाद्विद्यामन्त्रचूर्णयोगांश्च ज्ञात्वा **गच्छान्निर्गता**। ततः सा निमित्तादिबलेन धर्मकथया इभ्यादीनामीप्सिता जाता, ततः संस्तवेन तानावृत्त्य चैत्यायतन**प्रज्ञापनातश्चैत्यायतनं** कारितवती, विपुलं तत्र सत्कारसमुदयमनुभवति । अन्यदा

१. **चारचित्ताम्** -पु. प्रे. ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा महत्तरिका तस्याः सम्बोधनार्थं वा विहारप्रत्ययं वा चैत्यमहमुद्दिश्य वा तत्र समागता । सा तस्याः शिष्या परितुष्टा, तत इभ्यगृहेषु विविधान्यशनादीनि वस्त्राणि च महार्हाणि तस्या महत्तराया उत्पादयति। ततस्तया महत्तरिकया सा अनुशिष्टा-'किमद्याप्यार्ये! पार्श्वस्थत्वेन तिष्ठसि? कुरु संयमे समुद्योगम्' स्वयं वा सा उद्यन्तुकामा, एवं तस्यामुपस्थितायां यदि चैत्यानामन्यः शुश्रूषकोऽस्ति ततस्तस्मात् स्थानात् प्रतिक्राम्य तां महत्तरिका नयति, अथ नास्ति चैत्यानामन्यः शुश्रूषकस्ततो यदि तस्मात् स्थानात् प्रतिक्राम्य तां महत्तरिका नयति तदा चैत्याऽभक्तिनिमित्तं तस्याः प्रायश्चित्तं चतुर्गुरुकम्। एवं **पूजां** महत्तरिकायाः **कृत्वा** महत्तरिकया सह गुरुसन्निधा**वागमनम्**॥ २८१५॥

एतदेवाभिधित्सुराह—

**धम्मकहनिमित्तेहि य, विज्जामंतेहि चुन्नजोगेहिं ।**
**इब्भादि झोसिया णं, संथवदाणे य जिणाययणं ॥ २८१६॥**

**धर्मकथाभिर्निमित्तैर्विद्यामन्त्रैश्चूर्णयोगैश्च इभ्यादिः जोषित्वा** प्रीतयित्वा **संस्तवदाने** परिचयकरणे तथाविधप्रज्ञापनया **जिनायतनं** कारितवती ॥२८१६॥



For Private And Personal Use Only

**संबोहणट्ठयाए, विहारवत्ती व जिणवरमहे वा ।**
**महत्तरिया तत्थ गया निज्जरणं भत्त-वत्थाणं ॥ २८१७॥**

तस्याः **सम्बोधनार्थं विहारवृत्त्या वा जिनवरमहे वा** तस्या **महत्तरिका तत्र गता,** तत इभ्यगृहेषु तस्या विविधस्य **भक्तस्य** महार्हाणां **वस्त्राणां निर्जरणं** दानं तया कारितम्॥ २८१७॥

**अणुसट्ठ उज्जमंती व, विज्जंते चेइयाण सारवए ।**
**पडिवज्जंति अविज्जंतए उ गुरुगा अभत्तीए ॥ २८१८॥**

ततः सा महत्तरिकया संजमोद्योगकरणे सम**नुशिष्टा** स्वयं **वा उद्यच्छन्ती वर्त्तते** । तत्र **विद्यमाने चैत्यानां सारापके** साराकारके तां नेतुं **प्रतिपद्यते, अविद्यमाने तु** चैत्यसाराकारके तस्या नयने **अभक्तिनिमित्ताश्चत्वारो गुरुका**स्तासां महत्तरिकाणां प्रायश्चित्तम् ॥ २८१८॥

**आगमणं सक्कारं, हिंडंति जहिं विरूवरूवेहिं ।**
**लाभेण सन्नियट्टा, हिंडंती तो तहिं दिट्ठा ॥ २८१९॥**

एवं **सत्कारं** सन्मानं च प्रतिगृह्य गुरुसमीपे **आगमनं** ततो **लाभेन** वस्तुलाभेनोपेता **सन्निवृत्ता** विरूपरूपैरन्यदेशसत्कैर्वस्त्रैः प्रावृता यत्र भिक्षां **हिण्डन्ते** चैत्यवन्दनाय वा व्रजन्ति **तत्र हिण्डमाना** वृषभै**र्दृष्टा** ॥ २८१९ ॥

एतदेव स्पष्टं भावयति—

**सक्कारिया य आया, हिंडंति तहिं विरूवरूवेहिं ।**
**वत्थेहिं पाउया ता, दिट्ठा य तहिं तु वसभेहिं ॥ २८२० ॥**

**सत्कारिताश्च** महत्तराः[१] प्रवृत्तकार्या यत्र गुरवस्तिष्ठन्ति तत्र **आयाताः** तत्र च **विरूपरूपै**र्नाना प्रकारैर्महार्हैर्**वस्त्रैः प्रावृता हिण्डन्ति** ताश्च **तत्र हिण्डमाना वृषभैर्दृष्टाः** ॥२८२० ॥

**भिक्खा ओसरणम्मि वा अपुव्ववत्थाओ ताओ दट्ठूणं ।**
**गुरुकहण तासि पुच्छा, अम्हे अदिन्ना न वा दिट्ठा ॥ २८२१ ॥**

१. महत्तरा प्राभृतिका आर्य-पु. प्रे. ॥

**भिक्षायां समवसरणे वा अपूर्ववस्त्रास्ता दृष्ट्वा** वृषभा **गुरुकथनं** कृतवन्तो वृषभैर्गुरोः निवेदितम्। तत आचार्येण वृषभा भणिताः पृच्छत ता आर्यिका कुतो युष्माकं तानि वस्त्राणि? ततो वृषभैस्**तासां** समीपं गत्वा **पृच्छा** कर्त्तव्या यथा आर्ये! **नाऽस्माभि**रेतानि वस्त्राणि **दत्तानि नापि** केनचिद्दीयमानानि अस्माभि**र्दृष्टानि** ॥ २८२१॥

**निवेदणीयं च वसभे, आयरिए दिट्ठ एत्थ किं जायं ।**
**तुब्भे अम्ह निवेयह, किं तुब्भ इयं नवर दोन्नि ॥ २८२२॥**

**लहुगो लहुगा गुरुगा, छम्मासा होंति लहुगगुरुगा य ।**
**छेदो मूलं च तहा, गणं च हाउं विगेंचेज्जा ॥ २८२३॥**

अत्र द्वयोर्गाथयोर्यथासङ्ख्येन पदघटना। सा चैवं-संयतीभिर्यत् किमपि वस्त्रादिकं लभ्यते तत् सर्वं गुरवे **निवेदनीयम्** अनिवेदिते प्रायश्चित्तं लघुको मासः। **वसभे** इति वृषभेण.पृच्छायां कृतायां यदि न निवेदयन्ति तदा चत्वारो **लघुकाः**, **आचार्ये**ऽपि प्रच्छके यदि न कथयन्ति तदा चत्वारो **गुरुकाः**, यदि पुनराचार्यैरधिक्षिप्ता यथा किं युष्माभिः न निवेदितानि? तदा यद् व्यावृत्ताः तदा चतुर्लघुकमेव। अथ अनावृत्ताः सत्यो न कथयन्ति तदा चतुर्गुरुकम्। अथ

ता यद् भणन्ति तद् **दृष्टं** स्यात् तदा **षण्मासा लघवः**। अथाभिदधति **किमत्र जातं** यदि न निवेदितं तदा **षण्मासा गुरवः** प्रायश्चित्तम्। अथ भाषन्ते यूयं किम**स्माकं निवेदयत?** अत्र प्रायश्चित्तं **छेदः**। किं युष्माकमस्मदधिकम् ? नवरमावां परस्परं द्वे भ्रातृभाण्डे। एवं तासां ब्रुवतीनां प्रायश्चित्तं **मूलम्**। तस्याश्च प्रवर्त्तिन्या **गणो हृत्वा** अन्यस्या **दीयते**। अथ सापि नेच्छति ततोऽन्यस्या दातव्यः। अथ साऽपि नेच्छति तर्ह्यन्यस्या दीयते ॥ २८२२॥ २८२३॥

एतदेवाह—

**अण्णस्सा देंति गणं, अह नेच्छंति ततो विगिंचेज्जा तं पि ।**
**पुणरवि[१] दिंतस्स[ऽणिच्छे] एवं, तु कमेण सव्वासिं ॥ २८२४॥**

**अन्यस्या गण**माचार्या **ददति** तां पूर्वां प्रवर्त्तिनीं गणं हृत्वा **विगिंचयेत्** परित्यजेत् [**अनिच्छन्त्यां**] **पुन**रन्यस्या गणं **ददति** एवं **क्रमेण सर्वासा**मपि पूर्वस्या पूर्वस्या अनिच्छायां गणो दातव्यः, सर्वासामनिच्छायां सर्वासां परित्यागः ॥ २८२४॥

अथ कस्मात् ता गणं दीयमानं नेच्छन्ति? तत आह—

१. °वि दिन्नस्सा - मु.॥

**पवत्तिणिममत्तेण, गीयत्था उ गणं जई ।**
**धारइत्ता ण इच्छंति, सव्वासां पि विगिंचणा ॥ २८२५॥**

**यदि गीतार्था** अपि **गणं धारयितुं प्रवर्त्तिनीमभत्वेन नेच्छन्ति** तदा **सर्वासां विगिञ्चना** परित्यागः ॥ २८२५॥

**चोयग गुरुतो दंडो, पक्खेवपग चरिय सिद्धपुत्तीहिं ।**
**विसयहरणट्ठया तेणियं च एयं न नाहेंति ॥ २८२६॥**

**चोदकः** प्राह-प्रवर्त्तिन्यास्तुच्छे अपराधे **गुरुको दण्डो** दत्तः । आचार्यः प्राह— अपराधोऽपि तासां गरीयान् यद्भणिताः सत्योऽपि निष्ठुरं भाषन्ते । अन्यच्च **एता** एवमशिष्यमाणा अनापृच्छयोपधिं गृह्णन्त्य**श्चरिका-सिद्धपुत्रीभ्यां प्रक्षेपक**मुपचारं **विषय**निमित्तं **हरणार्थतया** न ज्ञास्यन्ति, **ना**पि कयाचित् सिद्धपुत्रिकया स्तैन्यकरणाय प्रव्रजितया **एत**दुत्कृष्टवस्त्रादिकं **स्तेनितं ज्ञास्यन्ति** तस्मादेतच्छिष्यापननिमित्तमेष गुरुको दण्डः॥ २८२६॥

एतदेव सप्रपञ्चमाह—

**अवराहो वि गुरू तासिं, सच्छंदेणोवहिं तु जा घेत्तुं ।**
**न कहंती भिन्ना वा, जं निट्ठुरमुत्तरं बेंति ॥ २८२७॥**

**अपराधोऽपि तासां** संयतीनां गुरुरेव यत् **स्वच्छन्दसा उपधिं गृहीत्वा न कथयन्ति भिन्ना वा** ज्ञाता वा सत्यो **यत् निष्ठुरमुत्तरं ब्रुवते** अन्यच्च अनापृच्छ्य गृह्णन्त्यो विषयहरणार्थतया चरिकासिद्धपुत्रीभिः प्रक्षेपकं न ज्ञास्यन्ति ॥ २८२७॥

एतदेव भावयति—

**अचियत्ता निक्खंता, निरोहलावण्णलंकियं दिस्सा ।**
**विरहालंभे चरिया, आराहण दिक्खलक्खेण ॥ २८२८॥**

काऽपि महेला कुटुम्बिनो**ऽचियत्ता** अप्रीतिमती अहमिति प्रव्रजिता, नवरं संयतीत्वे **निरोधेन** कुतोऽपि कर्मकरणादीनाम[1]र्थायानिर्गमनं, ततः शरीरस्य लावण्यमद्भुतं जातम् । तां **लावण्यालङ्कृतां** भिक्षामटन्तीं स भर्त्ता **दृष्ट्वा** लोभं गतः। सा चात्मतृतीया भिक्षामटन्तीति **विरहो** न विद्यते यत्र तामालापयति । ततः स **चरिकां** दानसन्मानाभ्या**माराधयति**। ततश्चरिका

गाथा २८२२-२८२८ अनुचित-वस्त्रग्रहणे दोषाः प्रायश्चित्तम् ११७३ (B)

१. ०मर्थाय नि० पु. प्रे. ॥

ब्रूते-संदिशत यन् मया कर्त्तव्यम्। स प्राह-एतां संयतीं तथा कुरुत यथा प्रतिभज्यते । ततः सा **दीक्षालक्षेण** दीक्षाव्याजेनाह-प्रव्रजिष्यामीत्येवंरूपेण तां संयतीमुपागता॥ २८२८॥

**अहवा वि अण्णो कोई, रूवगुणम्माइतो सुविहियाए ।**
**चरगाए पक्खेवं, करेज्ज छिद्दं अविंदंतो ॥ २८२९॥**

**अथवा कोऽप्यन्यो**ऽविरतः **सुविहितायाः** संयत्या **रूपगुणेनोन्मादित** उन्मादं ग्राहित**श्छिद्रमविन्दन्** अलभमान**श्चरिकया** दानसन्मानाभ्यामाराधितया **प्रक्षेप**मुपचारं **कुर्यात्** ॥ २८२९ ॥

**सिद्धी वि कावि एवं, अहवा उक्कोसणंतगा भिन्ना ।**
**होहं वीसंभेउं, अगहियगहिए य लिंगम्मि ॥ २८३०॥**

**अथवा** चरिकाया अभावे चरिकया प्रयोजनाऽसिद्धौ **काऽपि सिद्ध्यपि** सिद्धपुत्रिकाऽपि **एवं** दानसन्मानाभ्यां गृहीत्वा प्रयुज्येत ततोऽनापृच्छया ग्रहणेऽजानत्यस्तास्तमप्युपचारं गृह्णीयुः। तथा च सति महान् दोषः । अथवा सा सिद्धपुत्रिका तासां संयतीना**मुत्कृष्टानि [ अ ] नन्तकानि** वस्त्राणि दृष्ट्वा **भिन्ना** वस्त्रग्रहणलोभेन चित्तभेदमुपगता **भविष्याम्य**हं प्रव्रजितेति

**विश्रभ्य गृहीतेऽगृहीते च लिङ्गे** उत्कृष्टवस्त्राणां स्तैन्यं कुर्यात् ॥ २८३० ॥

पर आह—

**वीसज्जिय नासिहती, दिट्ठंतो तत्थ घंटलोहेणं ।**
**तम्हा पवित्तिणीए, सारण जयणाए कायव्वा ॥ २८३१ ॥**

चोदकः प्राह- नन्वेवं **विसर्जितास्ता नङ्क्ष्यन्ति** तस्मात् मा क्रियतामीदृशो गुरुको दण्डः। आचार्यः प्राह—**दृष्टान्तस्तत्र घण्टालोहेन** । किमुक्तं भवति-यस्मिन्नेव दिने यत्र लोहे घण्टा कृता तल्लोहं तस्मिन्नेव दिने विनष्टम्। एवं यत्र दिवसे ताः स्वच्छन्दतो वस्त्राणि गृहीतवत्यः प्रव्रज्यां वा दत्तवत्यः तस्मिन्नेव दिने ता विनष्टाः । यत एते दोषा**स्तस्मात् प्रवर्त्तिन्याः सारणा यतनया कर्त्तव्या** ॥ २८३१ ॥

तामेवाह—

**धम्मं जई काउमुवट्ठियासि, अप्पेव दुग्गं तु कुमंसएहिं ।**
**तं दाणि वच्चामु गुरूण पासं, भव्वमभव्वं च विंदंति ते ऊ ॥ २८३२ ॥**

सा परिव्राजिका सिद्धपुत्रिका वा यदि संयतीनामुत्तिष्ठति ततः सा प्रवर्त्तिन्या वक्तव्या- **यदि धर्मं कर्तुं समुत्थितासि तर्हि सम्प्रति व्रजामो गुरूणां पार्श्वं,** यतो **भव्यमभव्यं** वा **ते विदन्ति,** वयं तु किं जानीमः ?॥ २८३२॥

गुरवः कथं जानन्ति? इति चेद्,अत आह-

**जो जेण अभिप्पाएण, एती तं भो गुरू वियाणेंति ।**
**पारगमपारगं ति य, लक्खणतो दिस्स जाणंति ॥ २८३३॥**

**यो येनाभिप्रायेण समागच्छति तत् भो गुरवो विजानन्ति।** तथा प्रव्रज्यां ग्रहीतुकामं **दृष्ट्वा लक्षणत** एतत् **जानन्ति** यथा एष प्रव्रज्याया पारगो भविष्यत्येषो **अपारग** इति॥ २८३३॥

तथा-

**पत्ता पोरिसिमादी, छाया उव्वाय वुत्थ साहंति ।**
**चोदेति पुव्वदोसे, रक्खंती नाउ से भावं ॥ २८३४॥** दारगाहा।

**प्राप्ता पौरुष्यादिकं** प्रथमपौरुष्यादिकं गुरवे निवेदनीया, तथा **छाता** बुभुक्षिता **उद्वाता** परिश्रान्ता तथा **उषिता** एतदपि संयत्यो गुरूणां **कथयन्ति । गुरुश्च पूर्वदोषान् चोदयति** कथयति तथा **से** तस्या दीक्षिताया **भाव**मभिप्रायं दुष्टं **ज्ञात्वा** गुरवो **रक्षयन्ति**। एष द्वारगाथासङ्क्षेपार्थः ॥ २८३४॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः 'प्राप्ता पौरुष्यादिकमि'ति विवृणोति

**जा जीए होति पत्ता, नयंति तं तीए पोरिसीए उ ।**
**छाउव्वायनिमित्तं, बिइया ततियाए चरमाए ॥ २८३५॥**

**या यस्यां** पौरुष्यां संयतीनां पार्श्वे **प्राप्ता भवति तां तस्यां पौरुष्यां** संयत्यो गुरुसमीपं **नयन्ति**। अथ सा **च्छाता उद्वाता** वा तर्हि **तन्निमित्तं** तेन कारणेन स्यात् **द्वितीयस्यां तृतीयस्यां चरमायां** वा गुरुसमीपं नीयते । नीत्वा च छातादिकं सर्वं कथ्यते। एतेन च्छातोद्वातेति व्याख्यातम् ॥ २८३५॥

साम्प्रतम् 'उषिता'इति भावयति—

**चरमाए जा दिज्जइ, भत्तं विस्सामयंति णं जाव ।**
**ता होइ निसा दूरं, च अंतरं तेण वुत्थत्ति ॥ २८३६॥**

**चरमायां** पौरुष्यां सा समागता, सा च्छाता, ततो **याव**त्तस्यां चरमायां पौरुष्यां **भक्तं दीयते,** भक्तानन्तरं च संयत्यस्तां **विश्रामयन्ति तावन्निशा भवति** । **दूरं च अन्तरं** गुरूणामुपाश्रयात्, **तेन** सा तत्रैव संयतीनामुपाश्रये उषिता प्रभाते च गुरुसमीपे नेष्यते ॥ २८३६॥

**नाहिंति ममं ते तू, काई नासेज्ज अप्पसंकाए ।**
**जा उ न नासेज्ज तहिं, तं तु गयं बेंति आयरिया ॥ २८३७॥**

प्रभातेऽहं गुरुसमीपे **नेष्ये ते तु** गुरवो **मां ज्ञास्यन्ति** इति विचिन्त्य **काचिदात्मशङ्कया नश्येत्, या तु न नश्यति तां तत्र** गुरूपाश्रये **गतामाचार्याणां** संयत्यः **कथयन्ति** यथैका(षा)ऽस्माकमुपाश्रयेऽनेन कारणेनउषिता। एतेन 'वुत्थ साहंती'ति व्याख्यातम् ॥ २८३७॥

एवं कथिते आचार्यास्तां ब्रुवते किमित्याह—

---

१. सं. ।ण्मुत्तरां - पु. प्रे. ॥

**न हु कप्पति दूई वा, (चो)चारी वा अम्ह काइ इति वुत्ते ।**
**गुरुणा नाया मि अहं, वएज्ज नाहंति वा बूया ॥ २८३८ ॥**

'**न हि** नैव **कल्पते दूती चारी वा अस्माकं काचित्** दीक्षयितुम्' इति **गुरुणोक्ते ज्ञाताऽहमिति** विचिन्त्य **व्रजेत्** यदि वा **ब्रूयान्नाहं** तादृशीति । एतेन 'पूर्वदोषान् चोदयतीति' व्याख्यातम् ॥ २८३८॥

सम्प्रति 'रक्खंति नाउ से भावमि'ति व्याख्येयं तत्र कथं तस्या भावं लक्षयन्तीत्यत आह—

**अतिसयरहिया थेरा, भावं इत्थीण नाउ दुन्नेयं ।**
**रक्खेहेयं उप्पर, लक्खेह य से अभिप्पायं ॥ २८३९॥**

**अतिशयरहिता** अपि **स्थविराः स्त्रीणां दुर्ज्ञेयं भाव**मिङ्गिताकारकुशलतया ज्ञात्वा वदन्ति **एतामुत्परां** यत्नेन **रक्षयत लक्षयत** वा **से** तस्या **अभिप्रायम्** ॥२८३९॥ कथं लक्षयन्ति? इत्यत आह-

**उच्चारभिक्खे अदुवा विहारे, थेरीहिं जुत्तं गणिणी उ पेसे ।**
**थेरीण असती तु अतव्वया हि, ठावेंति एमेव उवस्सयम्मि ॥ २८४० ॥**

यदा सा ब्रूते नाहं तादृशीति तदा तस्या उत्परिचित्तेन लिङ्गमात्रं समर्पितं तत **उच्चार**भूमौ **भिक्षायामथवा विहारे गणिनी** प्रवर्त्तिनी तां **स्थविराभिर्युक्तां प्रेषयेत् स्थविराणामभावे अतद्वयोभि**स्तस्याः सकाशात् या या क्षुल्लकतरास्तरुण्यः ताभिः सममुच्चारभूम्यादिषु प्रेषयति। **एवमेव** प्रथमतः स्थविराभिः, तासामभावे असदृशवयोभिरित्यर्थः, उपाश्रये **स्थापयन्ति** ॥ २८४० ॥

**कइयविया उ पविट्ठा, अच्छइ छिड्डुं तहिं निलिच्छंती ।**
**विरहालंभे अहवा, भणाइ इणमो तहिं सा उ ॥ २८४१ ॥**

**कैतविका** कैतववती **प्रविष्टा** सती सा **तत्र छिद्रं निरीक्षमाणा तिष्ठति। अथवा विरहाऽलाभे तत्र सा इदं भणति**॥ २८४१ ॥

किं तद्भणति? इत्यत आह—

**अविहाडाहं अव्वो, मा मं पस्सेज्ज नीयवग्गो वा ।**
**तं दाणिं चेइयाइं, वंदह रक्खामहं वसहिं ॥ २८४२॥**

पाक्षिकादिषु आर्यिकाश्चैत्यवन्दनार्थं प्रस्थिता अवलोक्य सा शैक्षी ब्रूते '**अव्वो**' इति सम्बोधने '**अहमविघाटा** अप्रकटा वर्त्ते, यदि वा **मां** प्रव्रजितां **निजवर्गः पश्येत्** ततः स व्रताच्च्यावयेत् **तस्माददिदानीं** यूयं **चैत्यानि वन्दध्वमहं वसतिं रक्षामि**' एवमुक्ते एकया तरुण्या सह प्रतिश्रयपालिका स्थापिता॥ २८४२॥

ततो गतास्वार्यिकासु सा शैक्षी तां तरुणीमार्यिकां ब्रूते—

**उव्वण्णो सो धणियं, तुज्झ धवो जो तया सि नितण्हो ।**
**वभिचारि वा अन्नो, इति नाते विगिंचणा तीसे ॥ २८४३॥**

**तव धवो** भर्त्ता **यस्तदा निस्तृष्ण** आसीत् **स** इदानीं **धणिय**मत्यर्थं तव विषये **उव्वण्णो** उत्कण्ठितः, अथवा **अन्यः** कोऽपि **व्यभिचारी** पारदारिकः संयतीं प्रार्थयमानस्तां प्रव्रज्याव्याजेन व्यापारितवान् । ततः सा एवं विरहं ज्ञात्वा ब्रूयात् एको वरतरुणो रूपादिगुणोपेतस्तवानुगोऽनुरूपो वर्त्तते, स तव समागममिच्छति। एवं **तस्या** भावे **ज्ञाते विगिञ्चना** परित्यागः कर्त्तव्यः ॥ २८४३॥

अथवा काचित् सिद्धपुत्रिका वा अन्या वा संयतीनां वस्त्राण्यपहर्तुकामा निष्क्रमणव्याजेन प्रविष्टा चैत्यवन्दनार्थं गतास्वार्यिकासु तरुणीः क्षुल्लिकाः प्रतीदं ब्रूत—

**पारवयादीयाइं, दिट्ठा णं नासि णंतगाणि मए[१] ।**
**तुब्भं नत्थि इति विरहे, वुत्ता खुड्डीतो दंसंति ॥ २८४४॥**

**पारापतादिकानि** आदिशब्दात् पुण्ड्रवर्द्धनकादिपरिग्रहः, न **मयाऽनन्तकानि** वस्त्राणि **दृष्टानि, ण**मिति वाक्यालङ्कारे, तत् किं युष्माकं महत्तरिकाया पार्श्वे तानि **न सन्ति**? **एवमुक्ता**स्ताः**क्षुल्लिका**स्तुच्छतया माऽस्माकं महत्तरिकाया परिभवो भूयादिति कृत्वा दर्शयन्ति॥ २८४४॥

कानि कानीत्यत आहः—

**कोट्टंब ताम्रलित्तग, सिंधवए कसिण-जुंगिए चेव ।**
**बहुदेसिए य अन्ने, पेच्छसु अम्हं खमज्जाणं ॥ २८४५॥**

**कोट्टंबानि** गौडदेशोद्भवानि, **ताम्रलिप्तिकानि, सैन्धवानि, अन्यानि च बहुदेशिकानि**



१. महतिरिए-ला. ॥

**कृत्स्नानि** परिपूर्णानि **जुङ्गितानि** खण्डीकृतानि अस्माकं **क्षमार्याणां** क्षमाप्रधानानामार्याणां, प्रवर्त्तिन्या इत्यर्थः, **प्रेक्षस्व** वस्त्राणीति ॥ २८४५॥

उपसंहारमाह—

**सच्छंदगेण्हमाणीण, होंति दोसा जतो उ इच्चाती ।**
**इइ पुच्छिउं पडिच्छा, न तासि सच्छंदया सेया ॥ २८४६॥**

**स्वच्छन्दत** उपधिं शिष्यां वा **गृह्णतीनां** संयतीनां **यत इत्यादय** एवमादयो **दोषा भवन्ति, इति** अस्मात् कारणात् गुरूनापृच्छ्य उपधेः शिष्याया वा **प्रतीच्छा** ग्रहणं **न तु स्वच्छन्दता तासां श्रेयसी** ॥ २८४६॥

**सूत्रम्—कप्पइ निग्गंथाणं निग्गंथीओ आपुच्छित्ता वा अणापुच्छित्ता वा, निग्गंथीं अन्नगणाओ आगयं खुयायारं जाव संकिलिट्ठायारचरित्तं तस्स ठाणस्स आलोयावेत्ता जाव पायच्छित्तं पडिवज्जावेत्ता पुच्छित्तए वा, वाएत्तए वा, उवट्ठावेत्तए वा, संभुजित्तए वा, संवसित्तए वा, तीसे इत्तरियं दिसं वा, अणुदिसं वा उद्दिसित्तए वा धारेत्तए वा तं च निग्गंथीओ नो इच्छेज्जा, सेवमेव नियं ठाणं॥ २॥**

'कप्पइ निग्गंथाणं निग्गंथीतो आपुच्छित्ता वा अणापुच्छित्ता वा' इत्यादि। अत्र सम्बन्धमाह—

**अत्थेण गंथतो वा, संबंधो सव्वहा अपडिसिद्धो ।**
**सुत्तमत्थमवेक्खति, अत्थो वि न सुत्तमतियाति ॥ २८४७॥**

**अर्थतो ग्रन्थतश्च सम्बन्धोऽप्रतिषिद्धः सर्वथा,** यतः **सूत्रमर्थमपेक्षते,** अर्थोऽपि च, निर्ग्रन्थीनामधिकारे सूत्रमिदं प्रवृत्तमतः सूत्रतोऽर्थतश्च सम्बन्धोऽस्ति इति न किञ्चिदनुपपन्नम्॥ २८४७॥

**नदिसोयसरिसो वा, अहिगारो एस होइ दट्ठव्वो ।**
**छट्ठाणंतरसुत्ता, समणीणमयं तु जा जोगो ॥ २८४८॥**

अथवा **षष्ठोद्देशके** चरमानन्तरसूत्रद्वयादारभ्य **एषोऽधिकारो नदीस्त्रोतःसदृशो द्रष्टव्यः।** **अयं** तु **योगस्तावत् यावत् श्रमणीनाम**धिकारः ॥ २८४८॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**कल्पते निर्ग्रन्थानां निर्ग्रन्थीरापृच्छ्य अनापृच्छ्य वा निर्ग्रन्थीमन्यगणादागतां क्षताचारां सबलाचारां संक्लिष्टाचारचरित्रां तस्मात् स्थानादालोच्य** प्रतिक्राम्य **प्रायश्चित्तं प्रतिपाद्य प्रष्टुं वा वाचयितुं वा उपस्थापयितुं वा संभोक्तुं वा संवस्तुं वा तस्या इत्वरां दिश**माचार्यलक्षणा**मनुदिश**मुपाध्यायलक्षणां प्रवर्त्तिनीलक्षणां च **उद्देष्टुं** वा स्वयं वा **धारयितुं** वा **तां च निर्ग्रन्थ्यः** साम्भोगिक्योऽसाम्भोगिक्यो वा **नेच्छेयु**स्तर्हि **सेहि** सैव **नियं ठाणं निजमात्मीयस्थानं** प्रतिगमयतामपि ताः परित्यजतामपीति भावः निर्दोषत्वं प्रतिसिद्धिरेव, न कश्चनापि दोष इति सूत्रसङ्क्षेपार्थः। सम्प्रति **भाष्यविस्तरः**—

**संविग्गाणुवसंता, आभीरी दिक्खिया य इतरेहिं ।**
**तत्थारंभं दट्ठुं, विपरिणमतितरे व दिट्ठा उ ॥ २८४९॥**

काचि**दाभीरी संविग्नानां** समीपे धर्मं श्रुत्वा **उपशान्ता**, ते च संविग्ना अन्यत विहृता **इतरे** असंविग्नाः समागताः, तैः सा आभीरी **दीक्षिता**, तेषां चासंविग्नाना**मारम्भं** रन्धनादिकं **दृष्ट्वा** सा **विपरिणमति** विपरिणामे च तस्या अभिप्रायो जातः 'तेषामेव संविग्नानां

समीपमुपगच्छामि' एवं चिन्तयन्त्या तया ते **इतरे** संविग्ना स्नानादिसमवसरणे **दृष्टाः** श्रुता वा यथा अमुकस्थाने तिष्ठन्ति ॥ २८४९॥

**तह चेव अब्भुवगया, जह छट्ठुद्देस वण्णिया पुव्विं ।**
**अविसज्जंताणं पि, डंडो तह चेव पुव्वुत्तो ॥ २८५०॥**

सा तत्र गता यत्र ते संविग्नाः श्रुताः, गत्वा च ग्रहणशिक्षामासेवनशिक्षामन्यमाचार्यमन्यमुपाध्यायमन्यां च प्रवर्त्तिनीं याचते, एवमुक्ते **यथैव षष्ठोद्देशे** 'चतुत्थी मग्गए सिक्खं' [गा.२७९६] इत्यत्र पूर्ववर्णिता **तथैव** एषाऽपि संविग्नैर**भ्युपगता** यथा **वाऽविसर्जयतां** प्रवर्त्तिन्युपाध्यायाचार्याणां पूर्वं दण्डः प्रायश्चित्तं दण्डस्तथैवात्रापि द्रष्टव्यः ॥ २८५०॥

**तं पुण संविग्गमणा, तत्थाणीयं तु जइ न इच्छेज्जा ।**
**नियगातो संजतीतो ममकारादीहिं कज्जेहिं ॥ २८५१॥**

**तां पुनः संविग्नमनसं तत्रानीतां यदि निजकाः संयत्यो ममकारादिभिः कार्यैर्नेच्छेयुः** ॥ २८५१॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तान्येवम मकारादीनि कारणान्याह—

**पासत्थिममत्तेणं, पगती वेसा अचक्खुकंता वा ।**
**गुरुगणतण्णीयस्स व, निच्छंती पडिसिद्धीतो ॥ २८५२॥**

**ओमाणं णे काहिति, संखलिबद्धा उ ताओ सव्वातो ।**
**मा होहिति सागरियं, सीयंति वा उज्जयं नेच्छे ॥ २८५३॥**

यस्याः सा शिष्या तया सह तासां मैत्री, ततो मा सा पार्श्वस्था अस्माकमुपरि मन्युं कार्षीरिति **पार्श्वस्थाममत्वेन** नेच्छन्ति, अथवा सा कर्मानुभावतः प्रायः सर्वजनस्य **द्वेष्या,** यदि वा पूर्वभवानुभावत एकस्याः प्रवर्त्तिन्या **अचक्षुष्कान्ता,** अथवा सा प्रवर्त्तिनी आत्मीयस्याचार्यस्य विषये केनापि कारणेन कुपिता वर्त्तते, यदि वा गणस्य गच्छस्योपरि, एतच्चाचार्यो न जानाति यद्वा तस्याः संयत्या यो निजकवर्गस्तस्य विषये प्रवर्त्तिन्याः **प्रतिसिद्धिः** प्रतिस्पर्द्धता विद्यते, अथवा **ताः सर्वा** अपि संयत्यः **शृङ्खलाबद्धाः** परस्परं स्वजनाः ततो नोऽस्माकम**पमान**मेषा **करिष्यति** तस्मान्मा सागारिकं भवतु, यदि वा ताः **सीदन्ति** तच्चाचार्यो



For Private And Personal Use Only

न जानाति, सा च धर्मश्रद्धया पार्श्वस्थान् विप्रहायाऽत्र समागता साऽस्माकं सागारिकीति कारणैस्तामुद्यतामपि नेच्छन्ति ॥ २८५२॥ २८५३॥

अत्र प्रायश्चित्तविधिमाह —

**भणिय वसभाभिसेए, आयरियकुलेण गणेण संघेण ।**
**लहुगादि जाव मूलं, अण्णिस्स गणो य दायव्वो ॥ २८५४॥**

**एवं पुव्वगमेणं, विगिंचणं जाव होइ सव्वासिं ।**
**देंतन्न मणुण्णाणं, अमणुण्ण चउण्हमेगयरं ॥ २८५५॥**

**वृषभै**रानीतां यदि पूर्वकारणैस्तां नेच्छन्ति तदा तासां प्रायश्चित्तं चतुर्लघु, **अभिषेकः** उपाध्यायस्तेन ताः संयत्यो **भणनीयाः** प्रतीच्छतेमां संयतीमिति। तथापि चेन्नेच्छन्ति चतुर्गुरु। एव**माचार्येणा**पि भणने अनिच्छायां षड्लघु, **कुलेन** षड्गुरु, **गणेन** छेदः, **सङ्घेन** मूलम्। तथा चाह—**लघुकादि** चतुर्लघ्वादि प्रायश्चित्तं क्रमेण तावत् द्रष्टव्यं **यावन्मूलम्**। सङ्घभणनेऽप्यनिच्छायां प्रवर्त्तिन्या गणोऽपह्रियते**ऽन्यस्या गणो दातव्यः**। अथ सा

प्रवर्त्तिनीममत्वेन गणं नेच्छति तर्ह्यन्यस्या दीयते। **एवं पूर्वगमेन विगिञ्चनं** परित्यजनं तावद् द्रष्टव्यं **यावत् सर्वासामपि भवति**। ततो यस्तस्याचार्यस्य द्वितीयो गच्छस्तत्र नीयते, तत्रापि यदि तथैव ता नेच्छन्ति ततोऽन्यगच्छसत्काः साम्भोगिक्यः संयत्यस्तासां दीयते, ता अपि यदि नेच्छेयुस्तर्हि अन्यसाम्भोगिकीनां दीयते। तथा चाह— **अन्यानां मनोज्ञानाममनोज्ञानां** च सर्वसङ्ख्यया **चतसृणामेकतरं** स्थानं **ददति**। तत्र प्रथमं स्थानमात्मीयाः संयत्यः, द्वितीयं गच्छवर्त्तिन्यः, तृतीयमन्याः साम्भोगिक्यः,चतुर्थममनोज्ञा इति अथवा अन्यथा चतुर्णामेकतममिति व्याख्यायते॥ २८५४॥ २८५५॥

**समणुण्ण-मणुण्णाणं, संजय तह संजतीण चउरेति ।**
**पासत्थिममत्तादि व, अद्धाणादिव्व जे चउरो ॥ २८५६॥**

**समनोज्ञानां संयतानां** समुदाय एकं स्थानम्, समनोज्ञानां **संयतीनां** द्वितीयम्,**अमनोज्ञानां** संयतानां तृतीयम्, अमनोज्ञानां **संयतीनां** चतुर्थम्। एवमेतानि **चत्वारि** स्थानानि, एतेषामेकतरं समनोज्ञसंयतीनामात्मतृतीयानां द्वितीयगच्छवर्त्तिनीनामन्यगच्छवर्तिनीनां वा स्थानं दीयते, तदभावे अमनोज्ञसंयतीनामपि। अथवा **पार्श्वस्थाममत्वं**, प्रकृत्या सर्वजनद्वेष्या, प्रवर्त्तिन्या वा

अचक्षुष्कान्ता गुर्वादिप्रतिस्पर्द्धता वा प्रवर्त्तिन्या एतानि यानि चत्वारि कारणानि, एतेषामेकतरत् कारणमधिकृत्याऽन्यसाम्भोगिकीनामसाम्भोगिकीनां च दीयते, अथवा या अध्वनिर्गतादिका दुहितरं वा संस्मरन्ति परचक्रागमनेन देशभङ्गे वा शिक्षां वा मृगयमाणा एता याश्चतस्त्रस्ता-सामेकतरामन्यसाम्भोगिकीनामसाम्भोगिकीनां वा दातव्या ॥ २८५६॥

यद्यसाम्भोगिक्योऽपि नेच्छन्ति तदा किं कर्त्तव्यम्? अत आह—

**से हि त्ति नियं ठाणं एवं सुत्तम्मि जं तु भणियमिणं ।**
**एवं च कयपयत्ता ताहे सुयत्ता उ ते सुद्धा ॥ २८५७॥**

**एवम**साम्भोगिकीनामप्यनिच्छायां **यत् सूत्रे भणितं से हि त्ति नियं ठाण**मिति तत् कर्त्तव्यमस्याम्। अथ **एवं कृतप्रयत्ना** अपि यदा संयत्यो नेच्छन्ति **तदा** ते तां **मुञ्चन्तोऽपि शुद्धाः** ॥ २८५७॥

**सूत्रम्— जे निग्गंथा य निग्गंथीओ य संभोइया सिया, नो णं कप्पइ निग्गंथाणं पारोक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए। कप्पइ णं पच्चक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए।**

**जत्थेव अण्णमण्णं पासेज्जा तत्थेव एवं वएज्जा "अहं णं अज्जो! तुमए सद्धिं इमम्मि कारणम्मि पच्चक्खं पाडिएक्कं संभोइयं विसंभोगं करेमि।"**

**से य पडितप्पेज्जा, एवं से नो कप्पइ पच्चक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए। से य नो पडितप्पेज्जा, एवं से कप्पइ पच्चक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए॥ ३॥**

'जे य निग्गंथा य निग्गंथीतो य' इत्यादि। अत्र सम्बन्धमाह—



**संभोइउं पडिक्कमाविया य कप्पइ अयं पि संभोगो ।**
**सो उ विवक्खे वुत्तो, इमं तु सुत्तं सपक्खम्मि ॥ २८५८॥**

अनन्तरसूत्रे **प्रतिक्राम्य सम्भोक्तुं कल्पते** इत्युक्तम्, **अयमपि** चाऽनेन सूत्रेणाभिधीयमानः **सम्भोग**स्ततः सम्भोगाधिकारादिदं सूत्रं प्रवृत्तमथवाऽयं सम्बन्धः- पूर्वसूत्रे सम्भोगो **विपक्षे** संयतीरूपेऽभिहित **इदं तु सूत्रं सपक्षे** संयतरूपे सम्भोगविषयमिति सम्बन्धः ॥ २८५८॥

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**ये निर्ग्रन्था निर्ग्रन्थ्यश्च साम्भोगिकाः स्युस्तेषां नो ण**मिति वाक्यालङ्कारे, **कल्पते परोक्षे प्रत्येकं विसम्भोगिकं विसाम्भोगं कर्तुं, कल्पते प्रत्यक्षं प्रत्येकं साम्भोगिकं विसाम्भोगिकं कर्तुम् । यत्रैव परस्परं पश्येत् तत्रैव एवं वदेत् अहं ण**मिति पूर्ववत्, आह-'**आर्य ! त्वया सार्द्धमस्मिन् कारणे प्रत्यक्षं प्रत्येकं साम्भोगिकं विसाम्भोगं करोमि**' एवमुक्ते यदि **स प्रतितप्यते** 'मिथ्यादुष्कृतं **न** भूय एवं करिष्यामि' एवं सति से तस्य **न कल्पते** त्रयाणां **प्रत्यक्षं प्रत्येकं विसम्भोगिकं विसम्भोगं कर्तुम्** अथ **स न प्रतितप्यते एवं** सति **से** तस्य **कल्पते** त्रयाणां **प्रत्यक्षं प्रत्येकं विसम्भोगिकं विसम्भोगं कर्तु**मिति सूत्राक्षरार्थः ॥ अधुना **भाष्यकारः** प्राह—

सूत्र ३ गाथा २८५७-२८६० परोक्षे विसम्भोग-करणनिषेधः

**संभोगो पुव्वुत्तो पत्तेयं पुण वयंति पडियक्कं ।**
**तप्पंते समणुण्णे पडितप्पण माऽणुतप्पंत ॥ २८५९॥**

**सम्भोगः पूर्वं** निशीथाध्ययने **उक्तः । पडियक्कं पुनर्वदन्ति प्रत्येकं** यो विसम्भोगं करोति स तप्यते यथा-एतेन नाम शय्यातरपिण्डः प्रतिसेवितोऽहो कष्टम्! एवं तपन्तमितरो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञात्वा इतरोऽ**नुतप्यते,** एष मम दोषेण तपति तस्मात् प्रत्याययामि यथा असदेतत् यदहं शय्यातरपिण्डं सेवितवान्। अथ सत् तदासौ चिन्तयति **मा** मम दोषेणैष तप्यतु तस्मात् मिथ्यादुष्कृतं करोमि । एवं संविग्ने तप्यति यदनुतपनं तत् **प्रतितपन**मिति। तदेवं **भाष्य**कृता विषमाणि सूत्राक्षराणि विवृतानि॥ २८५९॥

सम्प्रति **निर्युक्त्य**वसरः—

**सागारिए गिहा निग्गए य वडघरिय जंबुघरिए य ।**
**धम्मिय गुलवाणियए, हरितोलित्ते य दीवे य ॥ २८६०॥**

**सागारिके** शय्यातरे **गृहान्निर्गते वटगृहिके जम्बूगृहिके च** असदभ्याख्यानेन विसम्भोगः कृतः। इयमक्षरघटना, भावार्थस्त्वयम्— कस्मिन्नगरे आचार्यस्य वटगृहिकः शय्यातरः, तस्मिन्नेव नगरे अन्यो जम्बूगृहिको गृहस्थोऽस्ति, ताभ्यां च वटगृहिक-जम्बूगृहिकाभ्यामात्मीयमात्मीयं गृहं कारितं, तयोश्च निर्मापितयोर्द्वयोरपि गृहयोः कपोताः प्रविष्टास्ततोऽमङ्गलमिति मन्यमानौ तौ नैमित्तिकं पृच्छतः कथमेतस्य दुर्निमित्तस्य व्याघातो



For Private And Personal Use Only

भवेत् ? नैमित्तिको वदति–'वटगृहिको जम्बूगृहिकगृहमधितिष्ठतु जम्बूगृहिको वटगृहिकगृहं, ततः कतिपयानि दिनानि स्थित्वा पश्चान्निजनिजगृहे गच्छे(म्ये)याताम्,' तौ परस्परगृहे सञ्चरितौ च। अथान्यदाऽन्यस्मात् गच्छात्प्राघूर्णकाः समागताः। ततो वास्तव्यैः जम्बूगृहिकस्य वटगृहिकगृहं प्रविष्टस्य गृहात् प्रथमालिकामानीय तेषां प्राघूर्णकानां दत्ता । तैः शय्यातरपिण्डं मन्यमानैरुपरोधवशादप्रीत्या भुक्ता। ततस्ते प्राघूर्णका निर्गत्य आत्मीयस्याचार्यस्य समीपं गत्वा आलोचयन्ति ते अस्माकं साम्भोगिकाः शय्यातरपिण्डं भुञ्जन्ते। अस्माभिः कथमप्युपरोधवशादप्रीत्या प्रथमालिका भुक्ता । एवं श्रुत्वा आचार्योऽपि अविचिन्त्य यदि विसम्भोगं करोति । अत्रैतदधिकृतं सूत्रं पतति । तथा चाह **भाष्यकारः**—

**नव घर कवोयपविसण, दोण्हं नेमित्तिजुगव पुच्छा य ।**
**अन्नोन्नस्स घराइं, पविसह नेमित्तितो भणइ ॥ २८६१॥**

**आदेसागम पढमा, भोत्तु लज्जाए गंतु गुरुकहणं ।**
**सो जइ करेज्ज वीसुं, संभोगं इत्थ सुत्तं तु ॥ २८६२ ॥**

**नवयोर्गृहयोः कपोतानां प्रविशनं,** ततो **द्वयोरपि** गृहस्वामिनोर्युगपत् **नैमित्तिकस्य पृच्छा, नैमित्तिको भणति— अन्योऽन्यस्य गृहं प्रविशताम्।** तौ च प्रविष्टौ, **अन्यदा आदेशानां** प्राघूर्णकाना**मागमः**। ततो वास्तव्यैर्जम्बूगृहिकस्य वटगृहिकगृहं प्रविष्टस्य गृहात् प्रथमालिका आनीता, तां **लज्जया भुक्त्वा** ततो **निर्गत्य** गुरुसमीपं गत्वा **गुरोः कथनं, स यद्यविचार्य विष्वक्संभोगं करोति** तदा **अत्र सूत्र**मापतितं द्रष्टव्यम्। अत्र विचारो यदि तावित्वरं गृहपरिवर्त्तं कृतवन्तौ तदा स जम्बूगृहिकोऽशय्यातर एव । अथ यावत्कथिकस्तदा जम्बूगृहिक एव शय्यातरः ॥ २८६१ ॥ २८६२ ॥

'धम्मिय त्ति'[गा.२८६०] अस्य व्याख्यानम्—

**धम्मितो देउलं तस्स, पालेई जइभद्दतो ।**
**सो य संवड्ढियं तत्थ, लद्धुं देज्जा जईण उ ॥ २८६३ ॥**

**तस्य** शय्यातरस्य किञ्चित् **देवकुलं** तत् **धार्मिकः पालयति, स च यतीनां भद्रकः,** ततः **संवर्द्धित**मग्रकूरं **तस्मिन्** शय्यातरगृहे **लब्ध्वा साधूना**मानीय **ददाति** । अत्रापि तथैव प्राघूर्णकागमनं धार्मिकात् प्रथमालिकानयनमित्यादि सर्वं तथैव वाच्यम् ॥ २८६३ ॥

'गुलवणिक' इत्यस्य व्याख्यानम्–

**वाणियओ य गुलं तत्थ, विक्किणंतो य तं दए ।**
**तत्थ [१] मोव्वरिए होज्जा, भंडकच्छपुडेण वा ॥ २८६४॥**

शय्यातरगृहे स्थितो गुड**वणिक्** स तत्र **गुडं विक्रीणन्** साधूनां गुडं **ददाति** । अथवा शय्यातरस्याऽ**पवरिकाया**मात्मीयं **भाण्डं** तेन निक्षिप्तम्, ततः **कच्छपुटेन** अटित्वा तत्रैव समागच्छति। स चाऽटन् यदा तदा वा साधूनां भिक्षां ददाति, ततः प्राघूर्णकागमनमित्यादि विभाषा तथैव ॥२८६४॥

'हरितोपलिप्ते' इत्यस्य व्याख्यानम्–

**हरितोलेत्ति कया सेज्जा कारणे ते य संठिया ।**
**पसज्झा [२] वसहिपालस्स चेइयट्ठा गणे निग्गते ॥ २८६५॥**

छगणेन वसतिरधुनो**पलिप्ता** कृता **हरितानि** च तत्र परिसाटितानि । तस्यामधुनोपलिप्तायां

१. मा वारिए-पु. प्रे.। सो वारिए-मु.॥ २. वावि पालस्स चेइयट्ठा गणे गते - पु. प्रे. ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पातितेषु च हरितेषु ते साधवः **कारणेन स्थिताः** । अथवा पूर्वसंस्थितानां **चैत्यवन्दनार्थं गणे निर्गते** पश्चात् **वसतिपालस्य प्रसह्य** बलात्कारेणोपलिप्ता कृता, हरितानि च पातितानि, अत्रावसरे प्राघूर्णकाः समागतास्ते च वसतिं दृष्ट्वा चिन्तयन्ति— प्रतिदिवसमुपलिप्यते शय्या, ततो गत्वा तैरात्मीयस्याचार्यस्य कथितं तेन च यद्यविचार्य विसम्भोगः क्रियते तदा अत्र सूत्रोपनिपातः ॥२८६५॥

'दीपे चे'त्यस्य व्याख्यानम्—

**छिण्णाणि वा हरियाणि पविट्ठो दीवएण वा ।**
**कयकज्जस्स पम्हुट्ठे सो वि जाणे दिणे दिणे ॥ २८६६॥**

यस्यां शय्यायां संयताः स्थितास्तत्र शय्यातरः केनापि कारणेन प्रदोषे **दीपकेन सह प्रविष्टस्ततो** येन कार्येण समागतस्तत्कार्यं कृत्वा निर्गतः दीपस्तत्रैव विस्मृतः। तत्र च तस्मिन् दिवसे साम्भोगिकाः प्राघूर्णका समागमन् **स च** प्राघूर्णकबृहत्तरः शय्यातरस्य **कृतकार्यस्य विस्मृते** दीपे जानाति **दिने दिने** वसतौ दीपः क्रियते। एवं ज्ञात्वा गुरोः कथितं, स चाऽविचिन्त्य विसम्भोगं कृतवान्। अत्राप्यधिकृतसूत्रस्योपनिपातः॥ २८६६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतान्यसन्ति कारणानि, अत्र प्रायश्चित्तविधिमाह—

**दट्ठुं साहण लहुओ, वीसु करेंताण लहुग आणादी ।**
**अद्धाणनिग्गयादी, दोण्हं गणभंडणं चेव ॥ २८६७॥**

योऽसन्ति कारणान्यविवेच्य गुरोर्निवेदयति तस्य प्रायश्चित्तं **लघुको** मासः । कथितेऽपि यद्याचार्यो न विवेचयति । अविवेच्य च विसम्भोगं कुर्वन्ति तदा तेषां **विष्वक्कुर्वतां** चत्वारो **लघुकाः**। न केवलं प्रायश्चित्तं किंत्वाज्ञादयश्च दोषाः। तथा **अध्वादिनिर्गतानाम्** आदिशब्दाद-शिवादिकारणपरिग्रहः। **द्वयोरपि गणयोर्भण्डनं च** ॥ २८६७॥



एतदेव स्पष्टं भावयति—

**तं सोउ मणसंतावो, संतईए तिउट्टइ ।**
**अन्ने वि ते विवज्जंति, वज्जिया अमुएहि उ ॥ २८६८॥**

ये तेषां साम्भोगिकास्तैस्तत्शय्यातरपिण्डाद्यासेवनं **श्रुत्वा मनःसन्तापः** क्रियते यथा-तेन धर्मश्रद्धिकेनापि भवता शय्यातरपिण्डाद्यकल्पिकमासेवितम्। ततः सोऽद्यप्रभृत्यस्माकं

For Private And Personal Use Only

**सन्ततेस्त्रुट्यति**[1] पृथग् विभिन्न इत्यर्थः । ततो येऽन्ये तेषां साम्भोगिकास्तेऽपि **तान् विवजर्यन्ति** यतस्तेऽवसन्ना जातास्ततो**ऽमुकेना**चार्येण **विवर्जिताः** ॥ २८६८॥

**ततो वा अन्नतो वावि, ते सोच्चा इह निग्गया ।**
**वज्जेंता जं तु पावेंति, निज्जरातो य हाविता ॥ २८६९॥**

ततस्ते वर्जिता अध्वनिर्गता अशिवादिकारणेन वा निर्गता इह यत्र ते पूर्वसम्भोगिकास्तिष्ठन्ति तत्र प्राप्ताः। **ततो** यैरविवेच्य शय्यातरपिण्डादिकमासेवितमित्याचार्याणां कथितं तेभ्यो**ऽन्येभ्यो वा श्रुत्वा** यूयं पृथक्कृता इत्याकर्ण्य तं गणं **वर्जयित्वा [ निर्गताः ] यत्** प्रथमद्वितीयपरीषहाभ्यामनागाढादिपरितापनं **प्राप्नुवन्ति** तन्निष्पन्नमविवेच्य विसम्भोगकारिणां प्रायश्चित्तम्। **निज्जरातो य हाविया** इति, तेषामध्वादिनिर्गतानां ते वास्तव्या वैयावृत्त्यं कृत्वा **निर्जरां** प्राप्नुयुस्ते ततो **हापिताः**, प्रभूतं च कर्म अविवेच्य जल्पकैर्बध्यते यन्महता संसारेण निस्तरीतुं शक्यते ॥२८६९॥

गाथा २८६७-२८७२ प्राधुर्णकादिभिः शङ्कायां पृच्छना कार्या

---

**१. सन्ततेस्तुद्यति- मु. पु. प्रे. । संयतस्तेस्तुद्यति-सं.॥**



For Private And Personal Use Only

**तं कज्जतो अकज्जे, वा सेवियं जइ वि तं अकज्जेण ।**
**न हु कीरइ पारोक्खं, सहसा इति भंडणं होज्जा ॥ २८७० ॥**

यस्मादेते दोषास्तस्मात् **कार्यतः** कारणेन **अकार्ये वा** कारणाभावे वा **यद्यपि सेवितं तत्** शय्यातरपिण्डादिकं तथाऽप्य**कार्येण** एवमेव **परोक्षं सहसा इति** एवं विसम्भोगः **न क्रियते**। मा परस्परं द्वयोर्गणयो**र्भण्डनं** भूयादिति हेतोः ॥ २८७० ॥

कथं विवेकः कर्त्तव्यः? इत्यत आह—

**निस्संकियं च काउं, आसंकनिवेयणाए तहिं गमणं ।**
**सुद्धेहि कारणमणाभोगजाणया दप्पतो दोण्हं ॥ २८७१ ॥**

तैः प्राघूर्णकैस्ते प्रष्टव्याः को युष्माकं शय्यातरः? कथं वा एष शय्यातरो न भवति?। एवं **निःशङ्कितं कृत्वा,** अथ लज्जया न पृष्टास्ततो न निश्चय इति एव**माशङ्कानिवेदनायां** कृतायां यस्याऽऽचार्यस्य कथितं तेन प्रेषितस्य सङ्घाटस्य **तत्र गमनं,** तेन च सङ्घाटकेन गत्वा यत् तैः कथितं तत् ते प्रष्टव्याः। ततस्ते गृहपरिवर्त्तादि यथातथ्यं कथयन्ति। ततः

सङ्घाटो गत्वा निजसूरिसमीपं कथयति एवमक्रियमाणे द्वयोर्गणयोर्भण्डनम्। तदेव पश्चार्द्धेन भावयति— '**सुद्धेहि** शुद्धैरप्यस्माभिः समं यूयं विसम्भोगं कुरुथ। अथवा **कारणं** गृहपरिवर्त्तादिकमधिकृत्य तत् गृहीतं, यदि वा **अनाभोगतो** गृहीतमथवा **द्वयोः** प्रथम-द्वितीयपरीषहयोरुदीर्णयो**र्जानता दर्पतो** गृहीतं पुनः पश्चात् कृता शोधिः, अपि च यदि निष्कारणेऽपि गृहीतं तथाऽपि न युक्तं परोक्षं विसम्भोगकरणम्। यदि वयं नाऽऽवृत्ता भवामस्ततो युक्तं विसम्भोगकरणमथ कारणे गृहीतं तदा वयं शुद्धा एव कथं विसम्भोग-करणम्?' एवं भण्डनं स्यात् ॥ २८७१॥

साम्प्रतं 'कारणमणाभोगे'ति पदद्वयं व्याख्यानयति—

**कज्जेण वा वि गहियं, सागारपरियट्टतो य सो अम्हं ।**
**कारणमजाणतो वा, गहियं किं वीसुकरणं तु ॥ २८७२॥**

**कार्येण** कारणेन **गृहीतमस्माभिर्वाऽपि**शब्दौ विकल्पने तच्च कार्य**मस्माकं स्वागारपरिवर्त्तः**। अथवा **कारणमजानता** यदि **गृहीतं** तथापि **किं** कस्मात् परोक्षेऽपि **विष्वक्करणं** विसम्भोगकरणम्?॥२८७२॥

सम्प्रति जाणता दप्पतो' इति व्याख्यानयति—

**जाणंतेहि व दप्पा, घेत्तुं आउट्टिउं कया सोही ।**
**तुब्भेत्थ निरइयारा, पसीयह भंते कुसीलाणं ॥ २८७३ ॥**

**जानद्भिरपि वा** प्रथम-द्वितीयपरीषहत्याजितैर्दर्पात् **गृहीत्वा आवृत्त्य कृता**ऽस्माभिः **शोधिः**, तस्मात् **यूयमेवात्र** जगति **निरतिचारा भदन्त! कुशीलाना**मस्माकं **प्रसीदत** इत्युपहासवचनमेतत् ॥२८७३॥

**पढमबिइतोदएणं, जं सव्वं आउरेहिं तं गहितं ।**
**दिट्ठादाणि भवंतो, जं बिइयपएसु नित्तण्हा ॥ २८७४॥**

**प्रथमद्वितीयोदयेन** प्रथमद्वितीयपरीषहोदयेन **यत् तत् सर्वमातुरैर्गृहीतं** युष्माभिस्तत् विस्मृतं, **दृष्टा भवन्त इदानीं यत् द्वितीयपदेषु निस्तृष्णा** इति, एतदप्युपहासवचनम् । एवं भण्डनं प्रवर्त्तते ॥ २८७४॥

यत एवं परोक्षे विसम्भोगकरणे भण्डनदोषस्तस्मात् कल्पते निर्ग्रन्थानां प्रत्यक्षं साम्भोगिकं विसम्भोगं कर्तुम्। अस्यैव सूत्रस्य व्याख्यानमाह—

**सत्तमए ववहारे, अवराहविभावियस्स साहुस्स ।**
**आउट्टमणाउट्टे, पच्चक्खेणं विसंभोगे ॥ २८७५ ॥**

अस्मिन् **सप्तमे व्यवहारे** व्यवहारस्योद्देशके अपराधेन विभावितः परिभावितो यः साधुः स यदि प्रत्यावर्त्तते तदा तस्या**पराधविभावितस्य साधो**रावृत्तस्य विसम्भोगो न क्रियते, प्रायश्चित्तं पुनर्दीयते । अथ नावर्त्तते ततो वारत्रयं भण्यते-आवर्त्तस्व महानुभाव! एवमुक्तोऽपि यदि नाऽऽवर्त्तते तदा तस्मि**न्ननावृत्ते प्रत्यक्षेण** प्रत्यक्षतया **विसम्भोगः** क्रियते ॥२८७५॥

**संभोगऽभिसंबंधेण आगते केरिसेण सह णेओ ।**
**केरिसएण विसंभोगो भण्णइ सुणसु समासेणं ॥ २८७६ ॥**

**एवमभिसम्बन्धेन सम्भोगे आगते** शिष्यः पृच्छति-**कीदृशेन सह** सम्भोगो **ज्ञेयः ? कीदृशेन सह विसम्भोगः ?** सूरिराह—**भण्यते** एतत् **समासेन,** तच्च भण्यमानं **शृणु** ॥ २८७६ ॥

प्रतिज्ञातमेव निर्वाहयति—

**पडिसेहे पडिसेहो, असंविग्गे दाणमादितिक्खुत्तो ।**
**अविसुद्धे चउगरुया, दूरे साहारणं काउं ॥ २८७७॥**

प्रतिषिध्यते 'पार्श्वस्थत्वादिकं न कल्पते' इति निवार्यते इति प्रतिषेधः, असंविग्नः पार्श्वस्थादिः भण्यते तस्मिन् **प्रतिषेधे असंविग्ने दानादे**र्दानग्रहणसंसर्ग्यादिः **प्रतिषेधः त्रिकृत्व** इति। यदि कथमपि दानादि करोति तदा एकं द्वौ त्रीन् वारान् वार्यते एकैकस्मिंश्च वारे प्रायश्चित्तं मासलघु। वारत्रयवारणे यदि भूयस्तैः सह दानादि करोति तदा सो **अविशुद्ध** इति विसम्भोगः क्रियते। विसम्भोगिकमपि साम्भोगिकं करोति तस्य प्रायश्चित्तं **चत्वारो गुरुकाः। दूरे साहारणं काउं** ति, **दूरे** गतानां यदि केऽपि पृच्छन्ति यथा-सन्त्यस्माकं केचित् साम्भोगिकास्तत्र देशे इति तदा **साधारणं** वक्तव्यम्। यथा-तदा साम्भोगिका अभवन् इदानीं पुनर्न जानीमः किमनुपालयन्ति साम्भोगिकत्वं किं वा **नेति** एष **निर्युक्तिगाथासमासार्थः** ॥ २८७७॥

साम्प्रतमेनामेव **भाष्यकारो** विवरीषुराह—

**पासत्थादिकुसीले, पडिसिद्धे जा उ तेसि संसग्गी ।**
**पडिसिज्झइ एसो खलु, पडिसेहे होइ पडिसेहो ॥ २८७८ ॥**

**पार्श्वस्थादिके कुशीले** स्थाने **प्रतिषिद्धे या तेषां** पार्श्वस्थादिस्थानवर्त्तिनां **संसर्गिः प्रतिषिध्यते** सा च संसर्गिः दानग्रहणाभ्यामवसातव्या। **एष भवति प्रतिषेधे प्रतिषेधः**, न चैष प्रतिषेधे प्रतिषेधोऽनार्षः ॥ २८७८ ॥

यत आह—

**सूयगडंगे एवं, धम्मज्झयणे निकाचितं भणियं।**
**अकुसीले सया भिक्खू, नो य संसग्गियं वए ॥ २८७९ ॥**

**सूत्रकृते** द्वितीयेऽङ्गे **धर्माध्ययने एवं निकाचितं** निश्चयपूर्वकं **भणितम्**, यथा—**सदा भिक्षुरकुशीलो भवेद्, न च** कुशीलैः सह **संसर्गिकां व्रजेत्** ॥२८७९ ॥

**दाणादीसंसग्गी, सइं कते पडिसिद्धे लहुगो ।**
**आउट्टे सब्भाम त्ति, असुहे उ तओ तेण परं ॥ २८८० ॥**

दानादिभिः संसर्गिः **दानादिसंसर्गिः**। तस्यां **सकृत् कृतायां** स प्रतिनिषिध्यते—'आर्य! कस्मात् पार्श्वस्थादिभिः समं संसर्गिं करोषि?' एवं **प्रतिषिद्धे** यदि स आवर्त्तते तदा स साम्भोगिक एव, केवलं तस्मिन्नावृत्ते प्रायश्चित्तं **लघुको** मासः, द्वितीयमपि वारं यदि करोति तदापि मासलघु, अथ तृतीयमपि वारं करोति आवर्त्तते च तदाऽपि मासलघु, **सद्भावत**स्त्रिकृत्व **आवृत्ते** लघुको मासः। **तेन पर**मिति ततस्तृतीयात् वारात् परं यदि चतुर्थं वारं संसर्गिं करोति तदा सो**ऽशुद्ध** इति तस्य प्रायश्चित्तं **गुरुको** मासः ॥ २८८० ॥

एतदेव स्पष्टतरमाह—

**तिक्खुत्तो मासलहू, आउट्टे गुरुगो मासो तेण परं ।**
**अविसुद्धे तं वीसुं, करेंति जो भुंजती गुरुगा ॥ २८८१ ॥**

**त्रिकृत्वः आवृत्ते** प्रायश्चित्तं **लघुको मासः**। ततः परं भूयः संसर्गिकरणे सो**ऽविशुद्ध** इति **गुरुको मासः**, **तं** च **विष्वक्** विसम्भोगं **करोति**, **यो**ऽपि तं **सम्भुङ्क्ते** तस्यापि प्रायश्चित्तं चत्वारो **गुरुकाः** ॥ २८८१ ॥

अथ कस्माद्वारत्रयात् परं भूयःसंसर्गिकृतो विसम्भोगः क्रियते? इत्यत आह—

**सति दोण्णि तिण्णि वावी, होज्ज अमाई तु माई तेण परं ।**
**सुद्धस्स होइ चरणं, मायासहिते चरणभेदो ॥ २२८२॥**

**सकृद्** एकवारं **द्वौ त्रीन्** वारान् **भवेदमायी, ततस्तृतीयाद्वारात् परं** संसर्गिकरणे **मायी।** अथ च **शुद्धस्य भवति चरणं मायासहिते तु चरणभेद**श्चरणाभावः, ततो विसम्भोगः क्रियते ॥२८८२॥

**एवं तू पासत्थादिएसु संसग्गि वारिया एसा ।**
**समणुण्णे वि अपरिच्छित्ते विदेसमादी गते एवं ॥ २८८३॥**

**एवमुक्तेन** प्रकारेण एषा दान-ग्रहणाभ्यां **संसर्गिर्वारिता, एवं समनोज्ञेऽपि विदेशादौ गते अपरीक्षिते** संसर्गिर्वारिता द्रष्टव्या । तेनापि सह संसर्गिः परीक्ष्य कर्त्तव्या नान्यथेति भावः ॥२८८३॥

सम्प्रति 'दूरे साहारणं काउं [गा.२८७७] इत्यस्य विभावनार्थमाह—

**समणुण्णेसु विदेसं, गतेसु पच्छण्ण होज्ज अवसन्ना ।**
**ते वि तहिं गंतुमणा, आहत्थि तहिं मणुन्ना णे? ॥ २८८४॥**

कस्याप्याचार्यस्य **समनोज्ञेषु** साम्भोगिकेषु **विदेशं गतेषु** पश्चादन्यसाम्भोगिकाः केचित् भिक्षाद्यलाभेना**वसन्ना भवेयुः**। ततस्**ते तत्र** विदेशे गन्तुमनस आचार्यं **पृच्छन्ति- सन्ति तत्र** केचिदस्माकं **मनोज्ञाः** साम्भोगिकाः?॥ २८८४॥

**अत्थि त्ति होइ लहुगो, कयादि ओसन्न भुंजणे दोसा ।**
**नत्थि वि लहुगो भंडण, न खित्त कह नेव पाहुण्णं ॥ २८८५ ॥**

एवमुक्ते यद्याचार्यो वक्ति- '**सन्ति** तत्र नः साम्भोगिकाः',तदा प्रायश्चित्तं **भवति** तस्य **लघुको** मासः। किं कारणम्? इति चेद्, अत आह-**कदाचित्** ते **अवसन्नीभूता** भवेयुः। ते च प्राघूर्णकास्तत्र गतास्तैः सह सम्भुञ्जन्ते, **भुञ्जानानां** च चतुर्गुरुकं प्रायश्चित्तम्। यत एवं **दोषास्तस्मात्** सन्तीति न वक्तव्यम् । अथ आचार्यो ब्रूयात् - '**न सन्ति**' इति तदापि मासो **लघुकः**। कस्माद्? इति चेत् **भण्डन**दोषात्, तथाहि— ते तत्र प्राप्तास्तेषां नाम्नि केनापि

**यस्माद्** विपक्षे **एते दोषाः,तस्मात् श्रमण-श्रमणीभ्यां स्वपक्षे उद्देशः कर्त्तव्यः** संयतैः संयतानामुद्देशः कार्यः, संयतीभिः संयतीनामित्यर्थः। ततः प्रागुक्ता दोषा न भवन्ति । आह परः -**किमत्र पुनः** कारणं यदुद्देशः **क्रियते ?** अनुद्दिष्टं कस्मात् न पठ्यते?॥ ३०१२॥ तत्राह-

**बहुमाण विणय आउत्तया य उद्देसतो गुणा होंति ।**
**पढमाएसो उ सव्वो, एत्तो वोच्छं करणकालं ॥ ३०१३॥**

उद्देशे हि क्रियमाणे श्रुतस्य श्रुताधारस्य चाध्यापकस्योपरि **बहुमान**मान्तरः प्रीतिविशेषो भवति। **विनयश्च** प्रयुक्तः स्याद् **आयुक्तता** च महती भवति एत **उद्देशतो गुणा भवन्ति**। एष **सर्वो**ऽप्यङ्गादिविषय उद्देशः **प्रथमादेशः**। **अत** ऊर्ध्वं तु स्वाध्याय**करणकालं वक्ष्ये**॥ ३०१३॥

प्रतिज्ञातमेव निर्वाहयति—

**थयथुइ धम्मक्खाणं, पुव्वुद्दिट्ठं तु होइ संज्झाए ।**
**कालियकाले इयरं, पुव्वुद्दिट्ठं विगिट्ठे वि ॥ ३०१४॥**

**नायमणाए१ आलोयणाउ२ अणालोयणे भवे गुरुगा ।**
**गीयत्थे आलोयण, सुद्धमसुद्धं विविंचंति ॥ २८८७॥** दारगाहा।

**ज्ञाते अज्ञाते** वा सम्भोगे **आलोचना** दातव्या, तदनन्तरं तैः सह सम्भुज्यते । यदि पुनर**नालोचिते** परस्परं भुञ्जते तदा **भवन्ति** चत्वारो **गुरुकाः** प्रायश्चित्तम्, सा चालोचना गीतार्थैर्दातव्या **सुद्धमसुद्धं विविंचंति** इति, **शुद्धोऽशुद्धो** वा य उपधिस्तं **विविञ्चन्ति** पृथक् कुर्वन्ति, विवेच्य यो यो निष्कारणे उद्गमादिभिरशुद्धो गृहीतो यश्च कारणे वा अयतनया तयोः परित्यागः कर्त्तव्यः तन्निष्पन्नं च प्रायश्चित्तं प्रतिपद्यन्ते। एष **निर्युक्तिगाथासमासार्थः** ॥ २८८७॥



साम्प्रतमेनामेव विवरीषुः प्रथमतो 'नायमनाए' इत्यस्य व्याख्यानमाह—

**अविणट्ठे संभोगे, नायमनाए य नासि पारिच्छा ।**
**पच्छोवसंपयं खलु, सेहं वाऽऽसज्ज आरे वी ॥ २८८८॥** दारं १॥

आर्यमहागिरेः परतः **सम्भोगोऽविनष्ट** आसीत् । तदा **ज्ञाते अज्ञाते वा नास्ति** द्रव्यादिभिः **परीक्षा आर्यसुहस्ति**शिष्यद्रमकप्रव्रज्याप्रतिपत्तिप्रभृतित आरात् विनष्टः सम्भोग

इति ज्ञाते अज्ञाते वा द्रव्यादिभिः परीक्ष्याऽऽलोचयितव्यम् आलोचिते च सह भुञ्जते । अथ साम्भोगिकाः सन्तः कथं न ज्ञायन्ते येनाऽज्ञातेनेत्युच्यमानं शोभेत ? तत आह— **पच्छोवसंपयं खलु** इत्यादि, पूर्वं ये उपसम्पन्नास्ते असमानीभूताः, अन्ये पश्चात् केऽप्युपसम्पन्नाः, अथवा पश्चादागत्य केचित् प्रव्रजितास्ततोऽदृष्टपूर्वतया ते न ज्ञायन्ते इति अज्ञाता भवन्ति। गाथायामेकवचनं जातौ ततोऽयमर्थः- **आरादपि** पूर्वदर्शनादर्वागपि **पश्चादुपसम्पन्नान् शैक्षकान् वा आसाद्य** साम्भोगिकानामप्यज्ञानता भवति। तदेवं 'नायमनाए' इति गतम् ॥ २८८८॥

इदानीम् 'आलोयणा' इति व्याख्यानयति—

**महल्लयाए गच्छस्स, कारणेहऽसिवादिहिं ।**
**देसंतरगया केइ, तत्थिमा जयणा भवे ॥ २८८९॥**

अति**महत्तया गच्छस्य** नास्ति एकत्र संस्तरणम् यदि वा **अशिवादिभिः कारणैः देशान्तरं गताः** एतैः कारणैः बहवः पृथक् पृथक् स्थिताः। तत्र पूर्वस्थितेषु पश्चादागतानां परस्परं यत्र मेलापको भवति **तत्रेयं यतना** ॥२८८९॥

**दोन्नि वि जइ गीयत्था, रायणिए इत्थ विगडणं पुव्वं ।**
**पच्छा इयरो वि दए, समाणतो छत्तछायतो ॥ २८९०॥**

अगीतार्थेन गीतार्थस्य पुरतः आलोचयितव्यम् **यदि पुनर्द्वावपि गीतार्थौ** ततोऽवमरत्नाधिकेन **गुरुरत्नाधिकस्य** पुरत आलोचयितव्यमवमरत्नाधिकेनालोचिते **पश्चादितरो**ऽपि रत्नाधिकोऽवमरत्नाधिकस्य पुरत आलोचनां **ददाति**। यः पुनः **समानश्छत्रच्छायाकः** समरत्नाधिकस्तत्र यः पश्चादाचार्यसमीपान्निर्गतस्तस्य पुरतः प्रथममालोचयितव्यम् , पश्चादितरस्य समीपे तेन। यदि पुनरनालोचिते परस्परं भुञ्जते तदा प्रायश्चित्तं प्रत्येकं चत्वारो गुरुकाः। एतेन 'अणालोइए भवे गुरुगा, गीयत्थे आलोयण'[गा. २८८७] इति व्याख्यातम्॥ २८९०॥

सम्प्रति 'सुद्धमसुद्धं विविंचंति' इत्यस्य व्याख्यानमाह—

**निक्कारणे असुद्धो उ, कारणे वाऽणुवायतो ।**
**उज्झिंति उवहिं दो वि, तस्स सोहिं करेंति य ॥ २८९१॥**

य उपधि**र्निष्कारणे** पुष्टालम्बनमन्तरेणोद्गमादिभिर्दोषै**रशुद्धो** गृहीतः, यश्च

**कारणेऽनुपायतो**-ऽयतनया गृहीतस्त**मुपधिं द्वावपि परित्यजतः**। ततः परस्परमालोचनायां दत्तायां येन दोषेणाशुद्ध उपधिरात्तस्तत्प्रत्ययमयतनाप्रत्ययं च प्रायश्चित्तं **प्रतिपद्यते** ॥ २८९१ ॥

**एवं तु विदेसत्थे, अयमन्नो खलु भवे सदेसत्थे ।**
**अभिणीचारीगादी, विणिग्गए गुरुसगासातो ॥ २८९२ ॥**

एवमुक्तेन प्रकारेण खलु **विदेशस्थे** यतना भणिता । **अयमन्यः खलु** यतनाप्रकारः **स्वदेशस्थे**, तमेवाह—**अभिनिचारिका** प्रागुक्तस्वरूपा तया, आदिशब्दादुपधिकार्येण स्पर्द्धकपतीनां वा साराकरणेन गुरूपदेशतो **गुरुसकाशाद् विनिर्गते** विनिर्गमेनैव प्रत्यागतैराचार्यपादमूले कस्यां वेलायामागन्तव्यम् ॥ २८९२ ॥

एनामेव निर्युक्तिगाथां भाष्यकारो विवृणोति—

**अभिनिचारिनिग्गते, अहवा अन्नेण वा वि कज्जेण ।**
**विसणं समणुण्णेसुं, काले को यावि कालो उ ?॥ २८९३ ॥**

**अभिनिचारिकया** प्रागुक्तस्वरूपया **निर्गते अन्येन वा** उपध्युत्पादनादिना **कार्येण** निर्गते भूयः **समनोज्ञेषु** साम्भोगिकेषु स्वाऽऽचार्यपादमूले इत्यर्थः, **विशनं** प्रवेशः **काले** कर्त्तव्यः। शिष्यः प्राह-**कः कालः?** ॥२८९३॥

सूरिराह—

**भत्तट्ठिय आवासग, सोहेउमतित्ति एत्थ अवरण्हे ।**
**अब्भुट्ठाणं दंडाइयाण गहणेगवयणेणं ॥ २८९४॥**

**भक्तार्थितां** कृत्वा बाह्यग्रामेषु भिक्षामटित्वा भोजनं च विधाय तदनन्तर**मावश्यक**मुच्चारादि **शोधयित्वा पश्चादपराह्ले** कालवेलाया**मायाति,** वास्तव्यैरपि नैषेधिकीशब्दं श्रुत्वा **अभ्युत्थानं** कर्त्तव्यम्, **दण्डादीना**मादिशब्दात् पात्रादिपरिग्रहः, **ग्रहणं** कर्त्तव्यम्। कथम् इत्याह-**एकवचनेन** दण्डादिकं गृह्णामीत्येवंरूपेणैकेन वचनेन यदि समर्पयन्ति तदा ग्रहीतव्यमन्यथा निर्बन्धो न कर्त्तव्यः। किं कारणम् इति चेद् उच्यते-वास्तव्येनातिशयेन गृहीते गृहीतमिति मन्यमानेन प्राघूर्णकेन वास्तव्याऽगृहीते मुक्ते भाजनभेदो भवति, तेन च पतता प्राणिजातिविराधना ततस्तन्निष्पन्नं प्रायश्चित्तं, तस्मादेकवचनेन दण्डादिग्रहणम् ॥ २८९४॥

वक्ष्यमाणकारणैः पुनरपवादपदतः कालवेलायां न प्रविशेत्, तान्येव कारणान्याह—

**खुड्डुगविगिट्ठगामे, उण्हं अवरण्हे तेण तु पगे वि ।**
**पक्खित्तं मोत्तूणं, निक्खिवि उक्खित्तमोहेणं ॥ २८९५ ॥**

**क्षुल्लको** ग्रामो यत्र प्राप्तो वर्त्तते तत्र पर्याप्तं न भविष्यतीति हेतोर्यदि वा **विकृष्ट**मन्तरं ततः कृतभिक्षाका न प्राप्स्यामो अथवाऽ**पराह्ने** व्रजतामती**वोष्णं** परितापस्ततः एतैः कारणैः **प्रगेपि** प्रातरपि प्रविशेत् तत्र च नैषेधिकीशब्दं श्रुत्वा यन्मुखे **प्रक्षिप्तं** **तन्मुक्त्वा**[1] तद् गिलनीयमित्यर्थः। यद् **उत्क्षिप्तं** लम्बने वर्त्तते तत्पात्रे **निक्षिप्य** वास्तव्यैरभ्युत्थातव्यम्। अत्र यदि प्राघूर्णकाः कृतपर्याप्ताः ततस्तैर्वक्तव्यंः 'मा अभ्युत्तिष्ठत वयं कृतपर्याप्ताः समागताः यदि वा यस्य कस्याप्यर्थः स तैः समं भुङ्क्ते। अथ कदाचित् प्राघूर्णका न कृतपर्याप्ता भवेयुस्तदा सर्वं तेषां दत्त्वा वास्तव्या अन्यद् गृह्णन्ति। अथ वास्तव्यैरतिशयेन पर्याप्ते लब्धे ते प्राघूर्णकाः समागतास्ततो यदि तपोर्हं प्रायश्चित्तमापन्नास्तदा **ओघा**लोचनया आलोच्य तैः समं भुञ्जते। एष **निर्युक्तिगाथासमासार्थः** ॥ २८९५ ॥



---

१. तद्भुक्त्वा-मु. ॥

साम्प्रतमेनामेव विषमपदव्याख्यानतो व्याख्यानयति, तत्र 'ओहेण' इति पदं व्याचिख्यासुराह—

**जइ उ तवं आवन्नो, जो भिन्नो अहव होज्ज नावन्नो ।**
**तहियं ओहालोयण, तेण परेणं विभागो उ ॥ २८९६॥**

वास्तव्यैर्भिक्षावेलायामतिशयेन पर्याप्ते लब्धे यदि प्राघूर्णकाः समागच्छन्ति, तदा यदि प्राघूर्णकास्त**पोर्ह**ं प्रायश्चित्त**मापन्ना** यावदद्यापि **भिन्ना न** भवन्ति छेदादिकमप्राप्ता इत्यर्थः। अथवा तपोर्हमपि प्रायश्चित्तं **नापन्नस्तदा ओघालोचनया** आलोच्य तैः समं मण्डल्यां समुद्दिशन्ति। **ततः** समुद्देशानन्तरं **परतो विभागा**ऽऽलोचनयाऽऽलोच्य प्रायश्चित्तं प्रतिपद्यन्ते। अथ छेदादिकमापन्नः ततो मण्डल्या उत्कृष्य दीयते ॥ २८९६॥

अथ भिक्षावेलायां न प्राप्ताः किन्त्वनागाढायां पश्चिमायां पौरुष्यां प्राप्ताः, तत्र विधिमाह—

**अहवा भुत्तुव्वरियं, संखडिमन्नेहिं वा वि कज्जेहिं ।**
**तं मुक्कं पत्तेयं, इमे य पत्ता तहिं होज्जा ॥ २८९७॥**

**अथवे**ति प्रकारान्तरे वास्तव्यानां **भुक्तोद्वरितं** वर्त्तते, अथवा **सङ्खड्यां** निमन्त्रिताः श्राद्धादिभिर्वास्तव्यास्तत्र पर्याप्तं गृहीतमस्ति। यदि वा आचार्याः कुलादि**कार्यै**र्विनिर्गतास्तान् कियन्तं कालं प्रतीक्ष्य तद्योग्यं मण्डल्यां **मुक्तं प्रत्येकमुद्वरित**मस्ति, **इमे च** प्राघूर्णका**स्तथावसरे प्राप्ता** भवेयुः, ततो वास्तव्या नैषेधिकीशब्दं श्रुत्वा समुत्थाय भणन्ति ॥२८९७॥

**भुंजह भुत्ता अम्हे, जो वा इच्छति अभुत्ते सह भुज्जं ।**
**सव्वं च तेसिं दाउं, अन्ने गिण्हंति वत्थव्वा ॥ २८९८॥**

**भुङ्ध्वं** यूयं, **वयं भुक्ताः, यो वा इच्छति अभुक्तै**र्वास्तव्यैः **सह भोज्यं** स तैः सह भुङ्क्ते। अथवा प्राघूर्णकानां न पश्चाद्भागे परिपूर्णं जातं ततः **सर्वं तेषां** प्राघूर्णकानां **दत्त्वा वास्तव्या अन्यत् गृह्णन्ति** ॥२८९८॥

**तिण्णि दिणे पाहुण्णं, सव्वेसिं असति बालवुड्ढाणं ।**
**जे तरुणा सग्गामे, वत्थव्वा बाहिं हिंडंति ॥ २८९९॥**

**सर्वेषा**मागतानां **त्रीणि दिनानि** यावत् **प्राघूर्णकं** करणीयम्। अथ सर्वेषां कर्तुं न शक्नुवन्ति ततः सर्वेषामभावे **बाल-वृद्धानां** कर्त्तव्यम्। तथा ये प्रार्घूणकानां **तरुणास्ते स्वग्रामे** हिण्डन्ते। ये तु **वास्तव्या**स्तरुणास्ते उद्भ्रामकभिक्षाचर्यया बहिर्ग्रामे **हिण्डन्ते** ॥२८९९॥

**संघाडगसंजोगो, आगंतुकभद्दएतरे बाहिं ।**
**आगंतुका व बाहिं, वत्थव्वगभद्दए हिंडे ॥ २९००॥**

यदि ग्रामवास्तव्या जना **आगन्तुकभद्रका**स्तदा प्राघूर्णकानामेकैको वास्तव्येन समं **सङ्घाटकेन** हिण्डते, **इयरे बाहिं** ति ये वास्तव्यानां सङ्घाटकसंयोगा उद्धरितास्ते बहिर्ग्रामे उद्भ्रामकभिक्षाचर्यया व्रजन्ति। अथ ग्रामवास्तव्या जना **वास्तव्यभद्रका**स्ततो वास्तव्याना-मेकैकः प्राघूर्णकेन समं हिण्डते। ये तु प्राघूर्णकानां सङ्घाटकसंयोगा अधिकास्ते **बहि**रुद्भ्रामक-भिक्षाचर्यया व्रजन्ति। उपधिचिन्तायामपि परस्परमालोचनायां दत्तायां यो गीतार्थेनोपधिरुत्पादितः स परिभुज्यते, यस्त्वगीतार्थेनोत्पादितस्तस्य परित्यागः करणीयः॥ २९००॥

**सूत्रम्— जाओ निग्गंथीओ वा निग्गंथा वा संभोइया सिया, नो णं कप्पइ निग्गंथीणं पच्चक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए। कप्पइ णं पारोक्खं पाडिएक्कं**

संभोइयं विसंभोगं करेत्तए।

जत्थेव ताओ अप्पणो आयरिय-उवज्झाए पासेज्जा तत्थेव एवं वएज्जा—"अह णं भंते! अमुगीए अज्जाए सद्धिं इमम्मि कारणम्मि पारोक्खं पाडिएक्कं संभोइयं विसंभोगं करेमि।"

सा य से पडितप्पेज्जा, एवं से नो कप्पइ पारोक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए। सा य नो पडितप्पेज्जा एवं से कप्पइ पारोक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए॥४॥

'जातो निग्गंथीतो' इत्यादि, अस्य सम्बन्धप्रतिपादनार्थमाह—

**मंडुगगतिसरिसो खलु, अहिगारे होइ बिइयसुत्तस्स ।**
**संपुडतो वा दोण्ह वि, होइ विसेसोवलंभो वा ॥२९०१॥**

मण्डूकः शालूरः स यथा उत्प्लुत्य गच्छति एवं निर्ग्रन्थसूत्रात् निर्ग्रन्थीसूत्रं विसदृशमिति **मण्डूकगतिसदृशम्**। तदुक्तं **द्वितीयसूत्रस्याधिकारः** प्रस्तावो **मण्डूकगतिसदृशः**। तथा

**संपुडतो वा** इत्यादि, यथा द्वे फलके एकत्रकृते फलकसम्पुटमित्युच्यते एवं निर्ग्रन्थसूत्राद् द्वितीयं निर्ग्रन्थीसूत्रं सम्पुटसदृशं भवति। तत उक्तं **द्वयोरपि** सूत्रयोः **संपुटक** इति निर्ग्रन्थसूत्रादनन्तरं निर्ग्रन्थीसूत्रमुक्तं, **भवति विशेषोपलम्भो वा** इति, 'जे निग्गंथा य निग्गंथीतो य संभोगिया सिया' इत्यादि यत् निर्ग्रन्थसूत्रम्,अस्माद् अनन्तरं निर्ग्रन्थीसूत्रं पठ्यते, ततः शिष्याणां **विशेषोपलम्भो भवति,** दूरव्यवधाने तु न स्यात्, ततो भवति विशेषोपलम्भ इति कृत्वा निर्ग्रन्थसूत्रादनन्तरं निर्ग्रन्थीसूत्रमुक्तम् ॥ २९०१॥

एवमनेन सम्बन्धेनायातस्यास्य व्याख्या—

**या निर्ग्रन्थ्यो निर्ग्रन्था वा साम्भोगिकाः** स्युस्तेषां **न कल्पते प्रत्यक्षं प्रत्येकं साम्भोगिकीं विसम्भोगां कर्तुं, कल्पते परोक्षं प्रत्येकं साम्भोगिकीं विसम्भोगां कर्तुम्। यत्रैव ता** निर्ग्रन्थ्य **आत्मीयान् आचार्योपाध्यायान् पश्यन्ति तत्रैव [ ता ] एवं वदन्ति अथ णमिति** वाक्यालङ्कारे, **भदन्त! अमुकया आर्यिकया सहास्मिन् कारणे** समापतिते **परोक्षं प्रत्येकं सम्भोगं विसम्भोगं करोमि। सा च से** तस्याः प्रवर्त्तिन्याः **प्रतितपति** मिथ्यादुष्कृतप्रदानेनानुतपति, असद् वा तदभ्याख्यानमिति प्रत्याययति, **एवं** सति **न कल्पते**

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**परोक्षं प्रत्येकं सम्भोगं विसम्भोगं कर्तुम्** । अथ **सा** तस्याः प्रागुक्तप्रकारेण **नानुतपति** तत **एवं** सति **से** तस्याः **कल्पते परोक्षं प्रत्येकं सम्भोगं [ विसम्भोगं ] कर्तु**मिति सूत्राक्षरार्थः ॥ सम्प्रति **भाष्यकारः** प्राह—

**एसेव गमो नियमा, निग्गंथीणं पि होइ नायव्वो ।**
**जं एत्थ नाणत्तं, तमहं वोच्छं समासेण ॥ २९०२॥**

यो निर्ग्रन्थसूत्रस्य व्याख्यागम उक्त **एष एव गमो निर्ग्रन्थीनामपि** सूत्रे **भवति ज्ञातव्यः**। केवलं **यदत्र नानात्वं तदहं समासेन वक्ष्ये** ॥ २९०२॥

तदेव विवक्षुः प्रथमतः प्रश्नमुत्थापयति—

**किं कारणं परोक्खं, संभोगो तासु कीरइ वीसु ? ।**
**पाएण ता हि तुच्छा, पच्चक्खं भंडणं कुज्जा ॥ २९०३॥**

**किं कारणं** केन कारणेन **तासु** संयतीसु **परोक्षं सम्भोगो विष्वक् क्रियते** ? आचार्य आह– हि यस्मात् **प्रायेण ताः** संयत्यस्**तुच्छाः** । ततः **प्रत्यक्षं** विसम्भोगकरणे **भण्डनं कुर्युः** ॥ २९०३ ॥



For Private And Personal Use Only

**दोन्नि वि ससंजतीया, गणिणो एक्कस्स वा दुवे वग्गा ।**
**वीसु करणम्मि तेच्चिय, कवोयमादी उदाहरणा ॥ २९०४ ॥**

**द्वौ गणिनौ** आचार्यौ **ससंयतीकौ** परस्परं साम्भोगिकौ। अथवा **एकस्य द्वौ वर्गौ** संयतवर्गः संयतीवर्गश्च, अपरस्य त्वेक एव संयतवर्गः। तौ यां विसम्भोगां कुरुतस्तां तैरेव(तस्ममदेव) वटगृहिक**कपोत-**प्रवेशनादिरूपा**दुदाहरणात्** प्रागुक्तप्रकारेण **विसम्भोगां कुरुत** इत्यर्थः ॥ २९०४॥

कथम्? इत्याह—

**पडिसेवितं तु नाउं, साहंती अप्पणो गुरूणं तु ।**
**ते वि य वाहरिऊणं, पुच्छंती दो वि सब्भावं ॥ २९०५॥**

काश्चन संयत्यः कासाञ्चित् संयतीनां प्राघूर्णिका गताः,ताभिश्च पूर्वप्रकारेण प्रथमालिका कृता, जाता शय्यातरपिण्डाशङ्का । अथवा हरितोपलिप्तायां वसतौ स्थिता यदि वा सदीपायाम्। ततस्ताभिरागत्य निजप्रवर्त्तिन्याः कथितं यथा-ताः शय्यातरपिण्डमासेवन्ते, प्रतिदिवसं हरितोपलिप्तायां वा वसतौ वसन्ति, सदीपायां वेति। सा च प्रवर्तिनी तन्मुखात् **प्रतिसेवितमिति ज्ञात्वा** ताभिस्सह गत्वाऽऽत्मनो **गुरूणां कथयति तेऽपि च** गुरवो **व्याहृत्य** आकार्य **द्वावपि**

संयतीवर्गो **सद्भावं पृच्छन्ति** । केवलं यदि ता एकगुरुप्रतिबद्धाः, अन्यथा दोषः ॥२९०५॥

तथा चाह—

**जइ ता उ एगमेगं, अहवावि परं गुरुं वएज्जा हि ।**
**अहवा वी परगुरुतो, पवतिणी तीसु वी गुरुगा ॥ २९०६॥**

**यदि** यकाभिः प्रतिसेवितं शय्यातरपिण्डादि, यकाभिश्च प्रतिसेवितं ज्ञात्वा गुरुभ्यः कथितं **ता** यदि **एकमेक**माचार्यमाश्रिताः । **अथवा** आत्मीया अपि सत्यः शय्यातरपिण्डाद्यासेविन्यः **परं गुरुं** कुतश्चित् कारणात् **व्रजेयुः** प्रतिपन्नाः। यदि वा सा **प्रवर्त्तिनी** यत्संयतीभिः शय्यातरपिण्डाद्यासेवितं सा **परगुरुत** उपसम्पदं प्रतिपन्ना। एतासु **तिसृष्वपि** यद्याचार्यः स्वयं पृच्छति 'कोऽत्र भूतार्थः' इति, तदा प्रायश्चित्तं चत्वारो **गुरुकाः**॥ २९०६॥

किं कारणम्? इति चेद्, अत आह—

**भंडणदोसा हुंती, वगडासुत्तं जे भणियपुव्वं ।**
**सयमवि य वीसु करणे, गुरुगा चावल्लया कलहो ॥ २९०७॥**

तासां तिसृणामपि स्वयं पृच्छने **भण्डनदोषा भवन्ति ये भणिताः पूर्वं कल्पाध्ययने प्रथमोद्देशके वगडासूत्रे,** ते च इमे-तासां स्वयं प्रच्छने त्रिषु स्थानेषु भण्डनम्। तानि च त्रीणि स्थानान्यमूनि-आत्मनो द्वौ गच्छौ संयतवर्गः संयतीवर्गश्च, तृतीयोऽन्याचार्यसत्काः संयताः संयत्यश्च एष एको वर्गो गण्यते। भण्डनं पुनरेवं जायते-ताः संयत्यः परकीयरूपाः पृष्टाः सत्यो ब्रूयुर्यथा 'जानीमो यद् दुःखापिता इहलोकसहायया निजप्रवर्त्तिन्या' एवमुक्ते संयतास्ताभिः सह कलहं कुर्युः। संयतीनामपि परस्परं रण्डाराटिर्भवेत्। तत्रान्यगच्छवर्त्तिनः साधवः पराचार्येण समं परसंयतैः समं परसंयतीभिश्च समं राटिं विदध्युः। यत एवं दोषास्तस्मात् द्वावपि तौ संयतीवर्गावात्मन आत्मन आचार्यस्य कथयतः। यदि पुनस्ताः संयत्यः **स्वयमेव विष्वक्** सम्भोगं **कुर्वन्ति** तदा तासां प्रायश्चित्तं चत्वारो **गुरुकाः**। कस्माद्? इति चेद्,अत-आह-**चापल्यतः** चपलतादोषेण **कलहः** परस्परं भूयादिति हेतोः ॥ २९०७॥

**पत्तेयं भूयत्थं, दोण्हं पि गणहरा तुलेऊणं ।**
**मिलिउं तग्गुणदोसे, परिक्खिउं सुत्तनिद्देसो ॥ २९०८॥**

यत एवं दोषास्तस्मादात्मन आचार्यस्य कथनीयम्, तौ च **गणधरौ द्वयोरपि** संयतीवर्गयोः

**प्रत्येकं भूतार्थं तुलयित्वा** सम्यग् विज्ञाय तत एकत्र **मिलित्वा तयोर्द्वयोरपि** संयतीवर्गयो-**र्गुणदोषान् परीक्ष्य सूत्रनिर्देशः** कर्त्तव्यः। स चायं-यदि नानुतपति ततस्तत्रैव यत्र मिलिताः संयतीनां परोक्षं सम्भोगं विसम्भोगं कुर्वन्ति। प्रत्यक्षं संयतीनां विसम्भोगकरणे तुच्छतया कलहभावात्॥ २९०८॥

**सूत्रम्— नो कप्पइ निग्गंथाणं निग्गंथिं अप्पणो अट्ठाए पव्वावेत्तए वा, मुंडावेत्तए वा, सेहावेत्तए वा, उवट्ठावेत्तए वा, संवसित्तए वा, संभुंजित्तए वा, तीसे इत्तरियं दिसं वा, अणुदिसं वा, उद्दिसित्तए वा धारेत्तए वा ॥ ५॥**

**कप्पइ निग्गंथाणं निग्गंथिं अन्नेसिं अट्ठाए पव्वावेत्तए वा जाव संभुंजित्तए वा, तीसे इत्तरियं दिसं वा, अणुदिसं वा उद्दिसित्तए वा धारेत्तए वा॥ ६॥**

'नो कप्पइ निग्गंथाणं निग्गंथिं अप्पणो अट्ठाए' इत्यादि सूत्रम्, अस्य सम्बन्धमाह—

**संभोगम्मि पवत्ते, इमा वि संभुंजते उवट्ठविउं ।**
**सीसायरियत्ते वा, पगते दिक्खंति दिक्खेया ( अन्नट्ठा ) ॥ २९०९॥**

पूर्वसूत्रेभ्यः **सम्भोगे प्रवृत्ते** प्रस्तुतसूत्राभिहिता **उपस्थाप्य सम्भुज्यते।** अथवा **शिष्यत्वमाचार्यत्वं** च **प्रकृत**मस्ति ततः शिष्याचार्यत्वे प्रकृतेऽनेनापि सूत्रद्वयेनेदमुच्यते- अन्यस्यार्थाय [ **दीक्षेयां** ] निर्ग्रन्थीं **दीक्षयन्ति** नात्मनोऽर्थायेति ॥ २९०९ ॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या - **न कल्पते निर्ग्रन्थीमात्मनोऽर्थाय प्रव्राजयितुं** सामायिकारोपणतो **मुण्डापयितुं** लोचकारापणतः **शिक्षापयितु**मासेवनाशिक्षाग्रहणशिक्षाप्रदानतः **उपस्थापयितु**मुपस्थापनाकरणतः **सम्भोक्तुं**[1] षण्णां सम्भोगानामन्यतमेन यथायोगसम्भोगेन **संवस्तुं**, तथा **तस्याम् इत्वरां दिशमा**चार्यलक्षणा**मनुदिशं** वा उपाध्यायादिरूपा**मुद्देष्टुं वा धारयितुं वा। कल्पते निर्ग्रन्थानां निर्ग्रन्थीमन्येषामर्थाय** इत्यादि प्राग्वत् नवरमन्येषामित्याचार्यस्योपाध्यायस्य प्रवर्त्तिन्या वा अर्थाय, एते एतस्या उपग्रहं करिष्यन्तीत्यभिप्रायेण। शेषं सुगमम्॥ अत्र **भाष्यम्**—



**अण्णट्ठमप्पणो वा, पव्वावणे चउगुरुं च आणादी ।**
**मिच्छत्त तेणसंकट्ठ मेहुणे गाहणे जं च ॥ २११० ॥**

शिष्यस्य मे सर्वकार्येषु सहायिका भविष्यतीत्येव**मन्यार्थम् एवमात्मनो** वाऽर्थाय यदि

१. सूत्रे संवसित्तए वा, संभुजित्तए वा, इति, अत्र क्रमभेद इति ज्ञेयम् ॥

**प्रव्राजयति** निर्ग्रन्थीं तदा तस्य प्रायश्चित्तं **चतुर्गुरु, आज्ञादयश्च** दोषास्तथा **मिथ्यात्वं** तीर्थकरवचनातिक्रमात्। तथा **स्तैन्यार्थं शङ्कायां** किमयं प्रव्राज्य हरिष्यति उत धर्मश्रद्धया प्रव्राजयति? इत्येवंरूपायां यत् प्रायश्चित्तं चतुर्लघुकम्, उपलक्षणमेतद् निःशङ्कितमेष प्रव्राज्य हरिष्यतीति निश्चये यत् प्रायश्चित्तं चत्वारो गुरुकाः। तथा **मैथुने** शङ्किते यथा किं मैथुनार्थमेष प्रव्राजयति उत धर्मश्रद्धया? इति यत् प्रायश्चित्तं चतुर्गुरुकं, नूनमेष मैथुनार्थं प्रव्राजयतीत्येवं निःशङ्किते यन्मूलं प्रायश्चित्तं, यच्च **ग्राहणे** कञ्चुकादिसङ्घाटिप्रावरणोपदेशदाने कक्षान्तरादि दृष्ट्वाऽऽत्मपरोभयसमुत्थदोषैः ब्रह्मचर्यविराधनं तन्निमित्तमपि प्रायश्चित्तमापाद्यते॥ २९१०॥

एतदेवोत्तरार्द्धं व्याचिख्यासुराह—

**तेणट्ठमेहुणे वा, हरति अयं संकऽसंकिए सोही ।**
**कक्खादभिक्खदंसण-मथक्कातोभये दोसा ॥ २९११॥**

**अयं** प्रव्राजनाव्याजेन **हरतीत्येवं शङ्कायामशङ्किते** वा **स्तैन्यार्थे** तथा मैथुनशङ्कायाम-शङ्किते वा मैथुने या **शोधिः** प्रायश्चित्तं तदापद्यते। तथा **कक्षादीनामथक्क**मप्रस्ताव**मभीक्ष्णदर्शने आत्मोभयदोषा** आत्मदोषा **उभयदोषा** उपलक्षणमेतत्, परदोषाश्च ये, तानपि प्राप्नोति॥ २९११॥

गाथा २९१०-२९१५ प्रवाजने हेतवः



For Private And Personal Use Only

एतदेव सविशेषमाह—

**हरति त्ती संकाए, लहुगा गुरुगा य होंति नीसंके ।**
**मेहुणसंके गुरुगा, निसंकिए होइ मूलं तु ॥ २९१२॥**

अथ प्रव्रज्यादानव्याजेन **हरतीति शङ्कायां** प्रायश्चित्तं चत्वारो **लघुकाः, निःशङ्के** हरणे नूनमेष निश्चितं हरिष्यतीत्येवं निश्चये **भवन्ति** चत्वारो **गुरुकाः**, तथा **मैथुनशङ्कायां** चत्वारो **गुरुकाः, निःशङ्किते** मैथुने **भवति मूलम्** ॥ २९१२॥

अमुमेवार्थं **सूत्रकृताङ्गा**ऽऽलापकेन संवादयति—

**अवि धूवगादि वासो, पडिसिद्धो तह य वासम[1] सइगाहिं वि ।**
**वीसत्थादिदोसा, वि जदा एवं तु पुव्वुत्ता ॥ २९१३॥**

पूर्वं **सूत्रकृताङ्गे** एवोक्ता अभिहिता, **पूर्वोक्ता** ॥ २९१३॥

१. ला.। वासमसमिही वा - पु. प्रे. । वाससतिहि वी -सं.॥

**पव्वावणा सपक्खे, परिपुच्छा दोसवज्जिए दिक्खा ।**
**एवं सुत्तं अफलं सुत्तनिवातो उ कारणिओ ॥ २९१४॥**

यस्मादेते दोषास्तस्मात् **सपक्षे प्रव्राजना** कर्त्तव्या। तद्यथा-पुरुषाः संयतैः प्रव्राजनीयाः, स्त्रियः संयतीभिः संयतैरनुज्ञाताभिः, सा च **दीक्षा परिपृच्छ्य** किं प्रव्रजसि? इति पृष्टा यद्यभ्युपगच्छति तदा दातव्या, परं **दोषवर्जिते** 'अट्ठारसपुरिसेसु' इत्येवमादिदोषरहिते। अत्र पर आह-यद्येतत् तत्त्वं तर्हि **सूत्रमफलम्,** सूत्रे परपक्षेऽपि दीक्षाया अभ्यनुज्ञानात्तस्याश्चासम्भवात्। आचार्यः प्राह-**सूत्रनिपातः कारणिकः** कारणमपेक्ष्येदं सूत्रं प्रवृत्तमिति भावः ॥ २९१३ ॥ २९१४॥

किं तत्कारणम्? अत आह—

**कारणमेगमडंबे, खंतियमादीसु मेलणा होति ।**
**पव्वज्जमब्भुवगते, अप्पाणे चउव्विहा तुलणा ॥ २९१५॥**



**कारण**मशिवादिलक्षणमधिकृत्य कोऽपि साधुरेकाकी जातः, कथम**प्येकमडम्बे** गतः, एकमडम्बं नाम यस्य निवेशस्य सर्वासु दिक्षु च नास्ति कोऽप्यन्यो ग्रामो नगरं वा। तस्मिन्नेकमडम्बे गतः। तत्र च संयत्यो न विद्यन्ते । अथ च तस्मिन्नेकमडम्बे तस्य साधोर्माता

भगिनी अन्या वा काचन नालसम्बद्धा स्वजनास्ति, तासां मात्रादीनां **मेलनं** मेलापकः साधो**र्भवति** स च मात्रादिकः स्त्रीजनो धर्मे कथिते अकथिते वा प्रव्रज्यां प्रतिपत्तुमभ्युपगतो यथा वयं प्रव्रज्यां प्रतिपद्यामहे। एवं **प्रव्रज्यामभ्युपगते** मात्रादावशङ्कनीये स्त्रीवर्गे यतना कर्त्तव्या । सा चेयं-तेन साधुना[आत्मा]चतुर्विधया तुलनया तोलयितव्यः। तद्यथा- द्रव्यतः क्षेत्रतः कालतो भावतश्च। तत्र द्रव्यतो [1] यदि आहारमुपधिं भैषजादिकं चोत्पादयितुं समर्थः । तथा कस्याप्येवं स्वभावो भवति यथा न शक्नोति स्थातुं प्रथमालिकां विना, चतुर्थरसकादिकं वा पानकं न शक्नोति पातुम्। ततस्तद्योग्यं पानकं प्रथमालिकां चानेतुं समर्थः। क्षेत्रतो यदि शक्नोति पथि पादाभ्यां गन्तुम्,अध्वनि वा यदि शक्नोत्याहारादिकमुत्पादयितुम्। कालतो ग्रीष्मकाले पानकं, शीतकाले यत् कालप्रायोग्यमाहारादिकं तदुत्पादयितुं समर्थः, रात्रौ मध्याह्ने वा यदि गन्तुं प्रभुः। भावतो यदि क्रोधादीनां जयं कर्तुं क्षमः, ज्ञानदर्शनचारित्राणि सामाचारीं च ग्राहयितुमीशस्ततो यावदाचार्याणां प्रवर्त्तिन्या वा मूलं न प्राप्नोति तावदेतया **चतुर्विधया तुलनयाऽऽत्मानं** तुलयित्वा यदि समर्थो जातस्ततः प्रव्राजयति॥ २९१५॥

गाथा २९१६-२९२१ स्वजन-प्रव्राजने तुलनादिः

१. यदि समर्थ आ० पु. प्रे.मु.॥



For Private And Personal Use Only

एतदेवाह—

**असिवादिकारणगतो, वोच्छिन्नमडंबसंजतीरहिते ।**
**कहियाऽकहिय उवट्ठिय, असंकइत्थी इमा जयणा ॥ २९१६ ॥**

**अशिवादिभिः कारणै**रेकाकी, व्यवच्छिन्ना ग्रामनगरादयो दिक्षु विदिक्षु च यस्मात् तस्मिन् **व्यवच्छिन्ने, संयतीरहिते मडम्बे** गतः। तत्र च धर्मे **कथिते अकथिते** वा मात्रादयो व्रतग्रहणार्थ**मुपस्थिताः**। तासु **अशङ्कासु** अशङ्कनीया**स्वियं** वक्ष्यमाणा **यतना** ॥ २९१६ ॥

तामेवाह—

**आहारादुप्पायण, दव्वे समुई च जाणते तीसे ।**
**जइ तरति गंतु खेत्ते, आहारादीणि अद्धाणे ॥ २९१७ ॥**

**द्रव्ये** द्रव्यतो यद्या**हारादीनाम्,** आदिशब्दादुपध्यादिपरिग्रहः, **उत्पादने** समर्थः । **समुई** नाम स्वभावः, तां च **तस्या जानाति,** यथा-प्रथमालिकां विना न शक्नोति, चतुर्थरसकादिकं च पानीयं पातुं न शक्नोति, ततस्तद्योग्यं पानं प्रथमालिकां चोत्पादयितुं क्षमः। तथा **क्षेत्रतो** यदि पथि पादाभ्यां **गन्तुं तरति, अध्वनि चाहारादिक**मुत्पादयितुम् ॥ २९१७ ॥

**गिम्हाइ काले पाणग, निसिगमणादिसु वा वि जइ सत्तो ।**
**भावे कोहाइजओ, गाहण नाणे य चरणे य ॥ २९१८॥**

**काले ग्रीष्मादौ** यदि **पानक**मुत्पादयितुमीशः, उपलक्षणमेतत्, शीतकाले वर्षाकाले च प्रायोग्यं तत् सम्पादयितुं शक्तः, [ **निशि** रात्रौ, **आदिग्रहणाद्** मध्याह्नपरिग्रहः, **गमनादिषु यदि शक्तः** ] **भावे** यदि **क्रोधादिजयः** कर्त्तुं शक्यते, **ज्ञाने चरणे च** तस्या **ग्राहणे** समर्थः, तदा यावदाचार्यमूलं प्रवर्तिनीमूलं च न प्राप्नोति तावदेतया चतुर्विधया तुलनयाऽऽत्मानं तोलयित्वा यद्यात्मनः समर्थता गम्यते तदा प्रव्राजयति यावत्कथासमर्थो वा प्रव्राजयति। अत्रेयं मार्गणा-यावत्कथं पालयितुं समर्थः स नियमात् प्रव्राजयति, इतरस्मिंस्तु भजना। तथाहि- यो यावत्कथं परिपालयितुमसमर्थस्तस्य यद्याचार्यः सलब्धिकः परिपालने समर्थोऽन्यो वा स्वगणसत्कः परिपालयितुं क्षमस्ततः प्रव्राज्य तस्य समर्पयति। अथाचार्योऽन्यो वा स्वगणसत्कस्तां परिपालयितुमसमर्थस्तदा न प्रव्राजयति । इयमितरस्मिन् भजना ॥२९१८॥

**अब्भुज्जमेगयरं, पडिवज्जिउकामे जो उ पव्वावे ।**
**गुरुगा अविज्जमाणे, अन्ने गणधारणसमत्थे ॥ २९१९॥**

यो नाम सलब्धिक आर्यिकाणां परिपालने च समर्थः। तस्य मात्रादिका **व्रत**ग्रहणार्थमुपस्थिताः। स यद्यभ्युद्यतविहारं मरणं वा प्रतिपत्तुकामस्तर्हि यदि तस्याचार्योऽन्यो वा स्वगणसत्कः परिपालने समर्थः तदा ताः प्रव्राज्य तस्य समर्पयति, समर्प्य चाभ्युद्यतविहारं मरणं वा प्रतिपद्यते। अथ नास्त्याचार्यः स्वगणसत्को वा तासां परिपालकस्तदा **अन्यस्मिन् गणधारणसमर्थेऽविद्यमाने योऽभ्युद्यतमेकतरं** विहारं मरणं वा **प्रतिपत्तुकामः प्रव्राजयति** तस्य प्रायश्चित्तं चत्वारो **गुरुकाः** ॥ २९१९ ॥

**जो वि य अलद्धिजुत्तो, पव्वावेंतस्स होति गुरुगाओ ।**
**तम्हा उ जो समत्थो, सो पव्वावेइ ताओ उ ॥ २९२० ॥**

**योऽप्यलब्धियुक्तो** न तत्प्रायोग्याहाराद्युत्पादयितुमीशस्तस्यापि **प्रव्राजयतो भवन्ति** चत्वारो **गुरुकाः** प्रायश्चित्तम्। यत एवमसमर्थतायां प्रायश्चित्तं **तस्मात् यः समर्थः स ता** मात्रादिकाः स्त्रीः **प्रव्राजयति** ॥२९२० ॥

**एवं तुलेऊणऽप्पं, सा वि तुलिज्जइ उ दव्वमादीहिं ।**
**कायाण दायणं दिक्ख सिक्ख इतरदिसा नयणं ॥ २९२१॥**

श्री व्यवहार-सूत्रम् सप्तम उद्देशकः १२०४ (A)

**एवमुक्तेन प्रकारेणाऽऽत्मानं** द्रव्यादिरूपया चतुर्विधया तुलनया **तोलयित्वा,** याऽसौ प्रव्राजनीया **साऽपि द्रव्यादिभिस्तोलयितव्या**। सा च तुलनाऽग्रे भणिष्यते। यदि तुलनायामुक्तायां सा ब्रूते- सर्वमहं कर्तुं समर्था इति तदा सा दीक्षणीया। सा च तुलना तस्याः कर्त्तव्या, यस्याः स्वभावो न ज्ञायते, यस्याः पुनः स्वभावो ज्ञातो वर्त्तते तत्रात्मतुलनैव प्रागुक्ता कर्त्तव्या। 'अथ यदि तस्य माता भगिनी वा ततः कथं तस्याः स्वभावो न ज्ञायते?' उच्यते- 'स लघुक एव नष्टः प्रव्राजितो वा। ततः स्वभावाऽपरिज्ञानम्।' **कायाण दायण**मिति, **कायानां** पृथिवीकायादीनां **दर्शनं** कर्तव्यम् यथा-एष पृथिवीकाय उच्यते, अयमप्कायः, अयं तेजस्कायः, एष वायुकायः,अयं वनस्पतिकायः, एष चलनधर्मा द्वीन्द्रियादिः त्रसकायः, तत्र पृथिव्या आलिखनादि न कर्त्तव्यम्, अप्कायेन स्वगात्रसेचनादि, तेजस्कायेन प्रतापनादि [वायुकायेन वीजनादि] च, वनस्पतिकायेन दन्तपवनादि, त्रसकायस्य परितापनादि। यदि पुनः कायैः कार्यमुपजायते तदा तत् कारणे प्रासुकेन परिमितेन कर्त्तव्यम्। एवमभ्युपगते तस्या **दीक्षा** दातव्या। तदनन्तरं **[शिक्षा]** ग्रहणशिक्षा आसेवनाशिक्षा च शिक्षणीया। तत्र ग्रहणशिक्षा सा **दशवैकालिका**दिसूत्रं पाठनीया, आसेवना शिक्षा यत् परिधापनादि शिक्ष्यते। तत्र परिधापनविधिमुपदर्शयितुकामेन पूर्वं लघुबालकः संयतीनेपथ्येन परिधाप्यते। तत उच्यते

गाथा २१२२-२१२५ दीक्षार्थ्या द्रव्यादितुलना १२०४ (A)

'एवम् आर्ये! त्वमपि परिधापनं कुर्या:।' तथा भिक्षाटनसामाचारीं सङ्क्षेपेण कथयति। तत **इत्वरदिक्करणं** 'यावदाचार्यसकाशं न व्रजामि तावदहमेव ते आचार्योऽहमेव च प्रवर्त्तिनी। आचार्यसमीपं गतानां त्वाचार्या ज्ञातार:।' ततो वक्ष्यमाणविधिना गुरुसमीपे नयनम्। एष निर्युक्तिगाथासमासार्थ: ॥ २९२१ ॥

साम्प्रतमेनामेव विवरीषुर्भाष्यकार: प्रथमतस्तस्या द्रव्यादिभिस्तुलनामाह—

**पेज्जादि पायरासा, सयणासणवत्थपाउरण दव्वे ।**
**दोसीण दुब्बलाणि य, सयणादि असक्कया एण्हिं ॥ २९२२ ॥**

गृहस्थावस्थायां **प्रातराशा** प्रथमालिका **पेयादि**रूपा, पेया प्रतीता, आदिशब्दान्मण्डक-मोदकादिपरिग्रह:। तथा **शयनाऽऽसनवस्त्राणि** शोभनानि **प्रावरणानि** च कालोचितान्यासीरन् **इदानीं** तु व्रतप्रतिपन्ने प्रथमालिकायां भक्तं **दोसीण**मिति पर्युषितं भविष्यति, **दुर्बलानि च शयनादीनि** शयना-ऽऽसन-वस्त्राणि प्रावरणानि च, **एतस्य** च कर्तु**मशक्यता**। इयं **द्रव्ये** द्रव्यविषया प्रतिपृच्छा ॥२९२२ ॥

पुनरपि द्रव्यविषयामेव तामाह—

**पडिकारा य बहुविहा, विसयसुहा आसि भे ण पुण इण्हिं ।**
**वत्थाणि ण्हाणधूवा, विलेवणाओसहाइं च ॥ २९२३ ॥**

तथा **भे** भवतीनां गृहस्थावस्थायां व्याधेः **प्रतिकारा बहुविधा आसीरन्, विषयसुखानि** च बहुविधानि । तथाहि–गृहस्थावस्थायां मनोज्ञानि **वस्त्राणि,** शरीरमनःपह्लत्तिकरं **स्नानं,** घ्राण-मनोनिर्वृतिकरा धूपाः, शरीरसुभगानि **विलेपनानि,** एतेन विषयसुखानि भावितानि । तथा **औषधानि च** गृहस्थावस्थायां नानाप्रकाराणि सङ्गृहीतानि, **इदानीं पुनर्न** विषयसुखानि नापि प्रतीकारा बहुविधाः, ततः परमदुष्करं व्रतमेतदिति ॥ २९२३ ॥

क्षेत्रतः प्रतिपृच्छामाह—

**अद्धाण दुक्खसेज्जा, सरेणुतमसा य वसहितो खेत्ते ।**
**परपाएहि गयाणं, वुत्थाण य उउसुहघरेसु ॥ २९२४ ॥**

युष्माकं सदैव **परपादैर्गतानां** सदैव च **ऋतुसुखेषु गृहेषूषितानां** प्रव्रज्याप्रतिपत्त्यनन्तर-

**मध्वनि** स्वपादाभ्यां गमने महद्दुःखं भविष्यति। **शय्या** वसतिः **सरेणुका,** तथा दीपो रात्रौ न प्रज्वाल्यते, **वसतयो** वसनानि **तमसा** कष्टानि भविष्यन्ति। एषा **क्षेत्रे** प्रतिपृच्छा॥ २९२४॥

कालत आह—

**आहाराउवजोगो, जोग्गो जो जम्मि होइ कालम्मि ।**
**सो अन्नहा न य निसिं, [1]अकालेऽजोग्गो य हीणो य ॥ २९२५॥**

**यो यस्मिन् काले योग्यः आहाराद्युपयोगः** स गृहस्थावस्थायां समपद्यत, व्रतप्रतिपत्त्यनन्तरं तु **स** आहाराद्युपयोगो**ऽन्यथा भवति**। तथा **न रात्रा**वाहाराद्युपयोगो [2]न वा**ऽकाले**, कालेऽपि च कदाचि**दयोग्यो** भवति, सोऽपि च न परिपूर्णः किन्तु **हीन** इति। गता कालप्रतिपृच्छा ॥ २९२५॥

भावप्रतिपृच्छामाह—

---

**१. कालेऽजोग्गो-ला.॥ २. न वा कालेऽपि सं. मु.॥**

**सव्वस्स पुच्छणिज्जा, न य पडिकूलेण सइरमुदिताऽसि ।**
**खुड्डी वि पुच्छणिज्जा, चोयणफरुसा गिरा भावे ॥ २९२६ ॥**

गृहस्थावस्थायां त्वं **सर्वस्य प्रच्छनीया** वर्त्तसे, तत्रापि **न प्रतिकूलेन** वचसा किन्त्वनुकूलेन। तथा **स्वैरं** स्वेच्छया **मुदिता** प्रमोदवती गृहस्थावस्थायाम् **असि** भवसि । व्रतप्रतिपत्त्यनन्तरं तु **क्षुल्लिकाऽपि** त्वया **प्रच्छनीया**, तथा तथा **चोदना**दिशिक्षणं **परुषया गिरा** भविष्यति। एतच्च परमदुस्सहम्, इत्येषा **भावे** भावविषया प्रतिपृच्छा ॥ २९२६ ॥

**जा जेण वएण जहा, व लालिता तं तदन्नहा भणति ।**
**सोयादिकसायाण य, जोगाण य निग्गहो समिति ॥ २९२७॥**

**या यस्मिन् वयसि,** गाथायां तृतीया सप्तम्यर्थे प्राकृतत्वाद्, **यथा** येन प्रकारेण **लालिता, वा**शब्दो भावविषयप्रतिपृच्छाप्रकारान्तरोपदर्शने, **तां तदन्यथा भणति।** तथा इदं वक्ति- **श्रोत्रादी**नामिन्द्रियाणां, क्रोधादीनां **कषायाणां, योगानां च** कायप्रभृतीनां प्रदुष्टानां **निग्रहः** कर्त्तव्यः। **समितय**श्च ईर्यासमित्यादयः पञ्च परिपालनीयाः। तदेवं तस्या द्रव्यादिभिस्तुलनोक्ता ॥ २९२७॥

सम्प्रति कायानां दर्शनमाह—

**आलिहण सिंच तावण, वीयण दंतधुवणादिकज्जेसु ।**
**कायाण अणुवभोगो, फासुयभोगो परिमितो य ॥ २९२८॥**

पृथिव्याः काष्ठादिना **आलिखनम्**, उदकेन **सेचनम्**, अग्निना **तापनं**, वायोर्**व्यजनम्** **दन्तप्रक्षालनम्, इत्यादिकार्येषु कायानामनुपभोगः**। यदि पुनः कायैः प्रयोजनमुपजायते तदा **प्रासुकेन परिभोगः** कर्त्तव्यः, सोऽपि च **परिमित** इति ॥२९२८॥

सम्प्रति दीक्षादिद्वारप्रतिपादनार्थमाह—

**अब्भुवगयाए लोओ, कप्पट्ठगलिंगकरणदावणया ।**
**भिक्खग्गहण कहेति, वदति चऽहं ते दिसा तिण्णि ॥ २९२९॥**

पूर्वोक्तं सर्वं यद्यभ्युपगतवती भवति तदा तस्या **अभ्युपगताया** अभ्युपगतवत्या **लोचः** कर्त्तव्यः। यदा तु निवसनविधिरुपदेष्टुमुपक्रान्तो भवति तदा **कल्पस्थकस्य** बालकस्य

संयती**लिङ्गकरणेन** संयतीनेपथ्यपरिधापनेन निवसनस्य **दर्शनं** कर्त्तव्यम् । तथा **भिक्षाग्रहणं** भिक्षाटनसामाचारीं **कथयति, वदति च** 'यावदाचार्यसमीपं न व्रजामि ताव**दहं ते** तव **तिस्रो दिशः**। अहमेव तवाऽऽचार्योऽहमेवोपाध्यायोऽहमेव च प्रवर्त्तिनीति । आचार्यपादमूलं गतानां त्वाचार्याः प्रमाणम्'॥ २९२९ ॥

नयनविधिमाह—

**माऊए एक्कियाए, संबंधी इत्थिपुरिससत्थे य ।**
**एमेव संजतीण वि, लिंगकरण मोत्तु बिइयपदं ॥ २९३० ॥**

**एकस्या मातुः**, उपलक्षणमेतत्, भगिन्या वा नयनं नाल**सम्बन्धिना स्त्री**सार्थेन समम्, तदभावे नालसम्बन्धिना **पुरुषसार्थेन,** तस्याऽप्यभावेऽन्येन भद्रकेन सार्थेन सह, गाथायां सप्तमी तृतीयार्थे प्राकृतत्वात्।

**सूत्रम्— नो कप्पइ निग्गंथीणं निग्गंथं अप्पणो अट्ठाए पव्वावेत्तए वा जाव संभुजित्तए वा, तीसे इत्तरियं दिसं वा अणुदिसं वा उद्दिसित्तए वा धारेत्तए वा॥ ७॥**

**कप्पइ निग्गंथीणं निग्गंथं अण्णेसिं अट्ठाए पव्वावेत्तए वा जाव संभुंजित्तए वा, तीसे इत्तरियं दिसं वा अणुदिसं वा उद्दिसित्तए वा धारेत्तए॥ ८॥**

'नो कप्पइ निग्गंथीणं निग्गंथं अप्पणो अट्ठाए पव्वावित्तए' इत्यादिसूत्रद्वयम् अस्याऽक्षरगमनिका प्राग्वद् । अत्र **भाष्यकारः** प्राह- **एमेवे**त्यादि गाथापश्चार्द्धम्, **एवमेव** अनेनैव प्रकारेण **संयतीनामपि** संयतं प्रव्राजयतीनां सर्वं निरवशेषं वक्तव्यम्। नवरं **लिङ्गकरणे द्वितीयपदं मुक्त्वा** लिङ्गकरणे द्वितीयपदमधिकमत्राऽसेवनीयमिति ॥ २९३० ॥

एतदेव दर्शयति—

**उट्ठेंतनिवेसंते, सतिकरणादी य लज्जनासो य ।**
**तम्हा उ सकडिपट्टं, गाहिंति तयं दुविहसिक्खं ॥ २९३१ ॥**

अग्रपूरकमात्रकरणे **उत्तिष्ठति निविशति सकृत्करणादौ**[१] **च** यस्मात् **लज्जानाशो** भवति **तस्मात्तकं** संयतं **द्विविधामपि शिक्षां ग्राहयन्ति सकटीपट्टकं** कटीपट्टकपरिधानोपेतं सन्तम् ॥ २९३१ ॥

१. °कं सन्तं कटी° मु. पु. प्रे. ॥

**आयरिय उवज्झाओ, तइया य पवत्तिणी उ समणीणं ।**
**अन्नेसिं अट्ठाए, त्ति होइ एएसि तिण्हं पि ॥ २९३२ ॥**

**श्रमणीनामाचार्य उपाध्यायस्तृतीया च प्रवर्त्तिनी** भवति। श्रमणानां त्वाचार्योपाध्यायौ ततो**ऽन्येषामर्थायेति** यदुक्तम् सूत्रद्वयेऽपि तस्यायमर्थो **भवति**— यथायोग**मेतेषां त्रयाणामर्थाय** संयती त्रयाणामर्थाय। संयतस्तु द्वयोरर्थायेत्यर्थः । एतेन 'अन्नेसिं अट्ठाए' इति सूत्रद्वयमपि व्याख्यातम्॥ २९३२॥

**सूत्रम्— नो कप्पइ निग्गंथीणं विइकिट्ठियं दिसं वा अणुदिसं वा उद्दिसित्तए वा धारेत्तए वा ॥ ९॥**

**कप्पइ निग्गंथाणं विइकिट्ठियं दिसं वा अणुदिसं वा उद्दिसित्तए वा धारेत्तए वा ॥ १०॥**

'नो कप्पइ निग्गंथीणं वितिगिट्ठियं दिसमि'त्यादि, अस्य सम्बन्धप्रतिपादनार्थमाह—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पव्वावियस्स नियमा, दिंति दिसं दुविहमेव तिविहा वा ।**
**सा पुण कस्स विगिट्ठा, उद्दिसति सन्निगिट्ठा वा ॥ २९३३॥**

अनन्तरसूत्रेषु प्रव्राजनमुक्त **प्रव्राजितस्य** तु **नियमाद् दिशं द्विविधां त्रिविधां वा प्रयच्छन्ति** संयतस्य द्विविधामाचार्योपाध्यायलक्षणाम्, संयत्यास्त्रिविधामाचार्योपाध्यायप्रवर्त्तिनीरूपामित्यर्थः, **सा पुनर्दिक् कस्य विकृष्टा उद्दिश्यते** कस्य **सन्निकृष्टे**ति प्रतिपादनार्थमधिकृतं सूत्रद्वयमित्येष सम्बन्धः ॥२९३३॥

अथवा अन्यथा सम्बन्धस्तमेवाह-

**अहवाऽवि सरिसपक्खस्स अभावा दिक्खणा विपक्खे वि ।**
**तत्थ वि कस्स विगिट्ठा, उद्दिस्सइ कस्स वा नेति?॥ २९३४॥**

पुरुषाः संयतानां सदृशपक्षः स्त्रियो विपक्षः। तथा स्त्रियः संयतीनां सदृशपक्षः पुरुषा विपक्षः। **अथवाऽपी**ति सम्बन्धस्य प्रकारान्तरतोपदर्शने, **सदृशपक्षस्याभावात् दीक्षणं विपक्षेऽपि** कर्त्तव्यमित्यनन्तरसूत्रेष्वभिहितम्। **तत्रापि कस्य** दिक् **विकृष्टा उद्दिश्यते** कस्य वा न? इत्येतदधिकृतसूत्रद्वयेनाभिधातव्यमिति सम्बन्धः। अनेन सम्बन्धेनाऽऽयातस्यास्य

सूत्र ९-१० गाथा २९३२-२९३८ व्यतिकृष्टदिगुद्देशे दोषाः

व्याख्या— **न कल्पते निर्ग्रन्थीनां व्यतिकृष्टाम**तिशयेन क्षेत्रतो भवतश्च व्यतिकृष्टां **दिशमनुदिशं वा उद्देष्टु**मनुज्ञातुं नापि स्वयं **धारयितुम् । तथा कल्पते निर्ग्रन्थानां क्षेत्रतो** भवतश्च **व्यतिकृष्टां दिशमनुदिशं वा** उद्देष्टुं वा स्वयं **धारयितुं वा** इत्येष सूत्रद्वयाक्षरार्थः॥

सम्प्रति **भाष्यम्**—

**दुविहं पि य वितिगिट्ठं, निग्गंथीणुद्दिसंति चउगुरुगा ।**
**आणाइणो य दोसा, दिट्ठंतो होइ कोसलए ॥ २९३५॥**

**द्विविधामपि विकृष्टां** क्षेत्रविकृष्टां भवविकृष्टां चेत्यर्थः । यो **निर्ग्रन्थीनां** दिश**मुद्दिशति** तस्मिन् प्रायश्चित्तं **चत्वारो गुरुकाः, आज्ञादयश्च दोषाः**। तत्र क्षेत्रविकृष्टां दिशमुद्दिशतो ये दोषास्तत्र कोशलको **भवति दृष्टान्तः**॥२९३५॥

तमेव भावयति—

**उवसामिया जयंतेण कोसलेणं गते य सा तम्मि ।**
**तं चेव ववदिसंती, निक्खंता अन्नगच्छम्मि ॥ २९३६॥**

**वारिज्जंती वि गया, पडिवन्ना सा य तेण भावेणं ।**
**जिणवयणबाहिरेणं, कोसलएणं अकुलएणं ॥ २९३७॥**

एकः **कोशलकः** कोशलदेशोत्पन्न इत्यर्थः, तेनान्यदेशं गतेन **यतमानेन** सदनुष्ठानपरायणेन काऽपि श्राविका **उपशमिता** । स च कोशलकः स्वदेशं गतः। **तस्मिंश्च गते** सा श्राविका **अन्यस्मिन् गच्छे** तत्र गते तस्य समीपे **निष्क्रमितुमुपस्थिता** 'यथा मां निष्क्रामयत, परं मम स एव कोशलकः आचार्यः।' एवं **सा तमेव व्यपदिशन्ती** तैर्दीक्षिता । सा च दीक्षाप्रतिपत्त्यनन्तरं वार्यमाणाऽपि कोशलसमीपं **गता** । सा च **तेन पापेन** जिनवचनबाह्येना-ऽ**कुलजेन** कोशलेन **प्रतिपन्ना**। एष दोषः क्षेत्रविकृष्टां दिशमुद्दिशतः॥ २९३६॥ २९३७॥

अत्र पर आह—

**कोसलए किं कारण, गहणं बहुदोसलो उ कोसलतो ।**
**तम्हा दोसुक्कडया, गहणं इह कोसले अवि य ॥ २९३८ ॥**

**किं कारणमत्र कोशलकस्य ग्रहणं** कृतम्? सूरिराह-यस्मात् **कोशलको** देशस्वभावात् बहून दोषान् लाति आदत्ते इति **बहुदोषलो** बहुदोषवान् **तस्मात्** दोषोत्कटतया अत्र कोशलस्य ग्रहणम् **अपि च** ॥ २९३८ ॥

**अंधं अकूरमययं, अवि य मरहट्टयं अवोगिल्लं ।**
**कोसलयं च अपावं, सएसु एक्कं न पिच्छामो ॥ २९३९ ॥**

**अन्ध्रम्** अन्ध्रदेशोत्पन्नम् **अक्रूरमतकम्** अक्रूराभिप्राय**मपि च महाराष्ट्रकम् अवोगिल्लम्** अवाचालं **कोशलकं च अपापं शतेषु** मध्ये **एकं न प्रेक्षामहे** इति प्रसिद्धिः। अतः कोशलक-ग्रहणम्॥ २९३९ ॥



पुनरपि परः प्राह—

**कोसलए जे दोसा, उद्दिस्संतम्मि किन्न सेसाणं ? ।**
**ते तेसि होज्ज व न वा, इमेहि पुण नोद्दिसे ते वी ॥ २९४० ॥**

**ये दोषाः कोशलके** दिशमुद्दिशति ते **किं न शेषाणां** दिशमुद्दिशति भवन्ति?

भवन्त्येवेति भावः। सूरिराह- **ते** दोषास्**तेषां भवेयुर्वा न वा,** कोशलके पुनर्नियमाद् भवन्ति, देशविशेषजन्मनोऽपि गुणदोषहेतुत्वात्। ततः कोशलोपादानम्। **एतैः पुन**र्वक्ष्यमाणैः कारणै**स्तानपि** शेषदेशोत्पन्नान् क्षेत्रविकृष्टान् **नोद्दिशेत्** ॥ २९४० ॥

अन्यच्च—

**अन्नं उद्दिसिऊणं, निक्खंता वा सरागधम्मम्मि ।**
**अण्णोण्णम्मि ममत्तं, न हु वग्गाणं पि संभवंति ॥ २९४१ ॥**

**वा**शब्दो दूषणान्तरसमुच्चये, यद्यल्पकालभाविनि **सरागधर्मे अन्य**माचार्य**मुद्दिश्य निष्क्रान्ता** पर**मन्योन्यस्मिन्** परस्परस्मिन् यत् **ममत्वं** तत् **व्यग्राणामपि** व्यग्रचित्तानामपि **न तु** नैव **भवति** किन्त्वेकचित्तानामुपजायते, सा चैकचित्तता अत्र नास्ति ॥ २९४१ ॥

तथा चाह—

**सुचिरं सारिया गच्छिहित्ति ममया न याति गच्छस्स ।**
**सीयंतचोयणासु य, परिभूया मि त्ति मन्नेज्जा ॥ २९४२ ॥**

**सुचिरमपि** कालं **सारिता** शिक्षिता सती **गमिष्यतीति** मन्यमानस्य **गच्छस्य न** तस्या विषये ममत्वमायाति, **सीदन्त्याः** संयमयोगेषु शिथिलीभवन्त्याश्चोदनाः शिक्षास्तासु दीयमानासु साऽन्यत्र गन्तुमनाः **परिभूताऽस्मीति मन्यते** ततस्तस्या अपि न गच्छस्योपरि ममता॥ २९४२॥

किञ्च—

**गमणुस्सुएण चित्तेण सिक्खातो वि न गिण्हइ ।**

**वारिज्जंती वि गच्छिज्जा, पंथ दोसे इमे लभे ॥ २९४३॥**

**गमनोत्सुकेन चित्तेन शिक्षा अपि** नानाप्रकारा ग्रहणशिक्षा आसेवनशिक्षाश्च **न गृह्णाति**। तथा **वार्यमाणाऽपि** तस्य क्षेत्रविकृष्टस्यान्यस्याचार्यस्य समीपं **गच्छेत्**। तत्र च **पथि दोषानिमान्** वक्ष्यमाणान् **लभते॥ २९४३॥** अत्र यदुक्तं प्राक् 'एतैर्वक्ष्यमाणैर्दोषैस्तानपि नोद्दिशेत्' [गा. २९४०] तद्व्याख्यानावसरः

तानेव दोषानाह—

**मिच्छत्त-सोहि-सागारियादि पासंडतेण-सच्छंदा ।**

**खेत्तविगिट्ठे दोसा, अमंगलं भवविगिट्ठम्मि ॥ २९४४॥**

**मिथ्यात्वं** मिथ्यात्वगमनं, **शोधेर**भावः। तथा सागारिके अगारसहिते, **आदि**शब्दात् अनगारे एकाकिन्या उपाश्रये दोषाः। तथा **पाषण्डै**र्विपरिणामनं, **स्तैनै**रपहारः, तथा **स्वच्छन्दा** स्यात् न गच्छाधीना। तथा च सति भूयांसो दोषाः। एते **क्षेत्रविकृष्टे** उद्दिश्यमाने **दोषाः। भवविकृष्टे** तूद्दिश्यमाने **अमङ्गलं** तेन संयमजीविताद् भवजीविताद्वा भ्रश्येत्। तस्माद्भवविकृष्टोऽपि नोद्देष्टव्यः। एष द्वारगाथासङ्क्षेपार्थः॥ २९४४॥

साम्प्रतमेनामेव विवरीषुः प्रथमतो मिथ्यात्वद्वारं शोधिद्वारं चाह—

**उवदेसो न सिं अत्थि, जेणेगागी उ हिंडए ।**

**इति मिच्छं जणो गच्छे,** ।दा.१। **कत्थ सोहिं च कुव्वउ?॥२९४५॥** दारं २।

**उपदेशः सिं** तासामेकाकिनीनां **नास्ति, येन** स तादृशः स्त्रीजन **एकाकी हिण्डते** । तत इति अस्मात् कारणादुपदेशाभावलक्षणा**ज्जनः** स्त्रीजनो **मिथ्यात्वं गच्छेद्**। गतं मिथ्यात्वद्वारम्। शोधिद्वारमाह— **कुत्र** प्रायश्चित्तमापन्ना सती **शोधिं कुर्यात्** ? नैव कुत्रापीति

भावः। एकाकिनीत्वात् न च प्रायश्चित्तस्थानम् अप्रायश्चित्तस्थानं वा सा जानाति, तत इतोऽपि शोध्यभावः॥ २९४५॥

सागारिकादिद्वारं पाखण्डद्वारं चाह—

**सागारमसागारे, एगीए उवस्सए भवे दोसा** । दारं ३।
**चरगादिविपरिणामण, सपक्खपरपक्खनिण्हादी ।। २९४६॥** दारं ४।

**सागारे** अगारसहिते **असागारे** अगाररहिते **उपाश्रये एकस्या** एकाकिन्या **दोषा भवन्ति**। तत्र सागारे दीपस्पर्शनादयः, अनगारे कुलटाजारादिप्रवेशतः। गतं सागारकादिद्वारम्, पाषण्डद्वारमाह-**चरगादि** इत्यादि, **स्वपक्षे परपक्षे** च **विपरिणामनं**, तत्र स्वपक्षे **निह्नवादिभिः**, आदिशब्दात् पार्श्वस्थादिपरिग्रहः । परपक्षे चरकादिभिः॥ २९४६॥

स्तेनद्वारं स्वच्छन्दद्वारं चाह—

**तेणोहि वा वि हिज्जइ,** । दा.५। **सच्छंदुट्ठाणगमणमादी य ।**
**दोसा भवंति एए, किं व न पावेज्ज सच्छंदा? ॥ २९४७॥** दारं ६।

**स्तेनैर्वा** शरीरापहारिभिरुपध्यपहारिभिर्वा सा पथि गच्छन्ती **ह्रियेत।** तथा **स्वच्छन्दमुत्थानं** स्वच्छन्दगमनमित्या**दयश्चैते दोषा** एकाकिन्या भवन्ति। **किं वा स्वच्छन्दा** सती सा **न प्राप्नुयात्**? सर्वदुःखस्थानमाप्नुयादित्यर्थः ॥ २९४७॥

सम्प्रति भवविकृष्टे दोषानाह—

**गोरवभयममकारा, अवि दूरत्थे वि होंति जीवंते ।**
**को दाणि समुग्घातस्स कुणइ न य तेण जं किच्चं ॥ २९४८॥**

**अपि दूरस्थेऽ**पि **जीवति** सति तद्विषये **गौरव-भय-ममीकारा भवन्ति** भूयस्तन्मिलनादिप्रत्याशासम्भवाद्। **इदानीं** पुनस्तस्य **समुद्घातस्य को** गौरवं भयं ममीकारं वा **करोति**? नैव कश्चित् यत् यस्मात् **न च नैव तेन कृत्यं** प्रयोजनं मृतत्वेन सर्वप्रयोजनातीतत्वात् ॥२९४८॥

**कोसलवज्जा ते च्चिय, दोसा सविसेस भवविगिट्ठम्मि ।**
**दुविहं पी वितिगिट्ठं, तम्हा उ न उद्दिसेज्जाहि ॥ २९४९॥**

य एव दोषा मिथ्यात्वगमनादयः क्षेत्रविकृष्टेऽभिहितास्त **एव सविशेषा भवविकृष्टेऽपि** ज्ञातव्याः, केवलं **कोशलवर्जाः।** कोशलदोषा हि भवविकृष्टे न भवन्ति मृतत्वेनाऽसम्भवात् **तस्मात् द्विविधमपि व्यतिकृष्टं** क्षेत्रविकृष्टं भवविकृष्टं च **नोद्दिशेत्** ॥ २९४९॥

अत्रैवापवादपदमाह—

**बितियं तिव्वऽणुरागा, संबंधी वा न ते सीयंति ।**
**इत्तरादिसा उ नयणं, अप्पाह एव दूरम्मि ॥ २९५०॥**

**द्वितीय**मपवादपदमधिकृत्य क्षेत्रविकृष्टमपि उद्दिशेत् यदि सा धर्मग्राहिण्याचार्ये **तीव्रानुरागा** भवेत्। स **वा** आचार्यस्तस्याः **सम्बन्धी** स्वजनः, **न च ते** आचार्याः संयमयोगेषु **सीदन्ति** उद्यतविहारिण इत्यर्थः । केवलं तस्या **इत्वरा दिशो**ऽनुबन्धनीया[१] यावत्ते स्वक आचार्यो न मिलति तावद्वयमाचार्या एते उपाध्याया इयं प्रवर्त्तिनीति। ततः स्वाचार्यसमीपे विधिना **नयनम्। अथ च दूरे** ते आचार्यास्ततः सन्देशं कथयन्ति, यथा-युष्मदीया धर्मशिष्या अस्माकं पार्श्वे प्रतिपन्नदीक्षाका वर्त्तते सा प्रतिग्राह्या ॥ २९५०॥

१. °नुबन्धयिन्या-मु.। °नु बन्धिन्या-सं.। °नु बन्धंध्या° पु. प्रे.॥

**भवविगिट्ठे वि एमेव समुग्घातो त्ति वा न वा ।**
**तत्थ आसंकिते बंधो निस्संके उ न बज्झति ॥ २९५१ ॥**

**भवविकृष्टेऽप्येवमेव,** द्वितीयपदमवगन्तव्यमिति भावः । कथम्? इत्याह-किं **समुद्घातः** कालगतः किं **वा न**? इत्येवं तस्मिन् भवविकृष्टे [**आशङ्किते**]तस्या **बन्धः** क्रियते, **निःशङ्के** तु भवविकृष्टे सा **न बध्यते** ॥ २९५० ॥

अत्रैव प्रकारान्तरमाह—

**अहवा तस्स सीसं तु, जइ सा उ समुद्दिशे ।**
**विप्पकिट्ठे तहिं खेत्ते, जयणा जा उ सा भवे ॥ २९५२ ॥**

**अथवा यदि सा तस्य शिष्यं समुद्दिशति** कथयति-मम त एवाचार्याः, अहं तु तच्छिष्यसमीपे स्थास्यामीति। तदा भवविकृष्टेऽपि तस्या बन्धः क्रियते । सा च तच्छिष्यसमीपे नीयते। तत्र **या विप्रकृष्टे क्षेत्रे यतनोक्ता साऽत्रापि भवति** ज्ञातव्या॥ २९५२ ॥

तदेवं निर्ग्रन्थीसूत्रं व्याख्यातम्, अधुना 'कप्पति निग्गंथाणं वितिगिट्ठं दिसं उद्दिसित्तए वा धारित्तए वा' [सूत्र १०] इति निर्ग्रन्थसूत्रव्याख्यानार्थमाह—

**निग्गंथाण विगिट्ठे, दोसा ते चेव मोत्तु कोसलयं ।**
**सुत्तनिवाओऽभिगए, संविग्गे से इत्तरिए ॥ २९५३॥**

**निर्ग्रन्थाना**मपि **विकृष्टे** उद्दिश्यमाने य एव निर्ग्रन्थीनां **दोषा** मिथ्यात्वादय उक्तास्त **एव कोशलक**मेकं दोषं **मुक्त्वा** शेषाः सर्वे निरवशेषा द्रष्टव्याः। यद्येवं तर्हि सूत्रमनर्थकम्, अविषयत्वाद्, अत आह-**सूत्रनिपातोऽभिगते संविग्ने** च **शेषे इत्वरिकः** । इयमत्र भावना-अभिगतो ज्ञाततत्त्वः श्राद्धः पुराणो वा संविग्नः स्वयं, योऽपि तस्य धर्मदेशक आचार्यः सोऽपि संविग्नस्तस्मिन् सूत्रनिपातो, यस्तु शेषः स्वयं न सम्यक्ज्ञाततत्त्वः,तस्य पथि व्रजतो मिथ्यात्वादयो दोषाः। तस्य दीक्षामाधाय इत्वरिको दिग्बन्धः क्रियते, न पुनः प्रेष्यते ॥ २९५३॥

एतदेव व्याचिख्यासुराह—

**सड्ढो व पुराणो वा, जइ लिंगं घेत्तु वयति अन्नत्थ ।**
**तस्स वितिगिट्ठबंधो, जा अच्छति ताव इत्तरितो ॥ २९५४ ॥**

**श्राद्धः** श्रावकः **पुराणः** पश्चात्कृतो **वा**शब्दो विकल्पने अधिगततत्त्वः स्वयं संविग्नः, योऽपि तस्य धर्मग्राहक आचार्यः सोऽपि संविग्नः। स इत्थम्भूतो **यदि लिङ्गं गृहीत्वाऽन्यत्र** क्षेत्रविकृष्टमूलाचार्यसमीपे **व्रजति तस्य विकृष्टो दिग्बन्धः** कर्त्तव्यः, यावच्च तत्र **तिष्ठति तावत्** तस्यात्मीय **इत्वरिको** दिग्बन्धः ॥२९५४॥

**मिच्छत्तादी दोसा, जे वुत्ता ते उ गच्छतो तस्स ।**
**एगागिस्स न भवे, इति दूरगते वि उद्दिसणा ॥ २९५५॥**

ये च पूर्वं **मिथ्यात्वादयो दोषा उक्तास्तेऽपि तस्यैकाकिनोऽपि गच्छतो न भवन्ति** ज्ञाततत्त्वत्वात् संविग्नत्वाच्च, **इति** हेतोस्तस्य **दूरगतेऽपि** क्षेत्रविकृष्टेऽपि गुरावु**द्देशनं** भवति ॥२९५५॥

**गीयपुराणोवट्ठं, धारंतो सततमुद्दिसंतं तु ।**
**आसन्नं उद्दिस्सइ, पुव्वदिसं वा सयं धरए ॥ २९५६॥**

**चोइज्जंतो जो पुण, उज्जमिहिति तं पि नाम बंधंति ।**
**सेसेसु न उद्दिसणा, इति भयणा खेत्तवितिगिट्ठे ॥ २९५७ ॥**

**गीतो** नाम सूत्रार्थनिष्पन्नः **पुराणः** पश्चात्कृतश्रमणभावः स निष्क्रमितुकामोऽन्येषामाचार्याणामुपस्थितः, तस्य च पूर्वाचार्योऽवसन्नो विदेशस्थश्च स तं **सततमे**वाभिधारयति, येषां च समीपे निष्क्रमितुमुपस्थितस्तान् प्रति उद्दिशति भणतीत्यर्थः, 'मम स एवाचार्यः' इति तं गीतं पुराण**मुपस्थम्** उपस्थितं पूर्वमाचार्यमवसन्नमभि**धारयन्तं** वचसा तमेवो**द्दिशन्तं** च प्रति यस्य समीपे निष्क्रामितुमुपस्थितः स पूर्वाचार्यस्य विदेशस्थस्य योऽन्य **आसन्न**स्तस्य सम्बन्धी संविग्नस्त**मुद्दिशति** यथा- 'स तव आचार्य' इति। अथवा **स्वयं** तेनात्मीयासन्न**दिक् धारयितव्या** न पुनः स तेन तत्रोद्देशयितव्यः, तस्यावसन्नत्वात्, यदि वा तमप्यवसन्नमुद्दिशति केवलमनेन प्रकारेण। केन? इत्यत आह-**चोइज्जंतो** इत्यादि, **यः पुन**र्ज्ञायते **चोद्यमानः** शिक्ष्यमाणः **उद्यस्यति** संविग्नीभविष्यति **तमपि नाम** ते आचार्या बध्नन्ति यथा— 'ते तवाचार्याः' इति। ये पुनर्ज्ञायन्ते न चोद्यमानाः संविग्ना भविष्यन्ति तेषु **शेषेषु नोद्देशन**मिति **भजना** विकल्पना **क्षेत्रविकृष्टे** ॥ २९५६॥ २९५७॥

गतं क्षेत्रविकृष्टं, सम्प्रति भवविकृष्टमाह—

**एमेव य कालगते, आसन्नं तं व उद्दिसइ गीओ ।**
**पुव्वदिसधारणं वा, अगीय मोत्तूण कालगयं ॥ २९५८॥**

**एवमेव** अनेनैव प्रकारेण **कालगते** तस्य मूलाचार्ये यदि स स्वयं **गीतार्थो** भवति तदा तस्य योऽन्य **आसन्न** आचार्य: **तं** वा **उद्दिशति पूर्वं दिशं वा धारयति** । अथ स स्वयमगीतार्थस्तदा तस्य **कालगतं मुक्त्वा** शेषोऽन्य उद्दिश्यते इति ॥ २९५८॥

**सूत्रम्— नो कप्पइ निग्गंथाणं विइकिट्ठाइं पाहुडाइं विओसवित्तए॥ ११॥**

'नो कप्पति निग्गंथाणं वितिगिट्ठाइं पाहुडाइ वियोसवित्तए' इति । अस्य सम्बन्धमाह—

**वितिगिट्ठा समणाणं, अव्वितिगिट्ठा य होति समणीणं ।**
**मा पाहुडं पि एवं, भवेज्ज सुत्तस्स आरंभो ॥ २९५९॥**

**व्यतिकृष्टा श्रमणानां** दिग् **भवति अव्यतिकृष्टा श्रमणीनामिति** अनन्तरसूत्रद्वयेऽभिहितमेव, तच्चाकर्ण्य **मा प्राभृतमप्येवं भवतीति** मन्येत इत्यधिकृत**सूत्रस्य आरम्भः**। अस्य व्याख्या—

**न कल्पते निर्ग्रन्थानां व्यतिकृष्टानि** क्षेत्रविकृष्टानि **प्राभृतानि** कलहानीत्यर्थः **वितोषयितुमुपशामयितुं**, किन्तु यत्रोत्पन्नं तत्रोपशमयितुं कल्पते इत्येष सूत्राक्षरार्थः॥ अत्र भाष्यप्रपञ्चः—

**सेज्जासणेऽतिरित्ते, हत्थादी घट्टभाण भेदे य ।**
**वंदंतमवंदंते, उप्पज्जइ पाहुडं एवं ॥ २९६०॥**

**शय्यासनातिरिक्ते,** किमुक्तं भवति? अतिरिक्तां शय्यामतिरिक्तानि वाऽऽसनानि परिग्रहे कुर्वति वार्यमाणे यदि वा **हस्तादि** हस्तपादादिकं पादेन सङ्घट्याऽऽक्रम्याऽक्षमयित्वा व्रजति, यद्वा कथमप्यनुपयोगतो **भाजनभेदे** अथवा पूर्वं **वन्दमाने पश्चादवन्दमाने प्राभृतं** नाम कलहस्तदेव**मुत्पद्यते** ॥ २९६० ॥

**अहिगरणस्सुप्पत्ती, जा वुत्ता परिहारियकुलम्मि।**
**सम्ममणाउट्टंते, अधिकरण ततो समुप्पज्जे ॥ २९६१ ॥**

**[**[1]**अधिकरणस्य** कलहस्य **उत्पत्तिः या पारिहाकुले उक्ता ] ततः सम्यगनावर्त्तमानेऽधिकरणं समुत्पद्यते**॥२९६१ ॥

१. पु.प्रे. मध्ये - उत्पत्तिसम्भवेसत्यां ततः - इति पाठः ॥

**अहिगरणे उप्पन्ने, अवितोसवियम्मि निग्गयं समणं ।**
**जे साइज्जइ संभुंजए व मासा चत्तारि भारिया ॥ २९६२॥**

**अधिकरणे उत्पन्ने** सति येन सहाधिकरणमुदपादि तस्मिन्न**तोषिते निर्गतं श्रमणं य आसादयति** प्रतिगृह्णाति स्वसत्तामात्रेण यश्च तेन सह **भुङ्क्ते** तस्य प्रायश्चित्तं **चत्वारो** मासा **भारिका** गुरवः ॥२९६२॥

**सगणं परगणं वा वि, संकंतमवितोसिते ।**
**छेदादि वण्णिया सोही, नाणत्तं तु इमं भवे ॥ २९६३॥**

येन सहाधिकरणमुपजातं तस्मिन्न**वितोषिते स्वगणं परगणं वा सङ्क्रान्त**मधिकृत्य या **छेदादिका शोधिः** पूर्वं **कल्पाध्ययने वर्णिता** सा अत्रापि तथैव वक्तव्या, नवरमत्र **यन्नानात्वं** तदिदं वक्ष्यमाणं **भवति** ॥ २९६३॥

तमेवाह—

**मा देह ठाणमेयस्स, पेसवे जइ तू गुरू ।**
**चउ गुरू ततो तस्स, कहंते वि य चउलहू ॥ २९६४॥**

अन्यत्र गतस्य यद्याचार्यः साधुसङ्घाटं संदेशं वा **प्रेषयति** यथा-'एषोऽधिकरणं कृत्वा समागतो वर्त्तते तस्मादेतस्य **स्थानं मा देया**' इति। तदा तस्य प्रायश्चित्तं **चतुर्गुरु। ततः** प्रेषणानन्तरं यस्य पार्श्वे सोऽन्यत्र गतस्तस्य स प्रेषितो यदि **कथयति** तदा तस्मिन्नपि प्रायश्चित्तं **चतुर्लघु** ॥ २९६४॥

यतस्तत्रेमे दोषाः—

**ओहाणं वा वि वेहासं, पदोसा जं तु काहिती ।**
**मूलं ओहावणे होइ, वेहासे चरिमं भवे ॥ २९६५॥**

**यद्** यस्मात् प्रेषणे कथने वा स **प्रद्वेषादवधावनं करिष्यति वैहायसं वा,** वैहायसनं नाम-उल्लम्बनम्। तत्रा**वधावने** तेन कृते सति प्रेषयितुः कथयितुर्वा **मूलं** प्रायश्चित्तम्। **वैहायसे**

**चरमं** पाराञ्चितमिति॥ २९६५॥

अन्यच्च—

**तत्थन्नत्थ व वासं, न देंति मे न वि य नंदमाणेणं ।**
**नंदंति ते खलु मए, इति कलुसप्पा करे पावं ॥ २९६६॥**

'मम **तत्रात्मसमीपेऽन्यत्र वा** इहागतस्य जन्मान्तरवैराद्वासं **न ददति नापि च मयि नन्दति ते नन्दन्ति।** महाप्रद्वेषतोऽसुखभावात् ततो जन्मान्तरवैरिणस्ते न मम पृष्ठं मुञ्चतीति' विचिन्त्य **कलुषात्मा पापं कुर्यात्** ॥ २९६६॥

किं तदित्याह—

**आलीवेज्ज व वसहिं, गुरुणो अन्नस्स घायमरणं वा ।**
**[1]कंडच्छारियसहितो, सयं व उरस्स बलवंतो ॥ २९६७॥**



---

१. कंडत्थारिय- पु. पे.। कंडत्थारिउ- मु.। कंडत्थारिउ- ला.॥

**कण्डच्छारिओ** नाम ग्रामो ग्रामाधिपतिर्देशो देशाधिपतिर्वा लूषका वा सहायास्तेन **सहितः स्वयं वा औरसबलवान्** सन् **वसतिमादीपयेत् गुरोरन्यस्य वा घातं मरणं** वा कुर्यात् ॥२९६७॥

**जइ भासति गणमज्झे, अवप्पयोगा व तत्थ गंतूणं ।**
**अवितोसविए एसाऽऽगतो त्ति ते चेव ते दोसा ॥ २९६८॥**

यः प्रेषितो यद्वा **अवप्रयोगात्** अन्येन कार्येण **तत्र गत्वा गणमध्ये** सकलगणसमक्षं **यदि भाषते** यथा **एषो**ऽधिकरणं कृत्वा येन सहाधिकरणमभूत् तस्मि**न्नतोषिते**ऽत्रा**गत** इति, ते इति तस्यापि **त एव** प्रागुक्ता **दोषाः** ॥२९६८॥

**जम्हा एए दोसा, अविहीए पेसणे य कहणे य ।**
**तम्हा इमेण विहिणा, पेसणकहणं तु कायव्वं ॥ २९६९॥**

**यस्मादविधिना प्रेषणे कथने च एते**ऽनन्तरोदिता **दोषाः,तस्मादनेन** वक्ष्यमाणेन **विधिना प्रेषणं कथनं तु कर्त्तव्यम्** ॥ २९६८॥

तमेव विधिमाह—

**गणिणो अत्थनिब्भेयं, रहिते किच्च पेसितो ।**
**गमेति तं रहे चेव, नेच्छे सहामहं खु ते ॥ २९७० ॥**

अन्येन **कृत्येन** प्रयोजनेन **प्रेषितः** स तु **रहिते** साधुश्रावकादिरहिते विविक्ते प्रदेशे **अर्थनिर्भेदं** तदधिकरणरहस्यं **गणिन** आचार्यस्य **गमयति** कथयति। क्रमेणाचार्यस्तं कृताधिकरणं **रहसि एव** गमयति । यथा त्वमित्थमित्थमधिकरणं कृत्वाऽत्र समागतो न च स उपशमित इति। एवमुक्ते यदि स **नेच्छेत्** यथा—अहं नाधिकरणं कृत्वा समागतः यस्त्विदं ब्रूते तेन **सहाहं** ब्रुवे **खु** निश्चितमिति ॥२९७० ॥

**गुरु समक्खं गमितो, तहावि जइ नेच्छई ।**
**ताहे णं गणमज्झम्मि, भासते नातिनिट्ठुरं ॥ २९७१ ॥**

एवं तस्यानिच्छायां स प्रयोजनान्तरव्याजेन प्रेषितो रहसि **गुरुसमक्ष**मधिकरणं गमयति, तथा कथञ्चनापि तच्चित्तमनुप्रविश्य यथा रोषं न विदधाति **तथा गमितोऽपि यदि नेच्छति ततः** प्रहरदिवसाद्यतिक्रमेण प्रस्तावान्तरमारचय्य **गणमध्ये** तं **भाषते** परं **नातिनिष्ठुरम्** ॥ २९७१ ॥

कथं तं भाषते ? इत्याह—

**गणस्स गणिणो चेव, तुमम्मि निग्गते तया ।**
**अद्धिती महती आसी, सो विवक्खो य तज्जितो ॥ २९७२॥**

**तदा** तस्मिन् काले **त्वयि** अधिकरणं कृत्वा **निर्गते** समस्तस्यापि **गणस्य गणिनश्चाऽऽचार्यस्य महती अधृतिरासीत्** । येन च सह तवाधिकरणमभूत् **सोऽपि विपक्षो** गणिना गणेन **च तर्जितः** ॥ २९७२॥

**गणेण गणिना चेवं, सारिज्जतमझंपिए[1] ।**
**ताहे अन्नावदेसेण, विवेगो से विहिज्जइ ॥ २९७३॥**

**एवमुक्त्वानन्तरं** तत्रत्येन **गणेन गणिना च** सम्यक् सारणीयः शिक्षणीयो येन स्वदोषं प्रतिपद्य तत्र गत्वा विपक्षं क्षमयति। अथ स तथा **सार्यमाणोऽझंपितो** नोपशमं नीतो दुःस्वभावत्वात्, **ततोऽन्यापदेशेन से** तस्य **विवेको विधीयते** ॥ २९७३॥

---

१. सारिज्जं तो स झंपिए ॥

केनापदेशेन ? इत्याह—

**महाजणो इमो अम्हं, खेत्तं पि न पहुप्पति ।**
**वसही सन्निरुद्धा वा, वत्थपत्ता वि नत्थि णो ॥ २९७४ ॥**

**अयं** साधु-साध्वीलक्षणो **महान् जनो अस्माक**मेतावतां चैतत् **क्षेत्रं न प्रभवति** संकीर्णत्वात्, यदि वा **वसतिः सन्निरुद्धा** सङ्कटा वर्त्तते, तत एतावन्तः साधवोऽत्र न मान्ति। अथवा **वस्त्रपात्राण्यस्माकं** सम्प्रति **न सन्ति, अपि**शब्दाद् न चात्र तथाविधः पाठोऽप्यस्ति साधवोऽप्येतेऽतीवाऽसहनाः। तस्मात् यूयमन्यत्र क्वापि गच्छत ॥ २९७४॥

यदि पुनः स सार्यमाण उपशममधिगच्छति। स च वक्ष्यमाणेन विधिनोपशमयितव्यः। तत्र प्रथमतोऽधिकरणोपशमस्थानमाह—

**[१]सगणिच्चपरगणिच्चेण, समणुन्नेयरेण वा ।**
**रहस्सा वि व उप्पन्नं, जं जहिं तं तहिं खवे ॥ २९७५॥**

१. छन्दोनुसारं 'सगणपरगणिच्चेण' पाठो युक्तः इति ला. टिप्पणे ॥

**स्वगणसत्केन परगणसत्केन** वा तेनाऽपि **समनोज्ञेन** साम्भोगिकेन **इतरेण वा** सह **रहसि** आदिशब्दादरहसि वा **यत्** यत्राधिकरण**मुत्पन्नं तत् तत्र क्षपयेत्** उपशमयेत् ॥ २९७५ ॥

तत्रोपशमनविधिमाह—

**एक्को व दो व निग्गय, उप्पन्नं जत्थ तत्थ वोसमणं ।**
**[१]गामे गच्छे दुवे गच्छा, कुलगणसंघेण बिइयपयं ॥ २९७६ ॥**

**एको वा द्वौ वा** वाशब्दात् त्रयो वा चत्वारो वा येऽधिकरणं कृत्वा **निर्गताः**। ते यत्र **ग्रामे** नगरे वाऽधिकरण**मुत्पन्नं तत्रा**ऽऽनीयन्ते, आनीय च यैः सहाधिकरणमभूत् तैः सह **व्युपशमनं** क्षामणं कार्यन्ते, तत् पुनरधिकरणमेकस्मिन् **गच्छे** यदि वा **द्वयोर्गच्छ**योरथवा **कुले** यद्वा **गणे** यदि वा **सङ्घे** समुत्पन्नं स्यात् । **बिइयपद**मिति, अत्रापि **द्वितीयपद**मपवादपदं, ततो वक्ष्यमाणकारणैर्विकृष्टमपि प्राभृतं वितोषयेत् । तच्च वितोषणमग्रे भावयिष्यते ॥ २९७६ ॥

साम्प्रतमधिकरणमुत्पन्नं यथोपशमयितव्यं, तथा आह—



१. तृतीये चरणे अनुष्टुप्छन्दः वर्तते ॥

**तं जत्तिएहिं दिट्ठं, तत्तियमित्ताण मेलणं काउं ।**
**गिहियाण व साहूण व, पुरतोच्चिय दो वि खामेंति ॥ २९७७॥**

**तत्** अधिकरणमुत्पन्नं **यावद्भिर्गृहस्थैः** संयतैर्वा **दृष्टं तावन्मात्राणां गृहस्थानां साधूनां वा मीलनं कृत्वा** तेषां **पुरतो द्वावपि** परस्परं **क्षमयतः**। कुलादिसमवाये यद्युत्पन्नं ततः कुलादिसमवायं कृत्वा क्षमयतः॥ २९७७॥ किं कारणं यावन्मात्रैर्गृहिभिः संयतैर्वा दृष्टं तावतां मीलनं कृत्वा परस्परं क्षमयतः?

तत्राह—

**णवणीयतुल्लहियया, साहू एवं गिहिणो उ नाहिंति ।**
**न य दंडभया साहू, काहिंती तत्थ वोसमणं ॥ २९७८॥**

**'नवनीततुल्यहृदयाः साधव' एवं गृहिणः** तुशब्दादभिनवशैक्षादयश्च **ज्ञास्यन्ति**। **न च दण्डभयात् साधवस्त**त्राधिकरणे समुत्पन्ने **व्युपशमनं करिष्यन्ति** किन्तु कर्मक्षपणाय एवं च ज्ञास्यन्ति। एवंरूपा च प्रतिपत्तिः शुभोदयपरम्पराहेतुः, अतः तावतां मीलनं कृत्वा परस्परं तौ क्षमयतः ॥ २९७८॥

सम्प्रति यदुक्तं 'बिइयपदमिति' तद्व्याख्यानार्थमाह—

**बिइयपदे वतिगिट्ठे, वितोसविज्जा उवट्ठिते बहुसो ।**
**बितिओ जइ न उवसमे, गतो य सो अन्नदेसं तु ॥ २९७९॥**

**द्वितीयपदे व्यतिकृष्टान्यपि** प्राभृतानि **वितोषयेत्** उपशमयेत्, कथम्? इत्याह-येन सहाधिकरणं **बहुशो** बहून वारान् कृतं तस्यो**पस्थित**स्तं क्षमयति स च क्षाम्यमाणो **द्वितीयो नोपशाम्यति** अनुपशान्तश्च स **गतोऽन्यं देशम्** ॥ २९७९ ॥

**कालेण व उवसंतो, वज्जिज्जंतो वि अन्नमन्नेहिं ।**
**खीरादिसलद्धीण व, देवयगेलन्नपुट्ठो वा ॥ २९८०॥**

तस्यान्यं देशं गतस्य बहुना **कालेन** गतेन तस्य कषायाः प्रतनवोऽभवन्, तत **उपशान्तः**। अथवा **अन्योन्यैः** साधुभिः कृताधिकरण एष इति स्थाने स्थाने **विवर्ज्यमान** एवं स्वचेतसि स कथयति यथा 'कषायदोषेणाहं स्थाने स्थाने विवर्जे, तस्मादलं कषायैरिति' पुनरावृत्तिः। अथवा **क्षीरादिसलब्धीनां** क्षीराश्रवादिसलब्धीनामुपदेशतः शममुपगतवान्, **देवतया** शिक्षितो यदि वा **ग्लानत्वेन स्पृष्ट**स्ततः चिन्तयति-'यदि कथमपि साधिकरणो म्रियेऽहं ततो

नाऽऽराधको भवामि तस्मात् तं गत्वोपशामयामि'॥ २९८०॥

एवं जातपुनरावृत्तिना यत् कर्त्तव्यं तदाह—

**गंतुं खामेयव्वो, अहव न गच्छेज्जिमेहि दोसेहिं ।**
**नीयल्लग उवसग्गो, तहियं तस्स होज्जत्तं ॥ २९८१॥**

तेन जातपुनरावृत्तिना यत्रोत्पन्नमधिकरणं तत्र **गत्वा** स **क्षमयितव्यः। अथवा एतैर्वक्ष्यमाणैर्दोषैस्तत्र न गच्छेत्** यत्रोत्पन्नमधिकरणम्, कैर्दोषैरित्यत आह-**निजका** स्वजनास्तस्य तत्र विद्यन्ते, ततस्तत्र **गतस्य तैरुपसर्गः** क्रियते ॥ २९८१॥

तथा—

**[१]सो गामो उट्ठितो होज्जा, अंतरा वावि जणवतो ।**
**णिण्हवगणं गतो वा, न तरइ अहवा वि पडिचरती ॥ २९८२॥**

१. अत्र २९८२ गाथायां पूर्वार्धे अनुष्टुप् उत्तरार्धे आर्याच्छंदः इति ला. टिप्पणे॥

यत्र ग्रामेऽधिकरणमुत्पन्नं **स ग्राम उत्थित** उद्वसीभूतः। अथवा **अन्तरा जनपद** उत्थितः। यदि वा येन सममधिकरणमजायत स **निण्हवगणं** प्रविष्टवान् अन्यत्र वा गतः, इतरो वा ग्लानो वा जातः, ततो गन्तुं **न शक्नोति, अथवा** ग्लानं **प्रतिचरति** ॥२९८२॥

**अब्भुज्जयं च पडिवज्जे भिक्खा अलंभो अंतर तहिं वा ।**
**रायादुट्ठं[१] ओमं, असिवं वा अंतर तहिं वा ॥ २९८३॥**

अथवा सोऽधिकृतः क्षमयितुमना **अभ्युद्यतं** विहारं **प्रतिपत्तुकामो** लग्नं च प्रत्यासन्नं, गन्तुं न शक्नोति । अथवा **अन्तरा** अपान्तराले **तत्र वा** यत्राधिकरणमुत्पन्नं **भिक्षाया अलाभः।** यदि वाऽन्तरा **तत्र वा राजद्विष्टमवमौदर्यमशिवं वा** ॥२९८३॥

**सबरपुलिंदादिभयं, अंतर तहियं व अहव होज्जाहि ।**
**एएण[२] कारणेणं, वच्चंतं कंपि अप्पाहे ॥ २९८४ ॥**

अन्तरा तत्र **शबरभयं पुलिन्दभयम्, आदिशब्दात्** स्तेनम्लेच्छादिभयपरिग्रहः, **अथवा**

१. रायदुट्ठे- ला.। रायदुट्ठं- पु. प्रे.॥ २. अतेहि कारणे हि- ला. ॥

**भवेत्।** ततः **एतैः कारणैः** तत्र गन्तुमशक्नुवन् यः **कोऽप्यन्यः** श्रावको वा सिद्धपुत्रो वा मिथ्यादृष्टिर्वा तत्र भद्रको **व्रजति** तं सन्देशयति यथा—अहमधुनोपशान्तः। एतैश्च कारणैरागन्तुमशक्तस्तस्मात् त्वमत्रागत्य मया सह क्षमणं कुरु ॥ २९८४॥

ततः सन्देशे कथिते यत्तेन कर्त्तव्यं तदाह—

**गंतूण सो वि तहियं, सपक्ख परपक्खमेव मेलित्ता ।**
**खामेइ सो वि कज्जं, च दीवए नागतो जेण ॥ २९८५॥**

यस्य सन्देशः कथापितः स **तत्र गत्वा** यैस्तदधिकरणं ज्ञातं तं समस्तं **स( ? स्व )पक्षं परपक्षं च मेलयित्वा** तं **क्षमयति सोऽपि** च क्षम्यमाणो **येन** कारणेन **नाऽऽगतस्तत्कारणं** तस्य साक्षात् **दीपयति** कथयति ॥ २९८५॥

**अह नत्थि [1]कोवि वच्चंतो ताहे उवसमति अप्पणा [2]चेव ।**
**खामेई जत्थ णं मिलती अदिट्ठे गुरुणंतियं ॥ २९८६॥**

१. कोइ- पु. प्रे.॥ २. चेव-ला. मु. नास्ति॥

**अथ नास्ति कोऽपि** तत्र **व्रजन्** यस्य सन्देशः कथ्यते, **तर्हि** स **आत्मना** स्वयमुपशाम्यति, सर्वथा मनसोऽधिकरणमुपशमपरायणतया स्फेटयति । ततो **यत्र मिलति** तत्र **क्षमयति**। अथ न क्वापि मिलितस्ततस्तस्मिन्न**दृष्टे गुरूणामन्तिकं** गत्वा तं मनसि कृत्य क्षामणं करोति॥ २९८६॥

**सूत्रम्—कप्पइ निग्गंथीणं वितिगिट्ठाइं पाहुडाइं वितोसवत्तिए॥ १२॥**

**कल्पते निर्ग्रन्थीनां व्यतिकृष्टानि** क्षेत्रविप्रकृष्टानि [**प्राभृतानि**] कलहान् **वितोषयितु**मुपशमयितुमित्येष सूत्राक्षरार्थः ॥ सम्प्रति **भाष्यप्रपञ्चः**—



**निग्गंथीणं पाहुड, वितोसवियव्व होइ वितिगिट्ठं ।**
**किह पुण होज्जुप्पन्नं, चेइयघरवंदमाणीणं ॥ २९८७॥**
**चेइयथुतीण भणणे, उण्हे अन्नातो बाहि अच्छंति ।**
**परिताविया धणियं, कोइलसद्दाभि तुब्भाहि ॥ २९८८॥**

**निर्ग्रन्थीनां प्राभृतं वितोषयितव्यम्** उपशमयितव्यं **भवति व्यतिकृष्टं** क्षेत्रविप्रकृष्टम्।

शिष्यः प्राह–**कथं** केन प्रकारेण **पुनस्तासामाधिकरणमुत्पन्नं स्यात्**? सूरिराह–काश्चनार्यिकाश्चैत्यवन्दनाय **चैत्यगृहं** गताः। तस्मिंश्च चैत्यगृहे बहिर्मुखमण्डपादिकं न समस्ति। ततश्चैत्यगृहमध्यस्थिताश्चैत्यानि वन्दन्ते। तासां च **वन्दमानानां** प्रथमस्तुतेरारभ्य **अन्याः** काश्चन संयत्यः समागताः। ताश्च मध्ये अवकाशो नास्तीति बहि**रुष्णे स्थिताः**। ततो विस्तरेण चैत्य**स्तुतीनां भणने** बहिःस्थिता **उष्णेन** परितप्यमाना वदन्ति–**युष्माभिः कोकिलाशब्दाभिर्धणियम**तिशयेन वयं **परितापिताः**॥ २८८७॥ २९८८॥

तथा—

**नग्घंति नाडगाइं, कलं पि कलभाणणीण[१] तुब्भाणं ।**
**विप्पगते भवतीणं, जायं ने भयं नरवतीति तो ॥ २९८९॥**

**युष्माकं कलभाननानां** सुस्वर[२]मनोज्ञाननानां पुरतः **कलामपि** मनागपि **नाटकानि नार्घन्ति** । ततो **भवतीनां विप्रकृते** कारणेन **जातं नोऽस्माकं भयं नरपतेः**। नूनं नरपतिना यूयं नाटके प्रक्षेप्स्यध्वे ॥ २९८९॥



---

**१. कलमाणिणीण–पु. प्रे. ला.। कलभासिणीण–ला. पाठा.॥ २. °मनोज्ञागतानां–पु. प्रे.॥**

**इति असहण उत्तुइया, मज्झत्थातो समंति तत्थेव ।**
**असुणासु[1] सव्वगणभंडणे च गुरुसिद्धिमा मेरा ॥ २९९० ॥**

**इति** एवमुपदर्शितेन प्रकारेण **असहनाभिर्या उत्तेजिता** कोपं ग्राहिता तां **मध्यस्थाः** संयत्यस्**तत्रैव शमयन्ति**। **न** च तास्तत् भण्डनं कस्यापि **श्रावितवत्यः**। अथ मध्यस्थानां संयतीनामभावतो वेलावशाद्वा सर्वगणस्य भण्डनमभूत् तर्हि **सर्वगणभण्डने स्वस्वगुरुशिष्टं** कर्त्तव्यम्। ततस्तावुपशमयतः। अथ लज्जातो भयतो वा न स्वस्वगुरोर्निवेदितं तर्हि तत्रे**यं मर्यादा** ॥ २९९० ॥

एतदेवाह—

**गणहरगणहरगमणं, एगायरियस्स दोन्नि वा वग्गा ।**
**आसन्नागम दूरे, य पेसणं तं च बितियपयं ॥ २९९१ ॥**

समस्तस्यापि गणस्य भण्डने जाते आत्मीयस्याऽऽत्मीयस्य **गणधरस्य** समीपे **गमनम्**।



१. असुणामु-सं.। असुणाव-ला.। असुणाम- मु.।।

अथवा **एकस्याऽऽचार्यस्य** सम्बन्धिनौ तौ **द्वावपि** संयती**वर्गौ,** तत एकस्य समीपे गच्छतः। ततः स एकस्तौ वा द्वौ गणधरौ तदधिकरणं यत्र चैत्यगृहेऽन्यत्र वोत्पन्नं तत्र द्वावपि वर्गौ नीत्वा उपशमयतः। अथ लज्जादिना स्वस्वगुरोर्न निवेदितमेकतरश्च पक्षो निर्गतस्तत आह— **आसन्ने**त्यादि, यद्या**सन्नं** गतोऽपान्तराले च निर्भयं ततः स **आनाय्यते,** अथ सापायं तर्हि तासां गणधर आगच्छति, आगत्य क्षमणं करोति। अथ **दूरे** गतस्तर्हि वृषभाणां **प्रेषणं** कर्त्तव्यं, ततो वृषभाः समेत्य ताः संयतीः क्षमयन्ति। अथ द्वितीयपक्षो नोपशान्तस्ततः पुनरावृत्तौ जातायां पूर्वोक्तकारणै**स्तदेव** प्रागुक्तं **द्वितीयं पद**मवसातव्यं, यत्र मिलन्ति तत्रैव क्षमयन्ति। अमिलने गुरूणामन्तिके इति॥ २९९१॥

एतदेव मूलतः सविस्तरं विभावयिषुरिदमाह—

**चेइयघरं नियत्ता, जत्थुप्पन्नं च तत्थ विज्झवणं ।**
**लज्जभया व असिट्ठे, दुवेगतर निग्गम इमं तु ॥ २९९२॥**

स्वस्वगुरुनिवेदने कृते तौ द्वावपि गुरू संयतीवर्गद्वयमपि **चैत्यगृहं नीत्वा,** अथवा

यत्राऽन्यत्रोत्पन्नमधिकरणं **तत्र** नीत्वाऽधिकरणस्य **विध्यापनं** कुरुतः। अथ **लज्जया भयाद्वा** गुरूणाम् **अशिष्टमभवत् द्वयोश्च** पक्षयोर्मध्ये **एकतरस्य** पक्षस्य **निर्गमस्तत इदं** कर्त्तव्यम् ॥२९९२॥

**आसन्नमणावाए, आणंतऽहवा से गणहरागम्म ।**
**जणणात अभिक्खामण, आणाविज्जऽन्नयं वा वि ॥ २९९३॥**

यद्यासन्नं निर्भयं च ततस्ता निर्गताः संयत्यः स्वगणेन सह **आनाय्यन्ते**। अथ सापायं ततस्तासां **गणधर आगच्छति** । ततस्ताः संयत्य आनीता गणधरो वा एकक आगतः,[ताः] यत्र **जनज्ञातं** भण्डनमभूत् तत्र **आनाय्य अन्यत्र वा** आनाय्य च [तासां]परस्परम**भिक्षमणं** कार्यम्। अथ दूरे गतास्तर्हि वृषभाः समागत्य संयतीः क्षमयन्ति॥ २९९३॥

**सूत्रम्— नो कप्पइ निग्गंथाणं निग्गंथीण वा वितिगिट्ठे काले सज्झायं उद्दिसित्तए वा करेत्तए वा ॥ १३॥**

अस्य सम्बन्धमाह—

**वितिगिट्ठं खलु पगयं, एगंतरितो य होइ उद्देसो ।**
**अव्वितिगिट्ठविगिट्ठं, जह पाहुडमेव नो सुत्तं ॥ २९९४॥**

सूत्र १३ गाथा २९९०-२९९५ व्यतिकृष्टे काले स्वाध्याय-निषेधः

**व्यतिकृष्ट**मिति **खलु प्रकृ**तमनुवर्त्तमानमस्ति दिग्सूत्रादनन्तरं च **एकेना**धिकरणसूत्रेणा-**न्तरितम् उद्देश**सूत्रं वर्त्तते। ततो **यथा प्राभृ**तमधिकरणं संयताना**मविकृष्टं** संयतीनां **विकृष्ट**मेवं **न** सूत्रमपीत्येतदर्थख्यापनार्थमिदं **सूत्रम्** ॥ २९९४॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**न कल्पते निर्ग्रन्थानां निर्ग्रन्थीनां वा व्यतिकृष्टे काले उद्घाटायां** पौरुष्यामित्यर्थः, **स्वाध्यायमुद्देष्टुं वा कर्तुं वे**ति सूत्राक्षरार्थः॥ सम्प्रति **भाष्य**विस्तरः—

**लहुगा य सपक्खम्मी, गुरुगा परपक्खे[१] उद्दिसंतस्स ।**
**अंगं सुयक्खंधं वा, अज्झयणुद्देसथुतिमाई ॥ २९९५॥**

यदि विकृष्टे उद्घाटपौरुषीलक्षणे **स( स्व )पक्षे** उद्दिशति संयतः संयतस्योद्दिशतीत्यर्थः। तदा तस्य प्रायश्चित्तं चत्वारो **लघुकाः। परपक्षः** संयतस्य संयती, संयत्याः संयतः,तत्र संयतः

सूत्र १३ गाथा २९९०-२९९५ व्यतिकृष्टे काले स्वाध्याय-निषेधः १२२५ (B)

---

१. परपक्ख-ला.॥

संयत्या **उद्दिशति** कारणे वा संयती संयतस्य तदा प्रायश्चित्तं चत्वारो **गुरुकाः**। अथ किमुद्दिशति एवं प्रायश्चित्तम्? अत आह—**अङ्गं श्रुतस्कन्धमध्ययनमुद्देशं स्तुतिमादि**शब्दात् स्तवं वा ॥२९९५॥

तत्र स्तुतिस्तवयोर्विशेषमभिधित्सुराह—

**एगदुगे तिसलोगा, थुतीओ[1] अन्नेसि होइ जा सत्त ।**
**देविंदत्थयमादी, तेणं तु परं थया होंति ॥ २९९६॥**

**एक**श्लोका **द्वि**श्लोका **त्रिश्लोका** वा **स्तुतिर्भवति** परतश्चतुःश्लोकादिकः स्तवः । **अन्येषा**माचार्याणां मतेन एकश्लोकादि **सप्त**श्लोकपर्यन्ता स्तुतयः **ततः परम**ष्टश्लोकादिकाः स्तवाः। यथा **देवेन्द्रस्तवादयः** आदिशब्दात् **कर्म**स्तवादिपरिग्रहः ॥ २९९६॥

अथ व्यतिकृष्टे काले उद्दिशतः पठतो वा को दोषस्तत आह—

१. थुतीसु-सं. ला. ।।

**अट्ठहा नाणमायारो, तत्थ काले य आदिमो ।**
**अकालज्झाइणा सो उ, णाणायारो विराहितो ॥ २९९७॥**

**ज्ञानाचारो अष्टधा** अष्टप्रकारः 'काले विणए' इत्यादि प्रागुक्तलक्षणः, तेषु चाष्टसु ज्ञानाचारेषु मध्ये **काल** इत्यादिमो ज्ञानाचारः **स च अकालाध्यायिना ज्ञानाचारो विराधितः** ॥ २९९७॥

न केवलमयं दोषः किं त्वन्येऽपि, तथा चाह—

**कालादि उवयारेण, न विज्जा सिज्झए विणा देइ।**
**रंधे व अवद्धंसं, सा व अन्ना व से तहिं ॥ २९९८॥**

**कालाद्युपचारेण विना विद्या न सिध्यति,** न केवलं न सिध्यति किन्तु कालादिवैगुण्यलक्षणे **रन्ध्रे** छिद्रे सति **सा**ऽधिकृतविद्याधिष्ठात्री **देवता अन्या वा क्षुद्रदेवता तत्रा**वसरे **अवध्वंसं ददाति**। एष दृष्टान्तोऽयमुपनयः- व्यतिकृष्टे काले सूत्रे उद्दिश्यमाने पठ्यमाने वा न सूत्रं निर्जराफलदायितया सिध्यति। न केवलं न सिध्यति किन्तु यया देवतया सूत्रमधिष्ठितं **सा** कालातिक्रमेण पठनतोऽक्षाम्यन्ती प्रान्ता वा काचिद् देवता अकालपठनलक्षणं छिद्रमवाप्य अवध्वंसं दद्यात् ॥ २९९८॥

अथ कथं ज्ञायते सूत्रं देवतया अधिष्ठितमत आह—

**सलक्खणमिदं सुत्तं, जेण सव्वण्णुभासियं ।**
**सव्वं च लक्खणोवेयं, समहिट्ठुंति देवया ॥ २९९९॥**

**इदमधिकृतं सूत्रं सलक्षणं येन** कारणेन **सर्वज्ञेन भाषितं, सर्वमपि च लक्षणोपेतं** वस्तु जगति **देवताः समधितिष्ठन्ति**। ततो ज्ञायते सूत्रमपि देवताधिष्ठितम् ॥ २९९९॥

अन्यच्च—

**जहा विज्जानरिंदस्स, जं किंचिदपि भासियं ।**
**विज्जा भवति सा चेह, देसे काले य सिज्झइ ॥ ३०००॥**

**यथा विद्यानरेन्द्रस्य** विद्याचक्रवर्त्तिनो **यत् किञ्चिदपि भाषितं विद्या भवति, सा चेह** जगति **देशे काले वा सिद्ध्यति** न कालाद्युपचारमन्तरेण ॥ ३०००॥

तथा—

**जहा य चक्किणो चक्कं, पत्थिवेहिं वि पुज्जइ ।**
**न यावि कित्तणं तस्स, जत्थ तत्थ व जुज्जति ॥ ३००१ ॥**

**यथा च**शब्दो दृष्टान्तान्तरसूचने, **चक्रिण**श्चक्रवर्त्तिन**श्चक्र**माज्ञा **पार्थिवैरपि** सर्वैः **पूज्यते, न चापि तस्य** चक्रस्य **यत्र तत्र** वा **कीर्त्तनं** शब्दनं संशब्दनं **युज्यते**॥३००१॥ उक्तौ दृष्टान्तावुपनयमाह—

**तहेहट्ठगुणोवेया, जिणसुत्तीकयावती ।**
**पुज्जते न य सव्वत्थ, तीसे झाया तु जुज्जती ॥ ३००२ ॥**

तथा तेन प्रकारेण इह जगति **जिनस्य** वाक् **सूत्रीकृता अष्टगुणोपेता** वक्ष्यमाणनिर्दोषत्वाद्यष्टगुणसमन्विता सर्वैरपि सुरासुरमनुजैः **पूज्यते, न च सर्वत्र** देशे काले वा **तस्या ध्याता युज्यते** किन्तु यथोक्त एव देशे काले च॥ ३००२॥

सम्प्रति तानेवाष्टौ गुणानाह—

**निद्दोसं सारवंतं च, हेउजुत्तमलंकियं।**
**उवणीयं सोवयारं च, मियं महुरमेव य ॥ ३००३ ॥**

**निर्दोषं** द्वात्रिंशताऽपि दोषैर्विनिर्मुक्तं, **सारवत्** बह्वर्थमधिकृतव्यवहारसूत्रवत्, **हेतवः** अन्वयव्यतिरेकलक्षणाः, **तैर्युक्तम्, अलङ्कृतम्** उपमाद्यलङ्कारोपेतम्, उपनीतम् उपनयोपसंहृतं, **सोपचारं** [=[१]अग्राम्याभिधानम्] **मितं** परिमिताक्षरं, **मधुरं** ललिताक्षरपदाद्यात्मकतया श्रोत्रमनोहारि ॥ ३००३॥



**पुव्वण्हे अवरण्हे य, अरहा जेण भासती ।**
**एसा वि देसणा अंगे, जं च पुव्वुत्तकारणं ॥ ३००४॥**

**येन** कारणेन भगवान् **अर्हन् पूर्वाह्णे अपराह्णे** च [**भाषते**] **एषैव** भगवतो **देशना अङ्गे** निबद्धा, तस्मादुद्घाटायां पौरुष्यां न पठनीयं, नाप्युद्देष्टव्यम्, **यच्च पूर्वं निशीथा**ध्ययने उक्तं **कारणं** तक्रोदाहरणलक्षणं तस्मादप्यकाले न पठनीयं नाप्युद्देष्टव्यम्॥ ३००४॥ अतश्चाऽकाले न पठनीयम् ।

यत आह—

---

१. आवश्यकहारिभद्र्यां गा. ८८० गाथा टीकायाम् 'अग्राम्याभिधानम्' इति॥

**रत्तीदिणाण मज्झेसु, उभतो[1] संझओ अवि ।**
**चरंति गुज्झगा केई, तेण तासिं तु नो सुयं ॥ ३००५॥**

**रात्रिन्दिनमध्ययोः** प्रातःसन्ध्यायां विकालसन्ध्यायां चेत्यर्थः। तथा **उभयोरपि सन्ध्ययोर्**मध्याह्नसन्ध्यायामर्द्धरात्रसन्ध्यायां चेत्यर्थः। येन कारणेन **केचित् गुह्यका** व्यन्तरविशेषा**श्चरन्ति** परिभ्रमन्ति **तेन** कारणेन **तासु** चतसृष्वपि सन्ध्यासु **न श्रुत**मुद्दिश्यते पठ्यते वा, मा भूत् छलनादोष इति कृत्वा ॥ ३००५॥

आह-यदि सन्ध्यासु गुह्यकाश्चरन्ति ततः कथमावश्यकं सन्ध्यायां क्रियते? तत आह—

**जाव होमादिकज्जेसु, उभयो संझयो सुरा।**
**लोगेण भासिया तेणं, संझावासगदेसणा ॥ ३००६॥**

**यावत् होमादिकार्येषु उभयोः सन्ध्ययोः सुरा** गुह्यका **लोकेन भाषिता**स्तिष्ठन्ति तावद्द्वयमावश्यकं कुर्मस्तेषां तत्र व्यापृतत्वादावश्यकस्यापि च सन्ध्याकृत्यरूपत्वात् **तेन सन्ध्यायामावश्यकदेशना**॥ ३००६॥

---

१. उभयतो-सं. ॥

**एते उ सपक्खम्मी, दोसा आणादयो समक्खाया ।**
**परपक्खम्मि विराहण, दुविहेण विसेण दिट्ठंतो ॥ ३००७॥**

**एते** प्रवचनवेदिनामतीव प्रसिद्धाः स(स्व)**पक्षे** उद्दिशतः **आज्ञादयो दोषाः समाख्याताः**। तद्यथा-आज्ञा तीर्थकराणां भग्ना भवति, अनवस्था तं दृष्ट्वा अन्येषामपि तथाकरणात्, मिथ्यात्वं तीर्थकराज्ञाभङ्गात्, विराधना द्विविधा संयमविराधना आत्मविराधना च, तत्र संयमविराधना ज्ञानाचारविराधनाद्, आत्मविराधना देवताछलनात्। **परपक्षे**प्येते दोषाः। केवलं या संयम**विराधना** सा ज्ञानाचारविघातात्मिका ब्रह्मविघातात्मिका च ज्ञातव्या, तत्र **द्विविधेन विषेण** द्रव्यविषेण भावविषेण च दृष्टान्तः॥ ३००७॥

तत्र द्रव्यभावविषप्ररूपणार्थमाह—

**दव्वविसं खलु दुविहं, सहजं संजोइमं च तं बहुहा ।**
**एमेव य भावविसं, सचेयणाऽचेयणं बहुहा ॥ ३००८॥**

**द्रव्यविषं खलु द्विविधं**, तद्यथा-**सहजं संयोगिमं च**, संयोजनं संयोगः, तेन निर्वृत्तम्

संयोगिमम् '**भावादिम**'इति इमप्रत्ययः, **तच्च** सहजं संयोगिमं च **बहुधा** अनेकप्रकारम्, एवमेव अनेनैव प्रकारेण खलु द्विविधं **भावविषं,** तद्यथा-सहजं संजोगिमं च। तच्च प्रत्येकं **सचेतनमचेतनं** च **बहुधा** बहुप्रकारम्॥ ३००८॥

सम्प्रति सहजसंयोगिमद्रव्यविषप्ररूपणार्थमाह—

**सहजं सिंगियमादी, संजोइमघयमहुं च समभागं ।**
**दव्वविसं णेगविहं, एत्तो भावम्मि वोच्छामि ॥ ३००९॥**

**सहजं** द्रव्यविषं **शृङ्गिकादि संयोगिमं घृतं मधु च समभागम्** एतच्चैकैकमपि **द्रव्यविषमनेकविधं** द्रष्टव्यम्। **अत** ऊर्ध्वं भावे **भावविषं वक्ष्यामि** ॥ ३००९॥

प्रतिज्ञातमेव निर्वाहयति—

**पुरिसस्स निसग्गविसं, इत्थी एवं पुमं पि इत्थीए ।**
**संजोइमो सपक्खो, दोण्हं वि परपक्खनेवत्थो ॥ ३०१०॥**

**पुरुषस्य निसर्गविषं** सहजविषं **स्त्री** नेपथ्योपेता, **एवं स्त्रिया** अपि सहजं विषं **पुमान्** पुरुषः नेपथ्योपेतः। **संयोगिमं** विषं **द्वयोरपि** संयतस्य संयत्याश्चेत्यर्थः, **स( स्व )पक्षः परपक्षनेपथ्यः**। तद्यथा-संयतस्य पुरुषः स्त्रीनेपथ्योपेतः, निर्ग्रन्थ्याः स्त्री पुरुषनेपथ्योपेता॥ ३०१०॥

**घाणरसफासतो वा, दव्वविसं सइंऽतिवाएति ।**
**सव्वविसयाणुसारी, भावविसं दुज्जयं असइं ॥ ३०११॥**

**द्रव्यविषं घ्राणतो रसतः स्पर्शतो वा सकृद्** एकवार**मतिपातयति** । **वा** विभाषायां, तदपि सकृदतिपातं वैकल्पिकं भवति। तथाहि-द्रव्यविषं कदाचिज्जीवितान्न च्यावयेदपीति। **भावविषं** पुनः **सर्वविषयानुसारि** पञ्चस्वपीन्द्रियविषयेषु सम्प्रापकत्वात् । तथा **दुर्जयम्** अल्पसत्त्वेन जेतुमशक्यत्वात्, नियमाच्चा**ऽसकृद**नेकवारमतिपातयति विनाशयति । भावविषमूर्च्छितानामनेकमरणभावात् ॥ ३०११॥

उपसंहारमाह—

**जम्हा एए दोसा, तम्हा उ सपक्ख समण-समणीहिं ।**
**उद्देसो कायव्वो, किमत्थ पुण कीर उद्देसो ॥ ३०१२॥**

**यस्माद्** विपक्षे **एते दोषाः,तस्मात् श्रमण-श्रमणीभ्यां स्वपक्षे उद्देशः कर्त्तव्यः** संयतैः संयतानामुद्देशः कार्यः, संयतीभिः संयतीनामित्यर्थः। ततः प्रागुक्ता दोषा न भवन्ति । आह परः -**किमत्र पुनः** कारणं यदुद्देशः **क्रियते** ? अनुद्दिष्टं कस्मात् न पठ्यते?॥ ३०१२॥ तत्राह-

**बहुमाण विणय आउत्तया य उद्देसतो गुणा होंति ।**
**पढमाएसो उ सव्वो, एत्तो वोच्छं करणकालं ॥ ३०१३॥**

उद्देशे हि क्रियमाणे श्रुतस्य श्रुताधारस्य चाध्यापकस्योपरि **बहुमान**मान्तरः प्रीतिविशेषो भवति। **विनयश्च** प्रयुक्तः स्याद् **आयुक्तता** च महती भवति एत **उद्देशतो गुणा भवन्ति**। एष **सर्वो**ऽप्यङ्गादिविषय उद्देशः **प्रथमादेशः**। **अत** ऊर्ध्वं तु स्वाध्याय**करणकालं वक्ष्ये**॥ ३०१३॥

प्रतिज्ञातमेव निर्वाहयति—

**थयथुइ धम्मक्खाणं, पुव्वुद्दिट्ठं तु होइ संज्झाए ।**
**कालियकाले इयरं, पुव्वुद्दिट्ठं विगिट्ठे वि ॥ ३०१४॥**

**स्तवः स्तुतिर्धर्माख्यानं** च **पूर्वोद्दिष्टं सन्ध्याया**मपि पठनीयं **भवति, कालिकं** पुनः श्रुतं प्रथमायां पौरुष्यामुद्दिष्टं **काले** प्रथमपौरुषीलक्षणे चरमपौरुषीलक्षणे च पठ्यते नाऽकाले, **इतरद्** उत्कालिकं प्रथमायां पौरुष्या**मुद्दिष्टं व्यतिकृष्टेऽपि** काले सन्ध्यामस्वाध्यायिकं च वर्जयित्वा पठ्यते ॥ ३०१४॥

**पत्ताण समुद्देसो, अंगसुयक्खंधपुव्वसूरम्मि ।**
**इच्छा निसीहमादी, सेसा दिणपच्छिमादीसु ॥ ३०१५॥**

अध्ययनमुद्देशं वा पठन्तो यदैव श्रवणं **प्राप्ता** भवन्ति तदैव[तेषां] तस्याऽध्ययनस्योद्देशस्य वा **समुद्देशः** क्रियते **अङ्गं श्रुतस्कन्धो** वा **पूर्वसूरे** उद्घाटायामपि पौरुष्यामनुज्ञायते। येषामागाढो योगस्तेषां **निशीथादीनामिच्छा** प्रथमायां चरमायां वा पौरुष्यां तेषामनुज्ञा प्रवर्त्तते इति। **शेषाणि** अध्ययनान्युद्देशका वा **दिवसस्य पश्चिमायां** पौरुष्याम्,**आदि**शब्दात् रात्रेः प्रथमायां चरमायां वाऽनुज्ञायन्ते ॥ ३०१५॥

अनुज्ञामेवाधिकृत्य विशेषव्याख्यानमाह—

**दिवसस्स पच्छिमाए, निसिं तु पढमाए पच्छिमाए वा ।**
**उद्देसज्झयणुण्णा, न य रत्ति निसीहमादीणं ॥ ३०१६ ॥**

**उद्देशानामध्ययनानां** चाऽनुज्ञा **दिवसस्य पश्चिमायां निशि तु प्रथमायां पश्चिमायां वा** प्रवर्त्तते। **निशीथादीना**मागाढयोगानां दिवसस्य प्रथमायां चरमायां वा पौरुष्यामनुज्ञातं **न तु रात्रौ** ॥ ३०१६ ॥

अत्रैवाऽऽदिशब्दस्याधिकार्थसंसूचकत्वमुपदर्शयति—

**आदिगहणा दसकालियमुत्तरज्झयणचुल्लसुयमादी ।**
**एएसि भइयऽणुण्णा, पुव्वण्हे आवि अवरण्हे ॥ ३०१७ ॥**

**आदिग्रहणाद्** आदिशब्दोपादानात् यानि **दशवैकालिकोत्तराध्ययनक्षुल्लक**कल्प-श्रुतादीनि, अत्रादिशब्दादौपपातिकादिपरिग्रहः। **एतेषामनुज्ञा** भजिता विकल्पिता **पूर्वाह्णे** वा स्याद**पराह्णे** वा॥ ३०१७ ॥

साम्प्रतमङ्ग-श्रुत-स्कन्धानामनुज्ञाविधिमाह—

**नंदीभासण चुण्णे, य विभासा होइ अंगसुयखंधे।**
**मंगलसद्धाजणणं, अज्झयणाणं चऽवोच्छेदो ॥ ३०१८॥**

**अङ्गे श्रुतस्कन्धे** च भवति अनुज्ञायां कर्त्तव्यायां **नन्दीभाषणं** ज्ञानपञ्चकोच्चारणं, **चूर्णे च विभाषा,** यदि भवन्ति वासाः शिरसि प्रक्षिप्यन्ते, तदभावे केसराण्यपि। कस्मादेवमनुज्ञा क्रियते? इति चेत्, अत आह-नन्दीभाषणे वासनिक्षेपे च **मङ्गलं** भवति, ज्ञानपञ्चकस्य भावमङ्गलत्वाद् वासनिक्षेपस्य च द्रव्यमङ्गलत्वात्। तथा अन्येषां परम**श्रद्धाजननं** यथैषोऽमुकस्याङ्ग**स्य श्रुतस्कन्धस्य** च पारगतः। आचार्येण चैवं सकलजनसमक्षं पूजितः, तस्मात् वयमपि गाढतरमुत्साहं कुर्म इति। तथा **अध्ययनानां चाऽव्यवच्छेदः**। अन्यथा 'नाऽननुज्ञातमन्येषां दीयते' इति तेषां व्यवच्छेदः स्याद्॥ ३०१८॥

अत्रैवापवादमाह—

**बिइयपयं आयरिए, अंगसुयक्खंधमुद्दिसंतम्मि ।**
**मंगल-सद्धा-भय-गोरवे य तह निद्दिए चेव ॥ ३०१९॥**

स(स्व)पक्षे उद्देशः कर्त्तव्यो न परपक्षे इत्युत्सर्गः। अत्र **द्वितीयपद**मपवादपदं-यदि प्रवर्त्तिन्यास्तत् श्रुतं न विद्यते तत आचार्यः परपक्षेऽपि संयतीरूपे अङ्गं श्रुतस्कन्धं वा उपलक्षणमेतदध्ययना-दिकं चोद्दिशति। अथवा सत्यपि तस्मिन् प्रवर्त्तिन्याः श्रुते **आचार्ये** संयत्या **अङ्गं श्रुतस्कन्धं वा उद्दिशति** मङ्गलादीनि भवन्ति ततः स एवोद्दिशति। तथाहि-आचार्ये उद्दिशति स परमज्ञानपात्रमिति **मङ्गल**बुद्धिरुपजायते। तथा यस्मादाचार्येणोद्दिष्टमिदमत आदरेण पठनीयमिति तत्पाठविषया महती **श्रद्धा** भवति तथा यदि पाठे प्रमादं करिष्यामि ततो न पठितमित्याचार्या रुष्येयुरिति **भयम्**। तथा ममेदमाचार्येण **गौरवे**णोद्दिष्टं तस्मादादरेण पठित्वा शीघ्रं समाप्तिं नयामि। **तह निट्ठिए चेव** त्ति **तथा निष्ठिते** अङ्गे श्रुतस्कन्धे वा समाप्तिं नीते यथासम्भवमेतैरेव कारणैरङ्गं श्रुतस्कन्धं वाचार्योऽनुजानीयात्॥ ३०१९॥

**एमेव संजती वि, उद्दिशती संजयाण बितियपदे ।**
**असतीए संजयाणं, अज्झयणाणं च वोच्छेदो ॥ ३०२०॥**

तत् विवक्षितं श्रुतं **संयतानां न विद्यते, अध्ययनानां** चान्यथा **व्यवच्छेदः** स्यात् ततो **द्वितीयपदेन** अपवादपदेन, गाथायां सप्तमी तृतीयार्थे, **संयत्यपि संयतानामुद्दिशति**॥ ३०२०॥

**एवं ता उद्देसो, अज्झाओ वी न कप्पति[1] विगिट्ठे ।**
**दोण्हं पि हुंति लहुगा, विराहणा सेव पुव्वुत्ता ॥ ३०२१ ॥**

**एव**मुक्तेन प्रकारेण **तावदुद्देशो**ऽभिहितो यथा- व्यतिकृष्टे काले स न क्रियते, **अध्यायो**ऽप्यध्ययनादीनां **विकृष्टे** काले **न कल्पते**, तत्र कालिकस्य उद्घाटा पौरुषी व्यति[कृष्टः] कालः, उत्कालिकस्य सन्ध्या। तत्र **द्वयोरपि** कालिकोत्कालिकयोः व्यतिकृष्टे काले प्रायश्चित्तं चत्वारो **लघुका** भवति। **सैव पूर्वोक्ता विराधना** ज्ञानविराधना आत्मविराधना च। तत्र ज्ञानविराधना च ज्ञानाचारहननाद्, आत्मविराधना प्रान्तदेवता च्छलनात्॥ ३०२१ ॥

अत्रैवापवादमाह—

**बितियविगिट्ठे सागारियाए कालगय असति वोच्छेदे ।**
**एवं कप्पति तहियं, किं ते दोसा न संती उ ॥ ३०२२ ॥**

कदाचित् साधवः कारणेन **सागारिकायां** वसतौ स्थिताः, तत्र परिचारणाशब्दं श्रुत्वा



---

१. कप्प वितिगिट्ठे-ला.॥

यस्य यत् परिजितं स तत् परावर्त्तयति, आदिशब्दात् स्तेनकादिष्वपि समापतत्सु यस्य यत् परिजितं स तत् गुणयति [इति] परिग्रहः, तथा **कालगतः** संयतो यदि कारणेन प्रतीक्षापयितव्यो भवति तदा रात्रौ जागरणनिमित्तं यस्य यत् परिजितं स तत् परावर्त्तयति। तथा यस्य सकाशे तत् श्रुतमधीतं स कालगतोऽन्यत्र च तच्छ्रुतं नास्ति, ततः सम्प्रति पठितं मा विस्मृतिं यायात् अनुप्रेक्षायां च सोऽकुशलः। तत एवमेतैः कारणै **द्वितीय**पदमधिकृत्य **व्यतिकृष्टे**ऽपि कालेऽध्यायः **कल्पते** । अत्र पर आह-**तत्राऽप**वादपदेन व्यतिकृष्टेऽपि काले पठतः **किं ते दोषा** आज्ञाभङ्गादयो **न सन्ति** न भवन्ति?॥ ३०२२॥

अत्रोत्तरमाह—

**भन्नइ जेण जिणेहिं, अणुण्णायाइं कारणे ताइं ।**
**तो दोसो न संजायइ, जयणाए तहिं करेंतस्स ॥ ३०२३॥**

गाथा ३०१८-३०२३ व्यतिकृष्टे काले पठननिषेधः

**भण्यते** अत्रोत्तरं दीयते **येन** कारणेन **जिनैः** कारणे सागारिकादिलक्षणे **तानि** पठनान्य**नुज्ञातानि तस्मात्** कारणाद् रहस्यश्रुतस्यापि च **यतनया** वक्ष्यमाणलक्षणया **तत्र** सागारिकवसत्यादौ पाठं **कुर्वतो दोष** आज्ञाभङ्गादिलक्षणो **न सञ्ज्ञायते**॥ ३०२३॥

तत्र यतनामाह—

**कालगयं मोत्तूणं, इमा अणुप्पेहदुब्बले जयणा ।**
**अन्नवसहिं अगीते, असती तत्थेवऽणुच्चेणं ॥ ३०२४॥**

**कालगतं मुक्त्वा** शेषेषु कारणेषु **अनुप्रेक्षादुर्बले इयं** वक्ष्यमाणा **यतना-अन्यस्यां वसतौ** गत्वा रहस्यश्रुतं परिवर्त्तयन्ति। मा **अगीते** अगीतार्थस्य रहस्यश्रुतश्रवणं भूयादिति हेतोः। अथान्य उपाश्रयो **न विद्यते** ततोऽन्यस्या वसतेरभावे तत्रैव तस्यामेव वसतावनुच्चेन शब्देन परावर्तयन्ति, कालगतेऽपि वसत्यन्तरे न यान्ति किन्तु तत्रैव जागरणनिमित्तम् **अनुच्चशब्देन** गुणयन्ति। संयत्योऽप्यपवादपदेन संयतानां समीपे पठेयुः परावर्त्तयेयुर्वा न कश्चिद्दोषः ॥ ३०२४॥

**सूत्रम्- कप्पति निग्गंथीणं वितिगिट्ठे काले सज्झायं करेंतए निग्गंथनिस्साए॥ १४॥**

**कल्पते निर्ग्रन्थीनां निर्ग्रन्थनिश्रया व्यतिकृष्टेऽपि काले स्वाध्यायं कर्तु**मिति सूत्राक्षरार्थः। अधुना **भाष्यप्रपञ्चः**—तत्र प्रथमतः पूर्वपक्षस्यावकाशं दर्शयति—

**कप्पति जइनिस्साए, वितिगिट्ठे संजतीण सज्झाओ ।**
**इति सुत्तेणुद्धारे, कयम्मि उ कमागतं भणति ॥ ३०२५॥**

**कल्पते यतिनिश्रया व्यतिकृष्टे** काले **संयतीनां स्वाध्याय इति सूत्रेणोद्धारे कृते** परः **क्रमागतं** परिपाट्यागतमिदं **भणति**॥ ३०२५॥

किं तद् इत्याह—

**पुव्वं वण्णेऊणं, संजोगविसं च जायरूवं च ।**
**आरोवणं तु गरुयं, न हु लब्भं वायणं दाउं ॥ ३०२६॥**

**पूर्वं संयोगविषं जातरूपं च** जातस्वरूपं च विषं सहजविषं चेत्यर्थः। **आरोपणं** च प्रायश्चित्तं चतुः [गुरुकं] **वर्णयित्वा** यत् सम्प्रति **वाचनां** ददत अन्तर्भूतण्यर्थत्वात् दापयत तां **दापयितुं** न हु नैव **लभ्यम्**॥ ३०२६॥

एवं परेण पूर्वपक्षे कृते सूरिराह—

**कारणियं खलु सुत्तं, असति पवायंतीयाए वाएज्जा ।**
**पाढेण विणा तासिं, हाणी चरणस्स होज्जाहि ॥ ३०२७॥**

इदं **खलु सूत्रं कारणिकं** कारणेन निर्वृत्तं, तदेव कारणमाह— असति अभावे **प्रवाचयन्त्याः** प्रवर्त्तिन्या **वाचयेत्** संयतीः। अन्यथा **पाठेन विना तासां चरणस्य हानिर्भवेत्** ॥ ३०२७॥

यदि भवति ततः को दोषः? इत्यत आह—

**जातो पव्वइयातो, सग्गं मोक्खं च मग्गमाणीतो ।**
**जइ नत्थि नाण-चरणं, दिक्खा हु निरत्थिगा तासिं ॥ ३०२८॥**

**याः स्वर्गं मोक्षं च मृगयमाणाः प्रव्राजिताः तासां यदि ज्ञानं चरणं च नास्ति** ततो हु निश्चितं **दीक्षा निरर्थिका** ॥ ३०२८॥

कथं निरर्थिका? इत्यत आह—

**सव्वजगुज्जोयकरं, नाणं नाणेण नज्जते चरणं ।**
**नाणंमि असंतम्मी, अज्जा किह नाहिति विसोहिं ॥ ३०२९॥**

**सर्वस्याऽपि** जगत **उद्योतकरं ज्ञानं, ज्ञानेन** च **ज्ञायते चरणम्।** ततो **ज्ञाने असति आर्यिका विशोधिं कथं ज्ञास्यन्ति?** नैव ज्ञास्यन्तीति भावः। ततो विशुद्ध्यभावात् चरणाभावः ॥ ३०२९ ॥

तथा चाह—

**नाणम्मि असंतम्मी, चरित्तं पि न विज्जए ।**
**चरित्तम्मि असंतम्मि, तित्थे नो सचरित्तया ॥ ३०३० ॥**

**ज्ञाने असति** प्रागुक्तयुक्ते**श्चारित्रमपि न विद्यते, असति चारित्रे** सकले तीर्थे **नास्ति** आर्यिकाणां **सचारित्रता** ॥ ३०३० ॥

**अचरित्तयाए तित्थस्स, निव्वाणं नाभिगच्छति।**
**असती निव्वाणस्स य, दिक्खा होति निरत्थगा ॥ ३०३१ ॥**

संयतीरधिकृत्य **तीर्थस्याऽचारित्रतया** संयती **निर्वाणं** कापि **न गच्छति,** निर्वाणस्य चाऽभावे दीक्षा निरर्थिका ॥ ३०३१ ॥

**तम्हा इच्छावेती, एयासिं नाणदंसणचरितं ।**
**नाणचरणेण अज्जा, काहिति अंतं भवसयाणं ॥ ३०३२॥**

यतो निर्वाणाभावे दीक्षा निरर्थिका, अथ च तासां निर्वाणाय भगवता दीक्षाऽनुज्ञाता **तस्मादेतासां** दीक्षा बलादपि **ज्ञानदर्शनचारित्रं** समाहारत्वादेकवचन**मिच्छापयति** यतो**ऽन्तं** विनाशं **भवशतानां करिष्यत्यार्यिका,** यतो निर्वाणं लभ्यते **ज्ञानचरणेन,** नान्यथा ॥ ३०३२॥

**नाणस्स दंसणस्स य, चारित्तस्स य महाणुभावस्स ।**
**तिण्हं पि रक्खणट्ठा, दोसविमुक्को पवाएज्जा ॥ ३०३३॥**

**ज्ञानस्य दर्शनस्य चारित्रस्य च** कथम्भूतस्यैकैकस्य इत्यत आह— **महान् अनुभावः** प्रभावो यस्य तत् तथा तस्य, एतेषां **त्रयाणां रक्षणाय दोषविमुक्तो** वक्ष्यमाणदोषविप्रमुक्तो **प्रवाचयेत्** ॥ ३०३३॥

**अप्पसत्थेण भावेण, वाएंतो दोसवं भव ।**
**केरिसो अप्पसत्थो उ?, इमो सो उ पवुच्चती ॥ ३०३४॥**

**अप्रशस्तेन भावेन वाचयन् दोषवान् भवति,** न प्रशस्तेन । अथ **कीदृशः** सोऽ**प्रशस्तो** भावः? सूरिराह-सोऽप्रशस्तो भावोऽ**यं प्रोच्यते** ॥ ३०३४॥

तमेवाह—

**परिवारहेउमन्नट्ठयाए वभिचारकज्जहेउं वा ।**
**आगारा य बहुविहा, असंवुडादी उ दोसा उ ॥ ३०३५॥**

**परिवारो** मे भूयादिति हेतोर**न्यार्थतया** वा, अन्नं पानं वा ममानीय दास्यतीत्येतदर्थं वा इत्यर्थः। **व्यभिचारार्थं** वा मैथुनार्थं वा, अन्येषां वा एतद्व्यतिरिक्तानां **कार्याणां हेतोः**, अथ **अगाराणि** गृहाणि **बहुविधानि असंवृतादीनि** मे सम्पादयिष्यतीत्येतदर्थं यदि वाचयति तदा सोऽप्रशस्तो भाव इति तस्य **दोषाः** ॥ ३०३५॥

**गणिणी कालगयाए, बहिया य न विज्जए जया अण्णा ।**
**संता वि मंदधम्मा, मज्जायाए य पवाएज्जा ॥ ३०३६॥**

**गणिन्यां** प्रवर्त्तिन्यां **कालगतायां** तत्रान्यत्र वा **बहिर्यदा अन्या** प्रवाचिका **न विद्यते,** अथास्ति परं **सत्यपि** सा **मन्दधर्मा,** ततः साधु**र्मर्यादया प्रवाचयति**॥ ३०३६ ॥

तामेव मर्यादामाह—

**आगाढजोगवाही, पकप्पो वावि होज्ज असमत्तो ।**
**सुत्ततो[1] अत्थतो वा वि, कालगया य पवत्तिणी ॥ ३०३७॥**

**आगाढयोगवाहिनी** काऽपि संयती, यदि **वा** कस्याश्चित् संयत्याः **प्रकल्पो** निशीथाध्ययनं **सूत्रतोऽर्थतश्चाऽसमाप्तो भवेत्** वर्त्तते अत्रान्तरे च **प्रवर्त्तिनी कालगता**॥ ३०३७ ॥

**अण्णा य सगच्छम्मी, जइ नत्थि पवाइगा ।**
**अण्णगच्छा मणुण्णं तु, आणयंति ततो तहिं ॥ ३०३८॥**

**अन्या स्वगच्छे यदि प्रवाचिका न विद्यते ततो अन्यगच्छाद् मनोज्ञां** साम्भोगिकीं तत्राऽऽर्यिकां वसता**वानयन्ति**॥ ३०३८ ॥

१. अत्र ३०३७ गाथायास्तृतीये चरणे अनुष्टुप्छन्दः इति ला. टिप्पणे॥

**सा तत्थ निम्मवे एक्कं, तारिसीए असंभवे ।**
**उग्गहधारण कुसलं, ताहे य नयंति अन्नत्थ ॥ ३०३९॥**

**सा** मनोज्ञा समानीता सती **तत्र एकामार्यिकां निर्मापयति** । अथ तादृशी मनोज्ञा न विद्यते तत आह—**तादृश्या अभावे** ततोऽ**वग्रह-धारणा-कुशलामन्यत्रा**ऽसाम्भोगिके गच्छान्तरे **नयति। तत्र** संयतीनां च संयतानां च परीक्षा कर्त्तव्या ॥ ३०३९॥

तथा चाह—

**संविग्गअसंविग्गा, परिच्छियव्वा य दो वि वग्गा उ ।**
**अपरिच्छणम्मि गुरुगा, परिच्छ इमेहिं ठाणेहिं ॥ ३०४०॥**

**द्वावपि** संयतसंयतीरूपौ **वर्गौ संविग्नावसंविग्नाविति** वा **परीक्षितव्यौ**, यदि न परीक्षन्ते ततो**ऽपरीक्षणे** प्रायश्चित्तं चत्वारो **गुरुकाः**, सा च **परीक्षा एभिर्वक्ष्यमाणैः स्थानैः** कर्त्तव्या ॥ ३०४०॥

तानेवाह—

**वच्चंति ता वि एंती, भत्तं गिण्हंति ता व तं दिंति ।**
**कंदप्पतरुण बाउस, अकालऽभीया य सच्छंदा ॥ ३०४१ ॥**

संयताः संयतीनामुपाश्रये निष्कारणं **व्रजन्ति**, ता अपि वा संयत्यः संयतानामुपाश्रयं निष्कारणमा**गच्छन्ति**। तथा **भक्तं** पानं वा संयतानां पार्श्वे संयत्यो यथा कथञ्चन **गृह्णन्ति, ता वा** संयत्यः संयतानां **प्रयच्छन्ति** । तथा परस्परं **तरुणा**स्तरुण्यश्च **कन्दर्प**कथां कथयन्ति, तथा संयताः संयत्यश्च **बाकुशं** भावं बिभ्रति। तथा द्वावपि वर्गा**वकाले** चरतः। तथा संयताः आचार्यस्य न बिभ्यति, आर्यिकाः प्रवर्त्तिन्याः। तथा संयताः संयत्यश्च **स्वच्छन्दा** आत्मन इच्छया यान्ति आयान्ति वा इत्यर्थः ॥ ३०४१ ॥

**अट्ठमीपक्खिए मोत्तुं, वायणाकालमेव य ।**
**पुव्वुत्ते कारणे वा वि, गमणं होइ अकारणं ॥ ३०४२ ॥**

**अष्टमीं पाक्षिकं** तथा **वाचनाकालं** तथा **पूर्वोक्तानि 'गम्मति कारणजाए'** इत्यादिना

ग्रन्थेन यानि **कल्पे**ऽभिहितानि [कारणानि] तानि **मुक्त्वा** शेषकालं यद् भवति **गमनं तदकारणं** निष्कारणमित्यर्थः। एतेन 'ता वा संयत्यो निष्कारणमायान्ती'ति व्याख्यातम् ॥ ३०४२॥

**थेरा सामायारिं, अज्जा पुच्छंति ता परिकहेंति ।**
**आलोयण१ सच्छंदं२ वेंटल३गेलन्न४पाहुणिया५ ॥ ३०४३॥**

**स्थविरा** आचार्या आत्मीया **आर्यिका** वास्तव्यानामार्यिकाणां **सामाचारीं पृच्छन्ति,** यथा-कीदृशी वास्तव्यानामार्यिकाणां सामाचारी? इति एवं पृष्टाः सत्य**स्ताः परिकथयन्ति।** या यत्र गताः तास्ततः प्रत्यागता **नालोचयन्ति,** नापि दैवसिकं रात्रिकं पाक्षिकं वाऽतीचारमालोचयन्ति। तथा **स्वच्छन्दं** वर्तन्ते नाचार्योपाध्यायप्रवर्त्तिनीनां च वश्याऽऽयत्ताः, तथा **वेंटलानि** प्रयुञ्जन्ति, न च **ग्लानायाः** प्रतितर्पयन्ति, नापि **प्राघूर्णकानां** वात्सल्यं विदधति ॥ ३०४३॥

**चित्तलए६ सविकारा७, बहुसो उच्छोलणं८ च कप्पट्ठे९।**
**थलिघोड१०वेस११साला१२,जंत१३वए१४काहिय१५ निसिज्ज१६ ॥३०४४॥**

तथा **चित्तलानि** वस्त्राणि परिदधति, तथा **सविकारा** गतावुल्लापे च विकारसहिताः। तथा **बहुशो** अनेकप्रकारं मुख-नयन-कक्षा-हस्त-पादादीना**मुच्छोलनम्** प्रक्षालनं कुर्वन्ति। तथा **कल्पस्थानि** डिम्भरूपाणि रमयन्ति मण्डयन्ति ममीकुर्वन्ति वा । तथा **स्थल्यो** देवद्रोण्यस्तासु भिक्षार्थं व्रजन्ति। तत्र **घोटा** डिङ्गरास्ते[१] निरुद्धा बलादपि गृह्णन्ति, स्थल्यां वा समवसृतो य उपाश्रयस्तत्र वसन्ति। **वेश्या**गृहाणि वा हिण्डन्ते, तत्पाटके वा वसतौ तिष्ठन्ति। **शाला** हस्तिशाला अश्वशाला वा तासु हिण्डन्ते, तासां वा समीपे उपाश्रये तिष्ठन्ति। **यन्त्राणि** इक्षुयन्त्रतैलयन्त्रादिगृहाणि तानि हिण्डन्ते, तन्मध्ये वा उपाश्रये वसन्ति । तथा **व्रजान्** गोकुलानि व्रजन्ति। **काथिका**दित्वं वा कुर्वन्ति गृहि**निषद्यां** वा बाधन्ते। एष द्वारगाथाद्वयसमासार्थः ॥ ३०४४॥

साम्प्रतमेतदेव विवरीषुः प्रथमतः आलोचनाद्वारं सच्छंदद्वारं चाह—

**जा जत्थ गया सा उ, नालोए दिवसपक्खियं वा वी** । दारं १।
**सच्छंदातो वयणे, महत्तरियाए न ठायंति ॥ ३०४५॥** दारं २।

१. डिङ्गरास्तैः नि° सं.। डिङ्गर=सेवक धूतारो इति 'शब्दरत्नमहोदधौ' ॥

**या यत्र** गता **सा** ततः प्रत्यागता **नालोचयति,** नापि काचन **दैवसिकं पाक्षिकम्** अपिशब्दात् रात्रिकं वाऽतीचारमालोचयति१। तथा **स्वच्छन्दाः** सर्वा अपि वर्त्तन्ते **न** महत्तरिकायाः, उपलक्षणमेतत् नाप्याचार्योपाध्याययो**र्वचने तिष्ठन्ति** २॥ ३०४५॥

अधुना विण्टलादिद्वारचतुष्टयमाह—

**विंटलानि पउजंति।** दा.३। [1]**गिलाणाए वि न पडितप्पति ।**
**आगाढ वऽणागाढं, करेंति अणागाढ आगाढं ॥ ३०४६॥** दारं ४॥
**अजयणाए व कुव्वंती, पाहुणगादि अवच्छला ।** दारं. ५।
**चित्तलाणि** [2]**नियंसंति, चित्ता रयहरणा तहा ॥ ३०४७॥** दारं ६।

**विण्टलानि खटि**काचप्पुटिकादीनि **प्रयुञ्जते 3। नापि ग्लानायाः प्रतितर्पयन्ति** प्रतिचरन्ति, यदि वा **आगाढे अनागाढं कुर्वन्ति अनागाढे** वा **आगाढमयतनया वा कुर्वन्ति**४।



---

१. गिलाणेयावि-पु. प्रे.। गिलायाणावि-मु.॥ २. नियंसेंति-ला.॥

तथा **प्राघूर्णकायामवत्सलाः** ५, तथा **चित्रलानि** विचित्ररेखोपेतानि वस्त्राणि **निवसते** परिदधति। **चित्राणि** वा नानाप्रकाराणि **रजोहरणानि** धारयन्ति ६॥ ३०४६॥ ३०४७॥

सम्प्रति सविकारद्वारमाह—

**गतिविब्भमादिएहिं, आगारा विगारा तहा पदंसंति ।**
**जह किढगाण वि मोहो, समुदीरति किं तु तरुणाणं ॥३०४८॥** दारं ७।

**गतिविभ्रमादिभिराकार-विकारास्तथा प्रदर्श्यन्ते यथा किढकानामपि** वृद्धानामपि **मोहः समुदीर्यते किं पुनस्तरुणाना**मिति ७॥ ३०४८॥

बहुश उच्छोलनाद्वारं कल्पस्थद्वारं चाह—

**बहुसो उच्छोलंती, मुहनयणे हत्थपायकक्खादी ।** दारं ८।
**गेण्हणमंडणरामण, भोयंति व तातो कप्पट्ठे ॥ ३०४९॥** दारं ९।

ता **मुखनयनानि हस्तपादकक्षादिकं** च **बहुशो**ऽनेकवार**मुच्छोलयन्ति** प्रक्षालयन्ति८।

तथा गृहस्थबालकानां **ग्रहणं** कुर्वन्ति, **मण्डनं** वा, **रामणं** वा क्रीडनं, यदि वा **ताः कल्पस्थान्** गृहस्थान् गृहस्थदारकान् **भोजयन्ति ९** ॥ ३०४९ ॥

स्थलीघोटकद्वारं वेश्याद्वारं चाह–

**थलि घोडादि ठाणे, वयंति ते वा वि तत्थ समुवेंति** । दारं १०।
**वेसत्थीसंसग्गी, उवस्सतो वा समीवम्मि ॥ ३०५०॥** दारं ११।

**स्थली-घोटादिस्थाने,** अत्रादिशब्दस्तेषामेव देवडिङ्गराणामनेकभेदख्यापनार्थं, ता **व्रजन्ति, ते वा** स्थलीघोटा देवडिङ्गरापरपर्यायास्तत्राऽऽर्यिकोपाश्रये स्थलीसमीपे **समुपयन्ति** गच्छन्ति १०। तथा **वेश्यास्त्रीसंसर्गिः** सदैव तासां, यदि वा वेश्यागृह**समीपे** तासा**मुपाश्रयः**११ ॥३०५० ॥

सम्प्रति शाला-यन्त्र-काथिकत्वद्वाराण्याह–

**तह चेव हत्थिसाला, घोडगसालाण चेव आसन्ने** । दारं १२।
**जंति तह जंतसाला, काहीयत्तं व कुव्वंति ॥ ३०५१॥** दारं १३-१५।

**तथा चैव हस्तिशालानां घोटकशालानां चासन्ने** प्रदेशे हिण्डन्ते, यदि वा तासां प्रत्यासन्ने उपाश्रये वसन्ति१२। तथा इक्ष्वादि**यन्त्रशालां गच्छन्ति** तत्समीपे वा वसन्ति१३। व्रजद्वारं सुगमत्वान्न विवृतम्। **काथिकत्वं** वा **कुर्वन्ति**॥ ३०५१॥ सम्प्रति स्थलीघोटकद्वारे(रयोः) दोषमाह—

**थलिघोडादि निरुद्धा, पसज्झ गहणं करेज्ज तरुणीणं।**
**संका य होइ तहियं, गोयर किमु पाडिवेसेहिं॥ ३०५२॥**

**स्थली-घोटादयो**ऽनेकप्रकारा देवडिंगरा **निरुद्धाः** कृतबस्तिनिरोधाः सन्तस्तरुणीनां **प्रसह्य** बलात्कारेण **ग्रहणं कुर्युः**, ततो **गोचरे**ऽपि तत्र गतानां **शङ्का भवति, किं पुनस्तैः प्रातिवेश्मिकैः?** तेषु प्रातिवेश्मिकेषु सुतरां शङ्का। एवं हस्तिशालादिष्वपि दोषविभाषा यथायोगं कर्त्तव्या॥ ३०५२॥

काथिकद्वारमेव सविस्तरं गृहिनिषद्याबाधनद्वारं चाह—

**सज्झायमुक्कजोगा, धम्मकहा विकह पेल्लणगिहीणं।**
**गिहिनिसिज्जं च, बाहंती संथवं वा करेंति उ॥ ३०५३॥**

स्वाध्यायेन मुक्तो योगो व्यापारो यासां ता **स्वाध्यायमुक्तयोगाः**, तथाभूताः सत्यो गृहिणां

**धर्मकथाना**माख्यायिकानाम् **विकथानां** च स्त्रीकथादीनां करणे **प्रेरणे** च नानारूपे **गृहिणा**मुद्युक्ताः१५। तथा **गृहिनिषद्यां बाधन्ते** गृहिनिषद्यासु उपविशन्तीत्यर्थः। **संस्तवं वा** परिचयं वा गृहस्थैः सह **कुर्वन्ति,** उपलक्षणमेतद् वस्त्राण्यन्नपानं वा गृहस्थानां ताः संयत्यो ददति, अविरतीश्च मण्डयन्ति, मण्डनोपदेशं वा तासां प्रयच्छन्ति, मण्डनकानि वा ददतीति १६॥ ३०५३॥

**एवं तु ताहिं सिट्ठे, निक्खिवियव्वा उ ता उ कहियं तु ।**
**दोसु वि संविग्गेसुं, निक्खिवियव्वा भवे तातो ॥ ३०५४॥**

**एवमुक्तेन** प्रकारेण **ताभिः** संयतीभिः **शिष्टे** कथिते ताः क्व **निक्षेप्तव्याः?** सूरिराह— **द्वयोरपि** संयत-संयतीवर्गयोः **संविग्नयोस्ता** भवन्ति **निक्षेप्तव्याः** । अत्र संयत-संयतीवर्गयोः संविग्नासंविग्नभेदतश्चत्वारो भङ्गाः। तद्यथा संयताः सीदन्ति संयत्योऽपि च सीदन्ति इति प्रथमो भङ्गः। संयताः सीदन्ति न संयत्य इति द्वितीयः । संयता न सीदन्ति किन्तु संयत्यः सीदन्तीति तृतीयः। न संयताः सीदन्ति नापि संयत्य इति चतुर्थः । तत्र 'दोसु वि संविग्गेसु' इति चतुर्थो भङ्गो गृहीतः, शेषेषु तु भङ्गेषु निक्षेपणं प्रतिषिद्धम्॥ ३०५४॥

तथा च तत्र प्रायश्चित्तमाह—

**संजय संजतिवग्गे, ऽसंविग्गेक्केक्के अहव दोहिं तु ।**
**निक्खेवणे होंति गुरुगा, अह पुण सुद्धेविमे दोसा ॥ ३०५५ ॥**

**संयतवर्गे संयतीवर्गे** वा **एकैकस्मिन्** असंविग्ने एतेन द्वितीयतृतीयभङ्गौ गृहीतौ, **अथवा द्वयोरपि** संयतसंयतीवर्गयोरसंविग्नयोरनेन प्रथमभङ्गो गृहीतः, **निक्षेपणे** प्रायश्चित्तं चत्वारो **गुरुका भवन्ति,** नवरं तपःकालविशेषिताः, प्रथमभङ्गे द्वाभ्यामपि विशेषिताः। **अथ पुनः शुद्धेऽपि** चतुर्थे भङ्गे **इमे** वक्ष्यमाणा **दोषास्**तर्हि तत्रापि निक्षेपणे चत्वारो गुरुकाः ॥ ३०५५ ॥

सम्प्रति तानेव दोषानाह—

**तरुणा सिद्धपुत्तादी, पविसंति नियल्लगाण निस्साए ।**
**मयहरिय निवारेंती, जे वि य पडिसेवे तहिं किंचि ॥ ३०५६ ॥**

**तरुणाः सिद्धपुत्रादयो निजकाना**मात्मीयानामार्यिकाणां **निश्रया** वन्दनव्याजेन **प्रविशन्ति**, प्रविश्य च तत्रैव चिरकालमवतिष्ठन्ते, त**न्महत्तरिका** यदि न निवारयति **येऽपि च तत्र** वसतौ काञ्चिदार्यिकामात्मीयां **प्रतिसेवन्ते** पर्युपासते, पर्युपासीनाश्च चिरकालं तिष्ठन्ति

तानपि न निवारयति यदि ॥ ३०५६॥

**निक्खिवणे तत्थ गुरुगा, अह पुण होज्जा उ सा समुज्जुत्ता ।**
**चरणगुणेसुं निययं, वियक्खणा सीलसंपन्ना ॥ ३०५७॥**

**तत्रापि निक्षेपणे** प्रायश्चित्तं चत्वारो **गुरुकाः। अथ पुनः सा** महत्तरिका **चरणगुणेषु नियतं विचक्षणा शीलसम्पन्ना** सती **समुद्युक्ता** अयुक्तं समस्तमपि वारयति॥ ३०५७॥ तथा

**समा सीस पडिच्छीणं, चोयणासु अणालसा ।**
**गणिणी गुणसंपन्ना, पसज्झपुरिसाणुगा॥ ३०५८॥**

शिष्याणां **प्रातीच्छिकानां** च **समा** तथा **चोदनासु** शिक्षणासु **अनलसा** कृतोद्यमा **गणिनी** महत्तरिका **गुणसम्पन्ना** तथा **अप्रसह्यः** अधृष्यो यः **पुरुषस्तदनुगा** तदनुसारिणी ॥ ३०५८॥

**संविग्गा भीयपरिसा, उग्गदंडा य कारणे ।**
**सज्झायझाणजुत्ता य, संगहे य विसारया ॥ ३०५९॥**

**संविग्ना** सामाचार्यां सम्यगुद्युक्ता, तथा भीता पर्षत् यस्याः सा **भीतपर्षत्** यतः कारणे उग्रदण्डा, तथा **स्वाध्यायध्याने युक्ता, सङ्ग्रहे च विशारदा** ॥ ३०५९ ॥

**विकहाविसोत्तियादीहि वज्जिया जा य निच्चसो ।**
**एयग्गुणोववेयाए, तीए पासम्मि निक्खिवे ॥ ३०६० ॥**

**या च नित्यशः** सर्वकालं **विकथा-विश्रोतसिकादिभिः**, आदिशब्दात् ऋद्धिगौरवादिपरिग्रहः, **वर्जिता। एतद्गुणोपेतायास्तस्याः पार्श्वे निक्षिपेत्**॥ ३०६० ॥

**एयारिसाए असती, वाएज्जाहि ततो सयं ।**
**वाएंते य इमा तत्थ, विही उ परिकित्तिया ॥ ३०६१ ॥**

**एतादृश्या** गणिन्या **अभावे** च **स्वयं वाचयेत्**, तस्मिंश्च **वाचयत्ययं** वक्ष्यमाणो **विधिः परिकीर्त्तितः**, स्त्रीत्वं गाथायां प्राकृतत्वात् ॥ ३०६१ ॥

**माया भगिणी धूया, मेहावी उज्जुया य आणत्ती ।**
**एयासिं असईए, सेसा वाएज्जिमा मोत्तुं ॥ ३०६२ ॥**

**मातरं भगिनीं दुहितरं** वा, कथम्भूताम् इत्याह–**मेधाविनीं** प्रज्ञावतीं **ऋजुकाम्** अकुटिलाम् **आज्ञप्तां** यदुपदिश्यते तस्य तथैव कारिकां वाचयेदिति योगः। **एतासामसती** अभावे **शेषा** अपि अस्वजना **वाचयेत्, इमां** वक्ष्यमाणां **मुक्त्वा** ॥ ३०६२॥

ता एवाह—

**तरुणिं पुराण भोइय, मेहुणियं पुव्वहसिय वभिचारिं ।**
**एतासु होंति दोसा, तम्हा उ न वायए ता ऊ ॥ ३०६३॥**

**तरुणीं पुराणां** पश्चात्कृतव्रतां पुनरभ्युपगतदीक्षां, **भोग्यां** वेश्यां, **मैथुनकीं** भार्यां, **पूर्वहसितं** यया सह पूर्वं हसितमासीत्, **व्यभिचारिणीं** पूर्वावस्थायां स्वैरिणीम्, **एतासु** यस्माद् वाच्यमानासु पूर्वाभ्यासेनाऽऽत्मपरसमुत्था **दोषा भवन्ति तस्मात् ता न वाचयेत्** ॥ ३०६३ ॥

अत्रैव विशेषमाह—

**वज्जकुड्डसमं चित्तं, जइ होज्जाहि दोण्ह वि ।**
**तहा वि संकितो होइ, एयातो वाययंत उ ॥ ३०६४॥**

यद्यपि **द्वयोरपि** वाच्यवाचकयोश्चित्तम् **वज्रकुड्यसमं तथाऽप्येता वाचयन् शङ्कितः** शङ्कागोचरो **भवति** तत **एतासां** वर्जनम् ॥ ३०६४॥

**पुव्वं तु किढीं असतीए मज्झिमा दोसरहितो वाएती ।**
**गणहर-अण्णयरो वावि परिणतो तस्स असतीए ॥ ३०६५॥**

**पूर्वं तावत्** [१]**किढीं** वृद्धां वाचयेत्, तस्या**मसत्यां दोष**रहितो गणधरो **मध्यमां वाचयेत्**। अथ **गणधरः** प्रयोजनान्तरेण व्याकुलस्तत**स्तस्य** गणधरस्याऽ**सति** अभावे **परिणतोऽन्यतरो वाऽपि** वाचयेत्॥ ३०६५॥

**तरुणेसु सयं वाए, दोसन्नयरेण वावि जुत्तेसु ।**
**विहिणा उ इमेणं तू, दव्वादीएण उ जयंतो ॥ ३०६६॥**

अथाऽन्यतरः परिणतो न विद्यते किन्तु सर्वेऽपि तरुणा वृद्धा अन्यतरेण दोषेण सविकारत्वादिना युक्ताः, तत**स्तरुणेषु** शेषेषु वृद्धेषु वाऽ**न्यतरेण दोषेण युक्तेषु** सत्सु **अनेन**

१. किण्टी-मु.। कटीं-पु प्रे.॥

वक्ष्यमाणेन **विधिना** गणधरः **स्वयं वाचयेत्** किंविशिष्ट इत्याह-**द्रव्यादिना यतमानः** ॥३०६६॥

तामेव द्रव्यादियतनादिमभिधित्सुरिदमाह—

**दव्वे खेत्ते काले, मंडलि दिट्ठी तहा पसंगे य ।**
**[१]एएसिं जयणं वोच्छं, आणुपुव्विं समासतो ॥ ३०६७॥**

**द्रव्ये क्षेत्रे काले मण्डल्यां तथा दृष्टिप्रसङ्गे च एतेषु** स्थानेषु **यतनाम् आनुपूर्व्या समासतो वक्ष्ये** ॥ ३०६७॥

तत्र प्रथमतो द्रव्ययतनामाह-

**जं खलु पुलागदव्वं, तव्विवरीयं दुवे वि भुंजंति ।**
**पुव्वुत्ता खलु दोसा, तत्थ निरोधे निसग्गे य ॥ ३०६८॥**

**यत् खलु पुलाक**मसारं **द्रव्यं तद्विपरीतं द्वावपि,** वाच्या वाचयिता चेत्यर्थः, **भुञ्जाते,** अन्यथा **तत्र** व्याख्यानमण्डल्यां मूत्रादि**निरोधे निसर्गे वा पूर्वोक्ताः खलु दोषाः** ॥ ३०६८॥

१. अत्र ३०६७ गाथोत्तरार्धे अनुष्टुप्छन्दः-इति ला. टिप्पणे॥

उक्ता द्रव्ययतना, क्षेत्रयतनामाह—

**सुन्नघरे पच्छन्ने, उज्जाणे देउले सभारामे ।**
**उभयवसहिं च मोत्तुं, वाएज्ज असंकणेज्जेसु ॥ ३०६९॥**

**शून्यगृहाणि प्रच्छन्नानि** विविक्तान् प्रदेशान् तथा उद्यानानि **देवकुलानि सभा आरामांश्च** तथा **उभयवसतिं** संयतीवसतिं संयतवसतिं **च मुक्त्वा** शेषेषु **अशङ्कनीयेषु** स्थानेषु **वाचयेत्** ॥३०६९॥

**उभयनिजे वइणीए, व सन्नि अहाभद्द तह य धुवकम्मी ।**
**आइण्णेऽसति अज्जाणुवस्सए अप्पणो वावि ॥ ३०७०॥**

**उभयस्य** संयत्याः संयतस्य च **निजे** स्वजने आसन्ने सति, यदि वा व्रतिन्या निजे, अथवा **संज्ञिनि** श्रावके, यदि वा **यथाभद्रके,** अथवा **ध्रुवकर्मणि** लोहकारादौ प्रत्यासन्ने सति वाचयेत्। अथान्यदशङ्कनीयं स्थानं न विद्यते, तत अन्यस्य स्थानस्या**ऽसति आर्याणामुपाश्रये** अथवा**ऽऽत्मन** उपाश्रये यत्र शय्यातरस्य संलोको भवति तत्र स्थितो वाचयति ॥ ३०७०॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतं क्षेत्रद्वारम् । अधुना कालयतनाद्वारमाह—

**जइ अत्थि वायणं देंतो, अदाउं ताहे गच्छति ।**
**अह नत्थि ताहे दाऊण, सुत्तइत्ताण पोरिसिं ॥ ३०७१ ॥**

**यदि** साधूनां सूत्रस्यार्थस्य च **वाचनां दाता** समस्ति **तत** आचार्यो वाचनां साधूना**मदत्त्वा गच्छति** प्रातरेव साध्वीनामशङ्कनीये स्थाने वाचनां दातुं गच्छतीति भावः। **अथा**ऽर्थपौरुषीदाता समस्ति **न** सूत्रपौरुषीदाता **तदा सूत्रवतां** संयतानां सूत्र**पौरुषीं दत्त्वा** गच्छति ॥ ३०७१ ॥

**अह अत्थइत्ता होज्जाहि, ता जाइ पढमाए ऊ ।**
**असतीए दोण्ह वी दाणे, इमा उ जयणा तहिं ॥ ३०७२ ॥**



अथ सूत्रस्य दाता विद्यते नार्थस्य, साधवश्चा**ऽर्थवन्तो**ऽपि अर्थार्थिनोऽपि **सन्ति, ततः प्रथम**पौरुष्यां संयतीनां वाचनाप्रदानाय **गच्छति**, द्वितीयस्यां तु पौरुष्यामागत्य संयतानामर्थं ददाति। अथ संयतानां सूत्रस्यार्थस्य वा प्रदाताऽन्यो न विद्यते तदाऽन्यस्या**ऽसति** अभावे

द्वयानामपि संयतानां संयतीनां चाऽऽत्मन उपाश्रये एकस्मिन् तेन वाचना देया। तत्र **द्वयानां** वाचना**दाने इयं** वक्ष्यमाणा **यतना**॥ ३०७२॥

अत्र मण्डलीयतनाद्वारमापतितं, तदेवाह—

**कडणतरितो वाए, दीसंति जणेण दो वि जह वग्गा ।**
**बंधंति मंडलिं ते, उ एक्कतो यावि एक्कतो ॥ ३०७३॥**

**ते** संयताः संयत्यश्च **मण्डलीं बध्नन्ति** तद्यथा-**एकतः** संयतमण्डली **एकतः** संयतीमण्डली, अपान्तराले च संयतीनां व्यवधानाय कटो दीयते। तत्रापि प्रच्छन्ने प्रदेशे स्थिताः संयतीर्न वाचयति। अन्यथा ये शून्यगृहादिषु वाचयतः शङ्कादयो दोषा उक्तास्ते अत्रापि स्युः, अत आह— **यत्र द्वावपि वर्गौ** संयतसंयतीसमुदायरूपावुपविष्टौ **जनेन दृश्येते** तत्र स्थितः **कटेनान्तरितो वाचयति** ॥ ३०७३॥

एवं सति यो गुणस्तमाह—

**लोगे वि पच्चतो खलु, वंदणमादीसु होंति वीसत्था ।**
**दुग्गूढादी दोसा, विगारदोसा य नो एवं ॥ ३०७४॥**

एवं क्रियमाणे सति **लोकेऽपि** शुद्धशीलसमाचारविषयः **प्रत्यय** उपजायते। येऽपि च **वन्दनादिषु** कार्येषु समागच्छन्ति तेऽपि तौ द्वावपि वर्गौ तथोपविष्टौ दृष्ट्वा **विश्वस्ता भवन्ति** एवं च सति ये **दुर्गूढादयः** प्रच्छन्नप्रदेशादिभाविता **दोषाः** ये च परस्परं संयतसयतीनां **विकारदोषास्ते न** भवन्ति। अथ कटो न विद्यते तदा वस्त्रेण चिलिमिली क्रियते॥ ३०७४॥ तथा चाह—

**चिलिमिलि छेदे ठायइ, जह पासति दोण्ह वी पवाएंतो ।**
**दिट्ठीसंबंधादी, इमे उ तहियं न वाएज्जा ॥ ३०७५॥**

**प्रवाचयन्** गणधरश्चिलिमिल्या उपलक्षणमेतत् कटस्य च **छेदे** पर्यन्ते **तिष्ठति यथा द्वावपि** संयतसंयतीवर्गौ पश्यति। तत्र ये संयताः संयतीनां दृष्टीर्दृष्ट्याऽऽत्मीयया सम्बघ्नन्ति ते **दृष्टिसम्बन्धा** उच्यन्ते, **आदिशब्दात्** मैथुनिकादिपरिग्रहः,ता**निमान्** वक्ष्यमाणान्न **वाचयेत्** ॥ ३०७५॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तानेवाह—

**सविगारा[१] मेहुणादी य, जे यावि धिइदुब्बला ।**
**अण्णेण वायए ते उ, निसिं वा पडिपुच्छणं ॥ ३०७६ ॥**

ये दृष्ट्या **सविकारा** ये च **मैथुनिकादयः**, मैथुनिको भर्त्ता, आदिशब्दात् पुराणादिपरिग्रहः। **ये चापि धृत्या दुर्बला**स्तान् **अन्येन** उपाध्यायादिना **वाचयेत्, निशि** रात्रौ **वा** तेषां सन्दिग्धस्थान**प्रतिप्रच्छनम्** ॥ ३०७६ ॥

**असतण्णे पवायंते, पढंति सव्वे तहिं अदोसिल्ला ।**
**अणिसण्णथेरिसहिया, थेरसहाओ पवाएंतो ॥ ३०७७ ॥**

अथान्य उपाध्यायादिः प्रवाचयन् न विद्यते तदाऽ**न्यस्मिन् असति वाचयति सर्वे तत्र पठन्ति** ततः **अदोषवन्तः**। तत्रापि संयत्यः पठन्ति **अनिषन्ना** अनुपविष्टा उर्द्धस्थिता इत्यर्थः, येन परस्परं दृष्टिसम्बन्धो न भवति। तथा स्थविरसहितः, प्रवाचयन्नपि स्थविरसहायः प्रवाचयति। येन तत्सहायः सर्वानपि निभालयति ॥ ३०७७ ॥

---

१. संगार मे० ला. ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संयत्योऽनिषन्नाः पठन्तीत्युक्तं तत्रापवादमाह—

**जा दुब्बला होज्ज चिरं च[1] झाओ, ताहे निसण्णा न य उच्चसद्दा ।**
**पलंब संघाडि न उज्जला य, अणुण्णया वास तिरंजली या ॥ ३०७८ ॥**

**या** शरीरेण **दुर्बला भवति** वर्त्तते **चिरं च स्वाध्यायः** कर्त्तव्यः। **तदा निषण्णा** उपविष्टा सती पठति, **न च उच्चशब्देन** बृहता शब्देनाऽऽलापकमुद्घोषयति इत्यर्थः। तथा **सङ्घाटिः प्रलम्बा** पादगुम्फपर्यन्ता क्रियते **नोज्वला** । तथा **अनुन्नता** पठति । किमुक्तं भवति? नोर्ध्वमुखा सती अन्यस्याऽन्यस्य मुखं विप्रेक्षमाणा पठति। तथा **वासो** वस्त्रं तेन **तिरोहिताञ्जलिः** आलापकं गुरोः समीपे याचते ॥ ३०७८ ॥

**एयविहिविप्पमुक्को, संजतिवग्गं तु जो पवाएज्जा।**
**मज्जायातिक्कंतं, तमणायारं वियाणाहि ॥ ३०७९ ॥**

**एतेन** अनन्तरोदितेन **विधिना विप्रमुक्तो यः संयतीवर्गं प्रवाचयेत् तं मर्यादातिक्रान्तम् अनाचारम्** आचाररहितं **विजानीयात्**॥ ३०७९ ॥



१. च सज्झातो - पु. प्रे.॥

For Private And Personal Use Only

**सूत्रम्— नो कप्पइ निग्गंथाण वा निग्गंथीण वा असज्झाइए सज्झायं करेत्तए॥ १५॥**

**कप्पइ निग्गंथाण वा निग्गंथीण वा सज्झाइए सज्झायं करित्तए ॥ १६ ॥**

अस्य सूत्रस्य सम्बन्धमाह—

**सज्झातो खलु पगतो, वितिगिट्ठे नो य कप्पइ जहा उ ।**
**एमेव असज्झाए, तप्पडिवक्खे य सज्झातो ॥ ३०८०॥**

**स्वाध्यायः खलु प्रकृतः** पूर्वसूत्रे वर्त्तते, स **यथा व्यतिकृष्टे** काले **न कल्पते एवमेवा-ऽस्वाध्यायिके**ऽपि, **तत्प्रतिपक्षे** पुन स्वाध्यायिके **स्वाध्यायः** कल्पते इत्येतदर्थख्यापनार्थमिदं सूत्रमिति सम्बन्धः॥ ३०८०॥

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**न कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा अस्वाध्यायिके स्वाध्यायं कर्तुम्। कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा स्वाध्यायिके स्वाध्यायं कर्तु**मिति सूत्राक्षरसंस्कारः॥ अधुना भाष्यप्रपञ्चः—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**असज्झाइयं च दुविहं, आयसमुत्थं च परसमुत्थं च ।**
**जं तं तु परसमुत्थं, तं पंचविहं तु णायव्वं ॥ ३०८१ ॥** [तुला आव.नि.१३२३]

**द्विविधं** खलु **अस्वाध्यायिकं**, तद्यथा— **आत्मसमुत्थं परसमुत्थं च** । आत्मनः स्वाध्यायं चिकीर्षोः समुत्थम् आत्मसमुत्थं, परस्मात् स्वाध्यायं कर्तुरन्यस्मात् समुत्थं परसमुत्थम्, चशब्दाव-स्वाध्यायिकतया तुल्यकक्षतासंसूचकौ, तत्र **यत् परसमुत्थं तत् पञ्चविधं ज्ञातव्यम्** ॥ ३०८१ ॥

तानेव पञ्चप्रकारानाह—

**संजमघाउप्पाए, सादिव्वे वुग्गहे व सारीरे ।**
**एएसु करेमाणे, आणाइ इमो उ दिट्ठंतो ॥ ३०८२ ॥**

**संयमघाति** संयमोपघातिकम्, **औत्पातिकम्** उत्पातनिमित्तं, **सदेवं** देवताप्रयुक्तं, **व्युद्ग्रहं शारीरं** च, **एतेषु** पञ्चस्वप्यस्वाध्यायिकेषु स्वाध्यायं **कुर्वति आज्ञादय** आज्ञाभङ्गादयो दोषाः। तथाऽऽज्ञां तीर्थकराणां भञ्जति प्रायश्चित्तं चतुर्गुरु, अनवस्थयाऽन्येऽपि तथा करिष्यतीति,



For Private And Personal Use Only

तत्रापि प्रायश्चित्तं चतुर्गुरु। यथावादी तथा कारी न भवतीति मिथ्यात्वं, तन्निष्पन्नमपि प्रायश्चित्तं चतुर्गुरु । विराधना द्विविधा-संयमविराधना आत्मविराधना च । तत्र संयमविराधना ज्ञानाचारविराधना, आत्मविराधनायाम**िदमुदाहरणम्** ॥ ३०८२॥

तदेवाह—

**मेच्छभयघोसण[१] निवे दुग्गाणि अतीह मा विणिस्सिहिह ।**
**फिडिया जे उ अतिगया इयरेहि य सेसनिवदंडो ॥ ३०८३॥**

कस्सति रण्णो मेच्छखंधावारो विसयं आगंतुं हणिउकामो, तं भयं जाणित्ता रण्णा सविसए सयलेवि घोसावियं-मिच्छखंधावारो आगंतुं विसयं हणिउकामो वट्टइ, ता तुब्भे दुग्गाणि अतीह, तत्थ जेहि रण्णो आणा कया ते मिच्छभयातो फिडिया, जेहिं न कया आणा ते मेच्छेहि लूसिया मारिया य । जे वि तत्थ केइ परिमुक्का ते वि रण्णा दंडिया ।

१. निशीथभाष्ये गा. ६०७६ आव. निर्युक्तौ गा.१३२४ मध्ये इत्थं पाठः- ''म्लेच्छभयघोसणनिवे-हियसेसा ते उ डंडिया रण्णा एवं दुहओ दंडे। सुरपच्छित्ते इह परे य॥''

अक्षरयोजना त्वेवं-**म्लेच्छभय**माकर्ण्य **नृपेन,** गाथायां सप्तमी तृतीयार्थे, **घोषणा** कारिता। यथा-**दुर्गाण्यतिगच्छथ** आश्रयथ **मा विनंक्ष्यथ** तत्र **ये अतिगतास्ते** म्लेच्छभयात् **स्फिटिता इतरे हताः** कृतसर्वस्वापहाराश्च कृताः, येऽपि **शेषाः** कथमपि म्लेच्छभयविमुक्तास्तेषामाज्ञा-भङ्गकरणतो **नृपेण दण्डः** कृतः॥ ३०८३॥

एष दृष्टान्तोऽयमर्थोपनयः—

**राया इव तित्थगरो, जाणवया साहु घोसणा सुत्तं ।**
**मेच्छा य असज्झातो, रयणधणाइं च नाणादी ॥ ३०८४॥**

[आव.नि.१३२५]

अत्र **राजा इव तीर्थकरः, जानपदा इव साधवः, घोषण**मिव **सूत्रं, म्लेच्छा** इव **अस्वाध्यायाः रत्नधनानीव ज्ञानादीनि** । तत्र ये साधवो जानपदस्थानीया राजस्थानीयस्य तीर्थकरस्याज्ञां नानुपालयन्ति ते प्रान्तदेवतया छल्यन्ते प्रायश्चित्तदण्डेन च दण्ड्यन्ते॥ ३०८४॥

केन पुनः कारणेनास्वाध्यायिके स्वाध्यायं करोति? तत आह-

**थोवावसेसपोरिसि, अज्झयणं वा वि जो कुणति सोउं ।**
**णाणादिसारहीणस्स तस्स छलणा उ संसारे ॥ ३०८५॥**

[तुला-नि.भा.६०७८]

**स्तोकावशेषायामपि पौरुष्यामध्ययनं** पाठ उद्देशो वा अद्यापि नान्तं नीत इति कृत्वा उद्घाटायामपि पौरुष्यामस्तमिते वा सूर्येऽथवा अस्वाध्यायमिति **श्रुत्वा**ऽपि योऽध्ययनं पाठम् अपि शब्दादुद्देशनं च **करोति**। तस्य ज्ञानादित्रिकं तत्त्वतोऽपगतं तीर्थकराज्ञाभङ्गकरणादिति, **ज्ञानादित्रिकसारहीनस्य संसारे** नरकादिभवभ्रमणलक्षणे **छलना** भवति। अपारघोरसंसारे निपतनं भवतीति भावः॥ ३०८५॥

अत्रैव दृष्टान्तान्तरमभिधित्सुराह—

**अहवा[१] दिट्ठंतऽवरो, जह रन्नो केइ पंच पुरिसा उ ।**
**दुग्गादि परितोसिओ, तेहि य राया अह कयाई ॥ ३०८६॥**



१. गाथा ३०८६-७ स्थाने निशीथ भा. गा. ६०८०, आव. निर्युक्तौ गा. १३२८ एषा गाथोपलभ्यते- दुगादि तोसिय निवो, पंचण्हं देइ इच्छियपयारं। गहिए य देति मुल्लं, जणस्स आहारवत्थादि॥

**तो देति तस्स राया, नगरम्मी इच्छियं पयारं तू ।**
**गहिए य देइ मोल्लं, जणस्स आहारवत्थादी ।। ३०८७।।**

**एगेण तोसियतरो, गिहमगिहे तस्स सव्वहिं वियरे ।**
**रच्छाईसु चउण्हं, एविहऽसज्झाइए उवमा ।। ३०८८।।**

**अथवे**ति दृष्टान्तस्य प्रकारान्तरतासूचने, **अपरो दृष्टान्तः** । **यथा-राज्ञः केचित् पञ्च पुरुषाः** सेवकाः। तैरथ कदाचित् राजा दुर्गादिषु पतितो निस्तारितः। तत्रापि तेषां पञ्चानां मध्ये एकेन केनचित् परमं साध्वसमवलम्ब्य भूयस्तरं साहायिकमकारि, **ततस्तेषां** तेनैकेन वर्जितानां चतुर्णां पुरुषाणां **राजा** परितुष्टः सन् **नगरे** रथ्यादिषु गृहवर्जेषु **प्रचारमीप्सितं ददाति**। यथा-यत् किमपि रथ्यायामापणेषु त्रिक-चतुष्क-चत्वरादिषु वा यूयं वस्त्राहारादिकं प्राप्नुयात तत् युष्माकमेव। एवं प्रसादे कृते **वस्त्राहारादौ** नगरे तैः स्वेच्छया **गृहीते** राजा यस्य सत्कं तैर्गृहीतं तस्य **मूल्यं ददाति**। येन **चैकेन** पुरुषेण भूयस्तरं साहायिकं कुर्वता

राजा **तोषिततरः,तस्य** राजा **गृहे अगृहे** वा **सर्वत्र** नगरमध्ये प्रचारमीप्सितं **वितरति** अनुजानाति, तत्रापि यस्य सत्कं तेन गृह्यते वस्त्राऽऽहारादि तस्य राज्ञा मूल्यं दीयते। इतरेषां च **चतुर्णां रथ्यादिष्वेव** प्रचारमनुज्ञातवान् न गृहेषु। **एव**मुक्तेन प्रकारेण **इह** प्रस्तुते **अस्वाध्यायिके उपमा** दृष्टान्तः॥ ३०८६॥ ३०८७॥ ३०८८॥

तदेवमुक्तो दृष्टान्तः। सम्प्रति दार्ष्टान्तिकयोजनामाह—

**पढमम्मि सव्वचेट्ठा, सज्झाओ वा निवारितो नियमा ।**
**सेसेसु असज्झातो, चेट्ठा न निवारिया अण्णा ॥ ३०८९॥**

**प्रथमे** अस्वाध्यायिके संयमोपघातिलक्षणे **सर्वा** कायिकी वाचिकी वा **चेष्टा स्वाध्यायश्च नियमाद्वारितस्तोष**क(षित)तरपुरुषस्थानीयतया तस्य सर्वत्र साधुव्यापारेषु प्रवृत्तेः। **शेषेषु** पुनश्चतुर्षु अस्वाध्यायिकेषु **अस्वाध्यायः** स्वाध्याय एव केवलो निवारितो नान्या कायिकी वाचिकी वा प्रतिलेखनादिका **चेष्टा वारिता** । तेषां शेषपुरुषचतुष्टयस्थानीयानां बहीरथ्यादाविव स्वाध्यायमात्रे एव व्यापारभावात् ॥ ३०८९॥

तदेवं पंचस्वप्यस्वाध्यायिकेषु सामान्यतो विशेषतश्चोदाहरणमुक्तम्। इदानीं

प्रथममस्वाध्यायिकं संयमोपघाति प्ररूपयति—

**महिया य भिन्नवासे, सच्चित्तरयए य संयमे तिविहे ।**
**दव्वे खेत्ते काले, जहियं वा जच्चिरं सव्वं ॥ ३०९० ॥**

**महिका** गर्भमासे पतन्ती प्रसिद्धा तस्यां तथा भिन्ने गृहादौ यत् पतति वर्षं तत् **भिन्नवर्षं**, तस्मिन् तथा **सच्चित्तरजसि च** एवं **त्रिविधे** त्रिप्रकारे **संयमे** पदैकदेशे पदसमुदायोपचारात् संयमोपघातिनि अस्वाध्यायिके निपतति **द्रव्यतः क्षेत्रतः कालतो** भावतश्च वर्जनं भवति । तत्र द्रव्यत एतदेव त्रिविधमस्वाध्यायिकं द्रव्यं, क्षेत्रतो **जहियं** ति यावति क्षेत्रे तत् पतति तावत्क्षेत्रं, कालतो **जच्चिरं** यावन्तं कालं पतति तावन्तं कालं, भावतः **सर्वं** कायिक्यादि चेष्टादिकं वर्ज्यते ॥ ३०९० ॥

एनामेव गाथां व्याख्यानयति—

**महिया उ गब्भमासे, वासे पुण होंति तिन्नि उ पगारा ।**
**बुब्बुय तव्वज्ज फुसी, सच्चित्तरजो य आयंबो ॥ ३०९१ ॥**

[तुला–आव. नि. १३२७]

**महिका गर्भमासे** प्रतीता, गर्भमासो नाम कार्त्तिकादिर्यावत् माघमासः। **वर्षे पुनस्त्रयः प्रकारा** भवन्ति। तानेवाह—**बुब्बुय** त्ति, यत्र वर्षे निपतति पानीयमध्ये **बुद्बुदा**स्तोयशलाका-रूपा उत्तिष्ठन्ति तत् वर्षमप्युपचारात् बुद्बुदमित्युच्यते, **तद्वर्ज** बुद्बुदवर्जम् द्वितीयं वर्षं, तृतीयं **फुसी** इति जलस्पर्शिका निपतन्त्यः। तत्र बुद्बुदे वर्षे निपतति यामाष्टकादूर्ध्वम्, अन्ये तु व्याचक्षते-त्रयाणां दिनानां परतस्तद्वर्जे पञ्चानां दिनानां [परतो] जलस्पर्शिकारूपे सप्तानां परतः सर्वमप्कायस्पृष्टं भवति। ततस्तत्र द्रव्यतः क्षेत्रतः कालतो भावतश्च वर्जनं प्राग्वत् भावनीयम्। यावच्चाप्कायमयं न भवति तावत् यद्युपाश्रयो निर्गलस्तत्र सर्वं स्वाध्यायप्रतिलेखनादि क्रियते, बहिस्तु न निर्गम्यते इति। **सच्चित्तरजो** नाम व्यवहारसचित्ता वातोद्धता श्लक्ष्णा धूलिः, तच्च **सचित्तरजो** वर्णनाऽऽ**ताम्रम्** गाथायां पुंस्त्वं प्राकृतत्वात्। तच्च दिगन्तरेषु दृश्यते, तदपि निरन्तरपातेन त्रयाणां दिनानां परतः सर्वं पृथिवीकायभावितं करोति । तत्रापि निपतति द्रव्यादितो वर्जनं प्राग्वत्॥ ३०९१॥

तदेव व्याख्यातुमाह—

**दव्वे तं चिय दव्वं, खेत्ते [१] जहियं तु जच्चिरं काले ।**
**ठाणादिभास भावे, मोत्तुं उस्सास उम्मेसं ॥ ३०९२॥**

**द्रव्ये** द्रव्यत**स्तदेवा**स्वाध्यायिकं[**द्रव्यम्**] महिकं भिन्नवर्षं सचित्तरजो वा वर्ज्यते। **क्षेत्रतो यत्र** क्षेत्रे निपतति। **कालतो यच्चिरं** कालं पतति। **भावतो मुक्त्वा उच्छ्वासमुन्मेषं**, तद्वर्जने जीवितव्याघातसम्भवात्। शेषां **स्थानादिकाम्** आदिशब्दाद् गमनागमनप्रतिलेखनादिपरिग्रहः कायिकीं चेष्टा **भाषां** च वर्जयति ॥ ३०९२॥

**वासत्ताणावरिया, निक्कारणे ठंति कज्जे जयणाए ।**
**हत्थऽच्छंऽगुलिसन्ना, पोत्ताऽऽवरिया व भासंति ॥ ३०९३॥**

**निष्कारणे** कारणाऽभावे **वर्षत्राणं** कम्बलमयः कल्पः,तेन सौत्रिककल्पान्तरितेन सर्वात्मना **आवृतास्तिष्ठन्ति** न **कामपि** लेशतोऽपि चेष्टां कुर्वन्ति, **कार्ये** तु समापतिते **यतनया हस्त**संज्ञया **अक्षि**संज्ञया **अङ्गुलिसंज्ञया** वा व्यवहरन्ति, **पोतावरिता वा भाषन्ते**, ग्लानादिप्रयोजने वर्षाकल्पावृता गच्छन्ति ॥ ३०९३॥

१. जह पडति-नि.भा ६०८३॥

गतं संयमोपघाति अस्वाध्यायिकम्, इदानीमौत्पातिकमाह—

**पंसू य मंसरुहिरे, केससिला वुट्ठितह रउग्घाए ।**
**मंसरुहिरेऽहोरत्तं, अवसेसे जच्चिरं सुत्तं ॥ ३०९४॥** [आव.नि.१३३१]

अत्र वृष्टिशब्दः प्रत्येकमभिसम्बध्यते, **पांशु**वृष्टौ **मांस**वृष्टौ **रुधिर**वृष्टौ **केश**वृष्टौ **शिला**वृष्टौ च। तत्र पांशुवृष्टिर्नाम यदचित्तं रजो निपतति, मांसवृष्टिर्मांसखण्डानि पतन्ति, रुधिरवृष्टिः रुधिरबिन्दवः पतन्ति, केशवृष्टिर्यद्वराः केशाः पतन्ति, शिलावृष्टिः पाषाणनिपतनं करकादिशिलावर्षमित्यर्थः। **तथा रजउद्घाते** रजस्वलासु दिक्षु सूत्रं न पठ्यते, शेषाः सर्वा अपि चेष्टाः क्रियन्ते। तत्र **मांसे रुधिरे** च पतति **अहोरात्रं** वर्ज्यते, **अवशेषे** पांशुवृष्ट्यादौ **यावच्चिरं** पांश्वादिपतनं तावन्तं कालं **सूत्रं नन्द्या**दि न पठ्यते, शेषकालं तु पठ्यते ॥ ३०९४॥

सम्प्रति पांशुरजउद्घाते व्याख्यानयन्नाह—

**पंसू अच्चित्तरजो, रयस्सलातो दिसा रउग्घातो ।**
**तत्थ सवाते निव्वाए य सुत्तं परिहरंति ॥ ३०९५॥** [आव.नि.१३३२]

**पांशवो** नाम धूमाकारम् आपाण्डुर**मचित्तं रजः, रजउद्घातो रजस्वला दिशो** यासु सत्सु समन्ततोऽन्धकार इव दृश्यते। **तत्र** पांशुवृष्टौ रजउद्घाते वा **सवाते निर्वाते च** पतति यावत्पतनं तावत्**सूत्रं परिहरन्ति** ॥ ३०९५॥

अत्रैवापवादमाह—

**साभाविए तिण्णि दिणा, सुगिम्हए निक्खिवंति जइ जोगं ।**
**तो तम्मि पडंतम्मी[1], कुणंति संवच्छरज्झायं ॥ ३०९६॥** [आव.नि.१३३३]

**यदि सुग्रीष्मे** ग्रीष्मकालप्रारम्भे, उष्णकालप्रारम्भे चैत्रशुक्लपक्षे इत्यर्थः । दशम्याः परतो यावत् पौर्णमासी, अत्रान्तरे निरन्तरं **त्रीणि दिनानि** यावद्यदि **योगं निक्षिपन्ति**। एकादश्यादिषु त्रयोदशीपर्यन्तेषु, द्वादश्यादिषु चतुर्दशीपर्यन्तेषु, यदि वा त्रयोदश्यादिषु पौर्णमासीपर्यन्तेषु अचित्तरजोऽवहेठनार्थं कायोत्सर्गं कुर्वन्ति **तदा तस्मिन्** पांशुवर्षे रजउद्घाते वा **स्वाभाविके पतति संवत्सरं** यावत् **स्वाध्यायं कुर्वन्ति** इतरथा नेति ॥ ३०९६॥

---

**१. पडंतेवी-इति नि. भा. ६०८७॥**

गतमौत्पातिकम्। इदानीं सदेवमाह—

**गंधव्वदिसा विज्जुक्कगज्जिते जूवए जक्खलित्ते य ।**
**एक्केक्कपोरिसिं गज्जियं तु दो पोरिसी हणति ॥ ३०९७॥**

[तुला.आव.नि.१३३४]

**गन्धर्व**नगरं नाम यच्चक्रवर्त्यादिनगरस्योत्पातसूचनाय सन्ध्यासमये तस्य नगरस्योपरि द्वितीयं नगरं प्राकाराट्टालकादिसंस्थितं दृश्यते। **दिस** त्ति दिग्दाहः, **विद्युत्** प्रतीता, **उल्का** सरेखा प्रकाशयुक्ता वा, **गर्जितं** प्रतीतं, **यूपको** वक्ष्यमाणलक्षणः, **यक्षलिप्तं** नाम एकस्यां दिशि अन्तरान्तरा यद् दृश्यते विद्युत्सदृशः प्रकाशः। एतेषु मध्ये गन्धर्वनगरादिकमेकैक**मेकैकां पौरुषीं** हन्ति। गर्जितं पुन**र्द्वे पौरुष्यौ हन्ति** ॥ ३०९७॥

**गंधव्वनगरनियमा, सादिव्वं सेसगाणि भजिताणि ।**
**जेण न नज्जंति फुडं, तेण उ तेसिं तु परिहारो ॥ ३०९८॥**

अत्र गन्धर्वनगरादिषु मध्ये **गन्धर्वनगरं नियमात् सदेवम्,**अन्यथा तस्याऽसम्भवात्।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**शेषकाणि** दिग्दाहादीनि **भक्तानि** विकल्पितानि, कदाचित् स्वाभाविकानि भवन्ति, कदाचित् देवकृतानि, तत्र स्वाभाविकेषु स्वाध्यायो न परिह्रियते किन्तु देवकृतेषु, परं येन कारणेन **स्फुटं** वैविक्त्येन तानि **न ज्ञायन्ते तेन तेषाम**विशेषेण **परिहारः**॥ ३०९८॥

सम्प्रति दिग्दाहादिव्याख्यानमाह—

**दिसिदाह छिन्नमूलो, उक्क सरेहा पगासजुत्ता वा ।**
**संझाछेयावरणा, उ जूवतो सुक्क दिण तिन्नि ॥ ३०९९॥**

**दिशि** पूर्वादिकायां **छिन्नमूलो दाहः** प्रज्वलनं दिग्दाहः। किमुक्तं भवति? अन्यतमस्यां दिशि महानगरप्रदीप्तमिवोपरि प्रकाशोऽधस्तादन्धकार इति दिग्दाहः। **उल्का** पृष्ठतः **सरेखा प्रकाशयुक्ता वा**। **यूपको** नाम **शुक्ले** शुक्लपक्षे **त्रीणि दिनानि** यावत् द्वितीयस्यां तृतीयस्यां चतुर्थ्यां चेत्यर्थः। सन्ध्याछेदः सन्ध्याविभागः स आव्रियते येन स **सन्ध्याछेदावरण**श्चन्द्रः। इयमत्र भावना-शुक्लपक्षे द्वितीया-तृतीया-चतुर्थीरूपेषु त्रिषु दिनेषु सन्ध्यागतश्चन्द्र इति कृत्वा सन्ध्या न विभाव्यते, ततस्तानि शुक्लपक्षे त्रीणि दिनानि यावत् चन्द्रः सन्ध्याछेदावरणः स यूपक इति एतेषु दिवसेषु प्रादोषिकी पौरुषी नास्ति सन्ध्याछेदाऽविभावनादिति॥ ३०९९॥



For Private And Personal Use Only

अत्रैव मतान्तरमाह—

**केसिं चि होंतऽमोहा, जूवतो ते उ होंति आइण्णा ।**
**जेसिं तु अणाइन्ना, तेसिं खलु पोरिसी दोन्नि ॥ ३१०० ॥**

**केषाञ्चिदा**चार्याणां मतेन च **भवन्ति** शुक्लपक्षे प्रतिपदादिषु त्रिषु दिवसेष्व**मोघा** शुभाशुभसूचननिमित्ताऽवितथोत्पादा आदित्यकिरणविकारजनिता आदित्यस्योदयसमये अस्तमयसमये वा आताम्राः कृष्णश्यामा वा **यूपक** इति **ते च भवन्ति** वर्त्तन्ते **आचीर्णा** नैतेषु स्वाध्यायः परिह्रियते इत्यर्थः। **येषां** तु आचार्याणा**मनाचीर्णास्तेषां** मतेन यूपको **द्वे पौरुष्यौ हन्ति** ॥ ३१०० ॥

न केवलममूनि सदेवानि किन्त्वमून्यपि, तान्येवाह—

**चंदिमसूरुवरागा[1], निग्घाए गुंजिते अहोरत्तं ।**
**चंदो जहण्णेणऽट्ठ उ, उक्कोसं पोरिसि बिछक्कं ॥ ३१०१ ॥**

१. सूरवरागे-इति आव. नि. १३३७॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सूरो[१] जहण्ण बारस, उक्कोसं पोरिसी उ सोलस उ ।**
**सग्गह निब्बुड्ड एवं, सूरादी जेणऽहोरत्ता ॥ ३१०२॥**

**चन्द्रोपरागे सूर्योपरागे** च तद्दिनापगमे इति वाक्यशेषः। तथा साभ्रे निरभ्रे वा नभसि व्यन्तरकृतो महागर्जितसमो ध्वनिर्निर्घातः, गर्जितस्येव विकारो गुञ्जावत् गुञ्जमानो महाध्वनिर्गुञ्जितं तस्मिन् **निर्घाते गुञ्जिते** च प्रत्येकमहोरात्रं यावत् स्वाध्यायपरिहारः। तत्र जघन्यत उत्कर्षतश्च चन्द्रोपरागं सूर्योपरागं चाधिकृत्य स्वाध्यायविघातकालमानमाह—**चन्द्रो जघन्येनाष्टौ** पौरुषीर्हन्ति **उत्कर्षतः पौरुषीद्विषट्कं** द्वादश पौरुषीरित्यर्थः । कथमिति चेद् उच्यते–उद्गच्छन् चन्द्रमा राहूणा गृहीतस्ततश्चतस्रः पौरुषी रात्रेर्हन्ति चतस्र आगामिनो दिवसस्य एवमष्टौ। द्वादश पुनरेवं प्रभातकाले चन्द्रमाः सग्रह एवास्तमुपगतः, ततः स चतस्रः पौरुषीर्दिवसस्य हन्ति चतस्र आगमिन्या रात्रेश्चतस्रो द्वितीयस्य दिवसस्य। अथवा औत्पातिकग्रहणेन सर्वरात्रिकं ग्रहणं जातं, सग्रह एव निमग्नस्ततः सन्दूषितरात्रेश्चतस्रः पौरुषीरन्यच्चाहोरात्रम् । अथवा अभ्रच्छन्नतया विशेषपरिज्ञानाभावाच्च न ज्ञातं कस्यां वेलायां ग्रहणं, प्रभाते च सग्रहो निमज्जन् दृष्टः, ततः समग्रा रात्रिः परिहृता, अन्यच्चाहोरात्रमिति



---
१. तुला-आव.नि१३४२-३, नि.भा.६०९२-३॥

For Private And Personal Use Only

द्वादश। तथा **सूर्यो जघन्येन द्वादश पौरुषी**र्हन्ति **उत्कर्षतः षोडश,** कथम् इति चेद् उच्यते-सूर्यः **सग्रह एवास्त**मुपयातस्ततश्चतस्रः पौरुषी रात्रेर्हन्ति चतस्र आगामिनो दिवसस्य चतस्रस्ततः परस्या रात्रेरेवं द्वादश, षोडश पुनरेवं-सूर्य उद्गच्छन् राहुणा गृहीतः सकलं च दिवसमुत्पातवशात् सग्रहः स्थित्वा सग्रह एवास्तमुपगतस्ततश्चतस्रः पौरुषीर्दिवसस्य हन्ति चतस्र आगामिन्या रात्रेस्ततश्चतस्रः परदिवसस्य ततोऽपि चतस्रः परतराया रात्रेः एवं षोडश पौरुषीर्हन्ति, सग्रहो निमग्नः सग्रह एवास्तमितः। तथा चोक्तम्-'**एयं उग्गच्छंत गहिए सग्गहनिवुड्डे दट्ठव्व**'मिति **सूरादी जेणऽहोरत्तं** ति **सूर्यादयो येनाऽहोरात्राः** ॥ ३१०१ ॥ ३१०२ ॥

ततः किम्? इत्याह—

**आइन्नं**[१] **दिणमुक्के, सोच्चिय दिवसो य राती य ।**
**निग्घाय-गुंजिएसुं, सच्चिय वेला उ जा पत्ता ॥ ३१०३ ॥**



यतः सूर्यादिरहोरात्रस्ततो **दिनमुक्ते** सूर्ये **स एव दिवसः** सैव **च रात्रि**रस्वाध्यायिकतया

---

१. एतद् पूर्वार्द्धं आव. नि. गा. नि. भा. गा. मध्ये उत्तरार्द्धे दृश्यते, छन्दोनुसारमपि उत्तरार्द्धे उचितम् इति ला. टिप्पणे॥

परिह्रियते। चन्द्रे तु तस्यामेव रात्रौ मुक्ते यावदपरश्चन्द्रो नोदेति तावदस्वाध्याय इति, सैव रात्रिरपरं च दिनमित्येवमहोरात्रमस्वाध्यायः । **अन्ये** पुनराहुः-**आचीर्ण**मिदं चन्द्रो रात्रौ गृहीतो रात्रावेव मुक्तस्तस्या एव रात्रेः शेषं वर्जनीयं, यस्मादागामिसूर्योदये समाप्तिरहोरात्रस्य जाता सूर्योऽपि यदि दिवा गृहीतो दिवैव मुक्तस्ततस्तस्यैव दिवसस्य शेषं रात्रिश्च वर्जनीया इति। तथा **निर्घात-गुञ्जितयोः** प्रत्येकं यस्यां वेलायां निर्घातो गुञ्जितं वाऽधिकृते दिनेऽभवत् द्वितीयेऽपि दिने **यावत् सैव वेला प्राप्ता** भवति तावदस्वाध्याय एव तयोरप्यस्वाध्यायस्याहोरात्रप्रमाणत्वात्। उक्तं च-**'निग्घातो गुंजियं च लोकप्रतीता एए अहोरत्तं उवहणंति'** त्ति ॥ ३१०२ ॥ तथा—

**चउ संझासु न कीरइ, पाडिवएसु तहेव चउसुं ।**
**जो जत्थ पुज्जती तू, सव्वहिं सुगिम्हतो नियमा ॥ ३१०४ ॥**



**चतस्रः सन्ध्या**स्तिस्रो रात्रौ, तद्यथा-प्रस्थिते (अस्तमिते) सूर्ये, अर्द्धरात्रे, प्रभाते च। चतुर्थी दिवसस्य मध्यभागे। एतासु चतसृष्वपि **स्वाध्यायो न क्रियते,** शेषक्रियाणां तु प्रतिलेखनादीनां न प्रतिषेधः, स्वाध्यायकरणे चाऽऽज्ञाभङ्गादयो दोषाः। तथा चतस्रः प्रतिपदः,

तद्यथा-आषाढपौर्णमासीप्रतिपत्१ इन्द्रमहप्रतिपत्२ कार्त्तिकपौर्णमासीप्रतिपत्३ सुग्रीष्मप्रतिपत् चैत्रपौर्णमासीप्रतिपदित्यर्थः४। एतास्वपि **चतसृषु प्रतिपत्सु तथैव** स्वाध्याय एव न क्रियते न शेषक्रियाणां प्रतिषेधः। इह प्रतिपद्ग्रहणेन प्रतिपत्पर्यन्ताश्चत्वारो महाः सूचिता इति। एषां च चतुर्णां महानां मध्ये **यो** महो यस्मिन् देशे यतो दिवसादारभ्य यावन्तं कालं **पूज्यते** तस्मिन् देशे ततो दिवसादारभ्य तावन्तं कालं स्वाध्यायं न कुर्वन्ति । प्रतिपत् पुनः **सर्वेषां** पर्यन्तः। '**सव्वेसिं जाव पाडिवतो**' इति वचनात्। **सुग्रीष्म**कश्चैत्रमासभावी पुनर्महामहः सर्वेषु देशेषु शुक्लपक्षप्रतिपद आरभ्य चैत्रपौर्णमासीप्रतिपत्पर्यन्तो **नियमात्** प्रसिद्धः ततो यद्यध्वानं प्रतिपन्नस्तथापि चैत्रमासस्य शुक्लपक्षप्रतिपद आरभ्य सर्वं पक्षं पौर्णमासीप्रतिपत्पर्यन्तं यावदवश्यमनागाढो योगो निक्षिप्यते, शेषेषु तु आगाढादिकेषु योगो न निक्षिप्यते, केवलं स्वाध्यायं न कुर्वन्ति ॥ ३१०४॥

गतं सदेवमस्वाध्यायिकमिदानीं व्युद्ग्रहजमाह—

**वुग्गह दंडियमादी, संखोभे दंडिए य कालगते ।**
**अण्णरायए य सभए, जच्चिरऽनिद्दोच्चऽहोरत्तं ॥ ३१०५॥**

[आव.नि.१३४४]

**व्युद्ग्रहे** परस्परविग्रहे **दण्डिकादीनाम्,आदि**शब्दात् सेनापत्यादीनां च परस्परं विग्रहे अस्वाध्यायः। इयमत्र भावना-द्वौ दण्डिकौ सस्कन्धावारौ परस्परं सङ्ग्रामं कर्त्तुकामौ यावन्नोपशाम्यतस्तावत् स्वाध्यायः कर्तुं न कल्पते। किं कारणम् इति चेद्? उच्यते-तत्र वानमन्तराः कौतुकेन स्वस्वपक्षेण समागच्छन्ति ते छलयेयुः,भूयसां च लोकानामप्रीतिः वयमेवं भीता वर्त्तामहे कामप्यापदं प्राप्स्याम एते च श्रमणका निर्दुःखं पठन्ति ॥ ३१०५॥

अत्रादिशब्दस्य व्याख्यानार्थमिमां गाथामाह—

**सेणाहिव भोइमहयर, पुंसित्थीणं व मल्लजुद्धे वा ।**
**लोट्टादिभंडणे वा, गुज्झग उड्डाह अचियत्तं ॥ ३१०६॥**

द्वयोः **सेनाधिपत्यो**र्द्वयोर्वा तथाविधप्रसिद्धपात्रयोः **स्त्रियोः** परस्परं व्युद्ग्रहे वर्त्तमाने, अथवा **मल्लयुद्धे** तथा द्वयोर्ग्रामयोः परस्परं सकलुषभावे बहवस्तरुणाः परस्परं लोष्टैर्युध्यन्ते। यदि वा बाहुयुद्धादिभिस्ततो **लोष्टादिभि**र्वा परस्परं **भण्डने** कलहे यावन्नोपशमो भवति

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेनाधिपादिव्युद्ग्रहस्य तावदस्वाध्यायः । अत्र कारणमाह— **गुज्झग उड्डाह अचियत्तं**, **गुह्यकाः** कौतुकेन प्रेक्षमाणाः छलयेयुः। तथा बहुजनो 'निर्दुःखा एते' इति मन्यमानोऽ**प्रीत्या उड्डाहं** कुर्यात्, लोकोपचारबाह्या एते इति । तथा **दण्डिके कालगते अण्णयराए य** त्ति यावदन्यो राजा नाभिषिक्तो भवति तावत् प्रजानां महान् सङ्क्षोभो भवति, तस्मिन् **संक्षोभे** सति स्वाध्यायो न कल्पते । किमुक्तं भवति? यावत् संक्षोभस्तावदस्वाध्यायः। अत्रापि पूर्वोक्ता दोषाः। **सभयं** म्लेच्छादिभयाकुलं तस्मिन्नपि स्वाध्यायो न कर्त्तव्यः। एतेषु सर्वेषु व्युद्ग्रहादिषु अस्वाध्यायावधिमाह-**जच्चिरऽनिद्दोच्चऽहोरत्तं** व्युद्ग्रहादिषु **यच्चिरं** यावन्तं काल**मनिद्दोच्चा**मिति अनिर्भयमस्वास्थ्यमित्यर्थः, तावन्तं कालमस्वाध्यायः। स्वस्थीभवनानन्तरमप्येकमहोरात्रं परिहृत्य स्वाध्यायः कर्त्तव्यः। उक्तं च-**निद्दोसीभूते वि अहोरत्तमेगं परिहरित्ता सज्झातो कीरइ इह** ॥ ३१०६ ॥

'संखोभे दंडियए य कालगए' इत्यनेनान्यदपि सूचितमस्ति, ततस्तदभिधित्सुः 'संखोभे दंडीए य कालगए' इत्येतदपि व्याख्यानयति—

**दंडिए कालगयम्मी, जा संखोभो न कीरते ताव ।**
**तद्दिवस भोइमहत्तर, वाडगपति सेज्जयरमादी ॥ ३१०७॥**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**दण्डिके कालगते** सति **यावत् संक्षोभस्तावत्** स्वाध्यायो **न क्रियते,** अन्यस्मिंस्तु राज्ञि स्थापितेऽहोरात्रातिक्रमेण क्रियते स्वास्थ्यभवनात्। तथा **भोजिके** ग्रामस्वामिनि, **महत्तरके** ग्रामप्रधाने, **वाटकपतौ** वसत्यनुगतवाटकैकस्वामिनि, तथा **शय्यातरे आदि**शब्दादन्यस्मिन् वा शय्यातरसम्बन्धिनि मानुषे कालगते **तद्दिवस**मस्वाध्यायः, एकमहोरात्रं यावत् स्वाध्यायपरिहार इत्यर्थः ॥ ३१०७॥

तथा—

**पगय-बहुपक्खिए वा, सत्तघरंतर मते व तद्दिवसं ।**
**निद्दुक्ख त्ति य गरिहा, न पढंति सणीयगं वावि ॥ ३१०८॥**



अन्योऽपि यो नाम ग्रामे **प्रकृतो**ऽधिकृतो महामनुष्यस्तस्मिन्, यदि वा **बहुपाक्षिके** बहुस्वजने कालगते, अन्यस्मिन् वा प्राकृते स्ववसत्यपेक्षया **सप्तगृहाभ्यन्तरे** कालगते **तद्दिवस**मेकमहोरात्रमस्वाध्यायः। किं कारणम्? अत आह-'**निर्दुःखा** अमी' इत्यप्रीत्या

For Private And Personal Use Only

**गर्हा**सम्भवात्, ततो **न पठन्ति, शनैर्वा पठन्ति** यथा न कोऽपि शृणोतीति, महिलारुदितशब्दोऽपि यावत् श्रूयते तावन्न पठन्ति ॥ ३१०८॥

**हत्थसयमणाहम्मी, जइ सारियमादि तू विगिंचेज्जा ।**
**तो सुद्धं अविवित्ते, अन्नं वसहिं विमग्गंति ॥ ३१०९॥**

कोऽप्यनाथो **हस्तशता**भ्यन्तरे मृतस्तस्मि**न्ननाथे** हस्तशताभ्यन्तरे कालगते स्वाध्यायो न क्रियते। तत्रेयं यतना-शय्यातरस्य अन्यस्य वा तथाविधस्य श्रावकस्य यथाभद्रकस्य वा वार्त्ता कथ्यते। यथा- 'स्वाध्यायान्तरायमस्माकमनाथमृतकेन कृतमस्ति, ततः सुन्दरं भवति यदीदं छर्द्यते।' एवमभ्यर्थितो **यदि शय्यातरादिर्विगिञ्चयेत्** परिष्ठापयेत् **ततः शुद्धं** भवतीति स्वाध्यायः कार्यः। अथ शय्यातरादिर्न कोऽपि परिष्ठापयितुमिच्छति तदा तस्मिन्ननाथमृतके **अविविक्ते** अपरिष्ठापिते **अन्यां वसतिं मार्गयन्ति** ॥ ३१०९ ॥

**अण्णवसहीए असती, ताहे रत्तिं वसभा विगिंचिंति ।**
**विक्खिणणे व समंता, जं दिट्ठं[1] असढयरे सुद्धा ॥ ३११०॥**

१. दिट्ठमसढे० ला.। दिट्ठं सढेयरे-आव. नि. १३४८, नि. भा. ६०९८॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अन्यस्या वसतेरभावो** यदि **ततो रात्रौ** सागारिकाऽसंलोके **वृषभास्तदनाथमृतकं विविञ्चन्ति** अन्यत्र प्रक्षिपन्ति । अथ तत् कलेवरं श्वशृगालादिभिः समन्ततो **विकीर्णं** ततो विकीर्णे तस्मिन् **समन्ततो** निभालयन्ति **यद् दृष्टं** तत् सर्वमपि विविञ्चन्ति, **इतरस्मिंस्तु** प्रयत्ने कृतेऽप्यदृष्टे **अशठा** इति कृत्वा **शुद्धाः** स्वाध्यायं कुर्वन्तोऽपि न प्रायश्चित्तभागिन इति भावः ॥ ३११० ॥

गतं व्युद्ग्रहजम्, इदानीं शारीरिकमाह—

**सारीरं पि य दुविहं, माणुसतेरिच्छियं समासेणं ।**
**तिरिच्छं तत्थ तिहा, जलथलखहजं पुणो चउहा ॥ ३१११ ॥**

[आ.व.नि.१३४८]

शरीरे भवं **शारीरं**, तदपि **समासेन** सङ्क्षेपतो **द्विविधं** द्विप्रकारम्, तद्यथा-**मानुषं तैरश्चं** च। **तत्र तैरश्चं त्रिधा-जलजं** जलजमत्स्यादितिर्यग्भवम्, एवं गवादीनां **स्थलजं खजं** च मयूरादीनाम्। **पुनरेकैकं चतुर्द्धा** चतुष्प्रकारम् ॥ ३१११ ॥



For Private And Personal Use Only

तानेव प्रकारानाह—

**चम्मरुहिरं च मंसं, अट्ठिं पि य होइ चउविगप्पं तु ।**
**अहवा दव्वाईयं, चउव्विहं होइ नायव्वं ॥ ३११२॥**

**चर्म** सशोणितं, **रुधिरं मांसमस्थि** इत्येतानि प्रतीतानि, एवमेकैकं जलजादि **चतुर्विकल्पं भवति**। **अथवा** जलजादिकं प्रत्येकं चर्मादिभेदतश्चतुर्विकल्पं सत् पुन**र्द्रव्यादिकं** द्रव्यादिभेदत**श्चतुर्विधं भवति ज्ञातव्यम्** ॥ ३११२॥

तानेव प्रत्येकं द्रव्यादीन् चतुरो भेदानाह—

**पंचेंदियाण दव्वे, खेत्ते सट्ठिहत्थ पोग्गलाकिण्णे ।**
**तिकुरत्थ महंतेगा, नगरे बाहिं तु गामस्स ॥ ३११३॥** [नि.भा.६१००]

**द्रव्ये** द्रव्यतः **पञ्चेन्द्रियाणां** जलजादीनां चर्मादिकं चतुष्टयमस्वाध्यायिकं, न विकलेन्द्रियाणाम्। **क्षेत्रे** क्षेत्रतः **षष्टिहस्ता**भ्यन्तरे परिहरणीयं न परतः । अथ तत् स्थानं तैरश्चेन **पौद्गलेन** मांसेन समन्ततः काककुर्कुरादिभिर्विक्षिप्तेनाऽऽ**कीर्णं** व्याप्तं तदा यदि स

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रामस्तर्हि तस्मिन् **तिसृभिः कुरथ्याभिर**न्तरिते विकीर्णे पौद्गले स्वाध्यायः क्रियते । अथ **नगरं** तदा तत्र यस्यां राजा सबलवाहनो गच्छति देवयानं रथो वा विविधानि वा संवहनानि गच्छन्ति तया **महत्याऽप्येकया** रथ्यया अन्तरिते स्वाध्यायः कार्यः। अथ स ग्रामः समस्तोऽपि विकीर्णेन पौद्गलेनाकीर्णो विद्यते, न तिसृभिः कुरथ्याभिरन्तरितं तत् पौद्गलमवाप्यते तदा **ग्रामस्य बहिः** स्वाध्यायो विधेयः ॥ ३११३॥

गता क्षेत्रतो मार्गणा, सम्प्रति कालतो भावतश्च तामाह—

**काले तिपोरिसऽट्ठ व, भावे सुत्तं तु नंदिमादीयं ।**
**बहिधोय रद्ध पक्के, वूढे वा होति सुद्धं तु ॥ ३११४॥**

तद् एकैकं जलजादिगतं चर्मादि **कालतस्तिस्त्रः पौरुषी**र्हन्ति। **अट्ठ वे**ति, यत्र महाकायपञ्चेन्द्रियस्य मूषिकादेराहननं तत्राष्टौ पौरुषीर्यावत् स्वाध्यायविघातः। गता कालतोऽपि मार्गणा, भावत आह-**भावे** भावतो **नन्द्यादिकं सूत्रं** न पठन्ति। **बहिधोए**त्यादि, यदि षष्टिहस्तेभ्यः परतो बहिः प्रक्षाल्य मांसमानीतं यदि वा **राद्धं** स्थालीपाकेन, पक्कं वा शूलापाकेन



For Private And Personal Use Only

तदा तस्मिन् बहिर्धौते बहीराद्धे बहि:पक्के वा तत्राऽऽनीते शुद्धम्, अस्वाध्यायिकं न भवतीति भावः। अथवा यत् तत्र षष्टिहस्ताभ्यन्तरे पतितमस्वाध्यायिकं रुधिरं तेनाऽवकाशेन पानीयप्रवाह आगतस्तेन **व्यूढं** तदा पौरुषीत्रयमध्येऽपि **शुद्धम**स्वाध्यायिकमिति स्वाध्यायः कार्यः ॥ ३११४ ॥

**अंतो पुण सट्ठीणं, धोयम्मी अवयवा तहिं होंति ।**
**तो तिन्नि पोरिसीतो, परिहरियव्वा तहिं होंति॥ ३११५॥**

[तुला-आ.नि.१३५२-३]

यदि **पुनः षष्टि**हस्ताना**मभ्यन्तरे** मांसं प्रक्षालयति तदा तस्मिन् **धौते** यत**स्तत्र** नियमाद**वयवाः** पतिता **भवन्ति ततस्तिस्त्रः पौरुष्यः** स्वाध्यायमधिकृत्य **तत्र परिहर्त्तव्या भवन्ति** ॥ ३११५॥

'अट्ठ वेति' यदुक्तं तदिदानीं भावयति—

**महकायेऽहोरत्तं, मज्जारादीण मूसगादिहते ।**
**अविभिन्ने गिन्ने वा, पठंति एगे जइ पलाति ॥ ३११६॥**

[तुला-आ.भाष्य २१८,नि.भा.६१०४]

**महाकाये** मूषिकादौ मार्जारादिना हते मारिते **अहोरात्र**मष्टौ पौरुषीर्यावदस्वाध्यायः। अत्रैव **मतान्तर**माह—अविभिन्ने इत्यादि, **एके** प्राहुः-यदि **मार्जारादिना मूषिकादिरविभिन्न** एव सन् मारितो मारयित्वा च गृहीत्वा अथवा गिलित्वा **यदि** ततः स्थानात् **पलायते** तदा **पठन्ति** साधवः सूत्रं, न कश्चिद्दोषः। अन्ये नेच्छन्ति, यतः कस्तं जानाति[विभिन्नो]अविभिन्नो वा मारित इति। **अपरे** पुनरेवमाहुर्यत्र मार्जारादिः स्वयं मृतोऽन्येन वा केनाप्यविभिन्न एव सन् मारितस्तत्र यावत् तत् कलेवरं न भिद्यते तावन्नाऽस्वाध्यायिकम्, विभिन्ने अस्वाध्यायिकमिति। तदेतदसमीचीनं यतश्चर्मादिभेदतः चतुर्विधमस्वाध्यायिकम् तस्मादविभिन्नेऽप्यस्वाध्याय एव॥ ३११६॥

**अंतो बहिं चि भिन्ने, अंडगबिंदू तहा वियायाए ।**
**रायपहवूढसुद्धे, परवयणे साणमादीणि ॥ ३११७॥** [आ.नि.१३५४]

**अन्तरु**पाश्रयस्य मध्ये यदि वोपाश्रयाद् **बहिः** षष्टिहस्ताभ्यन्तरे अण्डके पतिते यदि तदण्डकमभिन्नमद्याप्यस्ति तदा तस्मिन्नुज्झिते स्वाध्यायः कल्पते। अथ पतितं सद् तदण्डकं

भिन्नम् तस्य चाऽण्डकस्य कललबिन्दुर्भूमौ पतितस्तदा **भिन्ने अण्डके बिन्दौ** च भूमौ पतिते न कल्पते स्वाध्यायः। अथ कल्पे पतितं सद् अण्डकं भिन्नं कललबिन्दूर्वा तत्र लग्नः,तदा तस्मिन् षष्टिहस्तेभ्यः परतो बहिर्नीत्वा धौते कल्पते । **तथा विजातायां** प्रसूतायां तैरश्च्यामस्वाध्यायः पौरुषीत्रितयं यावत्, तथा ये **राजपथे** अस्वाध्यायिकबिन्दवो गलितास्ते न गण्यन्ते। अथान्यत्र पतितेऽस्वाध्यायिकं[1], ततो वर्षोदकप्रवाहेन तस्मिन् **व्यूढे** कल्पते। अत्र **श्वादिक**माश्रित्य **परस्य वचनं** तदग्रे भावयिष्यते, इति गाथासङ्क्षेपार्थः ॥ ३११७॥

साम्प्रतमेनामेव विवरीषुरिदमाह—

**अंडगमुज्झिय कप्पे, न य भूमि खणंति इहरहा तिण्णि ।**
**असज्झाइयपमाणं, मच्छियपाया जहिं खुप्पे ॥ ३११८॥**

यद्यण्ड**क**मभिन्नमेव पतितं तदा तस्मि**न्नुज्झिते** स्वाध्यायः **कल्पते,** अथ भिन्नं तदा न कल्पते, **न च भूमिं खनन्ति, इतरथा** भूमिखननेन यदि तदस्वाध्यायिक-मपनयन्ति तथापि

---

१. °ध्यायिके-सं.॥

**तिस्रः** पौरुषीर्यावदस्वाध्यायः। अण्डकबिन्दोर**स्वाध्यायिकस्य प्रमाणं यत्र मक्षिका पादा** निमज्जन्ति, किमुक्तं भवति? यावन्मात्रे मक्षिकापादा **ब्रुडन्ति** तावन्मात्रेऽप्यण्डकबिन्दौ भूमौ पतिते अस्वाध्यायः॥ ३११८॥

अधुना 'वियाताए' इति व्याख्यानार्थमाह—

**अजरायु तिन्नि पोरिसि, जराउयाणं जरे पडिए तिन्नि ।**
**निज्जंतुवस्स पुरतो, गलियं जंति निग्गलं होज्जा ॥ ३११९॥**

[आ.भाष्य २२०,नि.भा.६१०७]

**अजरायुः** प्रसूता **तिस्रः पौरुषीः** स्वाध्यायं हन्ति, अहोरात्रछेदं मुक्त्वा। अहोरात्रे तु छिन्ने आसन्नायामपि प्रसूतायां कल्पते स्वाध्यायः, **जरायुजानां** यावज्जरायुः लम्बते तावदस्वाध्यायः, **जरायौ पतिते** सति तदनन्तरं **तिस्रः** पौरुषीर्यावदस्वाध्यायः। तथा **उपाश्रयस्य पुरतो नीयमानं** तदस्वाध्यायिकं **गलितं** भवति तदा पौरुषीत्रयं यावदस्वाध्यायः, **यदि** पुन**र्निर्गलं भवेत्** तदा तस्मिन्नीते स्वाध्यायः ॥ ३११९॥

'रायपहवूढ'इति व्याख्यानार्थमाह—

**रायपहे न गणिज्जति, अह पुण अन्नत्थ पोरिसी तिन्नि ।**
**अह पुण वूढं होज्जा, वासोदेणं ततो सुद्धं ॥ ३१२० ॥**

**राजपथे** यद्यस्वाध्यायिकबिन्दवो गलितास्तदा तदस्वाध्यायिकं **न गण्यते,** किं कारणम्, इति चेद्, उच्यते- यतस्तत्र स्वयोगत आगच्छतां गच्छतां च मनुष्यतिरश्चां पदनिपातैरेवोत्क्षिप्तं भवति। जिनाज्ञा चाऽत्र प्रमाणमतो न दोषः। **अथ पुन**स्तदस्वाध्यायिकं तैरश्चं राजपथा**दन्यत्र** षष्टिहस्ताभ्यन्तरे पतितं तदा **तिस्रः पौरुषी**र्यावदस्वाध्यायः ।**अथ** तदपि **वर्षोदकेन व्यूढं** भवेत्, उपलक्षणमेतत्, प्रदीपनकेन वा दग्धं **तदा शुद्धं** तत् स्थानमिति कल्पते स्वाध्यायः ॥ ३१२० ॥

सम्प्रति 'परवयणे साणमादीणि' इति व्याख्यानयति—

**चोदेति समुद्दिसिउं, साणो जइ पोग्गलं तु एज्जाहि ।**
**उदरगतेणं चिट्ठति, जा ता चउहो असज्झातो ॥ ३१२१ ॥**

अत्र पर**श्चोदयति श्वा यदि पौद्गलं** तैरश्चं मांसं बहिः **समुद्दिश्य** तत्रा**ऽऽगच्छेत्** तर्हि यावत् स तत्र तिष्ठति तावत् तेनो**दरगतेन** पौद्गलेना**स्वाध्यायः** कस्मान्न भवति ?॥ ३१२१ ॥



For Private And Personal Use Only

सूरिराह—

**भण्णति जइ ते एवं, सज्झातो[१] एव तो उ नत्थि तुहं ।**
**असज्झाइयस्स जेणं, पुण्णो सि तुमं सयाकालं ॥ ३१२२॥**

**भण्यते** अत्रोत्तरं दीयते— **यदि ते एवं** पूर्वोक्तप्रकारेण मतिस्ततस्**तव स्वाध्यायः** कदाचनापि **नास्त्येव**। एवकारो भिन्नक्रमः, स च यथास्थानं योजितः, कस्मान्न स्वाध्यायः कदाचनापि? इत्यत आह—**येन** कारणेन **सदाकालं** सर्वकालं **त्वमस्वाध्यायिकस्य पूर्णः** शरीरस्य रुधिरादिचतुष्टयात्मकत्वात् ॥ ३१२२॥

**जइ फुसइ तहिं तुंडं, जइ वा लेच्छारिएण संचिट्ठे[२] ।**
**इहरा न होइ चोयग!, वंतं वा परिणयं जम्हा ॥ ३१२३॥**

**यदि** श्वा खरण्टितेन मुखेन तत्राऽऽगत्याऽऽत्मीयं **तुण्डं** क्वापि **स्पृशति, यदि वा** खरण्टितेनैव मुखेन **सन्तिष्ठति** तदा भवति अस्वाध्यायः, **इतरथा** यदि पुनर्बहिरेव मुखं लीढ्वा

१. चेव-पु.प्रे.॥ २. संचिक्खे-पु.प्रे., नि.भा. ६१०८॥

समागच्छति तदा **न भवति,** तथा यद्यप्यागन्तुं(त्य) वमति तथापि **चोदक**! नास्त्यस्वाध्यायिकं, **यस्मात्** तद् **वान्तं परिणतम्,** एवं मार्जारादिकमप्यधिकृत्य भावनीयम् ॥ ३१२३ ॥

गतं तैरश्चम् । अधुना मानुषमाह—

**माणुस्सगं चउद्धा, अट्ठिं मोत्तूण सयमहोरत्तं ।**
**परियावन्नविवण्णे, सेसे तिग सत्त अट्ठेव ॥ ३१२४ ॥** [आव.नि.१३५५]

**मानुषकं** मानुषमस्वाध्यायिकं **चतुर्द्धा**। तद्यथा—चर्म रुधिरं मांसमस्थि च । एते**ष्वस्थि मुक्त्वा** शेषेषु सत्सु क्षेत्रतो हस्त**शता**भ्यन्तरे न कल्पते स्वाध्यायः। कालतो**ऽहोरात्रम्**। **परियावन्नविवण्ण** त्ति, मानुषं तैरश्चं वा यद् रुधिरं तद् यदि पर्यापन्नत्वेन स्वभाववर्णाद्विवर्णीभूतं भवति [1]खदिरसारभमाससारादिकल्पं तदा तदस्वाध्यायिकं न भवतीति क्रियते तस्मिन् पतितेऽपि स्वाध्यायः। **सेस** त्ति, पर्यापन्नं विवर्णं मुक्त्वा शेषमस्वाध्यायिकं भवति। **तिग** त्ति, यद् अविरताया मासे मासे आर्त्तवमस्वाध्यायिकमागच्छति तत् स्वभावतः त्रीणि दिनानि गलति ततस्तानि त्रीणि दिनानि यावदस्वाध्यायः। त्रयाणां दिवसानां परतोऽपि कस्याश्चित् गलति

१. खदिरसारसमा° मु. आहोर ७, आहोर ६४॥

परं न तदार्त्तवं भवति, किन्तु तन्महारक्तं नियमात् पर्यापन्नं विवर्णं भवतीति नाऽस्वाध्यायिकं गण्यते। तथा यदि प्रसूताया दारको जातस्तदा **सप्त**दिनान्यस्वाध्यायिकमष्टमे च दिवसे कर्त्तव्यः स्वाध्यायः । अथ दारिका जाता तर्हि सा रक्तोत्कटेति तस्यां जाताया**मष्टौ** दिनान्यस्वाध्यायो नवमे दिने स्वाध्यायः कल्पते॥ ३१२४॥

एनमेव गाथावयवं व्याचिख्यासुराह—

**रत्तुक्कडया इत्थी, अट्ठ दिणा तेण सत्त सुक्कऽहिए ।**
**तिण्ह दिणाण परेणं, अणाउयं तं महारत्तं ॥ ३१२५॥** [आव.नि.१३५६]

निषेककाले यदि **रक्तोत्कटता** तदा स्त्री इति तस्यां जातायां **दिनान्यष्ट** अस्वाध्यायः। दारकः **शुक्राधिकः**, **तेन** तस्मिन् जाते **सप्त**दिनान्यस्वाध्यायः, तथा स्त्रीणां **त्रयाणां दिनानां परतस्तन्महारक्तमनार्त्तवं** भवति ततो न गणनीयम् ॥ ३१२५॥

**दंते दिट्ठे विगिंचणा सेसट्ठि बारसे व वासाइं ।**
**झामिते वूढे सीयाण पाणमादीण रुद्दघरे ॥ ३१२६॥** [आव.नि.१३५७]

यत्र हस्तशताभ्यन्तरे दारकादीनां **दन्तः** पतितो भवति तत्र निभालनीयं, यदि **दृश्यते** तदा परिष्ठाप्यः। अथ सम्यग् मृगयमाणैरपि न दृष्टस्तदा शुद्धमिति कल्पते स्वाध्यायः। अन्ये तु ब्रुवते-तस्यावहेठनार्थं कायोत्सर्गः करणीयः । दन्तं मुक्त्वा **शेषे** अङ्गोपाङ्गादिसम्बन्धि-**न्यस्थिनि** हस्तशताभ्यन्तरे पतिते **द्वादश वर्षाणि** न कल्पते स्वाध्यायः। अथ तत् स्थानमग्निकायेन ध्यामितं पानीयेन वा प्रव्यूढं तदा शुद्धमिति **ध्यामिते व्यूढे** वा स्वाध्यायः कल्पते। तथा **सीयाण**त्ति श्मशाने यानि कलेवराणि दग्धानि तान्यस्वाध्यायिकानि न भवन्ति, यानि पुनस्तत्रानाथकलेवराणि न दग्धानि निखातीकृतानि वा तानि द्वादश वर्षाणि स्वाध्यायं घ्नन्ति। यद्यपि च नाम श्मशानं वर्षोदकेन प्रव्यूढं तथापि तत्र न कल्पते स्वाध्यायो मानुषास्थिबहुलत्वात्। **पाणमादीण** त्ति पाण नाम **आडम्बरो** नाम यक्षो **हिरिमिक्का**ऽपरनामा दैवतं तस्यायतनस्याधस्ताद् मानुषाण्यस्थीनि निक्षिप्यन्ते, ततस्तत्र तथा मातृगृहे **चामुण्डा**ऽऽयतने **रुद्रगृहे** वाऽधस्तात् मानुषं कपालं निक्षिप्यते, ततस्तयोरपि द्वादश वर्षाण्यस्वाध्यायः ॥ ३१२६ ॥

अमुमेव गाथावयवं व्याचिख्यासुराह—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सीयाणे जं दड्ढं, न तं तु मुत्तूणऽणाहनिहयाइं ।**
**आडंबरे रुद्दे, मादिसु हेट्ठट्ठिया बारा ॥ ३१२७॥** [आव.भा.२२२,नि.भा.६११२]

**श्मशाने यत् दग्धमस्थि**जातं **न तद**स्वाध्यायिकं भवति । तन्**मुक्त्वा** शेषाणि न दग्धानि **अनाथ**कलेवराणि **निखातानि** वा तानि द्वादश वर्षाणि स्वाध्यायं घ्नन्ति। तथा **आडम्बरे** आडम्बरयक्षायतने **रुद्रे** रुद्रायतने **मातृषु** मातृगृहे आडम्बरादीना**मधस्तादस्थीनि** सन्ति तेन कारणेन तत्र **द्वादश** वर्षाण्यस्वाध्याय: ॥ ३१२७॥

**असिवोमाघाऽऽयणेसुं, बारस अवसोहितम्मि न करेंति ।**
**झामितवूढे कीरति, आवासियसोहिते चेव ॥ ३१२८॥** [आव.नि.१३५९]

यत्र ग्रामे समुत्पन्नेन **अशिवेन** भूयान् जन: कालगतो न च निष्काशित:, यदि वा **अवमौदर्येण** प्रभूतो जनो मृतो न च निष्काशित: अथवा **आघात**स्थानेषु भूयान् जनो मारयित्वा २ निक्षिप्तो वर्त्तते, तत एतेष्वशिवाऽवमौदर्याऽऽघातस्थानेषु पूर्वं विशोधनं क्रियते विशोधने च क्रियमाणे यद् दृष्टं तत् परित्यज्यते। अदृष्टविषये च देवताया: कायोत्सर्गं कृत्वा पठन्ति। अथ न क्रियते विशोधनं ततस्तस्मि**न्नविशोधिते द्वादश वर्षाणि** यावत् स्वाध्यायं **न कुर्वन्ति**।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ तद् अशिवादिस्थानमग्निकायेन **ध्यामितं,** वर्षोदकेन वा प्लावितं तदा **क्रियते** तत्र स्वाध्यायः । **आवासियसोहिए चेव** त्ति श्मशानं यदि भूयो जनैरावासितं ततस्तस्मि**न्नावासिते** शोधनं क्रियते, यत् दृश्यते तत् विविच्यिते। एवं **शोधिते** तस्मिन् अदृष्टास्थ्युपघाताय देवतायाः कायोत्सर्गं कृत्वा स्वाध्यायं प्रस्थापयन्ति ॥ ३१२८॥

**डहरग्गाममयम्मी, न करेंती जा न नीणियं होति ।**
**पुरगामे व महंते, वाडगसाहिं परिहरंति ॥ ३१२९॥**

[आव.भा.२२३,नि.भा.६११५]

**डहरके** क्षुल्लके **ग्रामे** कोऽपि मृतः, तस्मिन् मृते तावत् स्वाध्यायो **न क्रियते यावत्** तत् कलेवरं **न निष्काशितं भवति, पुरे** पत्तने **महति** वा **ग्रामे** वाटके साहौ वा यदि मृतो भवति तदा तं **वाटकं साहिं** वा **परिहरन्ति।** किमुक्तं भवति? तत्र न कुर्वन्ति स्वाध्यायं यावत् ततः वाटकात् साहीतो वा न निष्काशितं भवति । वाटकात् साहीतोऽन्यत्र मृते नाऽस्वाध्यायः ॥ ३१२९॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जति उ उवस्सयपुरतो, नीणिज्जइ तं मयल्लगं ताहे ।**
**हत्थसयंतो जाव उ, ताव उ न करेंति सज्झायं ॥ ३१३० ॥**

**यदि** तत् कलेवरं **मृतकं** नीयमानं यदि संयतानाम**ुपाश्रयस्य पुरतो** हस्तशताभ्यन्तरेण **नीयते ततो यावत् हस्तशतान्तो** हस्तशतं व्यतिक्रम्यते **तावन्न कुर्वन्ति स्वाध्यायम्**, हस्तशतं तु व्युत्क्रान्ते पठन्ति ॥ ३१३० ॥

अत्र पर आह—

**कोवी तत्थ भणेज्जा, पुप्फादी जा उ तत्थ परिसाडी ।**
**जा दीसंतु ताव तु, न कीरते तत्थ सज्झातो ॥ ३१३१ ॥**

**कोऽपि तत्र ब्रूयात्, या तत्र** मृतके नीयमाने **पुष्पादीनाम्**, आदिशब्दात् जीर्णचीवरखण्डादीनामुपाश्रयस्य पुरतो हस्तशताभ्यन्तरे **परिशाटिः** सा **यावत् दृश्यते तावत् तत्र न क्रियते स्वाध्यायः** ॥ ३१३१ ॥

अत्र सूरिराह—



For Private And Personal Use Only

**भन्नइ न तयं तु तहिं, निज्जंतं मोत्तु हो असज्झायं ।**
**जम्हा चउप्पयारं, सारीरमतो न वज्जंति ॥ ३१३२॥**

**भण्यते** अत्रोत्तरं दीयते **तत्र नीयमानं मृतकं मुक्त्वा** अन्यत् तकत्पुष्पादिकं पतित**मस्वाध्यायिकं न भवति, यस्मात् शारीरम**स्वाध्यायिकं **चतुष्प्रकारं** रुधिरादि-भेदतश्चतुर्विधम् पुष्पादिकं च तद्व्यतिरिक्तम् **अतो**ऽस्वाध्यायिकतया तन्न **वर्जयन्ति**। आत्मसमुत्थं त्वग्रेतनसूत्रे व्याख्यास्यते ॥ ३१३२॥

तदेवं ''नो कप्पइ निग्गंथाण निग्गंथीणं वा असज्झाइए सज्झायं करेत्तए'' इति सूत्रं व्याख्यातम्, अधुना ''कप्पति निग्गंथाण वा निग्गंथीण वा सज्झाइए सज्झायं करेत्तए'' इति सूत्रव्याख्यानार्थमाह—

**एसो उ असज्झाओ, तव्वज्जितो झायो तत्थिमा जयणा ।**
**सज्झाइए वि कालं, कुणइ अपेहितु चउलहुगा ॥ ३१३३॥**

**एषोऽनन्तरोदित** आत्मसमुत्थ-परसमुत्थभेदभिन्नो**ऽस्वाध्याय** उक्तः। **तद्विवर्जित**-स्तद्व्यतिरिक्तः **स्वाध्यायः** स्वाध्यायिकमित्यर्थः । **तत्र** स्वाध्यायिके **इयं** वक्ष्यमाणा **यतना,** तामेवाह **स्वाध्यायिकेऽपि** सति **कालं** प्रत्युपेक्ष्य स्वाध्यायं **करोति,** यदि पुनः कालम**प्रत्युपेक्ष्य** स्वाध्यायं करोति तदा तस्य प्रायश्चित्तं **चत्वारो लघुकाः** ॥ ३१३३॥

अत्र परावकाशमाशङ्कते—

**जइ नत्थि असज्झायं, किं निमित्तं तु घेप्पए कालो ? ।**
**तस्सेव जाणणट्ठा, भन्नइ किं अत्थि नत्थि त्ति ॥ ३१३४॥**

ननु **यदि नास्त्यस्वाध्याय**मस्वाध्यायिकं तर्हि **किं निमित्तं** केन कारणेन **कालो गृह्यते**? सूरिराह— **भण्यते-तस्यैवा**ऽस्वाध्यायिकस्य **परिज्ञानार्थं** कालो गृह्यते। यथा **किमस्ति** तदस्वाध्यायिकं किं वा **नेति,** यद्यस्वाध्यायिकं भविष्यति ततः कालो न शुद्धिमासादयिष्यति। अथ नास्ति ततः कालः शुद्धो भविष्यति॥ ३१३४॥

एतदेवाह—

**पंचविहअसज्झायस्स, जाणणट्ठाए पेहए कालं ।**
**काए विहीए पेहे?, सामायारी इमा तत्थ ॥ ३१३५ ॥**

यतोऽस्वाध्यायस्यैव **परिज्ञानाय** कालग्रहणमुक्तं तीर्थकरगणधरैः। ततः **पञ्चविधस्याऽस्वाध्यायिकस्य** ज्ञानायाऽवश्यं **प्रेक्षते** साधुः **कालम्**। शिष्यः प्राह—**केन विधिना प्रेक्षते** कालम्? सूरिराह— **तत्र** कालप्रेक्षणे **इयं** वक्ष्यमाणा **सामाचारी**॥ ३१३५॥

तामेवाह—

**चउभागऽवसेसाए, चरिमाए पोरिसीए उ ।**
**ततो ततो पेहेज्जा, उच्चारादीण भूमीतो ॥ ३१३६॥**

दिवसस्य चतुर्थी पौरुषी चरमपौरुषी तस्यां **चरमायां पौरुष्यां चतुर्भागावशेषायां तिस्त्रस्तिस्त्र उच्चारादीनां** उच्चार-प्रश्रवण-कालादीनां **भूमीः प्रत्युपेक्षेत**। इयमत्र भावना-उपाश्रयपरिघस्यान्तस्तिस्त्रो भूमीरुच्चारस्याऽध्यासितव्याः प्रत्युपेक्षते । तद्यथा-आसन्ने दूरे मध्ये च। तिस्त्रोऽनध्यासितव्याः। ता अप्येवमेव एताः परिघस्यान्तः षट् । एवमेव परिघाद्बहिरपि षट्। तद्यथा— आसन्नदूरमध्यभेदतस्तिस्त्रोऽध्यासितव्यास्तिस्त्रोऽनध्यासितव्या इति सर्वसङ्कलनया

उच्चारभूमयो द्वादश। एवमेव प्रश्रवणस्य द्वादश भूमयस्तिस्रो भूमयः कालस्य। तद्यथा—आसन्ने दूरे मध्ये, एताश्चोपाश्रयपरिघस्यान्तर्वेदितव्याः । सर्वसङ्ख्यया चतुर्विंशति (सप्तविंशति) भूमीः प्रत्युपेक्षते ॥ ३१३६ ॥

एतदेवाह—

**अहियासिया य अंतो, आसन्ने चेव दूरमज्झे य ।**
**तिण्णेव अणहियासी, अंतो छ च्छच्च बाहिरतो ॥ ३१३७॥**

**एमेव य पासवणे, बारस चउवीसतिं तु पेहित्ता ।**
**कालस्स य तिन्नि भवे, अह सूरो अत्थमुवयाति ॥ ३१३८॥**

[ओघ.नि.६३३-४,नि.भा.६११९-६१२०]

**अध्यास्या**[१] अध्यासनीया उपाश्रयपरिघस्याऽन्तस्तिस्रो भूमयः, तद्यथा—**आसन्ने दूरे मध्ये** च। एवमेव च **तिस्रो** मध्येऽ**नध्यास्या** अध्यासितुमशक्याः। सर्वसङ्ख्यया **अन्त**रुच्चारस्य

१. ओघनिर्युक्तिवृत्तौ-अधिकासिका, अनधिकासिका-इति॥

भूमयः **षट्**। एवमेव **षट्** परिधाद् **बहि**रपि सर्वसङ्कलनया द्वादशोच्चारभूमयः। **एवमेव प्रश्रवणेऽपि द्वादश**भूमयः। सर्वमीलने चतुर्विंशतिः। ता**श्चतुर्विंशतिं** भूमीः **प्रत्युपेक्षते**। तदनन्तरं **कालस्य तिस्रो** भूमयः जघन्येन हस्तान्तरिताः प्रत्युपेक्ष्या **भवन्ति**। तासु च प्रत्युपेक्षितासु **अथ** अनन्तरं **सूर्योऽस्तमुपयाति** ॥ ३१३७॥ ३१३८॥

**जइ पुण निव्वाघातं, आवस्सं तो करेंति सव्वे वि ।**
**सड्ढादिकहणवाघायायाए पच्छा गुरू ठंति ॥ ३१३९॥**

[ओघनि.६३५,आव.नि.१३६५]

सूर्यास्तमयसमये **यदि निर्व्याघातं** व्याघातस्याभावः, गाथायां पुंस्त्वं प्राकृतत्वात्, **ततः सर्वेऽपि** गुरुप्रभृतय **आवश्यकं** प्रतिक्रमणं **कुर्वन्ति**। अथ श्राद्धानां श्रावकाणामादिशब्दादश्राद्धानां वा धर्मो गुरूणा कथयितव्योऽस्ति ततः **श्राद्धादीनां** धर्म**कथनेन व्याघातता**यामावश्यकस्य व्याघाते सति **पश्चाद् गुरवो** निषद्याधरसहिता आवश्यके **तिष्ठन्ति** । इयमत्र भावना—यदि श्राद्धादीनां धर्मः कथयितव्यो भवति तत आचार्यो धर्मं कथयति निषद्याधरश्च पार्श्वे तिष्ठति, शेषाः पुनरावश्यकभूमौ सूत्रार्थस्मरणनिमित्तमाचार्यमापृच्छ्य आत्मीये आत्मीये स्थाने

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्चादागच्छतामवकाशपथमरुद्ध्वा बलं वीर्यं चाऽगूहयन्तो [1] यथाशक्ति चारित्रकायोत्सर्गेण तिष्ठन्ति, स्थित्वा च सूत्रार्थान् तावदनुप्रेक्षन्ते यावदाचार्यः कायोत्सर्गेण स्थितो भवति। तस्मिन् स्थिते दैवसिकमतीचारं चिन्तयन्ति॥ ३१३९॥

एतदेवाह—

**सेसा उ जहासत्ती, आपुच्छित्ताण ठंति सट्ठाणे ।**
**सुत्तत्थज्झरणहेउं, आयरियठियम्मि देवसियं ॥ ३१४०॥** [ओघनि. ६३६]

गुरुणा श्राद्धादीनां पुरतो धर्मकथने प्रारब्धे **शेषाः** साधवो **गुरुमापृच्छ्य** [2] **सूत्रार्थस्मरणहेतोः** स्वस्मिन् **स्वस्मिन् स्थाने यथाशक्ति** कायोत्सर्गेण **तिष्ठन्ति**। तत **आचार्ये** कायोत्सर्गेण **स्थिते दैवसिक**मतीचारं चिन्तयन्ति॥ ३९४०॥

अत्रैवापवादमाह—

१. ओघनिर्युक्तिटीकायामत्र मतान्तरौ दर्शितौ स्तः॥ २. सूत्रार्थक्षरण० ओ.नि. टीका॥



For Private And Personal Use Only

**जो होज्ज उ असमत्थो, बालो वुड्ढो व रोगितो वा वि ।**
**सो आवस्सगजुत्तो, अच्छेज्जा निज्जरापेही ॥ ३१४१ ॥** [ओघनि.६३७]

**यो बालो वृद्धो रोगितो वा** सञ्जातरोगः कायोत्सर्गेण स्थातु**मसमर्थः स निर्जरापेक्षी आवश्यकयुक्तो**ऽवश्यकर्त्तव्यव्यापारयुक्त उपविष्ट**स्तिष्ठेत्** ॥ ३१४२ ॥

**आवस्सयं काऊणं, जिणोवइट्ठं गुरूवदेसेण ।**
**तिन्नि थुई पडिलेहा, कालस्स विही इमो तत्थ ॥ ३१४२ ॥** [ओ.नि. ६३८]

**आवश्यकं जिनोपदिष्टं गुरूपदेशेन कृत्वा** पर्यन्ते **तिस्रः स्तुतयः** प्रवर्द्धमाना वक्तव्याः। तद्यथा— [१] प्रथमा एकश्लोकिका, द्वितीया द्विश्लोकिका, तृतीया त्रिश्लोकिका। तदनन्तरं **कालस्य प्रत्युपेक्षा** कर्त्तव्या, **तस्यां** च कालप्रत्युपेक्षणाया**मयं** वक्ष्यमाणो **विधिः** ॥३१४२॥

तमेवाह—

१. प्रथमा श्लोकेन स्तुतिर्द्वितीया बृहच्छन्दोजात्या बृहत्तरा, तृतीया बृहत्तमा एवं प्रवर्द्धमाना-ओ.नि.टी॥

**दुविहो उ होइ कालो, वाघाइम एयरो य नायव्वो ।**
**वाघातो घंघसालाए घट्टणं धम्मकहणं वा ॥ ३१४३ ॥** [ओघनि.६३९]

इह **कालो द्विविधो भवति,** तद्यथा-**व्याघातिम इतरश्च** । व्याघातेन निर्वृत्तो व्याघातिमः, "**भावादिम**" इति इमप्रत्ययः । इतरो निर्व्याघातः । तत्र **व्याघातो** नाम **घङ्कशालायां घट्टनं धर्मकथनं वा,** तत्राव्यतिरिक्ता बहुकार्पटिकाऽऽसेविता वसतिः घङ्कशाला तस्याम्। इयमत्र भावना— घङ्कशालास्थितानां साधूनामतिदूरमागच्छतोर्गच्छतोर्वा कालप्रत्युपेक्षकयोः स्खलनं पतनं वा भवति। अथवा कृते आवश्यके गुरूणां श्राद्धादीनामग्रतो धर्मः कथयितव्यो वर्त्तते, ततो निवेदने व्याघातः। एवंरूपेण घट्टनलक्षणेन वा व्याघातेन निर्वृत्तो व्याघातिमः। इतरो निर्व्याघातः। तत्र निर्व्याघाते द्वौ जनौ कालप्रत्युपेक्षकौ प्रवर्तेते, तौ कालं प्रत्युपेक्ष्य आचार्यस्य निवेदयतः। व्याघातिमे तु काले उपाध्यायस्तृतीयः कालप्रत्युपेक्षकयोर्दीयते येन तौ तस्यैव पुरतः कालं निवेदयतः। एवं ते द्वौ त्रयो वा जना आचार्यं 'मस्तकेन वन्दामहे' इत्यनेन वचनेनाऽभिमुखीकृत्य पृच्छन्ति- 'सन्दिशत कालप्रत्युपेक्षका वयं व्रजाम' इति। एवमापृच्छ्य निर्व्याघाते गुरूणाम्, इतरथोपाध्यायस्य वन्दनकं दत्त्वा 'प्रादोषिकं कालं गृह्णीम' इत्यापृच्छ्य

द्वयोर्व्रजतोर्यदि दीपज्योतिषा स्पर्शनं भवति, क्षुतं वा श्रवणपथमागतं तदा कालवधो भवति। अथ न सन्ति एतानि तदा कालभूमिं व्रजतः ॥ ३१४२ ॥ एतदेव सविस्तरं प्रतिपिपादयिषुरिदमाह—

**वाघाते ततिओ सिं, दिज्जति तस्सेव ते निवेदंति ।**
**इहरा पुच्छंति दुवे, जोगं कालस्स घेच्छामो ॥ ३१४४॥**

**व्याघाते** घट्टशालायां घट्टनरूपे धर्मकथनरूपे वा **तृतीयस्तयोः** कालप्रत्युपेक्षकयोरुपाध्यायो **दीयते** ततस्तौ **तस्यैव** पुरतो **निवेदयतः**, सर्वं सन्देशापनादिकालानुष्ठानं तस्याग्रे कुरुत इत्यर्थः। **इतरथा** व्याघाताभावे **द्वौ** कालप्रत्युपेक्षकौ गुरुमा**पृच्छतो** 'यथा**योगं** व्यापारं **कालस्य करिष्याव**' इति ॥ ३१४४॥

**कितिकम्मे आपुच्छण, आवासिय खलियपडियवाघाए ।**
**इंदिय दिसा य तारा, वासमसज्झाइयं चेव ॥ ३१४५॥**

[तुला. ओघनि. ६४१]

यदि निर्व्याघातं भवति, ततो गुरूणां **कृतिकर्म** वन्दनकं दातव्यमितरथा उपाध्यायस्य, ततः कृतिकर्मणि प्रदत्ते कालग्रहणाय **आप्रच्छनं** कर्त्तव्यम् यथा— 'प्रादोषिकं कालं गृह्णीमः,' तत्र यद्येवमापृच्छ्याऽऽ**वश्यकीं** न करोति, भूमिं वा न प्रमार्जयति, अपान्तराले गच्छन् **स्खलितः पतितो** वा वस्त्रादि वा क्वापि विलगति तदा कालस्य **व्याघातः**। अथवा **इन्द्रियार्थाः** प्रतिकूलाः समापतिताः **दिशो** वा विपरीताः प्रतिभान्ति स्म, **तारा** वा पतन्ति **वर्षं** वा अकाले निपतति, अन्यद्वा **अस्वाध्यायिक**मुपजातं तदा कालवधः ॥ ३१४५ ॥

**कितिकम्मं कुणमाणो, आवत्तगमादियं तर्हि वितहं ।**
**कुणति गुरू वा वितहं , पडिच्छती तत्थ कालवहो ॥ ३१४६ ॥**

[तुला.ओ.नि.६४१]

**कृतिकर्म** वन्दनकं **कुर्वन्** यद्या**वर्त्तादिकं तत्र वितथं करोति, गुरुर्वा तत्र** वन्दनके **वितथं प्रतीच्छति** तदा **कालवधः** ॥ ३१४६ ॥

**एवं आवाससेज्जमादि वितहं खलियपडिए य ।**
**निंताणच्छीयजोई, व होज्ज ताहे नियत्तंति ॥ ३१४७॥**

**एवमावश्यकीं शय्यामादि**शब्दादन्यामपि भूमिप्रत्युपेक्षणादिकां **वितथां** क्रियां कुर्वन्ति, तथा **स्खलिते** पतिते च तथा यदि **निर्गच्छतोः क्षुतं** भवति प्रदीपज्**योतिर्वा भवेत् तदा** कालव्याघात इति तौ **निवर्त्तेते** ॥ ३१४७ ॥

**अह पुण निव्वाघायं, ताहे वच्चंति कालभूमिं तु ।**
**जइ तत्थ गोणमादी, संसप्पाइ व तो एंति ॥३१४८॥**

**अथ पुनर्निर्व्याघातं** यथोक्तरूपस्यैकस्यापि व्याघातस्याऽभावस्**तदा कालभूमिं व्रजतः**। **यदि तत्र** कालभूमौ **गोणमादी**ति गवादयः, आदिशब्दात् श्वादिपरिग्रहः। **संसर्पा** बहवः कीटिकावेलूकप्रभृतयः, अत्रा**दि**शब्दात् मार्जारादिपरिग्रहः। **तत आगच्छन्ति,** न तत्र कालग्रहणं कुर्वन्ति, कालस्य व्याहननात् ॥ ३१४८ ॥

**एमादिदोसरहिते, संडासादी पमज्जिउ निविट्ठो ।**
**अच्छंति निलिच्छंतो, दो दो उ दिसा दुअग्गा वि ॥३१४९॥**

**एवमादिभि**रनन्तरोक्तै**र्दोषै रहिते** कालग्रहणयोग्यप्रदेशे **सण्डासादि प्रमार्ज्य** कालग्रहण-

वेलां प्रतीक्षमाणो **निविष्टस्तिष्ठति** इतरोऽपि दण्डधारी युगमात्रान्तरितस्तिष्ठति। तौ चैवं द्वावपि तिष्ठतो **द्वे द्वे दिशौ निरीक्षमाणौ** ॥ ३१४९ ॥

पुनः कथम्भूतावित्याह—

**सज्झायमचिंतेंता, कविहसिए विज्जुगज्जि-उक्काए ।**
**कणगम्मि य कालवहो, दिट्ठे अदिट्ठे इमा मेरा ॥३१५०॥**

प्रत्येकं द्वे द्वे दिशौ निरीक्षमाणावुपयुक्तौ **स्वाध्यायमचिन्तयन्तौ** अननुप्रेक्षमाणौ तिष्ठतः। यदि स्वाध्यायमनुप्रेक्षेते तदा कालवधः। दिशो निरीक्षमाणौ च यदि **कपिहसितं** शृण्वतः, [१] कपिहसितं नाम नभसि विकृतरूपस्य वानरसदृशमुखस्य अट्टट्टहासः, **विद्युतं** वा पश्यतो **गर्जितं** वा समाकर्णयतः, **उल्कां** वा निरीक्षेते तदा कालवधः। **कनके**ऽपि च वक्ष्यमाणसङ्ख्याके निपतिते **कालवधः**। एवं तावत् **दृष्टे** । अदृष्टे पुन**रियं** वक्ष्यमाणा **मर्यादा** सामाचारी ॥३१५०॥



१. कपिहसितं नामा विरलवानरमुखहसितम्-ओघ. नि. टीका गा. ६४३॥

तामेवाह—

**कालो संझा य तहा, दो वि समप्पंति जह समं चेव।**
**तह तं तुलं ति कालं, चरमदिसं वा असंझायं ॥३१५१॥**

[आ.नि.१३२६,नि.भा.३१६२]

**तथा** कथञ्चनापि **तं कालं तुलयतः** कालग्रहणवेलां कलयतो यथा **कालस्तथा सन्ध्या च द्वावप्येतौ यथा समकं समाप्नुतः** समाप्तिं यातः। काले समाप्ते यथा सन्ध्याविगमो भवतीति भावः। यदि वा यथाकालसमाप्तौ **चरमां** पश्चिमां **दिशमसन्ध्याकां** पश्यतस्तथा तुलयतः चरमायां दिशि पश्चात् सन्ध्याविगमो भवतीति प्रकारान्तरोपदर्शनम्॥ ३१५१॥

**नाऊण कालवेलं, ताहे उट्ठेउ दंडधारी उ ।**
**गंतूण निवेदेती, बहुवेला अप्पसद्दत्ति ॥ ३१५२॥**

उक्तप्रकारेण कालग्रहणवेलां तुलयित्वा **ज्ञात्वा** च **कालवेलाम्** , किमुक्तं भवति? स्तोकावशेषा सन्ध्या तत इदानीं कालग्रहणसमय इति परिज्ञाय तदनन्तरं **दण्डधारी** साधुजननिवेदनार्थ**मुत्तिष्ठति,** उत्थाय ततः कालग्रहणस्थानात् स दण्डधारी प्रतिश्रयमागच्छति।

तस्य चाऽऽगच्छत इयं सामाचारी— यदि स समागच्छन् नैषेधिकीं न करोति कालवधः। अथ 'नमो खमासमणाणं' इति न ब्रूते तदाऽपि कालवधः। एवं **गत्वा स निवेदयति** यथा [१] कालस्य **बहुवेला** वर्त्तते तस्माद्यूय**मल्पशब्दा** भवथ इति ॥ ३१५२॥

**ताहे उवउत्तेहिं, अप्पसद्देहिं तत्थ होयव्वं ।**
**जइ न सुयं तहिं केहि वि, दिट्ठंतो गंडएण तहिं ॥३१५३॥**

एवं दंडधारिणा निवेदने कृते **तत्र** कालग्रहणवेलायां **सर्वैरप्युपयुक्तैरल्पशब्दैर्भवितव्यम्**। **यदि** पुनस्तत्र तथा दण्डधारिणा निवेदने कृतेऽपि **कैश्चिदपि श्रुतं न** भवेत् **तत्र दृष्टान्तो गण्डकेन** वक्तव्यः॥ ३१५३॥

तमेवाह—

**जह गंडगमुग्घुट्ठे, बहूहि असुयम्मि गंडए दंडो ।**
**अह थोवेहि न सुयं, निवडति तेसिं ततो दंडो ॥३१५४॥** [तुला-ओ.नि.६४५]

१. तुला ओघनि. गा. ६४४ टीका॥

**यथा** ब्राह्मणाः किमपि विभक्तुकामाः वा पर्यालोचयितुकामा वा चतुर्वेदसमवायनिमित्तं **गण्डकं** पूर्वस्थापितं सन्दिशन्ति, यथा 'चतुर्वेदसमवायोद्घोषणां कुरुत', अतस्तेन गण्डके**नोद्घुष्टे** यदि **बहुभिर्न श्रुतं** तदा **गण्डके दण्डः**, गण्डकस्य दण्डः क्रियते। अथ **स्तोकैर्न श्रुतं** बहुभिस्तु श्रुतमिति तदा यैर्न श्रुतं **तेषां दण्डो निपतति** ॥ ३१५४॥

एष दृष्टान्तोऽयमर्थोपनयः—

**एविह वी दट्ठव्वं, दंडधरे होति दंडो तेसिं च ।**
**आवेदेउं गच्छति, तमेव ठाणं तु दंडधरो ॥३१५५॥**

**एव**मुक्तेन प्रकारेण **इहापि द्रष्टव्यम्**, यदि बहुभिर्न श्रुतं तदा **दण्डधरस्य दण्डो भवति**। अथ बहुभिः श्रुतं कतिपयैर्नाश्रावि तदा **तेषां** कतिपयानामश्रुतवतां दण्डः। एवं **दण्डधरः** साधूना**मावेद्य तदेव स्थान**मात्मीयं **गच्छति** ॥ ३१५५॥

**ताहे कालग्गाही, उट्ठेइ गुणेहिमेहि जुत्तो उ ।**
**पियधम्मो दढधम्मो, संविग्गोऽवज्जभीरु य ॥३१५६॥**

**ततो** दण्डधरस्य स्वस्थानागमनादनन्तरं **कालग्राही** एभिर्वक्ष्यमाणैर्गुणैर्युक्तः कालग्रहणायो- **त्तिष्ठति।** कैर्गुणैर्युक्तः? इत्याह— प्रियो धर्मो यस्याऽसौ **प्रियधर्मा,** धर्मे दृढो **दृढधर्मः,** राजदन्तादिदर्शनात् दृढशब्दस्य पूर्वनिपातः। अत्र भङ्गचतुष्टयम्। प्रियधर्मा नामैको न दृढधर्मः१ एकः न प्रियधर्म्मा दृढधर्म्मः२ एकः प्रियधर्मापि दृढधर्मोऽपि च३ एको न प्रियधर्मा नापि दृढधर्मः४। अत्र पदद्वयोपादानात् तृतीयभङ्गग्रहणम्। **संविग्नः** सम्यगनुष्ठाता, कस्मात् संविग्नः? इत्याह- **अवद्यभीरुः** अवद्यं पापं तस्मात् भीरुरवद्यभीरुः। अत्र प्रथमा हेतौ, '**निमित्त-कारण-हेतुषु सर्वासां विभक्तीनां प्रायो दर्शनम्**' इति वचनात्। ततोऽयमर्थो यस्मादवद्यभीरुस्ततः संविग्नत्वं करोति ॥ ३१५६॥



**खेयन्नो य अभीरू, एरिसतो सो उ कालगाही उ ।**
**उट्ठेति गुरुसगासं, ताहे विणएण सो एइ ॥ ३१५७॥**

**खेदज्ञः** कालविधेः सम्यग् ज्ञाता। **अभीरुः** मार्जारादेर्न बिभेति, अन्यथा उत्त्रस्तस्य छलना स्यात्। **एतादृशः स कालग्राही तत उत्थाय गुरुसकाशं** स्थापनागुरोः समीपं **विनयेनागच्छति** ॥ ३१५७॥

कथम्? इत्याह—

**तिन्नि य निसीहियाओ, नमणुस्सग्गेय पंच मंगलए ।**
**कितिकम्मं तह चेव य, काउं कालं तु पडियरती ॥ ३१५८॥**

स्थापनागुरुसमीपमागच्छन् आसन्ने दूरे मध्ये च **तिस्त्रो नैषेधिकीः** करोति। तदनन्तरं प्रत्यासन्नागमने **नमनम्**, 'नमः क्षमाश्रमणेभ्य' इति भणनम्, ततो हस्तशताभ्यन्तराऽऽगमनेऽप्यैर्यापथिक्याः प्रतिक्रमणम्। तत्र **कायोत्सर्गे** स्मर्त्तव्यः **पञ्चमङ्गलकः**, तस्मिन् स्मृते नमस्कारेण पारयित्वा पञ्चमङ्गलकस्याकर्षणं ततो मुखपोतिकां प्रत्युपेक्ष्य **कृतिकर्म** वन्दनकं द्वादशावर्त्तं कर्त्तव्यम्। तत् **कृत्वा** तदनन्तरं **कालं** प्रादोषिकं **प्रतिचरति**। 'संदिशत प्रादोषिकं कालं गृह्णीम' इत्युक्त्वा प्रतिगृह्णाति ॥ ३१५८॥

यथा प्रतिचरति तथा प्रतिपिपादयिषुरिदमाह—

**थोवावसेसियाए, संझाए ठाति उत्तराहुत्तो ।**
**दंडधरो पुव्वमुहो, ठायइ दंडंतरा काउं ॥ ३१५९॥**

**स्तोकावशेषायां सन्ध्यायां** स कालग्राहक **उत्तराभिमुखस्तिष्ठति, दण्डधरः** पुनः

**पूर्वाभिमुखस्तिष्ठति दण्डमन्तरा** अपान्तराले तिर्यक् ऋज्वायतं **कृत्वा** ॥ ३१५९ ॥

**गहणनिमित्तुस्सग्गं, अट्ठुस्सासे य चिंतिउस्सारे।**

**चउवीसगदुमपुप्फिय, पुंव्वा[1] एक्केक्कि य दिसाए ॥ ३१६० ॥**

[ओ.नि.६५०]

त्रीन् वारान् भूमिं रजोहरणेन प्रमार्ज्य तत्रोत्तराभिमुखो द्वावपि पादौ स्थापयित्वा पञ्चभिरिन्द्रियैः षष्ठेन च मनसा सम्यगुपयुक्तः प्रादोषिककाल**ग्रहणनिमित्तम् उत्सर्गं** कायोत्सर्गं करोति। स चैवम्—"पादोसियकालस्स सोहणवत्तियाए ठामि काउस्सग्गं अन्नत्थ ऊससिएणं जाव अरिहंताणं भगवंताणं नमोक्कारेणं न पारेमि ताव कायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि"। एवं कायोत्सर्गं कृत्वा तत्रा**ष्टावुच्छ्वासान् चिन्तयति,** पञ्च नमस्कारं मनसाऽनुप्रेक्षते इत्यर्थः। ततो मनसैव[2] नमस्कारेण **पारयित्वा चतुर्विंशति**स्तवं द्रुमपुष्पिकं श्रामण्य**पूर्वकं** चाध्ययनं परिपूर्णं क्षुल्लकाचारकथाध्ययनस्य त्वाद्यामेकां गाथां मनसानुप्रेक्षते,

**१. पुव्विग - ला. । पुव्वग ओ. नि.६५० ॥ २. नमस्कारेणोत्सार्य मूक एव चतुर्विंशतिस्तवं लोगस्सुज्जोयगरं पठति मुखमध्ये ॥**

एवं तावदुत्तरस्यां दिशि विधिरुक्तः. इत्थं च शेषायामप्येकै**कस्यां दिशि** द्रष्टव्यम्, तद्यथा— क्षुल्लकाचारकथाद्यगाथानुप्रेक्षानन्तरं ततोऽपि परावृत्त्य पश्चिमाभिमुख एतच्चिन्तयति, तदनन्तरं ततोऽपि परावृत्त्य दक्षिणाऽभिमुख एतच्चिन्तयति, चतसृष्वपि दिक्षु च प्रत्येकं चिन्तयन् द्वे द्वे दिशौ निरीक्षते, द्वे द्वे दिशौ दण्डधरः। तत्र यदीमानि भवेयुस्तदा कालवधः ॥३१६०॥

कानि? इत्यत आह—

**बिंदू य छीयपरिणय, भयरोमंचे व होइ कालवहो ।**
**भासंतमूढ संकिय, इंदियविसए य अमणुण्णे ॥३१६१॥**

[ओघनि. ६५१]



यदि कालं गृह्णत उदक**बिन्दु**स्तस्य दण्डधरस्य चोपरि निपतेत्, **क्षुतं** वा केनापि स्यात्, भावो वा तस्यान्यथा **परिणतः** स्याद्, यदि वाऽन्यतोऽनानुपूर्व्या दिशि परिणतोऽथवाऽध्ययनमनानुपूर्व्या अनुप्रेक्षितुं परिणतः, यदि वा बिभीषिकादिदर्शनतो **भयेन रोमाञ्चः** सञ्जातः। अथवा वाचा अध्ययनमन्यद्वा **भाषते**, यदि वा दिशि अध्ययने वा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मूढः, शङ्कितं** वा अध्ययनादिकं जातम्। अन्यत्र वा दिशि अध्ययने वा सङ्क्रान्तः। **इन्द्रियविषयो** वा **अमनोज्ञः** संवृत्तो, यथा दुर्गन्धः आगच्छति, विकृतं वा रूपं पश्यति, विकृतं नाम-आस्वाभाविकं, चेडरूपं वा विस्वरं रुदति, 'छिन्धि भिन्धि मारयेति' वा शब्दान्शृणोति। उपलक्षणमेतदिष्टविषयेषु वाऽपि रागमुपगच्छति तदा **कालवधः** ॥३१६१॥

एतस्या एव गाथाया व्याख्यानमाह—

**गिण्हंतस्स उ कालं, जइ बिंदू तत्थ कोइ निवडेज्जा ।**
**छीयं व परिणतो वा, भावो होज्जा से अन्नतो ॥ ३१६२॥**

**भीतो बिभीसियाई, भासंतो वावि गेण्हइ न सुज्झे ।**
**मूढो व दिसज्झयणे, संकियं वावि उवघातो ॥ ३१६३॥**

**अन्नं वा दिसज्झयणं, संकंतो होज्जऽणिट्ठविसए वा ।**
**इट्ठेसु वावि रागं, जइ वच्चइ तो हतो कालो ॥ ३१६४॥**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदं गाथात्रयमपि व्याख्यातार्थत्वात् सुगमम् ॥ ३१६२ ॥ ६१६३ ॥ ३१६४ ॥

**जइ उत्तरं अपेहिय, गेण्हइ सेसा उ तो हतो कालो ।**
**तीसु अदीसंतीसु वि, तारासु भवे जहण्णेणं ॥ ३१६५ ॥**

**यदि उत्तरां** दिश**मप्रेक्ष्य शेषा दिशः** प्राथम्येन **गृह्णाति।** किमुक्तं भवति? यदि पूर्वमुत्तराभिमुखो न **भवति** किन्तु शेषदिगभिमुखस्तदा **हतः कालः** । तथा यदि **जघन्यतस्तिसृषु तारास्वदृश्यमानासु** कालं गृह्णाति तदाऽपि हतः कालः ॥ ३१६५ ॥

**वासं व निवडइ जती, अहव असज्झाइयं व निवडेज्जा ।**
**एमादीहि न सुज्झे, तव्विरहम्मी भवे सुद्धो ॥ ३१६६ ॥**

**यदि वर्षं निपतति अथवा** किञ्चिदस्**वाध्यायिकं निपतेत्** तदा, **एवमादिभिः**, आदिशब्दात् यदि कायोत्सर्गेण तिष्ठन् भूमिं न प्रमार्जयति, छिन्नं वा मार्जारादिनाऽपान्तरालं, दण्डधरो वा कालग्राहिणो दूरव्यवस्थानस्थितो न युगान्तरमात्र इत्यादिपरिग्रहः, कालो **न शुद्ध्यति,** उपहन्यते काल इत्यर्थः। **तद्विरहे** यथोक्तदोषाभावे **भवति शुद्धः** कालः ॥ ३१६६ ॥



For Private And Personal Use Only

**गहियम्मी कालम्मी, दंडधरो अच्छती तहिं चेव ।**
**इयरो पुण आगच्छइ, जयणाए पुव्वभणियाए ॥ ३१६७॥**

**गृहीते काले दण्डधरस्तत्रैव** कालभूमौ **तिष्ठति** । **इतरः पुनः** कालग्राही **यतनया पूर्वभणितया** आवश्यकीं कृत्वा सम्यगुपयुक्तो रजोहरणेन भूमिं प्रमार्जयन् गुरुसमीपागमने च नैषेधिकीं कुर्वन्नित्यादिकया[1] **समागच्छति** ॥ ३१६७॥

**जो गच्छंतम्मि विही, आगच्छंतम्मि होइ सच्चेव ।**
**जं एत्थं नाणत्तं, तमहं वोच्छं समासेणं ॥ ३१६८॥**

**यो गच्छति विधिरुक्तः** आगच्छत्यपि विधिः **स एव भवति**। नवरमत्र **यन्नानात्वं तदहं समासेन वक्ष्ये** ॥३१६८॥

प्रतिज्ञातमेव निर्वाहयति—

**अकरणे निसीहियादी, आवडणादी य होइ जोइक्खे ।**
**अपमज्जिए य भीते, छीते छिन्ने य कालवहो ॥ ३१६९॥**

---

१.कथामागच्छति - सं.॥

**अकरणे नैषेधिक्यादेः**, आदिशब्दात् आवश्यकी-नमस्कारादेश्च परिग्रहः। यदि कालभूमेः निर्गच्छन् आवश्यकीं न करोति, गुरुसमीपमागच्छन्नैषेधिकीं, गुरुसमीपमागच्छन् नमःक्षमाश्रमणेभ्य इति नमस्कारं वा यदि न करोति, नाप्यैर्यापथिक्या प्रतिक्रामति, नापि वन्दनकं ददाति तदा कालवध इति योगः। तथा **आपतनादौ** आपतने प्रस्खलने च कालवधः। तथा **जोइक्खो** नाम दीपः। '**जोइक्खं तह छाइल्लयं च दीवं मुणिज्जाहि**'। इति, तज्**ज्योतिः**स्पर्शने वा कालवधः। तथा **अप्रमार्जिते** भूमेरप्रमार्जने त[१]था **क्षुते छिन्ने च** मार्जारादिनाऽपान्तराले मार्गे **कालवधः** ॥ ३१६९ ॥

**इरियावहिया हत्थंतरे वि मंगलनिवेयणा समयं ।**
**सव्वेहिं वि पट्ठविए, पच्छाकरणं अकरणं वा ॥३१७०॥**

आगत्य **हस्तशताभ्यन्तरेऽपि ऐर्यापथिक्या** प्रतिक्रन्तव्यम्, मुखपोतिकाप्रतिलेखनानन्तरं वन्दनकं दातव्यं, ततः शुद्धकाल इति **मङ्गलनिवेदनं** कर्त्तव्यं, ततो मङ्गलनिवेदनानन्तरं **समकमेव सर्वैः** स्वाध्याये **प्रस्थापिते पश्चात्करणमकरणं वा** कालदानस्य। किमुक्तं भवति?

१. ओधनि. टीका गा. ६५३ मध्ये - भीतः त्रस्तो वा यदि भवति तथाऽपि व्याहन्यते इति ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यः स्वाध्यायप्रस्थापनवेलायां नागतस्तस्य कालदानाकरणमितरेषां तु प्रस्थापनवेलाऽऽगतानां कालदानकरणमिति ॥ ३१७० ॥

एतदेवाह—

**सन्निहियाण वडारो, पट्ठविए पमादि णो दए कालं ।**
**बाहिठिए पडियरए, पविसइ ताहे य दंडधरो ॥ ३१७१ ॥** [ओघनि.६५५]

स्वाध्याये **प्रस्थापिते** ये स्वाध्यायप्रस्थापनवेलायां **प्रमादिनो** नाऽऽगतास्तेषां **कालं न दद्यात्,** शेषाणां तु दद्यात्। तथा चात्र [1] मरुकज्ञातं विजृम्भते। यः समवाये नाऽऽगतस्तस्य **वडारो** भागो न दीयते, **सन्निहितानां** तु दीयते। एवमत्रापि ये प्रस्थापनवेलायां नागतास्ते प्रमादेन तीर्थकराज्ञाभङ्गकारिण इति कालस्तेषां न दातव्यः, शेषाणां तु दातव्य इति। स्वाध्यायप्रस्थापनानन्तरं च कालग्राही अन्यो वा **बहिःस्थितः** कालं **प्रतिचरति, ततो दण्डधरः** स्वाध्यायप्रस्थापनार्थं मध्ये **प्रविशति** ॥३१७१ ॥

१. दृष्टान्तं ओघनि. टीकायां द्रष्टव्यम् ॥



For Private And Personal Use Only

**पट्ठविय वंदिते वा, ताहे पुच्छंति [१]केण किं सुयं भंते ! ।**
**ते विय कहंति सव्वं, जं जेण सुयं व दिट्ठं वा ॥ ३१७२॥**

[ओघनि. ६५६]

दण्डधरेण **प्रस्थापिते** स्वाध्याये गुरौ च **वन्दिते** कालग्राहिदण्डधरावन्ये **वा पृच्छन्ति** साधून् **केन किं श्रुतं भदन्त! तेऽपि** साधवः **कथयन्ति यत् येन दृष्टं वा श्रुतं वा** ॥ ३१७२॥

**एगस्स दोण्ह वा संकियम्मि किरइ न कीरए तिण्हं ।**
**सगणम्मि संकिए परगणम्मि गंतुं न पुच्छंति ॥ ३१७३॥**

**एकस्य द्वयोर्वा** क्षुतादौ **शङ्किते** स्वाध्यायः **क्रियते, त्रयाणां** शङ्किते न **क्रियते,** बहूनां शङ्कास्पदतया तस्य परमार्थतो निश्चितीभूतत्वात् तथा **स्वगणे शङ्किते परगणं गत्वा न पृच्छन्ति,** यतो यत्राऽस्वाध्यायिकसम्भवस्तत्राशङ्का परगणश्च स्थानान्तरवर्त्ती ततस्तत्रास्वाध्यायिकाऽसम्भवान्न भवेदप्याशङ्केति ॥ ३१७३॥

---

१. केण-ओघनि. ला. नास्ति॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पादोसितो अभिहितो, इयाणि सामन्नतो उ वोच्छामि ।**
**कालचउक्कस्स वि ऊ, उवघायविही उ जो जस्स ॥ ३१७४॥**

तदेवमुक्तप्रकारेण **प्रादोषिकः** कालोऽ**भिहितः**। सम्प्रति **कालचतुष्कस्यापि सामान्यत** उपघातविधिं वक्ष्ये, विशेषतोऽपि **यो यस्योपघातविधि**स्तमपि॥ ३१७४॥

प्रतिज्ञातमेव निर्वाहयति—

**इंदियमाउत्ताणं, हणंति कणगा उ सत्त उक्कोसं ।**
**वासासु य तिण्णि दिसा, उउबद्धे तारगा तिण्णि ॥ ३१७५॥**

[ओघनि.६५९]

सर्वैरपीन्द्रियैर्मनसा वा **युक्तानामुपयुक्तानां कनका उत्कर्षतः सप्त** कालं **घ्नन्ति**। किमुक्तं भवति? ग्रीष्मकाले त्रयः कनकाः कालं घ्नन्ति, शिशिरकाले पञ्च, वर्षाकाले सप्त। उल्काकनकयोश्चायं विशेषः- सरेखा उल्का, रेखारहितः कनक इति। तथा **वर्षासु**



For Private And Personal Use Only

**त्रयो दिशः** प्रकाशयुक्ता यदि स्युस्तदा प्राभातिककालशुद्धिरिति वाक्यशेषः। इयमत्र भावना- वर्षाकाले उपरि छन्ने तिर्यग्दिक्षु अछन्नासु मण्डपिकादौ काला गृह्यन्ते। तत्राऽऽद्येषु 'त्रिषु' कालेषु यदि चतस्रोऽपि दिशः प्रकाशयुक्ता अनन्तरिता इति भावः, तदा शुद्ध्यति। तथा यद्युपरि नीचं तदा प्राभातिकं कालमुपविष्टोऽपि गृह्णाति, **ऋतुबद्धे** काले चतुर्ष्वपि कालेषु यदि चतस्रोऽपि दिशः प्रकाशयुक्तास्तदा शुद्धिरितरथा नेति। **उउबद्धे तारगा तिन्नि** त्ति, **ऋतुबद्धे** काले आद्येषु त्रिषु कालेषु यदि **तिस्रस्तारका** दृश्यन्ते तदा कालो गृह्यते, अदृष्टासु न गृह्यते। कालग्रहणानन्तरं तु यद्यपि न दृश्यन्ते तारकास्तथापि पठन्ति, प्राभातिके पुनः काले अदृष्टेऽपि तारके ग्रहणमनुज्ञातम्। वर्षाकाले चत्वारोऽपि काला अदृश्यमानास्वपि तारकासु गृह्यन्ते ॥ ३१७५ ॥



एनामेव गाथां व्याचिख्यासुराह—

**कणगा हणंति कालं, ति पंच सत्तेव घिं-सिसिर-वासे ।**
**उक्का उ सरेहागा, रेहारहितो भवे कणगो ॥ ३१७६ ॥**

**वासासु पाभाइए, तिन्नि दिसा जइ पगासजुत्ता उ ।**
**सेसेसु तिसु वि चउरो, उउम्मि[1] चउरो चउदिसं पि ।। ३१७७।।**

**तिसु तिण्णि तारगातो, उउम्मि पाभाइए अदिट्ठे वि ।**
**वासासु अतारगातो, चउरो छन्ने निविट्ठो वि।। ३१७८।।**

[ओघनि. भाष्य गा.३१०-१२]

इदं गाथात्रयमपि व्याख्यातार्थत्वात् सुप्रतीतम् । **छन्ने निविट्ठो** वीत्युक्तमतस्तदेव सविशेषं भावयति—

**ठाणाऽसति बिंदूसु वि, गिण्हइ बिट्ठो वि पच्छिमं कालं ।**
**पडियरति बाहि एक्को, एक्को अंतट्ठितो गिण्हे ।। ३१७९।। [ ओघनि.६६१ ]**

वर्षाकाले तथाविधस्याऽन्यस्य **स्थानस्याऽसति** अभावे **बिन्दुष्वपि** निपतत्सु[2] उपर्यन्तर्नीचतया ऊर्ध्वस्थानाऽसम्भवे **उपविष्टोऽपि पश्चिमं** प्राभातिकं **कालं गृह्णाति,** तथा स्थानाऽसति

१. उडुम्मि-ला.।। २. त्सु सत्सु गृह्णात्युपविष्टः-ओघनि. टीका।।

**एको** दण्डधरो **बहिः** स्थितः कालं **प्रतिचरति एकः पुनरन्तःस्थितः** कालं **गृह्णाति**। एष वर्षासु प्राभातिके काले विशेषो नाऽऽद्येषु त्रिषु कालेषु। अथ कतरे चत्वारः कालाः? उच्यते प्रथमः प्रादोषिकः, द्वितीयोऽर्द्धरात्रस्फिटितः, तृतीयो वैरात्रिकः, चतुर्थः प्राभातिकः ॥ ३१७९ ॥

अथ कः कालः प्रथमतः कस्यां दिशि गृह्यते? तत आह—

**पादोसियऽड्डरत्ते, उत्तरदिसि पुव्व पेहए कालं ।**

**वेरत्तियम्मि भयणा, पुव्वदिसा पच्छिमे काले ॥३१८०॥** [ओघनि. ६६२]

**प्रादोषिकमर्द्धरात्र**मर्द्धरात्रस्फिटितं च **कालं पूर्वं प्रत्युपेक्षते** गृह्णाति **उत्तरस्यां दिशि, वैरात्रिके भजना** विकल्पना, उत्तरस्यां दिशि पूर्वं प्रत्युपेक्षते पूर्वस्यां वेति, **पश्चिमे** प्राभातिके **काले** प्रथमतः प्रत्युपेक्षणं **पूर्वस्यां दिशि** ॥ ३१८० ॥

अथ कियन्तः काला जघन्यतः, कियन्त उत्कर्षतः साधूनां ग्राह्याः? तत आह—

**कालचउक्कं उक्कोसएण जहन्नेण तिगं तु बोधव्वं ।**

**बिइयपयम्मि दुगं तू, माइट्ठाणे विमुक्काणं ॥ ३१८१ ॥**

मातृस्थानेन विमुक्तानामशठानां साधूनामुत्कर्षेण कालचतुष्कं ग्राह्यं भवति, जघन्येन त्रिकं कालत्रिकं ग्राह्यं **बोद्धव्यम्। द्वितीयपदे** अपवादपदे **द्विकं** कालद्विकं **तु**शब्दादेकोऽपि कालो बोद्धव्यः ॥ ३१८१ ॥ कथमुत्कर्षतः कालचतुष्कमत आह—

**पातोसिएण सव्वे, पढमं पोरिसि करेंति सज्झायं ।**
**ताहे उ सुत्तइत्ता, सुवंति जग्गंति वसभा उ ॥ ३१८२ ॥**

**प्रादोषिकेन** कालेन **सर्वे** साधवः **प्रथमं पौरुषीं** यावत्कालिकं **स्वाध्यायं कुर्वन्ति, ततो** द्वितीये यामे ये **सूत्रवन्तः** साधवः ते **स्वपन्ति, वृषभा जाग्रति** । ते च जाग्रतस्तेनैव कालेन **प्र**ज्ञापनादिकं परावर्त्तयन्ति तावद् यावत् कालवेला भवति॥ ३१८२ ॥ ततः कालवेलायां कालं प्रतिक्रम्य-

**फिडियम्मि अड्डरत्ते, कालं घेत्तुं सुवंति जागरिया ।**
**ताहे गुरू गुणंती, चउत्थे सव्वे गुरू सुवती ॥ ३१८३ ॥**

**वैरात्रिको न शुद्ध्यति** कालस्तदा **तेनैवार्द्धरात्रिकेण** कालेन **पठित्वा प्राभातिकं** कालं **गृह्णन्ति**। एवमेते **त्रयः** काला **भवन्ति** ॥ ३१८५॥

अत्रैव प्रकारान्तरमाह—

**अहवा पढमे सुद्धे, बितियअसुद्धम्मि होंति तिन्नेवं ।**
**पातोसिय वेरत्तिय, अतिउवओगा भवे दोन्नि ॥ ३१८६॥**

**अथवेति** प्रकारान्तरोपप्रदर्शने, **प्रथमे** प्रादोषिके काले **शुद्धे, द्वितीये** अर्द्धरात्रिणि काले **अशुद्धे त्रय एव** काला **भवन्ति**। उपलक्षणमेतत् , तेन प्रादोषिके वा प्राभातिके वा अशुद्धे त्रय इत्यपि द्रष्टव्यम्। कथं द्वौ कालौ भवतः ? इत्यत आह-**प्रादोषिके** काले गृहीते अर्द्धरात्रिके चाऽगृहीते चरमायां पौरुष्यामवगाढायां **वैरात्रिके** काले गृहीते कालिकश्रुतं परावर्त्तयद्भिः स्वाध्यायविषये**ऽत्युपयोग**भावतस्तावन्न ज्ञाता प्राभातिककालवेला यावत् सन्ध्या उपस्थिता। एवं मातृस्थानविमुक्तानामशठानामपवादपदेन **द्वौ** कालौ **भवतः**। तद्यथा-प्रादोषिको वैरात्रिकश्च॥ ३१८६ ॥

**वैरात्रिको न शुद्ध्यति** कालस्तदा **तेनैवार्द्धरात्रिकेण** कालेन **पठित्वा प्राभातिकं** कालं **गृह्णन्ति**। एवमेते **त्रयः** काला **भवन्ति** ॥ ३१८५॥

अत्रैव प्रकारान्तरमाह—

**अहवा पढमे सुद्धे, बितियअसुद्धम्मि होंति तिन्नेवं ।**
**पातोसिय वेरत्तिय, अतिउवओगा भवे दोन्नि ॥ ३१८६॥**

**अथवे**ति प्रकारान्तरोपप्रदर्शने, **प्रथमे** प्रादोषिके काले **शुद्धे, द्वितीये** अर्द्धरात्रिणि काले **अशुद्धे त्रय एव** काला **भवन्ति**। उपलक्षणमेतत् , तेन प्रादोषिके वा प्राभातिके वा अशुद्धे त्रय इत्यपि द्रष्टव्यम्। कथं द्वौ कालौ भवतः? इत्यत आह-**प्रादोषिके** काले गृहीते अर्द्धरात्रिके चाऽगृहीते चरमायां पौरुष्यामवगाढायां **वैरात्रिके** काले गृहीते कालिकश्रुतं परावर्त्तयद्भिः स्वाध्यायविषये**ऽत्युपयोग**भावतस्तावत्र ज्ञाता प्राभातिककालवेला यावत् सन्ध्या उपस्थिता। एवं मातृस्थानविमुक्तानामशठानामपवादपदेन **द्वौ** कालौ **भवतः**। तद्यथा-प्रादोषिको वैरात्रिकश्च॥ ३१८६॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रैव प्रकारान्तरमाह—

**अहवा वि अड्ढरत्ते गहिए वेरत्तिए असुद्धम्मि ।**
**तेणेव य पढियम्मी, पाभातियऽसुद्धे दोन्नेव ॥३१८७॥**

**अथवे**ति पूर्ववत्, प्रादोषिकं कालं गृहीत्वा तेन कालिके श्रुते परावर्त्तिते द्वितीये यामे तेनैव कालेन प्रज्ञापनादि परावर्त्त्य कालवेलायामतिक्रान्तायाम**र्द्धरात्रिके** काले गृहीते तेनाचार्येण प्रज्ञापनादौ परावर्त्तिते चतुर्थ्यां पौरुष्यामवगाढायां **वैरात्रिके अशुद्धे** ततस्**तेनैवा**र्द्धरात्रिकेन कालेन कालिके **पठिते, प्राभातिके अशुद्धे द्वावेव** कालौ भवतः। उपलक्षणमेतत्, तेन प्रादोषिक- प्राभातिकयोरथवा अर्द्धरात्रिक-वैरात्रिकयो[रथवाऽर्द्धरात्रिकप्रभातिकयो]र्यदि वा वैरात्रिकप्राभातिकयोर्ग्रहणे शेषयोरग्रहणे कालद्विकम्। एकतरस्य कालस्य शुद्धावेकः कालः ॥ ३१८७ ॥

**नवकालवेलसेसे, उवगहित अट्ठयाए पडिक्कमए ।**
**न पडिक्कमए वेगो, नववारहए असज्झातो. ॥ ३१८८॥**

नवानां कालानां वेला यत्र स **नवकालवेलः**, इत्थम्भूते चरमपौरुष्यां **शेषे** बालवृद्धादीनां



For Private And Personal Use Only

वाचनायां य **औपग्रहिक** उपष्टम्भकारी प्राभातिकः कालः, **तदर्थं** शेषाः साधवो वैरात्रिकस्य कालस्य **प्रतिक्रामन्ति, एको न प्रतिक्रामति**। ततः स प्राभातिकं कालं गृह्णाति। **अन्ये** तु ब्रुवते-कालग्राही वैरात्रिकस्य कालस्य प्रतिक्रम्य प्राभातिकं कालं गृह्णाति। शेषास्तु कालवेलायां वैरात्रिकस्य प्रतिक्रामन्ति प्राभातिकश्च कालो यदि **नव वारान् हतस्तदा** ध्रुव**मस्वाध्याय** इति॥ ३१८८॥

कथं नव वारान् ग्रहणं हननं वा? तत आह—

**एक्केक्को तिन्नि वारे, छीयादीहयम्मि गेण्हती कालं।**
**गेण्हऽसती एक्को वि उ, नववारे गेण्हती ताहे ॥ ३१८९॥**

**क्षुतादिना हते एकैकस्त्रीन् वारान् कालं गृह्णाति**। इयमत्र भावना— **क्षुतादिभिः** कालस्योपघातसम्भवे एकः त्रीन् वारान् कालं गृह्णाति। तस्याऽप्युपहते अन्यः त्रीन् वारान्। अथान्यः कालं **गृह्णन्** न विद्यते **तर्हि** तस्य गृह्णतो**ऽसति** अभावे **एकोऽपि नव वारान्** कालं **गृह्णाति,** तथापि चेदुपहतस्तर्हि हता पौरुषीति ध्रुवमस्वाध्यायः ॥ ३१८९॥

गाथा ३१८४-३१८९ कालग्रहण-सङ्ख्या-विचारः

**पाभाइयम्मि काले, संचिक्खे तिन्नि छीयरुन्नेसु ।**
**चोदेयऽणिट्ठसद्दे, जइ होती कालघातो उ ॥ ३१९०॥**

**एवं बारसवासे, खरसद्देणं तु हम्मती कालो ।**
**भन्नइ माणुसऽणिट्ठे, तिरियाणं तू पहारम्मि ॥ ३१९१॥**

**प्राभातिके काले** गृह्यमाणे त्रयः पुरुषाः **क्षुतरुदितानि संचिक्खे** इति परिभावयन्ति। गाथायां सप्तमी द्वितीयार्थं, बहुवचनं सकलाऽस्वाध्यायिकसूचनार्थं, तेन क्षुतरुदितादीनीति द्रष्टव्यम् । अत्र **परश्चोदयति यदि** अनिष्टे रुदितशब्दे **कालघातो भवति एवं** सति **खरशब्देन** गर्दभशब्देन **द्वादश वर्षाणि कालो हन्यते**, खरशब्दस्यातीवानिष्टतरत्वात्, सूरिराह-**भण्यते**-अत्रोत्तरं दीयते, **मानुषस्यानिष्टे** शब्दे कालोपघातः, **तिरश्चां तु प्रहारे** दीयमाने विस्वरशब्दे ॥ ३१९० ॥३१९१ ॥

**पावासिजाइया ऊ, जइ रोविज्जाहि कालवेलम्मि ।**
**ताहे घेप्पऽणागतं अह, अह पुण रोवे पगे चेव ॥ ३१९२॥**

प्रवसतीत्येवंशीलः **प्रवासी** तस्य जायैव **जायिका** भार्या **यदि कालवेलायां** कालग्रहणसमये **रुद्यात् तर्हि** यावन्न रोदिति ताव**दनागते** एव कालो **गृह्यते** । **अथ पुनः** सा **प्रगे एव** अतिसमन्धकारे **रोदिति** ॥ ३१९२ ॥

तत आह—

**ताहे उ पण्णविज्जइ, अह पन्नविया जया न ठाएज्जा ।**
**अह पुण बालं रुवेज्जा सि ताहे उग्घाडेज्जइ ॥ ३१९३ ॥**

**वीसरसरं रुवंते, अवत्तगडिंभगम्मि मा गेण्हे ।**
**अप्पेण विरसेण, महल्ल चेडं तु उवहणती ॥ ३१९४ ॥**

यदि सा अतिसमन्धकारे एव रोदिति **ततो** वृषभैर्गत्वा सा कोमलवचोभिः **प्रज्ञाप्यते,** यथा-समन्धकारे न रोदिति। **अथ** सा **प्रज्ञापिता**ऽपि यदा **न तिष्ठति** न तस्यां वेलायां रोदनादुपरमति **तदा सा उद्घट्यते**, तस्या अवहेठननिमित्तं कायोत्सर्गः क्रियते। **अथ बालः** किमपि **रुद्यात्** तदा तस्मिन् **अव्यक्तके डिम्भे** प्रबन्धेन **विस्वरस्वरं रुदिति मा गृह्णीयात्**

कालं, **महत्** पुनश्छेटरूपमल्पेनापि विरसेन स्वरेण कालमुपहन्ति। तदेवं प्राभातिककाल-ग्रहणविधिरुक्तः ॥ ३१९३ ॥ ३१९४ ॥

सम्प्रति प्रस्थापनविधिमभिधित्सुराह—

**गोसे य पट्ठवंते, छीए छीए उ तिन्नि वारातो ।**
**आइन्न-पिसिय-महियाइपेहणट्ठा दिसा पेहे ॥३१९५॥**

**गोसे** प्रभाते स्वाध्याये **प्रस्थाप्यमाने** यदि **क्षुतं** भवति तदा आकीर्णमासमन्तात् विकीर्णं यत् पिशितं, यत् महिकादिकमस्वाध्यायिकं तत् प्रेक्षणार्थं दिशः प्रेक्षते, तत्र यदि न दृष्टम-स्वाध्यायिकं तदा पुनः प्रस्थापयति। तत्रापि यद्यर्द्धप्रस्थापिते भवति तदा पुनरप्या**कीर्णपिशित-महिकादिप्रेक्षणार्थं दिशः प्रेक्षते**। एवं **क्षुते क्षुते** उपलक्षणमेतदन्यस्मिन् वा स्वाध्यायभङ्गकारिणि समुपस्थिते **त्रीन् वारान्** आकीर्णपिशितादिनिरीक्षणार्थं दिशः प्रेक्षते॥ ३१९५ ॥

न केवलं दिशः प्रेक्षते किन्तु—

**सेज्जायरसेज्जादिसु, छारादट्ठाए विसिउ पेहंति ।**
**तिण्ह परेणऽण्णात्थ उ, तत्थ जई तिण्णि वाराओ ॥ ३१९६ ॥**

त्रिष्वपि वारेषु प्रत्येकमन्यत्र **शय्यातरगृहे सेज्झत्ति** प्रातिवेशिकगृहे **आदिश**ब्दादन्यस्मिन् वा परतरादौ गृहे **क्षाराद्यर्थाय** क्षारादिग्रहणनिमित्तं मध्ये **प्रविश्य** पिशितादिकमस्वाध्यायिकं प्रेक्षते। यदि न दृष्टं किमपि [तर्हि]वाराणां **त्रयाणां परतोऽन्यत्र** गत्वा स्वाध्यायं प्रस्थापयन्ति। **तत्रापि यदि त्रीन् वारान्** उपहतः स्वाध्यायः क्षुतादिना ॥ ३१९६॥

**ताहे पुणो वि अन्नत्थ, गंतु तत्थ वि य तिन्नि वारा उ ।**
**एवं नववारहते, ताहे पढमाए न पढंति ॥ ३१९७॥**

**ततः पुनरप्यन्यत्र** स्थानान्तरे **गत्वा** स्वाध्यायः प्रस्थापनीयः। **तत्रापि** यदि **त्रीन् वारान्** क्षुतादिना कालस्योपघातः स्यात् **तत एवम**मुना प्रकारेण सर्वसङ्कलनया **नववारहते** स्वाध्याये **प्रथमायां** पौरुष्यां **न पठन्ति** स्वाध्यायम् ॥ ३१९७॥

**पट्ठवियम्मि सिलोगे, घाणालोया उ वज्जणिज्जाउ ।**
**सोणिय-वच्चिक्काणं मुत्तपुरीसाण तह चेव ॥ ३१९८॥**

**प्रस्थापिते** स्वाध्याये भणिते क्षुल्लकाचारकथाऽऽद्ये **श्लोके** स्वाध्यायं कुर्वन्ति, कुर्वद्भिश्च स्वाध्यायं **शोणितवर्च्चिकानां** शोणितस्तवकानां **मूत्रपुरीषाणां** च **घ्राणाऽऽलोका वर्जनीयाः** ॥ ३१९८ ॥

कथम्? इत्याह—

**आलोगम्मि [1]चिलिमिणी, गंधे अन्नत्थ गंतु पगरेंति ।**
**एसो ऊ सज्झातो, तव्विवरीतो असज्झातो ॥ ३१९९ ॥**

**आलोके** शोणितादीनामन्तरा **चिलिमिनी** क्रियते, **गन्धे** पुनरागच्छति **अन्यत्र गत्वा** स्वाध्यायं **कुर्वन्ति**। **एषोऽ**नन्तरोदितः सकलदोषविनिर्मुक्तः **स्वाध्याय**कालः स्वाध्यायः कारणे कार्योपचारात्। **विपरीतः** प्रागुक्तदोषयुक्तः कालोऽस्वाध्यायः ॥ ३१९९ ॥

**एएसामन्नयरे, असज्झाए जो करेइ सज्झायं ।**
**सो आणा अणवत्थं, मिच्छत्तविराहणं पावे ॥ ३२०० ॥**

१. चिलिमिलि-ला. पाठान्तरम् ॥

**एतेषामनन्तरोदितानामस्वाध्यायिकाना****मन्यतरस्मिन्नस्वाध्याये** अस्वाध्यायिके सति **यः करोति स्वाध्यायं स आज्ञाभङ्गं** तीर्थकराज्ञाविलोपाद्, **अनवस्थां** तथाकुर्वन्तमवलोक्याऽन्यस्यापि तथाकरणात्। **मिथ्यात्व**मयथावादकरणात्, **विराधनां** संयमविराधनां ज्ञानोपचारोपघाताद् आत्मविराधनां प्रान्तदेवताछलनात् **प्राप्नोति**॥ ३२००॥

अत्रैवापवादमाह—

**बितियागाढे सागारियादि कालगते असति वोच्छेए ।**
**एएहिं कारणेहिं, जयणाए कप्पई काउं ॥ ३२०१॥**

**द्वितीयपद**मपवादपदम् **आगाढे** योगे उह्यमाने यद्यप्यस्वाध्यायिकं भवति तथापि यतनया कर्तुं कल्पते स्वाध्यायः, यथा स्कन्दके चमरे च प्रत्यासन्ने अनुद्दिष्टमपि **स्कन्द**कोद्देशं **च**मरोद्देशकं च रात्रौ रात्रौ त्रीन् दिवसान् अस्वाध्यायिकेऽपि तदनुग्रहाय कर्षयन्ति। तथा कारणवशेन प्रतिबद्धायां शय्यायां स्थितास्तत्र **सागारिकस्य** शय्यातरस्य प्रतिचारणाशब्दं श्रुत्वा मा शृणुयामेनमनिष्टं शब्दमिति कृत्वा यत् यस्य कालिकमुत्कालिकं वा परिजितं स

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदस्वाध्यायिकेऽपि पठति, आदिग्रहणेन कदाचिद् यथाच्छन्दस्योपाश्रये कारणेन स्थितास्ततो यथामति विकल्पितां तस्य सामाचारीं मा शृणुयामिति तत्प्रतिघातार्थमस्वाध्यायिकेऽपि स्वाध्यायं कुर्वन्तीति परिग्रहः। तथा **कालगते** इति जागरणनिमित्तं मेघनादादिकमध्ययनमस्वाध्यायिकेऽपि परावर्त्यते। **असति वोच्छेए** इति, अधुना गृहीतं किमप्यध्ययनं तच्च यस्य समीपे गृहीतं स मरणमुपागमत् अन्यत्र च [तद्] न विद्यते ततो मा भूत्त**द्व्यवच्छेद** इत्यस्वाध्यायिकेऽपि तत् परावर्त्यते। **एतैः कारणैः** पञ्चविधानामस्वाध्यायिकानामन्यतमस्मिन्नप्यस्वाध्यायिके **यतनया कर्तुं कल्पते** स्वाध्यायः॥ ३२०१ ॥



**सूत्रम्— नो कप्पइ निग्गंथाण वा निग्गंथीण वा अप्पणो असज्झाइए सज्झायं करेत्तए। कप्पइ णं अण्णमण्णस्स वायणं दलइत्तए ॥१७॥**

'नो कप्पति निग्गंथाण वा निग्गंथीण वा' इत्यादि । अस्य सम्बन्धमाह—

**अच्चाउलाण निच्चोउयाण मा होज्ज निच्चऽसज्झातो ।**
**अरिसाभगंदरादिसु, इति वायणसुत्तसंबंधो ॥ ३२०२॥**

**अत्याकुलानां** बालवृद्धैरतिशयेन समाकुलानां साधूना**मर्शोभगन्दरादिषु** श्रमणीनां च **नित्यर्त्तुकानां मा नित्यं** सर्वकाल**मस्वाध्यायो भवतु** इति **वाचनासूत्र**मुपन्यस्तमित्येष **सम्बन्धः** ॥ ३२०२ ॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**न कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा आत्मनः** समुत्थे **अस्वाध्यायिके स्वाध्यायं कर्तुं** किन्तु **कल्पते परस्परस्य वाचनां दापयितुम्** अन्यत्र, यदि वा प्रक्षालनानन्तरं गाढबन्धे प्रदत्ते सति तत्रापि स्वयमपि वाचनां दातुं कल्पते इति वाक्यशेषः। एतदेव **भाष्यकारः** सप्रपञ्चमाह—

**आयसमुत्थमसज्झाइयं तु एगविह होइ दुविहं वा ।**
**एगविहं समणाणं, दुविहं पुण होइ समणीणं ॥३२०३॥**

आत्मनः शरीरात् समुत्थं सम्भूतम् **आत्मसमुत्थमस्वाध्यायिकमेकविधं** वा **भवति द्विविधं वा,** तत्र यत् **एकविधम्** अर्शोभगन्दरादिविषयं तत् **श्रमणानां** भवति, **श्रमणीनां पुनर्भवति द्विविधं** अर्शोभगान्दरादिसमुत्थम् ऋतुसम्भवं च ॥३२०३॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र यतनामाह—

**धोयम्मि य निप्पगले, बंधा तिन्नेव होंति उक्कोसा ।**
**परिगलमाणे जयणा दुविहम्मी होइ कायव्वा ॥ ३२०४॥**

व्रणादौ **निष्प्रगले धौते** उपरि क्षारप्रक्षेपपुरस्सरं **त्रयो बन्धा उत्कर्षतो भवन्ति,** तथापि **परिगलति द्विविधे** व्रणादावार्त्तवे च **यतना** वक्ष्यमाणा **कर्त्तव्या** ॥ ३२०३॥

एतदेव सप्रपञ्चं भावयति—

**समणो उ वणे व भगंदले व बंधेक्कका उ वाएंति ।**
**तह वि गलंते छारं, वोढु दो तिन्नि बंधा उ ॥ ३२०५॥**

**श्रमणो व्रणे वा भगन्दरे वा** परिगलति हस्तशताद् बहिर्गत्वा निष्प्रगलं प्रक्षाल्य चीवरे क्षारं क्षिप्त्वा उपर्यन्यत् चीवरं कृत्वा व्रणं भगन्दरं वा बध्नाति। तत **एवमेकं बन्धं कृत्वा वाचयति,** यदि **तथापि परिगलत्यस्वाध्यायिकम्।** तत उपरि **क्षारं निक्षिप्य द्वितीयं** बन्धं ददाति ततो वाचयति, तथाऽप्यतिष्ठति तृतीयमपि बन्धप्रत्यवतारं दत्त्वा वाचयति ॥ ३२०५॥



For Private And Personal Use Only

**जाहे तिन्नि विभिन्ना, ताहे हत्थसयबाहिरा धोउं ।**
**बंधेउं पुणो वि वाए, गंतुं अन्नत्थ व पढंति ॥ ३२०६ ॥**

**यदा त्रयोऽपि** बन्धास्तेनाऽस्वाध्यायिकेन **विभिन्ना** भवन्ति **तदा हस्तशतात् बहिर्गत्वा** निष्प्रगलं **प्रक्षाल्य** पुनः क्षारं निक्षिप्योपरि चीवरेण **बद्ध्वा पुनरपि वाचयति । अन्यत्र वा गन्तुं पठन्ति** ॥ ३२०६ ॥

**एमेव य समणीणं, वणम्मि इयरम्मि सत्त बंधाउ।**
**तहवि य अठायमाणो धोऊणं अहव अन्नत्थ ॥ ३२०७ ॥**

**एवमेव श्रमणीनामपि व्रणविषये** यतना कर्त्तव्या भवति, **इतरस्मिन्नार्त्तवे सप्त बन्धाः** पूर्वप्रकारेण भवन्ति। **तथापि** व्रणे इतरस्मिन् वा **अतिष्ठति** हस्तशताद्बहिः **प्रक्षाल्य** तथैव बन्धान् दत्त्वा वाचयति, **अन्यत्र वा** गत्वा पठन्ति ॥ ३२०७ ॥

**एतेसामन्नयरे, असज्झाए अप्पणा तु सज्झायं ।**
**जो कुणइ अजयणाए, सो पावइ आणमादीणि ॥ ३२०८ ॥**

**एतेषामनन्तरोदितानामन्यतरस्मिन्नात्मनोऽस्वाध्यायिके** सति **यः स्वाध्यायं करोति तत्राप्ययतनया स प्राप्नोति आज्ञादीनि** तीर्थकराज्ञाभङ्गादीनि दूषणानि। आदिशब्दादनवस्थादिपरिग्रहः ॥ ३२०८॥

न केवलमिमे दोषाः किन्त्विमे[तथा]चाह—

**सुयनाणम्मि अभत्ती, लोगविरुद्धं पमत्तछलणा य ।**
**विज्जासाहण वेगुण्ण धम्मयाए य मा कुणसु ॥ ३२०९॥**

अस्वाध्यायिके पठने **श्रुतज्ञानस्याभक्ति**र्विराधना कृता भवति, तद्विराधनायां दर्शनविराधना चारित्रविराधना च, तद्भावे मोक्षाभावः । तथा **लोकविरुद्ध**मिदं यदात्मनोऽस्वाध्यायिके पठनम्। तथाहि— लौकिका अपि व्रणे आर्त्तवे वा परिगलति परिवेषणं देवतार्चनादिकं वा न कुर्वन्ति। तथा **प्रमत्तीभूतस्य** सतस्तस्य प्रान्तदेवतया **छलना** स्यात्। तथा यथा **विद्या** उपचारमन्तरेण साध्यमाना **साधनवैगुण्यधर्मतया** न सिध्यति, तथा श्रुतज्ञानमपि, तस्मात् **मैवं कार्षीः** ॥ ३२०९॥

अत्र परावकाशमाह—

**चोएई जइ एवं, सोणियमादीहि होतऽसज्झातो ।**
**तो भारितो च्चिय देहो, एएसिं किह णु कायव्वं ॥ ३२१० ॥**

**परश्चोदयति यद्येवमुक्तप्रकारेणाऽस्वाध्यायो भवति, तत एतेषां शोणितादीनां देहो भृत** इति तत्र **कथं नु कर्त्तव्यं** ? तस्मिन् सति कथं स्वाध्यायः ? ॥ ३२१० ॥

**कामं भरितो तेसिं, दंतादी अवजुया तह वि वज्जा ।**
**अणवजुया उ अवज्जा, लोए तह उत्तरे चेव ॥ ३२११ ॥**

**कामं** मन्यामहे एतत् **तेषां** शोणितादीनां **भृतो** देह**स्तथापि** ये **दन्तादयोऽवयुताः** पृथग्भूतास्ते **वर्ज्या** वर्जनीयाः **यत्त्वनवयुता** अपृथग्भूता **लोके उत्तरे च** लोकोत्तरे च **अवर्जा** अपरिहर्त्तव्याः ॥ ३२११ ॥

एतदेव भावयति—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अब्भिंतरमललित्तो, वि कुणइ देवाणमच्चणं लोए ।**
**बाहिरमललित्तो पुण, ण कुणइ अवणेइ व ततो णं ॥ ३२१२॥**

**अभ्यन्तरमललिप्तोऽपि देवानामर्चनं लोके करोति, बाह्यमललिप्तः पुनर्न करोति, अपनयति** वा मलं **ततः** शरीरादेवमत्रापि भावनीयम् ॥ ३२१२॥

**आउट्टियाऽवराहं, सन्निहिया न खमए जहा पडिमा ।**
**इय परलोए दंडो, पमत्तछलणा इह सिया उ ॥ ३२१३॥**

**उपेत्य** कृत**मपराधं सन्निहिता** सन्निहितप्रातिहार्या **प्रतिमा न क्षाम्यति इति** एवममुना प्रकारेण श्रुतज्ञानमभ्युपेत्य कृतमपराधं न क्षमते, तत्र **परलोके** दुर्गतिप्रपातो **दण्ड इह**लोके प्रान्तदेवता**छलना स्यात्** ॥ ३२१३॥

**रागद्दोसा मोहा, असज्झाए जो करेइ सज्झायं ।**
**आसायणा व का से, को वा भणितो अणायारो ॥ ३२१४॥**

**रागाद् द्वेषाद् मोहाद्वा योऽस्वाध्याये स्वाध्यायं करोति से** तस्य **का** कीदृशी फलत



For Private And Personal Use Only

**आशातना ? को वा** कीदृशः फलद्वारेण **भणितोऽनाचारः** ?॥ ३२१४॥ तत्र रागद्वेषमोहान् व्याख्यानयति–

**गणिसद्दमाइमहितो, रागे दोसम्मि न सहते सद्दं ।**
**सव्वमसज्झायमयं, एमादी होति मोहो उ ॥ ३२१५॥**

**गणी** आचार्यः, **आदि**शब्दादुपाध्यायो गणावच्छेदक इत्यादिपरिग्रहः, एवमादिभिः **शब्दैर्महित** उत्कर्षितो योऽस्वाध्याये स्वाध्यायं करोति स **रागे** द्रष्टव्यः। यस्त्वन्यस्य गणि**शब्द**-मुपाध्यायशब्दं वा **न सहते,** अहमपि पठित्वा गणी उपाध्यायो वा भविष्यामि इति विचिन्तयन्नादरपरोऽस्वाध्यायेऽपि स्वाध्यायं विदधाति स द्वेषेऽवसातव्यः। यस्तु **सर्वमस्वाध्याय**-मयमित्येवमादि विचिन्त्याऽस्वाध्याये स्वाध्यायं करोति **एष भवति मोह** इति॥ ३२१५॥

सम्प्रत्याचार्यः फलद्वारेण आशातनामाह—

**उम्मायं व लभेज्जा, रोगायंकं च पाउणे दीहं ।**
**तित्थयरभासियातो, भस्सति सो संजमातो वा ॥ ३२१६॥**

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**इहलोए फलमेयं, परलोए फलं न देंति विज्जातो ।**
**आसायणा सुयस्स य, कुव्वइ दीहं तु संसारं ॥ ३२१७॥**

**[ स ] उन्मादं वा लभते रोगातङ्कं वा दीर्घं प्राप्नुयात्, तीर्थकरभाषिताद्वा संयमाद् भ्रश्यति । इहलोके विद्या** अङ्गश्रुतस्कन्धादिलक्षणाः **फलं [ परलोके ]** मोक्षलक्षणं **न ददति** न प्रयच्छन्ति। न केवलं फलदानाभावः किन्तु **श्रुतस्याऽऽशातना दीर्घं संसारं करोति।** तदेवं फलत आशातनाऽभिहिता ॥३२१६॥ ३२१७॥

साम्प्रतमनाचारं फलत आह—

**नाणायारो विराहितो, दंसणायारो तथा चरित्तं च ।**
**चरणविराहणयाए, मोक्खाभावो मुणेयव्वो ॥ ३२१८॥**

अस्वाध्याये स्वाध्यायं कुर्वता **ज्ञानाचारो विराधितः**, तद्विराधनायां **दर्शनाचारश्चारित्रं च विराधितम्। चरणविराधनतायां मोक्षाभावः** ॥ ३२१८॥

अत्रैवापवादमाह—



For Private And Personal Use Only

बितियागाढे सागारियादि कालगय असति वोच्छेए ।
एएहिं कारणेहिं, जयणाए कप्पते काउं ॥ ३२१९॥

अस्य व्याख्या प्राग्वत् ॥३२१९॥

सूत्रम्— तिवासपरियाए समणे निग्गंथे तीसं वासपरियाए समणीए निग्गंथीए कप्पइ उवज्झायत्ताए उद्दिसित्तए ॥१८॥

पंचवासपरियाए समणे निग्गंथे सट्ठिवासपरियाए समणीए निग्गंथीए कप्पइ आयरिय-उवज्झायत्ताए उद्दिसित्तए ॥१९॥

'तिवासपरियाए समणे निग्गंथे' इत्यादि। अस्य सम्बन्धमाह—

संगहमादीणट्ठाए वायणं देति अन्नमन्नस्स ।
अयमवि य संगहो च्चिय, दुविहदिसा सुत्तसंबंधो ॥ ३२२०॥

पूर्वसूत्रे अन्योन्यस्य **वाचनां ददति सङ्ग्रहादीनामर्थाय, अयमपि** चाऽनेनापि च सूत्रेणाभिधीयमाने[न] **द्विविधदिशा** आचार्यदिशा उपाध्यायदिशा च सङ्ग्रह एव, ततः सङ्ग्रह-प्रस्तावादधिकृतसूत्रस्यात्रोपन्यासः। एष **सूत्रसम्बन्धः** ॥ ३२२० ॥

अनेन सम्बन्धेनाऽऽयातस्याऽस्य व्याख्या—

**त्रिवर्षपर्यायः श्रमणो निर्ग्रन्थस्त्रिंशद्वर्षपर्यायायाः श्रमण्याः** [निर्ग्रन्थ्याः] **कल्पते उपाध्यायतया उद्देष्टुम्॥ पञ्चवर्षपर्यायः श्रमणो निर्ग्रन्थः, षष्टिवर्षपर्यायायाः श्रमण्याः निर्ग्रन्थ्याः कल्पते आचार्यतया उपाध्यायतया वा उद्देष्टु**मिति एष सूत्राक्षरार्थः । सम्प्रति भाष्यविस्तरः

गाथा ३२२१-३२२७ ३०,६० वर्षपर्यायाः श्रमण्या आचार्यो-पाध्यायो-द्देशनम्

**तइयम्मि उ उद्देसे, दिसासु जो गणहरो समक्खातो ।**
**सो चेव य होइ इहं, परियातो वण्णितो नवरं ॥ ३२२१ ॥**

**तृतीये उद्देशे दिक्षु** आचार्योपाध्याय-प्रवर्त्ति-स्थविर-गणावच्छेदिरूपासु **यो गणधर** आचार्य उपाध्यायो वा **समाख्यातः स एव इहापि भवति** ज्ञातव्यः। **नवरमिह पर्यायो**ऽधिको **वर्णितः** ॥३२२१ ॥

ततः स एव प्रपञ्च्यते—

**तेवरिसो तीसियाए, जम्मण चत्ताए कप्पति उवज्झो ।**
**बितियाए सट्ठि-सयरी य, जम्मण पणवास आयरितो ॥ ३२२२॥**

**त्रिवर्षः** त्रिवर्षपर्यायः **उपाध्यायः कल्पते**, **त्रिंशत्कायाः** त्रिंशद्वर्षपर्यायायाः, **जन्मना** जन्मपर्यायेण जघन्यतः **चत्वारिंशत्कायाश्च**त्वारिंशद्वर्षपर्यायायाः, उत्कर्षतो देशोनपूर्वकोटिकायाः। चत्वारिंशत् कथं स्याद्? इति चेद्, उच्यते- दशवर्षजातायाः प्रव्रज्याप्रतिपत्तिस्त्रिंशद्वर्षाणि व्रतपर्याय एवं चत्वारिंशत्, तथा **द्वितीयस्याः** श्रमण्याः निर्ग्रन्थ्याः **षष्टि**वर्षव्रतपर्यायायाः, **जन्मतो** जघन्यतः **सप्तति**वर्षप्रमाणायाः, **पञ्चवर्ष**पर्याय **आचार्यः** कल्पते, उत्कर्षतो देशोनपूर्वकोटिकायाः। जन्मतः सप्ततिवर्षाणि कथं भवन्ति? इति चेद्, उच्यते दशवर्षपर्यायायाः प्रव्रज्याप्रतिपत्तिः प्रव्रजितायाः षष्टिवर्षाणीति ॥ ३२२२॥

**गीयाऽगीता वुड्ढा, व अवुड्ढा जाव तीस परियागा ।**
**अरिहति तिसंगहं सा, दुसंगहं वा भय परेणं ॥ ३२२३॥**

**गीतार्था** वा **अगीतार्था वा,** तथा **वृद्धा वा** भवतु **अवृद्धा वा यावत् त्रिंशद्वर्षपर्याया** तावन्नियमात् **त्रिसङ्ग्रहं** त्रयाणामाचार्योपाध्यायप्रवर्त्तिनीनां सङ्ग्रहमर्हति, **दुसंगहं वा भय परेणं** त्रिंशद्वर्षपर्यायात् परतो भजना विकल्पना **त्रिसङ्ग्रहं वा** अर्हति **द्विसङ्ग्रहं वा** । तत्र द्विसङ्ग्रहम् उपाध्यायस्य प्रवर्त्तिन्या वा अभावतः ॥ ३२२३॥

एतदेव भावयति—

**वयपरिणया य गीया, बहुपरिवारा य निव्वियारा य ।**
**होज्ज उ अणुवज्झाया, अपवत्तिणि वा वि जा सट्ठी ॥ ३२२४॥**

या **वयसा परिणता गीतार्था बहुपरिवारा निर्विकारा च,** सा **यावत् षष्टि**स्ताव-दनुपाध्याया वा **भवेदप्रवर्त्तिनी वा** । एवं भवति द्विसङ्ग्रहिका ॥ ३२३४॥

**एमेव अणायरिया, थेरी गणिणी व होज्ज इयरी वा ।**
**कालगतोसन्नाए, व दिसाए धरेंति पुव्वदिसं ॥ ३२२५॥**

षष्टिवर्षेभ्यः परतो **गणिनी** प्रवर्त्तिनी **इतरा वा** अप्रवर्त्तिनी **स्थविरा अनाचार्या भवेत्।**

कथम्? इत्याह- **कालगतोसन्नाए** वा-इत्यादि, **कालगतायाम् अवसन्नायां वा दिशि** आचार्यलक्षणायां षष्टिवर्षेभ्यः परतो वर्त्तमाना आर्यिका **धारयन्ति पूर्वां दिशम्** । एवमनाचार्या भवति ॥३२२५॥

किं कारणं संयतीनामवश्यं सङ्ग्रह इष्यते? तत आह—

**बहुपच्चवाय अज्जा, नियमा पुण संगहे य परिभूया ।**
**संगहिया पुण अज्जा, थिरथावरसंजमा होति ॥ ३२२६॥**

**आर्या** पुन**र्बहुप्रत्यवाया,** ततोऽसङ्ग्रहे सति **नियमात् परिभूता** भवति पराभव-स्थानमुपजायते। सङ्गृहीता पुनरार्या स्थिरस्थावरसंयमा भवति। ततः सङ्ग्रह इष्यते ॥ ३२२६॥

अथ के अपाया इत्याह—

**पेसीअइयादीया, जे पुव्वमुदाहडा अवाया उ ।**
**ते सव्वे वत्तव्वा, दुसंगहं वण्णयंतेण ॥ ३२२७॥**

**ये पूर्वं कल्पाध्यने द्विसङ्ग्रहं वर्णयता पेसी आर्यिका आदिशब्दात्** कुलपुत्र-भोजिकादिपरिग्रहः, **इत्यादिका उदाहृता अपायास्ते सर्वे** अत्रापि **वक्तव्याः।** ततो बह्वपायदर्शनतः सङ्ग्रहो मन्यते ॥३२२७॥

एतदेव द्रढयति—

**अजायविउलखंधा, लता वाएण कंपते जले वा ।**
**अबंधणा नावा उवमा एस असंगहे ॥ ३२२८॥**

**अजातविपुलस्कन्धा** यथा **वातेन लता कम्पते, जले वा** यथा **अबन्धना** बन्धनरहिता नौः, **एषा असङ्ग्रहे उपमा।** आर्याप्यसङ्गृहीता सती बहुप्रत्यवायवातोत्कलिकाभिरितस्ततः संयमात् कम्पते इत्यर्थः ॥ ३२२८॥

**दिट्ठंतो गुव्विणीए उ, कप्पट्ठगबोधएहिं कायव्वो ।**
**गब्भत्थे रक्खंती, सामत्थं खुड्डए अगडे ॥ ३२२९॥**

अत्र लोके **दृष्टान्तो गुर्विण्याः कर्त्तव्यः,** लोकोत्तरे **कल्पस्थकबोधिकैः** क्षुल्लकचौरैः।

तत्र **गर्भस्थे** पुत्रे स्वगोत्रजादयस्तां **रक्षन्ति,** स एष पुत्रप्रभावः। **अवटे** गते चौरे **क्षुल्लकस्य** तन्मारणाय **सामर्थ्य**पर्यालोचनं सोऽप्येष पुरुषस्य प्रभावः ॥३२२९॥

तत्र प्रथमतो गुर्विणीदृष्टान्तं विभावयिषुस्तावदिदमाह—

**सगोत्तरायमादीसु, गब्भत्थो वि धणं सुतो ।**
**रक्खए मायरं चेव, किमुतो जाय वड्डितो ॥ ३२३०॥**

**गर्भस्थोऽपि सुतः स्वगोत्रे राजादिषु** धनं जिघृक्षुषु **धनं रक्षति मातरं च, किं पुनर्जातः प्रवर्द्धितश्च,** स सुतरां रक्षति॥ ३२३०॥ तत्र यथा गर्भस्थोऽपि रक्षति तथा प्रतिपादयति—

**वणिए मए रायसिट्ठे, गब्भिणिधणमत्थितो पसूयाए ।**
**सव्वं सुयस्स दाहं, धूयाए भत्त-वीवाहं ॥ ३२३१॥**

एको वणिकः, तस्य भार्या आपन्नसत्त्वा, **वणिक् कालगतः,** ततः केनापि **राज्ञः शिष्टं** देव **गुर्विण्या धनमस्ति** । राज्ञोक्तं— 'तिष्ठतु तद्धनं, यदि **प्रसूतायाः** सुतो भविष्यति

ततः **सर्वं सुतस्य दास्यामः, दुहितरि** च जातायां यावता **भक्तं** यावता च **वीवाह**स्तावन्मात्रं च दास्यामः। एवं गच्छेऽपि । गर्भस्थोऽपि सुतो राज्ञः स्वगोत्रेभ्यश्च धनं रक्षति मातरं च, अन्यथा स्वगोत्रजै राज्ञा वाऽद्यापि तव पार्श्वे धनमस्तीति बहुधा विलुप्यते ॥ ३२३१॥

भावितं लौकिकमुदाहरणम्। अधुना लोकोत्तरिकं भावयति—

**लोउत्तरिए अज्जा-खुड्डगबोहिहरणं पसरणीयं ।**
**चोरो य रणं कूवे सामत्थण वारणा लेट्टू ॥ ३२३२॥**

**लोकोत्तरिको**ऽयं दृष्टान्तः क्वचिद् ग्रामे मालवशबरानीकमापतितम्। तत्र कैश्चिद् **बोधिकै**श्चौरैरा**र्यिका**णामेकस्य च **क्षुल्लकस्य हरणं** कृतं, ते चौरा अन्यस्यैकस्य चौरस्यार्यिकाः क्षुल्लकं च समर्प्याऽन्यस्य हरणाय गताः। स **चैकश्चौर**स्तृषापीडितः सन् **कूपे** पानीयाया**वतीर्णः** । ततः क्षुल्लकश्चिन्तयति वयमेतावत्सङ्ख्याका बहवोऽयमेकस्ततः किमेकस्यापि न प्रभविष्याम? इति विचिन्त्य ता आर्यिका भणिताः पाषाणपुञ्जमेनं कुर्मः। ता नेच्छन्ति, मा मारयिष्यतीति कृत्वा। ततः क्षुल्लकेन तद्वचो श्रुत्वा महानेकपाषाणस्तस्योपरि

मुक्तस्ततः पश्चात्ताभिः सर्वाभिरेककालं पाषाणा मुक्ताः। ततः स पाषाणपुञ्जेनाऽऽक्रान्तश्चौरो मरणमुपागमत्। ततः क्षुल्लकेन तास्ततो निष्काशिताः। एवं क्षुल्लकोऽपि रक्षति, किं पुनर्महान्! तत एतेन कारणेन आचार्य उपाध्यायश्च त्रिवर्षपञ्चवर्षपर्यायस्त्रिंशत्षष्टिवर्षपर्यायाणामपि गीतार्थानामपि दीयते ॥ ३२३२॥

**सूत्रम्— गामाणुगामं दूइज्जमाणे भिक्खू य आहच्च वीसुंभेज्जा, तं च सरीरगं केइ साहम्मिए पासेज्जा, कप्पइ से तं सरीरगं 'मा सागारियं' ति कट्टु एगंते अचित्ते बहुफासुए थंडिले पडिलेहित्ता पमजित्ता परिट्ठवेत्तए ।**

**अत्थि य इत्थ केइ साहम्मियसंतिए उवगरणजाए परिहरणारिहे, कप्पइ से सागारकडं गहाय दोच्चं पि ओग्गहं अणुन्नवेत्ता परिहारं परिहारित्तए ॥ २०॥**



'गामाणुगामं दूइज्जमाणे भिक्खू य' इत्यादि । अस्य सूत्रस्य सम्बन्धप्रतिपादनार्थमाह—

**अतिरेगट्ठ उवट्ठा, सट्ठी परियाय सत्तरी जम्मं ।**
**जरपागं माणुस्सं, पडणं पक्कस्स संबंधो ॥ ३२३३॥**

अनन्तरसूत्रे **अतिरेकार्थम**तिरेकप्रतिपादनार्थमाचार्यस्योपाध्यायस्य च **उपस्था** उपस्थापनं कृतम्। तत्र **षष्टि-पर्यायं सप्ततिवर्षजन्मकं मानुषं जरापाकं** भवति, जरसा **पक्कस्य** च **पतनं,** तच्च पतनमनेन सूत्रेणाभिधीयते, एष सूत्र**सम्बन्धः**॥ ३२३३॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**ग्रामानुग्रामं दूइज्जमाणे** इति विहरन् **भिक्षुः आहच्च** कदाचित् शरीरात् विष्वग्भवेद् म्रियेत इत्यर्थः। **तच्च शरीरकं केचित् साधर्मिकाः** संयताः **पश्येयुः।** तत्र **से** तस्य साधर्मिकस्य **कल्पते तत् शरीरं मा सागारिकं** भवतु **इति कृत्वा एकान्ते विविक्ते अचित्ते स्थण्डिले बहुप्रासुके** कीटिकादिसत्त्वरहिते **प्रत्युपेक्ष्य प्रमार्ज्य** च **परिष्ठापयितुम्। अत्थि या इत्थ** इत्यादि **अस्ति चात्र किञ्चित् साधर्मिकसत्कमुपकरणजातं** सलक्षणं पतद्ग्रहादि **परिहरणार्हं** परिभोगार्हं। से इत्यादि, **कल्पते से** तस्य **सागारकृतं गृहीत्वा,** सागारकृतं नाम नात्मना स्वीकरोति [किन्तु]आचार्यसत्कमेतद्, आचार्य एव एतस्य ज्ञायका [इति] एवं गृहीत्वा आचार्याणां समर्पयेद्, यदि आचार्यस्तस्यैव ददाति ततः स 'मस्तकेन वन्दे' इति ब्रुवाण आचार्यवचः प्रमाणं करोति। एष **द्वितीयोऽवग्रहः, तमनुज्ञाप्य** द्विविधेन **परिहारेण परिहर्तुं** परिभोगयितुम्। अथाचार्योऽन्यस्मै ददाति तदा तस्य तदिति सूत्रसङ्क्षेपार्थः ॥ सम्प्रति

निर्युक्तिविस्तरः—

**तं चेव पुव्वभणियं, सुत्तनिवातो उ पंथ गामे वा ।**
**गामे एगमणेगा, बहू व एमेव पंथे वि ॥ ३२३४॥**

यत् **पूर्वं क**ल्पाध्ययने चतुर्थे उद्देशके विष्वग्भवनविधानं **भणितं तदेवा**त्रापि द्रष्टव्यम्,नवरमिह विशेषो भण्यते— **सूत्रनिपातो ग्रामे वा** भवेत् **पथि** वा 'गामाणुगामं दूइज्जमाणे' इति वचनात्। तत्र **ग्रामे एको वा** भवे**दनेके** वा, तत्र येऽनेके ते द्विप्रभृतयो यावत् सप्त **बहवो वा** द्रष्टव्याः। **एवमेव पथ्यपि** द्रष्टव्यम्, एको वाऽनेके वा। तत्राऽनेके द्विप्रभृतयो यावत् सप्त बहवो वा ॥३२३४॥

एतदेवाह—

**एगो एगो चेव उ, दुप्पभिई अणेग सत्त बहुगा वा ।**
**कालगयगाम पंथेव जाणगा उज्झणविहीए ॥ ३२३५॥**

**एकस्तावदेक एव**, तस्यैकत्वेन भेदाभावाद्, **द्विप्रभृतयो** यावत् **सप्त** ताव**दनेके**, ततः

परं **बहवः**। एतेषां मध्ये कदाचिदेको **ग्रामे वा पथि वा कालगतो** भवेत् तत्र **उज्झनविधेः** परिष्ठापनविधेर्ये **ज्ञायकास्ते** यथोक्तविधिना परिष्ठापयन्ति। अथाऽनेके द्विप्रभृतयो यावत् सप्तेति। [सप्तेति] कस्मादुक्तं? न पञ्च षड् वा' इति। उच्यते— सप्तानामेव समाप्त-कल्पत्वादन्यथा त्वविधिरिति ज्ञापनार्थम् । तथा चाह—

**चउरो वहंति एगो, कुसादि रक्खइ उवस्सयं एगो ।**
**एगो य समुग्घातो, इति सत्तण्हं अहाकप्पो ॥ ३२३६॥**

**चत्वारो** जना विष्वग्भूतं **वहन्ति, एकः** पञ्चमकः **कुशान्** दर्भान् पानं च गृहीत्वा पुरतो याति, **एकः** षष्ठ **उपाश्रयं रक्षति, एकः** सप्तमः **समुद्घातः** कालगत इति एवममुना प्रकारेण **सप्तानां यथाकल्पो** विधिकल्पः ॥ ३२३६॥

**सत्तण्हं हेट्ठेणं, अविही उ न कप्पए विहरिउं जे ।**
**एगाणियस्स अविही, उ अच्छिउं गच्छिउं वा वि ॥ ३२३७॥**

**सप्तानामधस्तादविधिः**, ततस्तेषांषट्पञ्चप्रभृतीनां **विहर्त्तुं न कल्पते, जे** इति पादपूरणे, **एकाकिनः** पुनरासितुं **गन्तुं वा** नियमा**दविधिः**, तेषामपि कदाचित् कारणवशतः स्थितानां

य: परिष्ठापनविधि: सोऽग्रेऽभिधास्यते॥ ३२३७॥ तथा च एकाऽनेकेषामेव विधिमभिधित्सु: प्रथमतोऽनेकेषां प्रतिजानीते—

**णेगाण विहिं वोच्छं, नायमनाए व पुव्वखित्तम्मि १।**
**दिसि२थंडिल३ झामिय [1]निंबमादि तिसुं पदेसेसुं ॥ ३२३८॥** दारगाहा।

पूर्वमेकोऽनेके चोक्ता:। तत्र प्रथमतो**ऽनेकेषां विधिं वक्ष्यामि**। प्रतिज्ञातमेव करोति-तत्र **ज्ञाते अज्ञाते वा पूर्वक्षेत्रे दिक्** परिभावनीया। तथा **त्रिषु प्रदेशेषु स्थण्डिलं,** तच्च स्वाभाविकं शिलातलादिरूपं, **ध्यामित**मग्निना दग्धं, [2]**निम्बादीनां** समीपं वा ॥३२३८॥ तत्र प्रथमतो ज्ञातक्षेत्रविषयविधिमाह—

**नाए उ पुव्वदिट्ठं, तं चेव थंडिलं हवति तत्थ ।**
**अण्णात वेलपत्ता, सन्नादिगया उ पेहेंति ॥ ३२३९॥**

**ज्ञाते** क्षेत्रे यत् **पूर्वं दृष्टं तदेव तत्र स्थण्डिलं भवति। अज्ञाते** यदि **वेलायां प्राप्ता**स्तदा **संज्ञादिगता:** स्थण्डिलं **प्रेक्षन्ते** ॥ ३२३९॥

१. बिंबा° मु. पुप्रे.॥ २. बिम्बा° मु. पुप्रे. एवमग्रेऽपि॥

**अह पुण विकाल पत्ता, एंता चेव य करेंति उवयोगं ।**
**अकरणे हवंति लहुगा, वेलपत्ताण चउ गुरुगा ॥ ३२४० ॥**

**अथ पुनर्विकाले** विकालवेलायां **प्राप्तास्तत आगच्छन्त एव** स्थण्डिलविषय**मुपयोगं कुर्वन्ति**। अथ प्रमादतोऽमङ्गलबुद्ध्या वा न कुर्वन्ति तदा उपयोगस्याऽ**करणे** चत्वारो लघुकाः प्रायश्चित्तम्। **वेलाप्राप्तानां** पुनः स्थण्डिलविषयोपयोगाऽकरणे प्रायश्चित्तं चत्वारो गुरुकाः ॥ ३२४० ॥

**आणादिणो य दोसा, कालगते संभमादिसुं होज्जा ।**
**अच्छंतमणच्छंता[1] विणासगरिहं च पावंति ॥ ३२४१ ॥**

न केवलं प्रायश्चित्तं किन्तु **आज्ञादयश्च दोषाः**। तथा तेषां मध्ये कोऽपि रात्रौ कदाचित् **कालं** कुर्यात् तत्र स्थण्डिलं न प्रत्युपेक्षितमिति न परिष्ठापयन्ति, अपरिष्ठापयतां च वेतालोत्थानदोषाः, अथ परिष्ठापयन्ति तर्ह्यस्थण्डिलदोषासङ्गः। तथा रात्रौ वह्नि**सम्भ्रमो** वा स्तेनसम्भ्रमो वा परचक्रविभ्रमो वा जातः, सोऽपि च व्रती कालगतः, स्थण्डिलं न

१. °तमणिच्छं° सं.॥

प्रत्युपेक्षितमिति न परिष्ठापितस्तत्र यदि अग्नि**सम्भ्रमादिषु** 'कथमनाथकलेवरमिति त्यक्त्वा व्रजामः, मा प्रवचनस्याड्डाहो भूदिति' विचिन्त्य **तिष्ठन्ति** तस्य समीपे, तदा तेषामग्न्यादे**र्विनाश** उपधेर्वा स्तेनादिभिरपहरणम्। अथ न **तिष्ठन्ति** किन्तु तत् त्यक्त्वा पलायन्ते तदा ते जनमध्ये **गर्हां प्राप्नुवन्ति।** अथवा स्थण्डिलं न प्रत्युपेक्षितमिति प्रभाते परिष्ठापयन्ति तदा मलिनैः वस्त्रैस्तस्मिन् परित्यज्यमाने प्रवचनस्य अपभ्राजना— 'अहो अमी वराका अदत्तदाना मृता अपि शोभां न लभन्ते' इति ॥ ३२४१॥

'संभमादिसु होज्जा' इत्यादिकमेव व्याख्यानयति—

**तेणग्गि संभमादिसु, तप्पडिबंधेण दाह हरणं वा ।**
**मइलेहि व छड्डेंती, गरिहा य अथंडिले वा वि ॥ ३२४२॥**

**स्तेनाग्निसम्भ्रमादिषु** आदिशब्दात् परचक्रसम्भ्रमादिपरिग्रहः, **तत्प्रतिबन्धेन** कालगतप्रतिबन्धेन तिष्ठतामग्निना **दाहः** स्तेनै**र्वा हरणं** स्यात्। अथ स्थण्डिलं न प्रत्युपेक्षितमिति प्रभाते परिष्ठापयन्ति तदा **मलिनैर्वस्त्रैः** उपेतं **छर्दयन्ती**ति **गर्हा** स्यात्। अथैतद्दोषभयाद् रात्राव**स्थण्डिलेऽपि** परिष्ठापयन्ति तदा अस्थण्डिलपरिष्ठापनादोषः॥ ३२४२॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एए दोस अपेहिय, अह पुण पुव्वं तु पेहियं होंतं ।**
**ता ताहे च्चिय निंता, एते दोसा न होंता य ॥ ३२४३ ॥**

**एते** अनन्तरोदिता **दोषा अप्रेक्षिते** स्थण्डिले भवन्ति। अथ पुनः पूर्वं प्रत्यु**पेक्षितमभविष्यित् ततस्तदैव** यदि पुनः **अनायिष्यत** तदा **एते** अनन्तरोदिता **दोषा नाभविष्यन्**॥ ३२४३ ॥

**अह पेहिए वि पुव्विं, दिया व रातो व होज्ज वाघातो ।**
**सावय-तेणभया व ढक्किया ताहे अत्थावे[१] ॥ ३२४४ ॥**

**अथ पूर्वं प्रेक्षितेऽपि** स्थण्डिले **दिवा वा रात्रौ वा भवेत् व्याघातः**। कथम्? इत्याह- **श्वापद**भयात् **स्तेनभयाद्वा,** यदि वा रात्रौ द्वाराणि **ढक्कितानि** पिहितानि **तदा आस्थापयन्ति** धरन्ति, न परिष्ठापयन्तीत्यर्थः। तदा बन्धन-च्छेदन-जागरणादिका पूर्वोक्ता यतनाऽपि[यावत्]-स्तेनादिभयापगमो भवति स्थण्डिलं वा किमपि कालोचितं प्राप्यते तावत् सैव प्राक्तनी यतना कर्त्तव्या ॥ ३२४४ ॥

१. अच्छाते-ला.। अत्था वि [ तो ] मु.॥



For Private And Personal Use Only

**असतीए सुक्किलाणं, दिणकालगयं निसिं विवेचंति ।**
**परिहारियं च पच्छाकडादि कोडी दुगेणं वा ॥ ३२४५॥**

अथ दिवसे कालगतः परं **शुक्लानि** वस्त्राणि न विद्यन्ते तर्हि **शुक्लानां** वस्त्राण**मभावे** **दिनकालगतं** बन्धनादियतनाविषयं कृत्वा **निशि** रात्रौ **विविंचंति** परिष्ठापयन्ति। अथ रात्रौ पूर्वोक्तकारणैर्व्याघातस्तर्हि यद्यन्यत एवमेव याचने शुक्लं वस्त्रं न लभ्यते, तदा **पश्चात्कृतादिषु प्रातिहारिकं** शुक्लं वस्त्रं याच्यते। अथ तदपि न लभ्यते तर्हि **कोटीद्विकेना**ऽप्युत्पादयेत्। किमुक्तं भवति? पूर्वं विशोधिकोट्या मृग्यते, तदभावे अविशोधिकोट्यापीति ॥ ३२४५॥

**असती नीणेउ निसिं, ठवेतु सागारि थंडिलं पेहे ।**
**थंडिलवाघायम्मि वि, जयणा एसेव कायव्वा ॥ ३२४६॥**

कोटीद्विकप्रकारेणापि शुक्लवस्त्राणामभावे **निशि** रात्रौ परिष्ठापयन्ति। तत्र **सागारिकं** शय्यातरं कालगतस्य समीपे **स्थापयित्वा** स्वयं साधवः **स्थण्डिलं** तथाविधं **प्रत्युपेक्षन्ते** । अथ **स्थण्डिले व्याघातस्तदा एषैवा**नन्तरोदिता **यतना कर्त्तव्या** ॥ ३२४६॥

रात्रिद्वारं गतम् । अथ दिग्द्वारमाह—

**महल्लपुरगामे वा, दिसा वाडगसाहितो ।**
**इहरा दुव्विभागा उ, कुग्गामे सुविभाविया ॥ ३२४७॥**

**महानगरस्य महाग्रामस्य वा** महत्त्वेन दिग्विभागो दुःखेन विभाव्यते। तत उपाश्रयात् **वाटकात् साहेर्वा दिग्विभागः** परिभावनीयः, **इतरथा दुर्विभागा** भवेयुः। **कुग्रामे** तु **सुविभाव्या** दिशः ॥ ३२४७॥

ताः पुनरिमा दिशः—

**दिसा [1]अवरदक्खिणा य दक्खिणा य अवरा य दक्खिणापुव्वा ।**
**अवरुत्तरा य पुव्वा, उत्तर पुव्वुत्तरा चेव ॥ ३२४८॥**

**दिक्** प्रथमतोऽ**परदक्षिणा** नैर्ऋती निरीक्षणीया, तदभावे **दक्षिणा,** तस्या अभावे **अपरा** पश्चिमा, तस्या अप्यभावे **दक्षिणपूर्वा,** आग्नेयी इत्यर्थः। तस्या अभावे **अपरोत्तरा,** वायवीति

१. अवर दक्खिणा य, अवरा य पच्छिम दक्खिणा पुव्वं - ला.॥

भावः। तस्या अलाभे **पूर्वा,** तस्या अप्यभावे [**उत्तरा,** तस्या अप्यभावे] **उत्तरपूर्वा**।॥ ३२४८॥

सम्प्रति प्रथमायां दिशि सत्यां शेषदिक्षु परिष्ठापने दोषमाह—

**समाही अभत्तपाणे, उवगरणे झायमेव कलहो य ।**
**भेदो गेलन्नं वा, चरमा पुण कड्ढते अन्नं ॥ ३२४९॥**

प्रथमायाम् अपरदक्षिणायां परिष्ठापने प्रचुरान्नपानलाभतः **समाधि**रुपजायते, तस्यां सत्यां द्वितीयस्यां दक्षिणायां परिष्ठापने **अभक्तपानं** भक्तपानालाभः। तृतीयस्यां [पश्चिमाया] **मनुपकरण**मुपधेरलाभः। चतुर्थ्यां दक्षिणपूर्वस्यां **स्वाध्याया**भावः। पञ्चम्याम् अपरोत्तरस्यां **कलहः** षष्ठ्यां पूर्वस्यां गच्छ**भेदः** सप्तम्यामुत्तरस्यां **ग्लानत्वम् चरमा** अष्टमी पूर्वोत्तरा कृतमृतकपरिष्ठापना **अन्यत्** मृतकं **कर्षयति,** मरणमापादयतीत्यर्थः ॥ ३२४९॥

एतदेव स्पष्टतरमाह—

**पउरण्ण-पाण पढमा, बितियाए भत्तपाण न लभंति ।**
**ततियाए उवहिमादी, नत्थि चउत्थीए सज्झाओ ॥ ३२५०॥**

**पंचमियाए असंखड, छट्टीए गणस्स भेयणं नियमा ।**
**सत्तमीए गेलन्नं, मरणं पुण अट्ठमी बेंति ॥ ३२५१ ॥**

गाथाद्वयमपि व्याख्यातार्थत्वात् सुगमम्। नवरं **पउरण्णपाण पढमा** इत्यत्र प्राकृतत्वात् सप्तम्या लोपः। ततः प्रथमायामिति द्रष्टव्यम् । **अट्ठमीति** अष्टम्यामिति ॥ ३२५० ॥ ३२५१ ॥

साम्प्रतमुक्ताऽनुक्तद्वारसङ्ग्रहार्थमाह—

**रत्ति दिसा थंडिल्ले, सिल[1]बिंबाझामिए य उस्सण्णे।**
**छित्तविभत्ते सीमा, सीयाणे चेव ववहारो ॥ ३२५२ ॥** दारगाहा ।

प्रथमं **रात्रिद्वारं**, तच्च प्रागेव सप्रपञ्चमुक्तम्। द्वितीयं **दिग्द्वारं**, तच्च भण्यमानमास्ते, तृतीयं **स्थण्डिलद्वारं** तच्च स्थण्डिलं त्रिधा **शिलारूपं**, [2]**बिम्बादिवृक्षादीनामधः**, **ध्यामितं** च। चतुर्थं **उत्सन्नद्वारं**, पञ्चमं **क्षेत्रैर्विभक्ते** भूमिभागे द्वयोर्ग्रामयोः **सीमायां** परिष्ठापनीयमित्येवं लक्षणम्।

---

१. ०लचिंचा - पु. प्रे. ॥ एवमग्रेऽपि ॥ २. चिंचा-पु. प्रे. । एवमग्रेऽपि ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षष्ठं **श्मशान** इति द्वारं, तत्र च व्यवहारो वक्तव्यः। एष द्वारगाथासङ्क्षेपार्थः ॥ ३२५२॥

साम्प्रतमेनामेव विवरीतुकामो रात्रिद्वारं किल प्रागेव सप्रपञ्चमुक्तम्, अतो दिग्द्वारस्य वक्तव्यशेषमाह—

**लब्भमाणे वा पढमाए असतीए वाघाते वा ।**
**ताहे अन्नाए वि, दिसाए पेहेज्ज जयणाए ॥ ३२५३॥** दा.२।

**लभ्यमानाया**, गाथायां पुंस्त्वं प्राकृतत्वात्, **प्रथमाया** अपरदक्षिणस्या **अभावे व्याघाते वा** सति **ततस्तस्याः** प्रथमाया दिशोऽ**न्यस्यां दिशि** द्वितीयस्यां स्थण्डिलं **यतनया प्रेक्षेत**। तस्या अपि लभ्यमानाया अभावे व्याघाते वा सति तृतीयस्याम्। एवं यावच्चरमायामपि, न च प्रागुक्तो दोषः तीर्थकराऽऽज्ञानुपालनपुरस्सरं यतनया प्रवृत्तेः। यदि पुनर्द्वितीयस्यां सत्यां तृतीयस्यां परिष्ठापयति तर्हि यो द्वितीयस्यां दोष उक्तः स प्रसजति, चतुर्थ्यां तृतीयोक्तः, एवमुत्तरोत्तरदिक्ष्वपि भावनीयम्॥३२५३॥

गतं दिकद्वारमधना स्थण्डिलद्वारमाह—



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सिलायलं पसत्थं तु, जत्थ वुत्थादि फासुयं ।**
**झामत्थंडिलमादीव, बिंबादीणं समीवे वा ॥ ३२५४॥** दा.३।

**शिलातलं** शिलातलरूपं यत् **प्रशस्तं** स्थण्डिलं तत्र परिष्ठापयन्ति। अथवा **यत्र** गोकुलमजा वा **उषिता** आदिंशब्दादन्यथा यत् प्रासुकं तत्र, यदि वा **ध्यामिते** अग्निना दग्धे प्रदेशे, आदिशब्दात् कारीषादिप्रदेशरूपे वा **स्थण्डिले**, यदि वा बिम्बादीनां वृक्षाणां समीपे यत्र महान् सार्थ उषितस्तत्र परिष्ठापयन्ति ॥ ३२५४॥

गतं स्थण्डिलद्वारमधुना उस्सण्णद्वारमाह—

**उस्सन्नतिन्निकप्पा उ, होंति खेत्तेसु केसुई ।**
**अथंडिला अदिसासुं, वा ते वि जाणिज्ज पन्नवं ॥ ३२५५॥** दा. ४।

**केषुचित्क्षेत्रेषु उस्सन्नेन** बाहुल्येन बहुकालाचीर्णाः कल्पा भवन्ति। किंविशिष्टा? इत्याह- **अस्थण्डिलाः**, तथाहि- केषुचित् ग्रामेषु नगरेषु वा एवंरूपा मर्यादा यथा एतावति प्रदेशे मृतकं त्यक्तव्यं नान्यत्र। तत्र च स्थण्डिलाभावः। ततस्तत्र धर्मास्तिकायप्रदेशनिश्रामुपकल्प्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिष्ठापयेत्। यत्रापि नदीपूरेण वर्षासु स्थण्डिलप्रदेशः प्लावितः, अन्यासु च दिक्षु स्थण्डिलव्याघातः तत्रापि धर्मास्तिकायप्रदेशनिश्रया परिष्ठापनं कुर्यात्। एतच्च प्रस्तावादुक्तम्, अन्यथा नायमाचीर्णः कल्पः। तथा केषुचित् क्षेत्रेषु **अदिक्षु** बहुकालाचीर्णाः कल्पा भवन्ति। यथा आनन्दपुरे उत्तरस्यां दिशि संयताः परिष्ठापयन्ति, ततस्तत्र तथैव परिष्ठापनं कर्त्तव्यं, नास्ति कश्चिद्दोषः। तानपि अस्थण्डिलान् अदिक्षु वा कल्पान् **प्रज्ञावान् जानीयात्** । ज्ञात्वा च तथैव समाचरेदिति ॥ ३२५५॥

गतमुस्सन्नद्वारम्। इदानीं क्षेत्रविभक्ते सीमायामिति द्वारमाह—

**खेत्तविभत्ते गामे, रायभए वा अदेंतसीमाए ।**
**भोइयमादी पुच्छा, रायपहे सीम मज्झे वा ॥ ३२५६॥** दा. ५।

**क्वचिद्** ग्रामे **कौटुम्बिकैः** क्षेत्रभूमयः **सर्वा अपि सीमाच्छेदेन** विभक्ताः। **ततः समस्तं भूमण्डलं क्षेत्रैर्निरुद्धं क्षेत्रसीमासु च न लभ्यते परिष्ठापयितुम् । कुतः ? इत्याह**–रायभए वा अदेंतसीमाए **यदि क्षेत्रसीमायां परिष्ठाप्यते तदा येषां कुटुम्बिनां सा सीमा ते राजकुले**



For Private And Personal Use Only

**गृह्यन्ते, यथा—युष्माभिरयं मारितः।** **ततः सीमायां** राजभयेन, **वाशब्दः समुच्चये,** अददत्सु **कौटुम्बिकेषु तस्य ग्रामस्य यो** भोजिको **महत्तरः स** पृच्छ्यते- **यथा क्षेत्रसीमायां वयं मृतकं परिष्ठापयामः** । आदिशब्दात् **यदि स ब्रूयात् 'आयुक्तको जानाति नाहमिति ततस्तं पृच्छ' तदा स पृच्छ्यते। यदि सोऽनुजानाति ततः सुन्दरमथ नानुजानाति तदा** राजपथे **परिष्ठाप्यते। अथवा द्वयोः ग्रामयोर्**मध्ये सीमायां **स राजावग्रह इति कृत्वा ॥ ३२५६॥**

अधुना श्मशानद्वारमाह—

**असती तू सीयाणे, रुंभण अन्नत्थ अपरिभोगम्मि ।**
**असती अणुसट्ठादी, णंतग अंताइ इयरे वा ॥ ३२५७॥** दा. ६।

राजपथस्य ग्रामद्वयमध्यस्य वा कथमप्यभावे **सीयाणे** श्मशाने परिष्ठाप्यते, अथ श्मशानपालकः श्मशानद्वारे स्थितो **निरुणद्धि** यथा- 'यद् दातव्यं तद् दत्त्वा श्मशानमभिगच्छथ' तदा **अन्यत्र अपरिभोगे** यत्राऽनाथमृतकानि परिष्ठाप्यन्ते दह्यन्ते वा तत्र परिष्ठापयन्ति । अथ तादृक् स्थानं न विद्यते तदा तस्य **असत्य**भावे तस्य श्मशानपालकस्य

**अनुशिष्टिरनुशासनम्, आदिशब्दाद्** धर्मकथा च क्रियते। अथ तथापि न ददाति तर्हि से तस्य मृतस्य यानि **णंतगानि अंताणि** प्रान्तानि तस्मै दीयन्ते। अथ तानि नेच्छन्ति तर्हि **इतराणि** नवानि दीयन्ते॥ ३२५७॥

कथम्भूतानीत्यत आह—

**अदसाइ अणिच्छंते, साहारणवयण दार मोत्तूणं ।**
**सति लंभ मुवारुहणं, सच्चेव विगिंचणाऽलंभे ॥ ३२५८॥**

**अदशानि** दशारहितानि दीयन्ते। अथ तानि **नेच्छन्ति** तर्हि **साधारणं वचनं** भण्यते-यथाऽयं कालगतोऽवतारितस्तिष्ठतु, वयं ग्रामं प्रविश्य मार्गयामः, यदि लप्स्यामहे दास्यामो नो चेत् तर्हि तवायत्तमिदं मृतकमिति एवं साधारणं वचनमुक्त्वा तत् कलेवरं श्मशान**द्वारे** अवतार्य ग्राममध्ये गमनं कुर्वन्ति। **सति लंभे**त्यादि, यदि लब्धानि सदशानि वस्त्राणि ततः प्रत्यागत्य दत्त्वा परिष्ठापयन्ति । अथ न लब्धानि तदा राजकुले **उपारोहणं** चटनं चटित्वा निवेद्यते, यथा— 'युष्मदीयः श्मशानपालकः श्मशाने व्रतिनं कालगतं मोक्तुं न ददाति, साधवो हि निष्किञ्चनाः स त्वस्मभ्यं याचते' एवं निवेद्य तस्य परुषमानीय परिष्ठापयन्ति।

एतेन यदधस्तात् द्वारगाथायां [गा.३२५२] व्यवहार इत्युक्तं तद्भावितम्। अथ राजकुलं ब्रूयात्-श्मशानपालस्यैतदायत्तं ततो यत् स ब्रूते तत् कर्त्तव्यम् । एवं राजकुले व्यवहारस्याऽलाभे **सैव विवेचना**। किमुक्तं भवति? पुनस्तत्र न गम्यते ॥ ३२५८॥

**सीयाणस्स वि असती, अलंभमाणे वि उवरि कायाणं ।**
**निसिरंता जयणाए, धम्मादिपदेसनिस्साए ॥ ३२५९॥**

अथ स स्मशानपालकः श्मशानद्वारे मृतकस्य स्थापनं न ददाति तदा **स्मशानस्याऽभावे** श्मशानद्वारे च स्थापयितु**मलभ्यमाने** अस्थण्डिलेऽपि **कायानां** हरितकायादीना**मुपरि यतनया धर्मादिप्रदेशनिश्रया** धर्मास्तिकायादिप्रदेशेष्विदं परिष्ठापयाम इति कल्पनया **निःसृजन्तः** परिष्ठापयन्तः शुद्धाः ॥ ३२५९॥

**एस सत्तण्ह मज्जाया, ततो वा जे परेण उ ।**
**हेट्ठा सत्तण्ह थोवा उ, तेसिं वोच्छामि जो विही ॥ ३२६०॥**

**एषाऽ**नन्तरोदिता **मर्यादा** विधिः **सप्तानां तेभ्यो वा** सप्तभ्यः **परेण** परतो ये

अष्टप्रभृतयस्तेषां द्रष्टव्या, ये तु **सप्तानामधस्तात् स्तोकास्तेषां यो विधिस्तं वक्ष्ये** ॥ ३२६० ॥

प्रतिज्ञातमेव करोति—

**पंचण्ह दोन्नि हारा, भयणआ आरेण पालहारेसु ।**
**ते चेव य कुसपडिमा, नयंति हारावहारो वा ॥ ३२६१ ॥**

यदि सप्तानामधस्तात् षट् भवन्ति तदा त्रयो विश्राम्य द्वौ द्वौ भूत्वा वहन्ति, एको वसतिपालः, एकस्तृणानि मात्रकं च गृह्णाति। **पञ्चानां** विधिं साक्षादाह–पञ्चानां साधूनां सम्भवे **द्वौ हरौ** वहत इत्यर्थः। तृतीयः कुशाद्यानयति, चतुर्थो वसतिपालः पञ्चमः कालगतः। पञ्चाना**मारतो** ये चतुःप्रभृतयस्तेषां वसति**पाले हरे** च **भजना** वसतिरक्षणे वहने च विकल्पना। किमुक्तं भवति? यथासम्भवमशून्यां वसतिं कृत्वा शय्यातरस्य वा निवेद्य शून्यामपि कृत्वा यथा शक्नुवन्ति तथा परिष्ठापयन्ति। तथा चाह–**त एव हरा** मृतवाहकाः **कुशप्रतिमां नयन्ति**। इयमत्र भावना–शय्यातरस्य वसतिनिवेदने कृते त्रयो विश्रम्य विश्रम्य वहन्ति यस्तु विश्राम्यति स कुशादि नयतीति। अथवा एक एव यः समर्थः स हरो भवेत् स वहतीति भावः॥ ३२६१ ॥

**एक्को व दो व उवहिं, रत्तिं वेहास दिय असुण्णम्मि ।**
**एक्कस्स य तह चेवा, छड्डुणे गुरुगा य आणादी ॥ ३२६२॥**

यदि त्रयः साधवो भवेयुस्तदा एकः कालगतः, यौ च द्वौ तौ **रात्रावुपधिं विहायसि** कृत्वा **एको द्वौ वा** वहतः **अथ दिवा** परिष्ठाप्यते तदा एकस्य मोचनेन शय्यातरभालनेन वाऽ**शून्ये** उपाश्रये कृते सति द्वाभ्यामेकेन वा ऊढ्वा परिष्ठापयितव्यः। एकस्यापि परिष्ठापने विधिस्तथैव द्रष्टव्यो यथा द्वयोरनन्तरमुक्तः। किमुक्तं भवति? रात्रावुपधिं विहायसि कृत्वा परिष्ठापयति। दिने शय्यातरभालनेन वसतिमशून्यां कृत्वा परिष्ठापयेत्। यद्येकद्वित्रिप्रभृतयः स्तोका वयं कथं वोक्ष्याम इति विचिन्त्य न परिष्ठापयन्ति किन्तु **त्यक्त्वा** गच्छन्ति तदा तेषां प्रायश्चित्तं चत्वारो **गुरुकाः**, न केवलं प्रायश्चित्तमेव किन्तु **आज्ञादयश्च** दोषाः। तन्निमित्तमपि तेषां प्रायश्चित्तमिति भावः ॥ ३२६२॥

इमे चान्ये दोषाः—

**गिहि-गोण्ण-मल्ल-राउलनिवेयणा पाणकड्ढणुड्डाहो ।**
**छक्कायाण विराहण, झामण[१] सुक्खे य वावन्ने ॥ ३२६३॥**

१. ज्ञावण - पु. प्रे । ज्झावण - मु. ॥

साधूनामभावे **गृहिणस्तं** त्यजन्ति, यदि वा **गावौ** बलीवर्दौ [१]योत्त्रयित्वा ताभ्यां गृहस्थाः कर्षयन्ति; अथवा **मल्लैः** परित्याजयन्ति, यदि वा गृहस्था **राजकुले निवेदयन्ति**। तत्र **पाणैराकर्षणे** प्रवचनस्योड्डाहः। यथा- पर्याप्तमीदृशेन धर्मेण यत्रेदृशी अवस्था प्राप्यते। एते प्रवचनविराधनारूपा दोषाः। इयं संयमविराधना असंयतैर्नीयमाने **षट्कायविराधना**। **ध्यामना** दहनं तस्य कलेवरस्य गृहस्थैः क्रियेत, ततस्तत्रापि षट्कायविराधना, तथा **व्यापन्ने** कुथिते कृमिजालसंसक्ते **शुष्के** शोषमुपगते द्वीन्द्रियविराधना ॥ ३२६३ ॥

उपसंहारमाह—

**तम्हा उ विहि तं चेव, वोढुं जे जई पच्चला ।**
**नयंति दो वि निद्दोच्चे, सद्दोच्चे ठावए निसिं ॥ ३२६४॥**



यस्मादेते अनन्तरोदिता दोषास्**तस्मात्** स्तोकैरपि परिष्ठापयितव्यम् । तत्र **विधिः प्रागुक्त एव** तथा यदि चत्वारस्तदा एको वसतिपालः शेषास्त्रयो विश्रम्य विश्रम्य कलेवरं वहन्ति।

१. टिप्पण : योक्त्रयित्वा - मु. सं. ॥

यस्तु विश्राम्यति स तृणानि मात्रकं च वहति। अथ त्रयो जना यदि वा द्वौ तदा यदि रात्रौ निर्भयं तर्हि **निद्दोच्चे** निर्भये **ये यतय** उपधिं तच्च कलेवरं वोढुं **प्रत्यला:** समर्थास्ते **द्वावपि नयन्ति**। उपधिं तच्च कलेवरं नयन्तीत्यर्थः। नीत्वा च कलेवरं परिष्ठापयन्ति। अथ बहिरुपकरणस्तेनभयं तदा रात्रावुपकरणं विहायसि विलम्ब्य द्वारं बद्ध्वा परिष्ठाप्य प्रत्यागच्छन्ति। यदि वा **सद्दोच्चे** सभये रात्रौ तत्कलेवरं **स्थापयन्ति** स्थापयित्वा बन्धन-च्छेदन-जागरणादिकां यतनां कुर्वन्ति ततो दिवसे यदि शक्नुवन्ति तदा उपकरणं गृहीत्वा परिष्ठापयन्ति। अथोपकरणं वोढुं न शक्नुवन्ति तदा शय्यातरादीनां परिनिवेद्य द्वारं स्थगयित्वा परिष्ठापयन्ति, परिष्ठाप्य भूयो वसतौ प्रत्यागच्छन्ति॥ ३२६४॥

गाथा ३२६५-३२७१ एकाकिनः परिष्ठापना-विधिः

**अह गंतुमणा चेव, तो नयंति ततो च्चिय ।**
**ओलोयणमकुव्वंतो, असढो तत्थ सुज्झए ॥ ३२६५॥**

**अथान्यं** ग्रामं ते **गन्तुमनसस्तत** उपकरणं सह **नयन्ति**, नीत्वा तत् कलेवरं परिष्ठाप्य **तत एव** परिष्ठापनप्रदेशात् परतोऽन्यं ग्रामं गच्छन्ति। **तत्र** यदुक्तमधस्तात् **कल्पा**ध्ययने

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'अवरुज्झयम्मि अवलोयणा कायव्वा' इति तदन्यग्रामगमनेनाऽशठः [**अवलोकनाम्**] **अकुर्वन् शुध्यति,** न दोषभाग् भवति ॥ ३२६५॥

**छड्डेउं जइ जंती, नायमनाया वा नाए परलिंगं ।**
**जइ कुव्वंती गुरुगा, आणादी भिंक्खुदिट्ठंतो[1] ॥ ३२६६॥**

**यदि** कालगतं **छर्दयित्वा** अपरिष्ठाप्य **गच्छन्ति** तर्हि ते विचारणीयाः। तेन ग्रामेण ते **ज्ञाता अज्ञाता वा?,** तस्य ग्रामस्य परिचिता अपरिचिता वा? इत्यर्थः । तत्र **ज्ञाते** ग्रामस्य परिचये सति **यदि** कालगतस्य **परलिङ्गं कुर्वन्ति** कृत्वा चाऽपरिष्ठाप्य गच्छन्ति तदा प्रायश्चित्तं चत्वारो **गुरुकाः, आज्ञादयश्च** दोषाः। अथाऽज्ञाते परलिङ्गं कृत्वा अपरिष्ठाप्य गच्छन्ति तदा कालगतस्य परलिङ्गदर्शनतो मिथ्यात्वगमनम्। अत्र च श्रावक**भिक्षुदृष्टान्तः**। स चाऽऽ**वश्यकटीका**तो भावनीयः ॥ ३२६६॥

अत्र ज्ञातेऽन्ये च दोषाः। तानेवाह—

१. **भिच्छु - सं P॥**



For Private And Personal Use Only

**अचियत्तमादिवोच्छेयमादि दोसा उ होंत परलिंगे ।**
**अन्नाए ओहि काले, अ कए गुरुगा य मिच्छत्तं ॥ ३२६७॥**

ज्ञाते सति **परलिङ्गे** क्रियमाणे **अचियत्तादयो**ऽप्रीत्यादयो **व्युच्छेदादयश्च दोषा भवन्ति**। तथाहि-ग्रामेयकास्तत् परलिङ्गं कृतमितरांश्च साधून् दृष्ट्वा अप्रीतिं कुर्वन्ति— 'अहो इमे संयता निःशूका निर्लज्जा मा परिष्ठाप्यो भूदिति परलिङ्गमारोप्याऽपरिष्ठाप्य त्यक्त्वा गताः। आदिग्रहणेनाऽऽगाढमिथ्यादृष्टीनां प्रीतिरुपजायते इति परिग्रहः। तत्र च व्युच्छेदादयो दोषाः। तथाहि- ते आगाढमिथ्यादृष्टयः प्रीता ब्रुवते- अहो सुन्दरमात्मनैव तैः प्रवचनस्य हीलना कृता, मा एतेषामाहारादीनि प्रयच्छथ, आदिग्रहणान्मा अत्र कोऽपि प्रव्रज्यां प्रतिपद्येत, मा सोऽप्येवंविधामवस्थां प्राप्नुयात्। एते ज्ञातानां दोषाः। अथ **अज्ञाता**ऽयतनां कृत्वा तत् कलेवरमपरिष्ठाप्य व्रजन्ति तर्हि ते यदि क्षिप्रमेव गतास्ततः स पश्चात् कालगतो देवलोके उत्पन्नो**ऽवधिं** प्रयुङ्क्ते ततः स एवं मन्येत 'अहमेतेन लिङ्गेन देवो जातः', एवं मननानन्तरं **मिथ्यात्व**गमनम्। अत्र **काले कृते** तेषां गमने प्रायश्चित्तं चत्वारो **गुरुकाः**। यस्मादेते दोषास्तस्मात् विधिना परिष्ठाप्यः॥ ३२६७॥

सम्प्रति यः कथञ्चन एकाकी जातस्तस्य परिष्ठापनाविधिमाह—

एगाणितो उ जाहे, न तरेज्ज विविंचिउं तयं सो उ ।
ताहे य विमग्गेज्जा, इमेण विहिणा सहाए उ ॥ ३२६८॥

यदा स एकाकी तकत् कलेवरं विवेक्तुं न शक्नुयात् तदा अनेन वक्ष्यमाणेन विधिना सहायान् विमार्गयेत् ॥ ३२६८॥

तमेव विधिमाह—

संविग्गमसंविग्गे, सारूविय सिद्धपुत्त सण्णी य ।
सग्गामम्मि य पुव्विं, सग्गाम असती परग्गामे ॥ ३२६९॥

अप्पाहेइ सयं वा, वि गच्छई तत्थ ठाविया अण्णं ।
असती निरच्चाए वा, काउं ताहे व वच्चेज्जा ॥ ३२७०॥

संविग्गाई ते च्चिय, असतीए ताए इत्थिवग्गेणं ।
सिद्धि-साविग-संजति, किढि मज्झिमकाय तुल्ला वा ॥ ३२७१॥

यदि तस्मिन् ग्रामे अन्येऽपि **संविग्नाः** असाम्भोगिकाः सन्ति तदा तैः सह परिष्ठापयति, तेषामभावे **असंविग्नैः** पार्श्वस्थादिभिः समम्, तेषामप्यभावे **सारूपिकसिद्धपुत्रैः**, तेषामप्यप्राप्तौ **संज्ञिभिः** श्रावकैस्समम्। एवं **पूर्वं स्वग्रामे** मार्गणा कर्त्तव्या। तत्र **स्वग्रामे** संज्ञिनाम**प्यसति** अभावे यदि **परग्रामे** स्वपक्षोऽस्ति तत्र कञ्चित् प्रेषयति। अन्यस्य तथाविधस्य प्रेषणयोग्यस्याऽभावे **अप्पाहइत्ति** अन्यं गच्छन्तं सन्दिशति । अन्यस्यापि गच्छतोऽसम्भवे कालगतस्य पार्श्वे कञ्चित् **स्थापयित्वा स्वयम**न्यग्रामं **गच्छति**। गत्वा सपक्षमन्यमानयति। अथ स कोऽपि न विद्यते यः कालगतस्य पार्श्वे स्थाप्यते तर्हि यत्र काकादिभिर्न भक्ष्यते तत्र **निरत्यये** निरपाये स्थाने कालगतं **कृत्वा ततो**ऽन्यग्रामं **व्रजेत्**। गत्वा **संविग्नादी**नानयति प्रथमतः संविग्नान् साम्भोगिकानानीय तैः समं परिष्ठापयति, तेषामलाभे असाम्भोगिकैरपि, तेषामप्यभावे असंविग्नैः पार्श्वस्थादिभिः, तेषामप्यसति सारूपिकसिद्धपुत्रैः, तेषामप्यप्राप्तौ श्रावकैस्समं, तेषामप्यभावे **स्त्रीवर्गेण**। तत्र क्रममाह-प्रथमतः सारूपिकीभिः सिद्धपुत्रीभिरतुल्यवयोभिः, तासामप्यलाभे श्राविकाभिरतुल्यवयोभिः, तासामप्यभावे वृद्धाभिः संयतीभिः, तासामप्यप्राप्तौ मध्यमवयोभिः संयतीभिः, तासामप्यलाभे **तुल्याभिर**पि तुल्यवयोभिरपि संयतीभिः ॥ ३२६९ ॥३२७० ॥ ३२७१ ॥

**गणभोइए व जुंगित, संबरमादी मुहा अणिच्छंति ।**
**अणुसट्ठी अदसादी, तेहि समं तो विविंचेइ ॥ ३२७२ ॥**

तुल्यवयसामपि संयतीनामभावे मल्ल**गणं** वा हस्तिपालगणं वा कुम्भकारगणं वा समुपतिष्ठति। ततो यान् ते सहायान् ददति तैः समं परिष्ठापयति। गणानामभावे **भोजिकं** ग्राममहत्तरमुपतिष्ठते, ततो यान् स सहायान् ददाति तैस्सह परिष्ठापयति । तत्रापि सहायानामलाभे ये **जुङ्गिका** हीनजातयो हीनकर्माणश्च **सम्बरादयः** सम्बराः कचवरोत्सारकाः, आदिशब्दान्नखशोधकस्थानरक्षकक्षालकादिपरिग्रहः। तेषामनुशिष्टिं ददाति, ततस्तैः सहायैः परिष्ठापयति। अथ ते **मुधा नेच्छन्ति** तदा येऽन्ये जातिजुङ्गिका वरुडादयस्तेषा**मनुशिष्टिं** ददाति। अथ तेऽपि मुधा नेच्छन्ति तदा तेषा**मदशानि** वस्त्राणि मूल्यं दीयते। अदशानामनिच्छायां सदशान्यपि ततस्तैः **समं विवेचयेत्** ॥ ३२७२ ॥

**अह रुंभिज्ज दारट्ठो, मुल्लं दाऊण णीणह ।**
**अणुसट्ठादी तु तहिंपि व अन्नो वा भणती जदि ॥ ३२७३ ॥**

तस्मिन् कालगते कदाचित् रात्रौ नीयमाने **द्वारस्थो** द्वारं न दद्यात् । यदि किञ्चित् प्रयच्छ ततो निष्काशं ददामि। क्वचिद् देशे पुनरयमाचारो दिवसेऽपि मृतकं द्वारपालस्य किञ्चिद्दत्वा निष्काश्यते तस्य रुन्धतो**ऽनुशिष्टिः** कर्त्तव्या, **आदि**शब्दाद्धर्मकथापि। तत्र **यदि** नेच्छति ततो **यद्यन्यः** कोऽपि धर्मकथामनुशिष्टिं वा श्रुत्वा **ब्रूते** ॥ ३२७३॥

किं ब्रूते? इत्याह—

**मुंच दाहामहं मुल्लं, उवेहं तत्थ कुव्वती ।**
**अदसादीणि वा देती, असती साहारणं वदे ॥ ३२७४॥**

**जइ लब्भामो आणेमो, अलद्धे तं वियाणतो ।**
**सो वि लोगरवा भीतो, मुंचते दारपालओ॥ ३२७५॥**

**मुञ्चा**ऽमुं साधु**महं** ते **मूल्यं दास्यामि, तत्रोपेक्षां** साधुः **कुरुते**, न तं मूल्यं प्रयच्छन्तं वारयति। अथान्यः कोऽपि नैवं भणति तदा **अदशानि** वस्त्राणि **ददाति**, तेषामनिच्छायां सदशान्यपि। अथ च वस्त्राणि सदशान्यदशानि वा न सन्ति तदा तेषा**मभावे साधारणं वदेत्**।

तथाहि- **यदि लप्स्यामहे** तत **आनेष्यामः। अलाभे त्वमेतस्य** कलेवरस्य **विज्ञायकः**। एवं साधारणे उक्ते **सोऽपि** द्वारस्थो **लोकरवभीतो** नियमात् **मुञ्चति,** अमोचने तत्रैव मुक्त्वा वस्त्रोत्पादनाय गच्छति, गत्वा अन्तं प्रान्तं वा वस्त्रमानयति। अलाभे सोऽपि **द्वारपालो** मृतके[1] पार्श्वस्थे लोकेन हील्यते, ततो मुहूर्त्तानन्तरं स स्वयमेव मुञ्चति ॥ ३२७५ ॥

अज्ञातविषयेऽपवादमाह—

**अन्नाए वा वि परलिंगं, जयणाए काउं वच्चती ।**
**उवयोगट्ठा नाऊणं एस विही असहाये ॥ ३२७६ ॥**

अथवा **अज्ञाते** अपरिचये ग्रामरूपे **यतनया** कालगतस्य **परलिङ्गं कृत्वा व्रजति**। कया यतनया? इत्याह-**उपयोगार्थं ज्ञात्वा** एतावता कालेन तस्य कालगतस्य उपयोगलक्षणोऽर्थोऽभूत्, नातः परं परलिङ्गकरणेऽपि कश्चिद्दोष इति ज्ञात्वा **एष विधिः असहाये** असहायस्य एकाकिनो द्रष्टव्यः, न तु द्विप्रभृतीनामपीति ॥ ३२७६ ॥

१. मृतकेन हील्यते - मु. ॥

**एएण सुत्तं न गयं, सुत्तनिवातो उ पंथ गामे वा ।**
**एगो व अणेगे वा, हविज्ज वीसुंभिया भिक्खू ॥ ३२७७॥**

यदेतत् व्याख्यात**मेतेन न सूत्रं गतं** किन्तु सामाचारीप्रकाशननिमित्तं सर्वमेतत् व्याख्यातम्। सम्प्रति यदधः प्रतिपादितः **सूत्रनिपातः पथि ग्रामे** वेति, तदिदानीं व्याख्यायते **एको वा अनेके वा भवेयुर्विष्वग्भूताः भिक्षवः** । इयमत्र भावना-अत्र चत्वारो भङ्गाः, एकेन साधुना एकः कालगतो दृष्टः १, एकेनाऽनेके २ अनेकैरेकः ३ अनेकैरनेके ४ ॥ ३२७७॥

तत्र प्रथमभङ्गमधिकृत्य विधिमाह—

**एगाणियं तु गामे, दट्ठुं सोउं विगिंचण तहेव ।**
**जा दाररुंभणं तू, एसो गामे विही वुत्तो ॥ ३२७८॥**

**ग्रामे** एकाकी **एकाकिनं** कालगतं संविग्नमसंविग्नं वा **दृष्ट्वा** श्रुत्वा वा **विवेचनं** परिष्ठापनं **तथैव** कुर्यात् यथोक्तमनन्तरं तावद्**यावत् द्वारे निरोधनम्।** एवं शेषेष्वपि भङ्गेषु संविग्नशरीरं वा असंविग्नशरीरं वा प्रागुक्तेन विधिना परिष्ठापयितव्य**मेष ग्रामे विधिरुक्तः** ॥ ३२७८॥

सम्प्रति पथि विधिमभिधित्सुराह—

**एमेव य पंथम्मि वि, एगमणेगे विगिंचणा विहिणा ।**
**इत्थं जो उ विसेसो, तमहं वोच्छं समासेण ॥ ३२७९ ॥**

**एवमेव** अनेनैव प्रागुक्तेन प्रकारेण **पथ्यपि एकस्यानेकस्य** च **विधिना विवेचना** परिष्ठापना द्रष्टव्या। नवरमत्र **यो विशेषस्तमहं समासेन वक्ष्ये** ॥३२७९ ॥

**एगो एगं पासति, एगो णेगे अणेग एगं वा ।**
**णेगाऽणेगे ते पुण, संविग्गितरे व जे दिट्ठा ॥ ३२८० ॥**

तत्र एकानेकभेदप्रतिपादनार्थमाह—**एक एकं पश्यतीति** प्रथमो भङ्गः १, **एकोऽनेकान्** २, **अनेके एकम्** ३, **अनेके अनेकान्** ४, तत्र **ये दृष्टास्ते संविग्ना** भवेयुरसंविग्ना वा सर्वथा परिष्ठापना कर्त्तव्या। अन्यथा प्रवचनोपघातसम्भवात् ॥ ३२८० ॥

सम्प्रति विशेषप्रतिपादनार्थमाह—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वइक्कंते भिन्ने नियट्टे सोऊणं पंच वि पयाइं ।**
**मिच्छत्त अन्नपंथेण, कड्ढणा झामणा जं च ॥ ३२८१ ॥**

व्यतिक्रान्तं नाम जीवितादतिक्रान्तं व्यपगतजीवमिति भावः। भिन्नं श्वादिभिर्विकीर्णं, कुथितमकुथितं वा, तस्मिन् **व्यतिक्रान्ते भिन्ने**, उपलक्षणमेतत् अभिन्ने वा **श्रुते निवृत्त्य** यथोक्तविधिना तत् परिष्ठापयेत्। यदि पुनः **श्रुत्वा एकमपि** पदं गच्छति तदा आज्ञादीनि **पञ्चापि पदानि** तस्य प्रसजन्ति। न केवलमाज्ञादीनि पञ्च पदानि किन्तु इमान्यपि मिथ्यात्वादीनि प्रसजन्ति। तद्यथा— श्रुत्वा यदि परिष्ठापनाभया**दन्यपथेन** उन्मार्गेण मार्गेण वा अन्यग्रामाभिमुखं व्रजति तदा न स यथावादकारीति तस्य **मिथ्यात्वम्** । **कड्ढण**त्ति, गृहिगवाद्याकर्षणे यत् प्रायश्चित्तं तदपि प्राप्नोति। तथा **झामण**त्ति ध्यामनम् अग्निकायेन यदि तस्य कलेवरस्य क्रियते तदा **ध्याम**ननिष्पन्नमपि तस्य प्रायश्चित्तमापद्यते, यच्चान्यत् तदपि प्राप्नोति। किं तद्? इति चेत्, यावन्तः प्राणा सम्मूर्च्छन्ति तावन्तो विराध्यन्ते, यावन्तश्चाऽऽगन्तुकाः प्राणविराधनामाप्नुवन्ति तत्सर्वमपरिष्ठापयन् प्राप्नोति। अथवा श्रुत्वा पदमात्रातिक्रमेऽपि पञ्चापि पदानि प्राप्नोति। कानि तानि? इत्यत आह— मिथ्यात्वम् अयथावादकारित्वाद् १, अन्यपथेन व्रजति तन्निमित्तं प्रायश्चित्तं २, गृहस्थादिभिराकर्षणे तन्निष्पन्नम् ३, अग्निकायेन दहने तद्धेतुकम् ४,



For Private And Personal Use Only

यच्चान्यत् संमूर्च्छितागन्तुकप्राणजातिविराधनाजं तदपि ५ ॥३२८१॥

साम्प्रतमेनामेव गाथां व्याचिख्यासुरिदमाह—

**तं जीवातिक्कंतं, भिन्नं कुहितेयरं वा सोऊणं ।**
**एगपयं पि नियत्ते, गुरुगा उम्मग्गमादी वा॥ ३२८२॥**

**तत्** कलेवरं **जीवातिक्रान्तं** व्यतिक्रान्तमुच्यते, **भिन्नं** श्वादिभिर्विकीर्णं तच्च **कुथितम-कुथितं वा,** उपलक्षणमेतत् अभिन्नं **वा श्रुत्वा एकपदमपि** न गच्छति किन्तु **निवर्त्तते।** अन्यथा एकपदातिक्रमेऽपि प्रायश्चित्तं चत्वारो **गुरुकाः, उन्मार्गादौ** वा उन्मार्गगमनादौ वा प्रत्येकं प्रायश्चित्तं चत्वारो गुरुकाः॥ ३२८२॥

**आणादी पंच पदे, नियत्तणे पावए इमे अन्ने ।**
**मिच्छत्तादी व पदे, कमविक्खेवादि जं पंच ॥ ३२८३॥**

न केवलमनिवर्त्तने प्रायश्चित्तं किन्तु **आज्ञादीनि पञ्च पदानि** प्राप्नोति। तद्यथा- आज्ञा १ अनवस्था २ मिथ्यात्वम् ३ आत्मविराधना ४ संयमविराधना च ५। न केवलममूनि पदानि

किन्तु **इमान्यपि मिथ्यात्वादीनि पदान्य**न्यानि प्राप्नोति। तानि च प्रागेव भावितानि, अथवा पञ्चापि पदानि प्राप्नोति इत्युक्तं, तत्र तान्येव पञ्चपदानि द्वारगाथया दर्शयति-**क्रमविक्षेपात्** पादविक्षेपात् **यानि पञ्च** पदानि मिथ्यात्वादीनि, मिथ्यात्वम् १ अन्यपथेन प्रव्रजनम् २ गृहस्थादिभिराकर्षणम् ३ अग्निकायेन दहनं ४ यच्चान्यत् सम्मूर्च्छिताऽऽगन्तुकप्राणजाति-विराधनमिति तानि प्राप्नोति। तदेवं पञ्चपदानीत्यस्य व्याख्यानं द्विधा कृतम् ॥ ३२८३॥

सम्प्रति 'कर्षणपदं पञ्च' इति व्याख्यानयति—

**गोणादि जत्तियातो, व पाणजाती उ तत्थ मुच्छंति ।**
**आगंतुगा व पाणा, जं पावंते तयं पावे ॥ ३२८४॥**

**गवादयो** यत् समाकर्षयन्ति, **यावन्तो वा प्राणजातयस्तत्र** कलेवरे **मूर्च्छन्ति, आगन्तुका वा प्राणा यत् प्राप्नुवन्ति** तदेतत् सर्वं सोऽनिवर्त्तमानः **प्राप्नोति**। शेषपदानि सुगमानीति कृत्वा न व्याख्यातानि ॥ ३२८४॥

अधुना विवेचनमाह—

**दट्ठुं सोउं वा अव्वावण्णं विगिंचए विहिणा ।**
**वावन्ने परलिंगं, उवही नातो अनातो वा ॥ ३२८५ ॥**

पथि कालगतं **दृष्ट्वा** यदि [वा]पथि कालगत इति अन्यतः **श्रुत्वा** यदि तत् कलेवर**मव्यापन्नम्** अविभिन्नमित्यर्थः। ततः पूर्वोक्तेन **विधिना विवेचयेत्**। अथ स एकाकी ततः परिष्ठापयितुं न शक्नोति, यदि वा शक्नोति परं बहवः मृतास्ततः परलिङ्गं कृत्वा व्रजति। अथ तत् **व्यापन्नं** तदा तस्मिन् **परलिङ्गं** कर्त्तव्यम् । परलिङ्गकरणं नाम यत्तस्योपधिग्रहणं, स **चोपधिर्द्विधा-ज्ञातो** वा **अज्ञातो वा** । ज्ञातो नाम यथैतत् साम्भोगिकस्य साधोरुपकरणम्, अज्ञातो नाम यो न ज्ञायते किमेष साम्भोगिकस्य किंवा असाम्भोगिकस्य? इति, तत्र ज्ञातोऽज्ञातो वा तस्योपधिर्ग्रहीतव्यः ॥ ३२८५ ॥

अथ कस्मात् परलिङ्गं क्रियते? तत आह—

**मा णं पिच्छंतु बहू, इति नाए वी करेइ परलिंगं ।**
**गहियम्मि वि उवगरणे, परलिंगं चेव तं होइ ॥ ३२८६ ॥**

**मा** अमुं **बहवो** जनाः **प्रेक्षन्तामिति** कृत्वा **ज्ञातेऽपि** तस्मिन् कालगते **परलिङ्गं क्रियते।** किं तत् परलिङ्गकरणम्? इति चेद्, अत आह— **गृहीते चोपकरणे परलिङ्गमेव तद्भवति** साधुलिङ्गाभावात् ॥ ३२८६॥

सम्प्रति ज्ञातस्य वाऽज्ञातस्य वोपधिग्रहणे विधिमाह—

**सागारकडे एक्को, मणुन्नदिन्नोग्गहो भवे इतो ।**
**अमणुन्ने अप्पणता, न गेण्हती दिज्जमाणं पि ॥ ३२८७॥**

**सागारकृतं** नाम यत् स्वयं नात्मार्थीकृतं किन्तु आचार्या एतस्य विज्ञायका इति बुद्ध्या परिगृहीतं, तस्मिन् **सागारकृते एकः** प्रथमोऽवग्रहः, यदि साम्भोगिकस्योपधिरयमिति ज्ञातस्तदा आचार्यसमीपं गत्वा निवेद्य आचार्यस्य समर्पयति, तत्र यद्याचार्यो ब्रूते– त्वमेवामुमुपधिं परिभुंक्ष्व, ततो 'मस्तकेन वन्दे' भणित्वा अन्येषां साधूनां निवेदयति, यथा– 'क्षमाश्रमणैरेतत् वस्त्रं पात्रं वा मह्यं दत्तमिति'। ततस्ते ब्रुवते– 'आरोग्यधारणीयं क्षमाश्रमणानां गुणैर्वर्द्धस्व।' एवं **मनोज्ञस्य** साम्भोगिकस्योपधे**र्दत्तस्याऽवग्रहो** विधेयः। अथा**ऽमनोज्ञस्य** स उपधिस्तर्हि तं गुरोः समर्पयति। तं च गुरुणा **दीयमानमपि न गृह्णाति** असाम्भोगिकसत्कत्वात् ॥ ३२८७॥

तर्हि कथं तत् कर्त्तव्यम्? इत्याह—

**इयरेसिं घेत्तूणं, एगंते परिट्ठवेज्ज विहिणा उ ।**
**अण्णाए संविग्गोवहिम्मि कुज्जा उ घोसणयं ॥ ३२८८॥**

तत **इतरेषाम**साम्भोगिकानां लिङ्गमात्रोपजीविनां वा सम्बन्धी यदि ज्ञातो भवति तर्हि आचार्याणां तथैव निवेदनीयम् । तत्र यद्यन्य उपधिर्नास्ति ततः कारणे आचार्यो ब्रूते- 'परिभुङ्क्ष्व अमुमुपधिमिति'। तेन च तथेति प्रतिपत्तव्यम् । अथान्य उपधिः समस्ति तदा सूरिवचनात् तं **गृहीत्वा एकान्ते परिष्ठापयेत्**। अथ न ज्ञातो भवति किमयमुपधिः संविग्नानामिति तदा **अज्ञाते संविग्नोपधौ** विधिना **घोषणां कुर्यात्** ॥ ३२८८॥

**सूत्रम् — सागारिए उवस्सयं वक्कएणं पउंज्जेज्जा, से य वक्कइयं वएज्जा-'इमम्मि य इमम्मि य ओवासे समणा निग्गंथा परिवसंति । से सागारिए परिहारिए । से य नो वएज्जा, वक्कइए वएज्जा, से सागारिए परिहारिए । दो वि ते वएज्जा, दो वि सागारिया पारिहारिया ॥२१॥**

**सूत्रम् — सागारिए उवस्सयं विक्किणेज्जा, से य कइयं वएज्जा-'इमम्मि य इमम्मि य ओवासे समणा निग्गंथा परिवसंति से सागारिए परिहारिए। से व नो वएज्जा, कइए वएज्जा से सागारिए परिहारिए । दो वि ते वएज्जा दो वि सागारिया परिहारिया ॥२२॥**

'सागारिए उवस्सयं' इत्यादि सूत्रद्वयम्। अस्य सम्बन्धमाह—

**उग्गह एव अहिकितो, इमे उ सुत्ता उ उग्गहे चेव ।**
**साहम्मिय सागारिय, नाणत्तमिणं दुवेण्हं पि ॥ ३२८९॥**

**अवग्रहः** पूर्वसूत्रेऽ**धिकृतः, इमे अपि** चाधिकृते द्वे अपि **सूत्रे अवग्रह**विषये ततोऽवग्रहप्रस्तावादस्य सूत्रद्वयस्यात्रोपन्यासः, नवरं पूर्वसूत्रे **साधर्मिक** उक्तोऽस्मिन् **सागारिकः** शय्यातर **इति नानात्वं द्वयोरपि**॥ ३२८९ ॥ तदेवमुक्तः सम्बन्धः, अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**सागारिकः** शय्यातरः स **उपाश्रयमवक्रयेण** कियत्कालं भाटकप्रदानेन **प्रयुञ्जीत** व्यापारयेत्, स च सागारिकोऽवक्रायिकं भाटकेन प्रतिग्राहकं **वदेत्- अस्मिन्नस्मिन्नवकाशे श्रमणा निर्ग्रन्थाः परिवसन्ति** तस्मादेतत्परिहारेण त्वया भाटकेन ग्रहीतव्यमेवमुक्ते **स**

**सागारिकतया परिहार्यः** परिहर्त्तव्यः । अथ तेन पूर्वस्वामिना सागारिकेण सर्वमपि भाटकेन प्रदत्तं ततो **न** किमपि **वदेत्,** केवल**मवक्रयिको वदेत्**- अस्मिन् अस्मिन् अवकाशे श्रमणाः निर्ग्रन्थाः परिवसन्तु, तदा अवक्रायिकः **सागारिकः** शय्यातर इति **परिहार्यः** परिहर्त्तव्यः। अथवा **द्वावपि वदेयातां** यथा- पूर्वस्वामिनोक्तमेतावत्येकदेशे श्रमणाः सन्तु, तावत्यमातः साधून् दृष्ट्वाऽवक्रयिको ब्रूयाद्-एतावति मदीयेऽपि प्रदेशे तिष्ठन्तु। एवं विक्रयसूत्रमपि भावनीयम्। तदा **द्वावपि तौ सागारिकौ** शय्यातरौ इति परिहार्याविति सूत्रद्वयाक्षरार्थः, सम्प्रति भाष्यविस्तरः—

**वक्कइयसालठाणे, चउरो मासा य हवंतऽणुग्घाया ।**
**दियरातो असिवावण, भिक्खगते भुंजणगिलाणे ॥ ३२९० ॥**

वक्रयेण कियत्कालं भाटकप्रदानेन निवृत्ता वाक्रयिकी, सा चासौ शाला च **वाक्रयिक-शाला,** तद्रूपे **स्थाने,** शालाग्रहणम् उपलक्षणं तेनापद्वारिकास्थाने वा गृहे वा इत्यपि द्रष्टव्यम्, यदि तिष्ठन्ति साधवस्तदा तेषां प्रायश्चित्तं **चत्वारो मासा अनुद्घाता** गुरवो भवन्ति। यतस्तत्र

इमे दोषाः- सा शाला अपद्वारिका वा पूर्वं संयतानां दत्ता पश्चात् कोऽपि तद्ग्रहणाय रूपकान् ददाति 'ममेमां शालामपद्वारिकां गृहं वा कियत् कालं भाटकेन प्रयच्छत।' ततः स रूपकलोभेन संयतान् निष्काशयेत, **दिवा रात्रौ** वा उभयत्रापि निष्काशने स्पर्धकपतेराचार्यस्य वा प्रत्येकं प्रायश्चित्तं चतुर्गुरुकम्। रात्रौ निष्काशने श्वापदद्विविधस्तेनतो**ऽशिवापनं** विनाशप्राप्तिरित्यर्थः। अन्यां च वसतिं मार्गयतामप्यलभमानानां जनगर्हा यद्येतेषां शुभं कर्म ततः पूर्वोपाश्रयादपि न निष्काश्येरन् अन्यां वा वसतिं लभेरन्। **भिक्खगय**त्ति, संयता एकं वसतिपालं मुक्त्वा शेषा भिक्षार्थं गताः पश्चात् स एकाकी वसतिपालो निष्काश्येत। **भुंजण** त्ति, भोक्तुकामा वा निष्काश्येरन्। तत्र चोभयत्रापि जनगर्हा। **ग्लानो** वा कोऽपि वर्त्तते सोऽकाण्डे निष्काशितः कथं क्रियते? तदेवं शालामधिकृत्योक्तम्॥ ३२९०॥

इदानीमुपलक्षणव्याख्यानसूचितामपद्वारिकां गृहं च वाक्रयिकमधिकृत्योक्तदोषयोजनां साक्षादाह—

**उव्वरिय गिहं वा वि, वक्कएण पउंजए ।**
**पउत्ते तत्थ वाघातो, विणासगरिहा धुवा ॥ ३२९१॥**

**अपद्वारिकां गृहं वा** यत् शय्यातरो **वक्रयेण प्रयोजयति** तत्र स्थाने तदेव पूर्वोक्तं प्रायश्चित्तम्। यतो वक्रयेण **प्रयुक्ते तत्र** गृहादौ बलादकाण्डनिष्काशने सूत्रार्थ**व्याघातः** रात्रौ च निष्काशने च श्वापदस्तेनै**र्विनाशः**। अन्यवसत्यलाभे भिक्षागतादिनिष्काशने वा **ध्रुवा** लोके **गर्हा**। एतच्च सर्वं प्रागेव भावितमिति न भूयो भाव्यते ॥ ३२९१ ॥

**एगदेसम्मि वा दिन्ने, तन्निस्सा होज्ज तेणगा ।**
**रसालदव्वगिद्धा वा, सेहमादी उ जं करे ॥ ३२९२॥**

शालाया अपद्वारिकाया गृहस्य वा **एकदेशे** दत्ते अन्तरा कटके प्रक्षिप्ते यदि तिष्ठन्ति तदा **तन्निश्रया** संयतनिश्रया **स्तेनका** चौरा **भवेयुः**। संयतेषु कायिकभूमिं गतेषु स्तेनाः प्रविश्य गृहस्थानां भाण्डकमपहरेयुः, अथवा **रसालं** रसवत् यत् तत्र **द्रव्यं तद् गृद्धाः शैक्षकादयो** वा **यद**कृत्यं तत् **कुर्युः** [चोरयेयुरित्यर्थः]। ततो गृहस्थेन संयता शङ्क्यन्ते। यथा- नूनमेतैरस्मद्भाण्डमपहृतम्। अथवा एतेषां द्वारेण स्तेनैरपहृतं, यदि वा एतैरेव संयतैः कस्यापि दुःस्थितस्य सम्प्रदत्तमिति। एवं शङ्कायां स विनाशं वा कुर्यात्। यदि वा राजकुलेऽन्यत्र वा नीत्वा[शिक्षां प्रदापयेत् यदि वा] ग्रामबृहत्पुरुषपार्श्वे कर्षणम्। तत्र च भूयसी जनगर्हेति ॥ ३२९२ ॥

**पेहा-वियार-झायादी, जे उ दोसा उदाहिया ।**
**अच्छंते ते भवे तत्थ, वयए भिण्णकप्पता ॥ ३२९३॥**

**ये दोषाः** पूर्वं **कल्पा**ध्ययने मद्योदक-धान्यशालादिषु सागारिके चोपाश्रये **प्रेक्षायां विचारभूमौ स्वाध्यायादौ** वाऽ**भिहिता**स्ते तत्र शालादीनामेकदेशे **तिष्ठति भवेयुः**। अथैतद्दोषभयादन्यत्र **व्रजति** तर्हि **भिन्नकल्पता** दोषो मासकल्पे वर्षाकालकल्पे वा अपरिपूर्ण एव सति निर्गमात् ॥ ३२९३॥

सम्प्रति 'भिक्खगतेत्ति' एतद्व्याख्यानार्थमाह—

**भिक्खं गतेसु वा तेसु, वक्कवी बेइ णीह मे।**
**णीणिए वावि पाले णं, उवहिस्सासिवावणा ॥ ३२९४॥**

**भिक्षां गतेषु** [गच्छत्सु इत्यर्थः] **वा तेषु** साधुषु **वक्रयी** भाटकेन गृहीतशालादिको **ब्रूते**-यथा **निर्गच्छत** यूयं **मम** गृहात् तदा भिक्षाटनव्याघातः। तत्कालमन्यवसत्यलाभे जनगर्हा सूत्रार्थव्याघातश्च। अथवा तेषु भिक्षां गतेषु पश्चादागत्य वसति**पालं निष्काशयति,** तस्मिन्

निष्काशिते णमिति वाक्यालङ्कारे, **उपधेः** स्याद**शिवापनं** स्तेनैरपहरणं विस्मरणतो वा नशनमिति ॥ ३२९४ ॥

**अहवा भरियभाणा उ, आगते जइ निच्छुभे ।**
**भत्तपाण विणासो उ, भुंजए साऽऽगते इमे ॥ ३२९५ ॥**

अथ भक्त**भृतभाजनानागतान् यदि निष्काशयति** तदा गृहीत**भक्तपानविनाशः**। गतं भिक्षागतद्वारम्। अधुना भोजनद्वारमाह-अथ **भुञ्जानेषु** साधुषु स वक्रयी **समागतः**। तदा **इमे** वक्ष्यमाणा दोषाः ॥ ३२९५ ॥

तानेवाह—

**जिया अट्ठिसरक्खा वि, लोगो सव्वो वि बोट्टितो ।**
**पगासिए य अन्नेसिं, हीला होइ पवयणे ॥ ३२९६ ॥**

साधून् साधुक्रियया भुञ्जानान् दृष्ट्वा स विपरिणतभावो ब्रूते '**जिता एतैरस्थिसरजस्का अपि** कापालिकाः' तेभ्योऽप्यमी हीनाचारा इति भावः। तथा **लोकः सर्वो**ऽप्येतैः

पाणकैरिवैकत्र भुञ्जानै**र्बोटितो** विट्टालितः। न केवलं स एवं तत्र ब्रूते किन्त्वन्येषामपि जनानां स प्रकाशयति, **प्रकाशिते चाऽन्येषां प्रवचनस्य हीला** भवति॥ ३२९६॥

'भुंजण' त्ति व्याख्यातम्, अधुना ग्लानद्वारमाह—

**सीयवायाभितावेहि, गिलाणो जं तु पावती ।**
**अमंगलं भउक्खित्ते, ठाणमन्नो वि नो दए ॥ ३२९७॥**

**शीतेन वातेन अभितापेन** च **ग्लानो यद्** [1]आगाढादिपरितापनं **प्राप्नोति** तन्निष्पन्नं स्पर्द्धकपतेराचार्यस्य वा प्रायश्चित्तं, तथा तैः निष्काशितैः ग्लान उत्क्षिप्तः, तस्मि**न्नुत्क्षिप्ते** वसतिमन्यां मार्गयतां मृतोऽयमित्य**मङ्गलमिति** कृत्वा मारिस्पृष्टोऽयमिति **भयेन** वा **अन्योऽपि** कश्चित् **स्थानं न ददाति**॥३२९७॥

**गहिते उत्थाणरोगेण अच्छंते नीणियम्मि वा ।**
**वोसिरियम्मि उड्डाहो, धरणे चाऽऽयविराहणा ॥ ३२९८॥**

१. अनागा० पु. प्रे. ॥

तथा ग्लाने **उत्थानरोगेणा**ऽतीसाररोगेण **गृहीते तिष्ठति निष्काशिते** वाऽतीसारदोषस्तथा चाह- **व्युत्सृष्टे उड्डाहो धरणे चाऽऽत्मविराधना** मरणस्य गाढतरग्लानत्वस्य वा भावात् ॥ ३२९८॥

उपसंहारमाह—

**एए दोसा जम्हा, तहियं होंति उ ठायमाणाणं**
**तम्हा न ठाइयव्वं, वक्कयसालाए समणेहिं ॥ ३२९९॥**

**यस्मात् तत्र** वक्रयशालादौ **तिष्ठतामेते** अनन्तरोदिता **दोषा भवन्ति तस्मात्** तस्यां **वक्रयशालायाम्**, उपलक्षणमेतत् वक्रयापद्वारिकायां वक्रयगृहे वा **श्रमणैर्न स्थातव्यम्** ॥३२९९॥

अत्र परस्यावकाशमाह—

**एवं सुत्तं अफलं, सुत्तनिवातो उ असति वसहीए ।**
**बहिया वि असिवादी, उ कारणे तो न वच्चंति ॥ ३३००॥**

यदि नाम वक्रयशालादौ न स्थातव्यं तर्हि **सूत्रमधिकृतमफलं,** सूत्रे वक्रयेऽपि श्रमणानामवस्थानानुज्ञानात्। सूरिराह-नेदं सूत्रमफलम् यतोऽस्य **सूत्रस्य निपातो**ऽवकाशो **वसतेरन्यस्या अभावे बहिरपि** निर्गच्छता**मशिवादिकं कारणं ततो न व्रजन्ति** किन्तु तत्रैव वक्रयशालादौ तिष्ठन्ति॥ ३३००॥

तत्र यतनामाह—

**एएहिं कारणेहिं, ठायंताणं इमो विही तत्थ ।**
**छिंदंति तत्थ कालं, उउबद्धे वासवासे वा ॥ ३३०१॥**

एतैरनन्तरोदितैरन्यत्र वसत्यलाभे बहिरशिवादिलक्षणैः **कारणैस्तत्र** वक्रयशालादौ **तिष्ठतामयं** वक्ष्यमाणो **विधिः**। तामेवाह- **तत्र कालं छिन्दन्ति ऋतुबद्धे वर्षावासे वा।** इयमत्र भावना-ऋतुबद्धे शय्यातरं प्रति भण्यते-यदि संपूर्णं मासं ददासि, वर्षाकाले भण्यते-यदि चतुरो मासान् ददासि तर्हि तिष्ठामः। अथ न ददासि तर्हि न तिष्ठामः॥ ३३०१॥

एतदेवाह—

**मासचउमासियं वा, न विनिच्छोढेव्वा उ अम्ह नियमेण ।**
**एवं छिन्नठियाणं, वक्कइतो आगतो होज्जा ॥ ३३०२॥**

ऋतुबद्धे काले **मासं** वर्षाकाले **चतुर्मासं नियमेन वयं न निष्काशयितव्याः, एवं च्छिन्ने** काले शय्यातरेण तथैव प्रतिपन्ने तिष्ठन्ति । तेषां च तथा **तिष्ठतां वक्रयिको** वक्रयेण ग्राही **आगतो भवति** ॥ ३३०२॥

**दिन्ना व भूणएणं, अहवा लोभा सयं पि देज्जाहि ।**
**अणुलोमिज्जइ ताहे, अदेंते अणुलोमे वइक्कइयं ॥ ३३०३॥**

शय्यातरो वसतिं दत्त्वा प्रवसितः, पश्चात् पुत्रस्य समीपे वक्रयी समागतः, स ब्रूते-यत्र संयतास्तिष्ठन्ति तन्मे भाटकेन प्रयच्छ। [ततश्च] सा वसतिर्**दत्ता**ऽभूत्। **केन? भ्रूणकेन** पुत्रेण। **अथवा** शय्यातरः प्रभूतकभाटक**लोभेन स्वयमपि** वक्रयिणो **दद्यात्** दत्त्वा च निष्काशयेत् । तत्र यद्यन्या वसतिर्लभ्यते तर्हि तत्र स्थातव्यम् अन्यवसत्यलाभे स धर्मकथया **अनुलोम्यते** अनुकूलः क्रियते। अथ स धर्मकथयानुलोभी न भवति तर्हि यस्तस्याभ्यर्हितो

गरीयान् पितामहमातामहप्रभृतिकस्तेनानुलोमी क्रियते, अथैवमपि स **न ददाति** स्थातुं तर्हि तस्मिन्नददति **वक्रयिक**मुक्तप्रकारेण **अनुलोमयेत्** ॥ ३३०३ ॥

**तम्मि वि अदेंते ताहे, छिन्नमछिन्ने वि निंति उउबद्धे ।**
**वासासुं ववहारो, उउबद्धे कारणज्जाते ॥ ३३०४ ॥**

**तस्मिन्नप्य**वक्रयिणि पूर्वप्रकारेण अनुलोम्यमानेऽप्य**ददति ऋतुबद्धे** काले **छिन्ने अछिन्ने वा** परिपूर्णे अपरिपूर्णे वा अवधौ **निर्गच्छन्ति, वर्षाकाले** यद्यन्यः कोऽपि साधूनामनुकम्पको न विद्यते यो वसतिं प्रयच्छति तर्हि गत्वा राजकुले **व्यवहारः** कर्त्तव्यः। न केवलं वर्षासु किन्तु **ऋतुबद्धे**ऽपि काले **कारणजाते** सति कर्त्तव्यः ॥ ३३०४ ॥

कारणजातमेव पृच्छति—

**किं पुण कारणजातं, असिवोमादी उ बाहि होज्जाहि ।**
**एएहिं कारणेहिं, अणुलोमऽणुसट्ठि पुव्वं तु ॥ ३३०५ ॥**

**किं पुनः कारणजातं** यद्वशात् ऋतुबद्धेऽपि काले व्यवहार आश्रीयते ?[उच्यते]

**अशिवाऽवमौदर्यादि**कमादिशब्दात् म्लेच्छ-परचक्रादिभयपरिग्रहः। **बहिः** कारणजातं **भवेत्** तत **एतैः कारणैः** ऋतुबद्धेऽपि काले पूर्व**मनुशिष्ट्यानुलोमनं** क्रियते ॥ ३३०५॥

कथं क्रियते? इत्याह—

**सइं जंपंति रायाणो, सइं जंपंति धम्मिया ।**
**सइ जंपंति देवा वी, तं पि ताव सइं वद ॥ ३३०६॥**

**सकृज्जल्पन्ति राजानः, सकृत् जल्पन्ति धार्मिकाः, सकृज्जल्पन्ति देवा अपि, त्वमपि तावत् सकृद् वदसि** । ततः स्वयमुक्त्वा कथमकस्मादस्मान्निष्काशयसि? ॥ ३३०६ ॥

**अणुलोमिए समाणे, तं वा अन्नं वसहि[1] उ देज्जाहि ।**
**अन्नो वऽणुकंपाए देज्जाही वक्कयं तस्स ॥ ३३०७॥**

एवमुक्तेन प्रकारेणाऽ**नुलोमिते सति तामन्यां वा** यदि **वसतिं दद्यात्** यदि **वा अन्योऽनुकम्पया तस्य** शय्यातरस्य **वक्रयं** भाटकं **दद्यात्** ॥ ३३०७ ॥

१. वजइ व - मु. । वजउ उ - सं ॥

**अन्नं व देज्ज वसहिं, सुद्धमसुद्धं व तत्थ ठायंति ।**
**असती परुसाविज्जइ, न नीमो दाऊण को तं सि? ॥ ३३०८॥**

**अन्यां वा वसति**मन्योऽनुकम्पया **दद्यात्** किंविशिष्टाम्? इत्याह-**शुद्धामशुद्धां वा,** शुद्धां विशुद्ध्यविशुद्धिकोटिरहिताम्, अशुद्धां विशुद्ध्यविशुद्धिकोटिदूषितां वा **तत्र तिष्ठन्ति**। अथ स तामन्यां वा वसतिं न ददाति नापि कोप्यन्यो भाटकं शुद्धामशुद्धां वा वसतिम्, तदा **असति** एकस्याप्युक्तरूपस्य प्रकारस्याऽभावे स **परुष्यति** परुषीक्रियते। कथम्? इत्याह-त्वं छिन्नकालां वसतिं दत्त्वा सम्प्रत्यपूर्ण एव काले अस्मान्निष्काशयसि [परं] **न निर्गच्छामः, कस्त्वं** वसतिं **दत्त्वा** साम्प्रतमसि? "**दत्त्वा दानमनीश्वर**" इति वचनात्। अथ किञ्चिद्वक्तव्यं तर्हि राजकुले गच्छामः। एवं परुषितो यदि तिष्ठति, ततः सुन्दरमथ न तिष्ठति तदा राजकुले गन्तव्यम् ॥ ३३०८॥

तथा चाह—

**रायकुले ववहारो, चाउम्मासं तु दाउं निच्छुभती ।**
**पच्छाकडो य तहियं, दाऊणमणीसरो होति ॥ ३३०९॥**

**राजकुले** गत्वा **व्यवहारः** क्रियते। कथमित्याह-**चतुर्मासं दत्त्वा** एषोऽस्मान्निष्काशयति। **तत्र च** राजपुरुषैः '**दत्त्वा** दान**मनीश्वरो भवती**ति' न्यायमनुसरद्भिः स **पश्चात्कृतः** ॥ ३३०९ ॥

**पच्छाकडो भणिज्जा, अच्छउ भंडं इहं निवायम्मि ।**
**अहयं करेमि अन्नं, तुब्भ अहवा वि तेसिं तु ॥ ३३१० ॥**

स उक्तप्रकारेण राजकुले **पश्चात्कृतः** सन् **ब्रूयात्**-'**इह** यत्र यूयं तिष्ठथ, तत्र च **निवाते भाण्डं** क्रयाणकं **तिष्ठतु**, अन्यथा [वक्रयिकः] कोपिष्यति, युष्माकं **पुनरन्यां** वसतिं **करोमि**। **अथवा तेषां** क्रयाणकानां योग्यमन्यत् स्थानं करोमि'॥ ३३१० ॥

**असती अण्णाए ऊ, ताहे उवेहा न पच्चणीयत्तं ।**
**ठायंति जत्थ जंपंति, चोदग कम्मादि तहिं दोसा ॥ ३३११ ॥**

एवमुक्ते यद्यन्या वसतिः प्राप्यते तदा तत्र गन्तव्यमथाऽन्या वसतिर्नास्ति **तदा अन्यस्या** वसतेर**भावे उपेक्षा कर्त्तव्या**। किमुक्तं भवति? यद्यन्यां वसतिं क्रीत्वा ददाति

अविशोधिकोटिकृतां वा तदा तत्रापि **स्थातव्यम्,** न पुनस्तत्रैवास्माभिः स्थातव्यमित्याग्रहपरतया तस्य प्रत्यनीकत्वमुत्पादनीयम्। स हि प्रत्यनीकीकृतः सन् साधूनामन्यस्य वसतिदायकस्य वा प्रतिकूलमाचरेत् । अत्र **चोदको** जल्पति-यत्र तिष्ठन्ति साधव**स्तत्र कर्मादय** आधाकर्मादयो दोषाः। आदिशब्दात् मिश्रक्रीतादिदोषपरिग्रहः॥ ३३११ ॥

अत्र सूरिराह—

**भण्णइ णिंताण तहिं, बहिया दोसा उ बहुतरा होंति ।**
**वासासु हरियपाणा, संजमे आयाए कंटादी ॥ ३३१२॥**

**भण्यते** अत्रोत्तरं दीयते-ऋतुबद्धे काले **निर्गच्छतां तत्र [ यदि ] बहिर्बहुतरा दोषा** अशिवाद्युपद्रवलक्षणा **भवन्ति वर्षाकाले** निर्गच्छतां संयमविराधना आत्मविराधना च। तत्र यत् **हरित**कायोपमर्दनं द्वीन्द्रियादि**प्राणा**क्रमणं वा सा **संयमे** संयमस्य विराधना, **कण्टकादिभिरात्मनो** विराधना। तदेवं छिन्ने काले तिष्ठतां विधिरुक्तः। अथ कालच्छेदो न कृतोऽथ च वर्षाकालो वर्त्तते, अथवा ऋतुबद्धे अपि काले बहिरशिवादि आगाढं कारणं तदा

अन्यस्यां वसतौ गन्तव्यम्, न पुनः शय्यातरं प्रति किमपि वक्तव्यम्। अथान्या शुद्धा वसतिर्न प्राप्यते तदा विशोधिकोटिदूषितायां स्थातव्यं, तस्या अप्यलाभे अविशोधिकोटिदूषितायामपि स्थातव्यमिति॥ ३३१२॥

सम्प्रति सागारिकवक्रयिकयोः शय्यातरत्वचिन्तां कुर्वन्नाह—

**सो चेव य होइ तरो, तेसिं ठाणं तु मोत्तु जइ दिन्नं ।**
**अह पुण सव्वं दिन्नं, [१]तो देंतो वक्कई उ तरो ॥ ३३१३॥**

शालागृहस्य वा अपद्वारिकाया वा अर्द्धं त्रिभागो वा वक्रयेण दत्तः, शेषं संयतानां दत्तम् यथा 'अत्र यूयं तिष्ठतेति'। तत्र च साधवः सर्वेऽपि मान्ति तदा **स एव** पूर्वस्वामी शय्या**तरो भवति। अथ पुन**स्तेन पूर्वस्वामिना **सर्वमपि** शालादि भाटकेन **प्रदत्तं तदा** निर्गच्छतः साधून् दृष्ट्वा यदि वक्रयी ब्रूते 'मा निर्गच्छत यूयमहं युष्माकमवकाशं दास्यामि' **तर्हि** सोऽवकाशं **ददानो वक्रयी**[शय्यातरः], **न** सोऽशय्या**तरः** ॥ ३३१३॥

१. तो णीणह वक्कई - ला. ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अह पुण एगपएसे, भणेज्ज अच्छह तहिं न मायंति ।**
**वक्कइय बेंति इत्थं, अच्छह नो खित्त भंडेणं ॥ ३३१४॥**

**अथ स** पूर्वस्वामी **भणेद्**, यथा '**यूयमस्मिन्नेकप्रदेशे तिष्ठथ' तत्र** च साधवो **न मान्ति,** ततोऽमातः साधून् दृष्ट्वा **वक्रयिको**ऽनुकम्पया **ब्रूते**-'अत्र **तिष्ठथ** यूयं न किं **नो**ऽस्माकं **भाण्डेन क्षिप्तेन** प्रयोजनम्' ॥ ३३१४॥

**तहियं दोवि तरा ऊ, अहवा गेण्हेज्जऽणागयं कोई ।**
**दुल्लभअच्चग्घतरं, व नाउ तहिं संकमइ तस्स ॥ ३३१५॥**

**तत्रा**नन्तरोक्ते प्रकारे **द्वावपि** शय्या**तरौ, अथवा कोऽपि** चिन्तयति यदा भाण्डं नेष्यति तदा बहवः क्रयिका भविष्यन्ति ततोऽत्यर्घतरा महार्घतरा शाला भविष्यति। यदि वा बहुकेनापि मूल्येन दुःखेन लप्स्यते, तद् **दुर्लभामत्यर्घतरां** वा शालां **ज्ञात्वा अनागतं** साधूनामनागमनकाले एव भाटकप्रदानेन **गृह्णाति**। एतच्च साधुभिरागतैर्ज्ञातं यथेयं शाला भाटकेनामुकस्यायत्ता जाता, **ततस्तं** गत्वा याचन्ते ॥ ३३१५॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोऽपि ब्रूयात् —

**जाव नागच्छते भंडं, ताव अच्छह साहवो ।**
**एवं वक्कइतो साहू, भणंतो होइ सारितो ॥ ३३१६॥**

**'यावन्नागच्छति भाण्डं तावत् साधवो** यूयं **तिष्ठथ', एवं वक्रयिकः साधून् भणन् सागारिकः** शय्यातरो **भवति** ॥ ३३१६ ॥

**देसं दाऊण गते, गलमाणं जइ छएज्ज वक्कइतो ।**
**अण्णो वऽणुकंपाए, ताहे सागारितो सो सिं ॥ ३३१७॥**

पूर्वस्वामी शालादे**र्देश**मेकं दत्त्वा क्वाप्यन्यत्र **गतः**, वर्षाकाले च स देशो गलति, ततस्तं **गलन्तं** प्रदेशं **वक्रयिकोऽन्यो वाऽनुकम्पया छादयति तदा स तेषां** साधूनां **सागारिकः** शय्यातरः ॥ ३३१७ ॥

एतदेव सविस्तरं भावयति—



For Private And Personal Use Only

**मोत्तूणं साधूणं, गहितो पुण वक्कतो पउत्थम्मि ।**
**हेट्ठा उवरिम्मि ठिते, मीसम्मि पडालि ववहारो ॥ ३३१८॥**

**साधूनामवकाशं मुक्त्वा** तेन पूर्वस्वामिना शय्यातरेण **वक्रयो** भाटकं **गृहीतः**। गृहीत्वा च प्रोषितः। तस्मिन् **प्रोषितेऽधस्ताद्** वक्रयिकस्य भाण्ड**मुपरि** माले साधवः। अथवा अधस्तात् शालायां स्थिताः साधवः उपरिमालो वक्रयिकस्य दत्त एतद् **मिश्र**मुच्यते। एवं मिश्ररूपे **मिश्रे** स्थितानां यदा शालायां [अधस्तात्] साधवः उपरिमाले च वक्रयिकस्य भाण्डं तदा पडाली गलति भाण्डस्योपरीति न काचित् साधूनां क्षतिः। अथ वक्रयिकस्य भाण्डमधस्तात् शालायामुपरिमाले तिष्ठन्ति साधवः, पडाली च गलति तदा वक्रयिकश्चिन्तयति- 'उपरिमाले पडाली गलति, तत्र साधूनां कष्टं मम तु भाण्डमधस्तात् शालायां ततो न विनश्यतीति' एवं चिन्तयित्वा **पडालीं** न छादयति तत्र यद्यन्योऽपि कश्चिन्न छादयति तदा **व्यवहारः** कर्त्तव्यः, व्यवहारेण छादयितव्य इति भावः॥ ३३१८॥

एतदेवाह—

**हेट्ठा कयं वक्कइएण भंडं, तस्सोवरिं वा वि वसंति साहू ।**
**भंडं ण मे उल्लइ मालबद्धे, नो तं छयंतम्मि भवे विवातो ॥ ३३१९॥**

**अधस्तात्** शालायां, **कृतं वक्रयिकेण भाण्डं, तस्य** भाण्डस्योपरि माले **वसन्ति साधवः**। ततो **न मे भाण्डमस्मिन् मालबद्धे आर्द्र्यते** तिम्यते इति विचिन्त्य **न तां** पडालीं **छादयति** [ततश्च] **भवेद् विवादो** व्यवहारो जायते ॥ ३३१९॥

कथम् ?इत्याह—

**वक्कइय छएयव्वे, ववहारकयम्मि वक्कयं बेंति ।**
**अकयम्मि साहीणं, बेंति तरं दाइयं वा वि ॥ ३३२०॥**

यदि पूर्वमवक्रयकाले एव वागन्तिको **व्यवहारः कृतो** यथा **वक्रयिकेण छादयितव्य-**मिति तदा **वक्रयिकं** साधवोऽनुकूलेन प्रतिकूलेन वा वचसा **ब्रुवते** यथा-'त्वया छादयितव्या पडालीति'। अथ न कृतस्तथारूपो वागन्तिकव्यवहारः, तत्राह-**अकृते** यथोक्तरूपे वागन्तिके व्यवहारे **स्वाधीनं** शय्यातरं **ब्रुवते** यथा 'छादय पडालीमिति' अथ स शय्यातरः क्वापि प्रोषितो भवेत् तदा तस्य शय्या**तरस्य** दायादं वा गोत्रिणं ब्रुवते ॥ ३३२०॥

**अच्छयंते च दाऊणं, सयं सेज्जायरे घरं ।**
**अणुसट्ठादिऽणिच्छंतं, ववहारेण छावए ॥ ३३२१ ॥**

अथ शय्यातरः प्रमाद्यति न छादयति तदा अन्यः कश्चिदभ्यर्थ्यते, ततो येन सा पडाली छादिता सोऽपि शय्यातरो भवति। अथान्यः कश्चनापि छादयिता न विद्यते तदा **शय्यातरे स्वयं गृहं** दत्त्वा प्रमादेनाऽ**नाच्छादयति अनुशिष्टि**रनुशासनं क्रियते, **आदि**शब्दाद् धर्मकथा च, तथापि छादयितुमनिच्छन्तं **व्यवहारेण** 'येन गृहं दत्तं तेन छादनमपि कर्त्तव्यम्। न च पूर्वमाच्छादनं विचारितं न चास्माकमकिञ्चनानां किञ्चिदस्ति येन छादयाम' इत्येवं राजकुलेऽपि गत्वा **व्यवहारकरणेन छादयेत्** ॥ ३३२१ ॥

तदेवमवक्रयसूत्रं भावितम्, इदानीं क्रयिकसूत्रमतिदेशतो व्याख्यानयति —

**एसेव कमो नियमा, कइयम्मि वि होइ आणुपुव्वीए ।**
**नवरं पुण नाणत्तं, उच्चत्ता गेण्हती सो उ ॥ ३३२२ ॥**

य एव क्रमोऽवक्रयिकेऽभिहितः **स एव क्रमो नियमात् क्रयिके आनुपूर्व्या भवति।**

किमुक्तं भवति? यथा वक्रयिके शय्यातरत्वचिन्ता कृता तथा तयैव रीत्या क्रयिकेऽपि कर्त्तव्येति **नवरं पुनर्व**क्रयिकात् क्रयिकस्य **नानात्वमिदं**-वक्रयिकः कियत्कालं मूल्यप्रदानतो गृहीतः(गृह्णाति), स तु क्रयिकः पुन**रुच्चत्वेन गृह्णाति** यावज्जीवं मूल्यप्रदानत आत्मसत्ताकी-करोति ॥ ३३२२॥

**सूत्रम्— विहवधूया नायकुलवासिणी सा वि यावि ओग्गहं अणुन्नवेयव्वा, किमंग पुण पिया वा, भाया वा, पुत्ते वा, से वि यावि ओग्गहं ओगेण्हियव्वे॥ २३॥**

'विहवधूया नायकुलवासिणी'त्यादि, अस्य सूत्रस्य सम्बन्धमाह—

**सागारियअहिगारे, अणुवत्तंतम्मि कोइ सो होति ।**
**संदिट्ठो व पभू वा, विहवासुत्तस्स संबंधो ॥ ३३२३॥**

इह पूर्वसूत्रात् **सागारिकाऽधिकारः** शय्यातराधिकारोऽनुवर्त्तते, तस्मिन् **अनुवर्त्तमाने**ऽनेन सूत्रेण **कोऽपि** सागारिकः, कोऽपि **प्रभु**रिति प्रतिपाद्यमित्येष **विधवासूत्रस्य सम्बन्धः**॥ ३३२३॥

अस्य व्याख्या—

न विद्यते धवो भर्त्ता यस्याः सा **विधवा, धूता** दुहिता **ज्ञातिकुलवासिनी** पितृगृहवासिनी पितामहगृहवासिनी वा इत्यादि। अथवा समासकरणादिदं द्रष्टव्यं-या दुहिता विधवा या च ज्ञातिकुलवासिनी दुहिता। ज्ञातिकुलवासिनी नाम या गृहजामातुर्दत्ता **साप्यवग्रहमनुज्ञापयितव्या किमङ्ग पुनर्पिता वा भ्राता वा पुत्रो वा** स सुतरामनुज्ञापयितव्यः। तथा चाह—**से वि यावी**त्यादि, तौ द्वावप्य**वग्रहमवग्रहीतव्या**विति सूत्राक्षरार्थः ॥ सम्प्रति **भाष्यकारो** व्याख्यानमाह—

**विगयधवा खलु विधवा, धवं तु भत्तारमाहु नेरुत्ता ।**
**धारयति धीयते वा, दधाति वा तेण उ धवो त्ति ॥ ३३२४॥**

**विगतधवा खलु विधवा** विगतो धवो अस्या इति व्युत्पत्तेः, **धवं तु भर्त्तारमाहुः नैरुक्ता** निरुक्तशास्त्रविदः। कया व्युत्पत्त्या? इत्याह-**धारयति** तां स्त्रियं **धीयते** वा तेन पुंसा सा स्त्री **दधाति** सर्वात्मना पुष्णाति तां **तेन** कारणेन निरुक्तिवशात् **धव इत्युच्यते**॥ ३३२४॥

**विधवा वऽणुण्णविज्जइ, किं पुण पिय-माइ-भाय-पुत्तादी ।**
**सो पुण पभु वऽपभू वा, अपभू पुण तत्थिमे होंति ॥ ३३२५॥**

**विधवाऽप्यनुज्ञाप्यते किं पुनः पिता माता भ्राता पुत्रादिर्वा** स सुतरामनुज्ञाप्यः, केवलं **स पुनः** पुत्रभ्रातृप्रभृतिको द्विधा **प्रभुर्वा** भवेद् **अप्रभुर्वा तत्र** पुनर**प्रभव इमे** वक्ष्यमाणा **भवन्ति**॥ ३३२५॥

तानेव निर्युक्तिकृदाह—

**आएस-दास-भइए, विरक्क-जामाइए उ दिण्णा य ।**
**अस्सामि मास लहुतो, सेस पभूऽणुग्गहेणं वा ॥ ३३२६॥**

**आदेशः** प्राघूर्णकः, **दासो**ऽङ्कितः, **भृतकः** कर्मकरः, **विरिक्तो** गृहीतरिक्तादिभागः पुत्रो भ्राताऽन्यो वा, तथा कन्या अन्यत्र पृथग्गृहे **जामातरि दत्ता,** एते**ऽस्वामिनो**ऽप्रभवः, एतान् यदि अनुज्ञापयति तदा प्रायश्चित्तं **मासलघु। शेषाः प्रभवः** स्वामिनः, तान् अनुज्ञापयेत्। **अणुग्गहेणं वे**त्ति, अप्रभूणामपि येषां प्रभुणाऽनुग्रहः कृतो यथा 'यत् त्वया कृतं दत्तं वा तत् प्रमाणमिति', तेन **वाऽनुग्रहेणा**ऽप्रभूनपि अनुज्ञापयेत्, नान्यथा ॥ ३३२६॥

अप्रभूणामनुज्ञापने दोषानाह—

**दिय रातो निच्छुभणा, अप्पभुदोसा अदिन्नदाणं च ।**
**तम्हा उ अणुण्णवए, पभुं व पभुणा व संदिट्ठं ॥ ३३२७॥**

**अप्रभूणा**मनुज्ञापने **दोषाः दिवा रात्रौ** वा **निष्काशनं,** तत्र च जनगर्हा-विनाशादयो दोषाः, न केवलं निष्काशन**मदत्तादानं च,** यस्मादप्रभूणामनुज्ञापने एते दोषास्**तस्मात् प्रभुं प्रभुसंदिष्टं** वानुज्ञापयेत् ॥ ३३२७॥

तमेव दर्शयति—

**गहपति गहवतिणी वा, अविभत्तसुतो अदिन्नकन्ना वा ।**
**पभवति निसिट्ठविहवा, आइट्ठे वा सयं दाउं ॥ ३३२८॥**

**गृहपतिर्गृहपत्नी वा अविभक्तसुतो** वा **अदत्तकन्या वा** वाशब्दादविभक्तद्रव्यभ्रातृ-भ्रातृव्यादिर्वा **प्रभवति,** अथवा या दुहिता **विधवा निसृष्टा** गृहे प्रमाणीकृता साऽपि प्रभवति, यदि वा यः **स्वयं दातुं** प्रभुणा **आदिष्टः** सोऽपि प्रभवति। एतान् अनुज्ञापयेत् ॥ ३३२८॥

**सूत्रम् —पहे वि उग्गहो अणुण्णवेयव्वो ॥२४॥**

अस्य सम्बन्धमाह—

**उग्गहपहुम्मि दिट्ठे, कहियं पुण सो अणुण्णवेयव्वो ? ।**
**अद्धाणादीएसु वि, संभावणसुत्तसंबंधो ॥ ३३२९॥**

**अवग्रहस्य प्रभौ दृष्टे क्व पुनः सोऽवग्रहोऽनुज्ञापयितव्यः** ? इति चिन्तायामधिकृत-सूत्रेणोच्यते-

**पथ्यप्यवग्रहोऽनुज्ञापयितव्यः** अपिशब्दः सम्भावनायामास्तां ग्रामे नगरे वा किन्तु सम्भावनया अध्वन्यपि॥ तथा चाह—**अध्वादिकेष्वप्य**नुज्ञापयितव्यः । एष **सम्भावनासूत्रस्य सम्बन्धः** ॥ ३३२९॥ सम्प्रति **भाष्यविस्तरः**—

**अद्धाण पुव्वभणियं, सागारियमग्गणा इहं सुत्ते ।**
**एगेण परिग्गहिए, सागारिय सेसए भयणा ॥ ३३३०॥**

**अध्वनि** यद् वक्तव्यं तत् सर्वं **पूर्वं कल्पाध्ययने भणितमिति इह** पुनः **सूत्रे**ऽध्वानं व्रजता **सागारिकमार्गणा** शय्यातरमार्गणा क्रियते। तथा **एकेन परिगृहीते** वृक्षादौ सति **शेषे सागारिके भजना,** यदि संस्तरन्ति तर्हि यावद्भिस्तद् गृहीतं वृक्षादि तावतः शय्यातरान् करोति असंस्तरणे एकं कमपि शय्यातरमिति भावार्थः ॥ ३३३० ॥

सम्प्रति पूर्वार्द्धव्याख्यानार्थमाह—

**दिणे दिणे जस्स उवल्लियंती, भंडी वहंते व पडालियं वा ।**
**सागारिए होति स एग एव, रीढागएसु तु जहिं वसंति ॥ ३३३१ ॥**

**दिने दिने यस्य भण्डीं** गन्त्रीं **वहन्तीमुपलीयन्ते** आश्रयन्ति साधवो यदि **वा पडालिकाम्** पडालिका नाम यत्र मध्याह्ने सार्थिकास्तिष्ठन्ति, यत्र वा वसन्ति तत्र वस्त्रादिमयं कुवलयनं कुर्वन्ति, तां वा यस्य दिने दिने उपलीयन्ते तदा **स एवैकः सागारिकः** शय्यातरो **भवति, रीढागतेषु तु** अवज्ञया **यत्र** तत्र गतेषु तु साधुषु यत्र रात्रौ **वसन्ति** तद्दिवसं शय्यातरः। इयमत्र भावना-यस्य न नियमेन भण्डीं वा पडालिकां वा प्रतिदिनमुपलीयन्ते किन्तु यदृच्छया कस्मिन् दिने कस्यापि तदा यां यां रात्रिं यस्य यस्य भण्ड्यादिकमुपलीयन्ते तस्मिन् दिने स शय्यातरः ॥ ३३३१ ॥

**वीसमंता वि छायाए, जे तहिं पढमं ठिया ।**
**चिट्ठंति पुच्छिउं ते वि, पंथिए किमु जहिं वसे ॥ ३३३२॥**

**विश्राम्यन्तोऽपि छायायां ये तत्र पथिकाः प्रथमं स्थितास्तिष्ठन्ति तानपि पृष्ट्वा** तत्र **तिष्ठेयुर्नान्यथा। किं पुनर्यत्र वसेयुः**। तत्र सुतरां ते अनुज्ञातव्यास्ततो भवन्ति ते शय्यातराः ॥ ३३३२॥

सम्प्रति 'एगेण परिग्गहिए सागारियसेसए भयणा' इति व्याख्यानयन्नाह—

**वसंति वा जहिं रत्तिं, एगाणेगपरिग्गहे ।**
**तत्तिए उ तरे कुज्जा, ठावंतेगमसंथरे ॥ ३३३३॥**

**यत्र** वृक्षस्याधस्तादन्यत्र वा **एकस्य** वा परिग्रहे **अनेकस्य** वा पथिकसङ्घातस्य **परिग्रहे** साधवो **रात्रौ वसन्ति** तर्हि सर्वानपि **तान्** शय्या**तरान्** कुर्युः। अथ न **संस्तरन्ति** तदा तन्मध्ये **एकं** शय्यातरं स्थापयन्ति, शेषान् निर्विशन्ते[१] । एषा शेषे सागारिके भजना॥ ३३३३॥

---

१. उपभुञ्जते - इत्यर्थ ॥

**सूत्रम्— से रज्जपरियट्टेसु, संथडेसु, अव्वोगडेसु अव्वोच्छिन्नेसु, अपरपरिग्गहिएसु सच्चेव ओग्गहस्स पुव्वाणुन्नवणा चिट्ठइ अहालंदमवि ओग्गहे॥ २५॥**

**से रज्जपरियट्टेसु, असंथडेसु वोगडेसु, वोच्छिन्नेसु, परपरिग्गहिएसु भिक्खुभावस्स अट्ठाए दोच्चंपि ओग्गहे अणुन्नवेयव्वे सिया॥ २६॥**

'से रज्जपरियट्टेसु' इत्यादि सूत्रद्वयम्, अस्य सम्बन्धप्रतिपादनार्थमाह-

**सागारिय साहम्मिय, उग्गहगहणेणुवत्तमाणम्मि ।**
**सत्तम अंतिमसुत्तं, ठवंति राउग्गहे थेरा ॥ ३३३४॥**

पूर्वसूत्रेभ्यः **सागारिकाऽ**वग्रहग्रहणमनुवर्त्तते ततोऽपि परतरेभ्यः **साधर्मिकावग्रहग्रहणम्**। तस्मिन् अनुवर्त्तमानेऽवग्रहग्रहणप्रस्तावात् **सप्तमस्योद्देशकस्यान्तिमं सूत्रं** सूत्रद्वयं **राजावग्रहे स्थविराः** सूत्रकर्त्तारः **स्थापयन्ति**। एषोऽधिकृतसूत्रद्वयसम्बन्धः ॥३३३४॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या- **से** तस्य भिक्षो **राजपरावर्त्तेषु** राजपरावर्त्तो नाम

अग्रेतनो राजा कालगतो नवोऽभिषिक्तः, तेषु पुनः कथम्भूतेषु इत्याह- **संस्तृतेषु** न कोऽपि तद्राज्यं विलुम्पतीति भावः। तथा **अव्याकृतेषु** येषां दायादानां सामान्यं तद्राज्यं तैरविभक्तेषु, **अव्यवच्छिन्नेषु** तस्मिन्नेव वंशे अनुवर्त्तमानेषु, अत एव **अपरपरिगृहीतेषु सैवावग्रहस्य पूर्वा अनुज्ञापना तिष्ठति,** या तस्य वंशस्यादावनुज्ञापना कृता। कियन्तं कालं पुनः सैव पूर्वानुज्ञा तिष्ठति? त्रत आह— **यथालन्दमप्यवग्रहः**, किमुक्तं भवति ? यावन्तं कालं स वंशोऽनुवर्त्तते तावन्तमपि कालमवग्रहे राजावग्रहे सैव पूर्वानुज्ञापना वर्त्तते, न पुनरन्यस्मिन् राज्ञि उपविष्टे, स भूयोऽवग्रहमनुज्ञापयितव्यः एष प्रथमसूत्रस्यार्थः। सम्प्रति द्वितीयस्योच्यते-**से** तस्य भिक्षो **राज्यपरावर्त्तेषु** अन्येषु राज्यं प्रतिपन्नेषु, **असंस्तृतेषु** त्रुटितपूर्वराज्यसंस्थितिषु, **व्याकृतेषु** अन्यवंशीयैः दायादैर्वा विभज्य विभज्य ममीकृतेषु, **व्यवच्छिन्नेषु** व्यवच्छिन्नपूर्ववंशेषु, अत एव **परपरिगृहीतेषु भिक्षुभावस्यार्थाय** भिक्षुभावो नाम ज्ञानदर्शनचारित्राणि तेषामेव भिक्षुशब्दप्रवृत्तिनिमित्तत्वाद्। एतच्च प्रथमोद्देशके सप्रपञ्चं भावितं, तस्यार्थाय स भिक्षुभावः परिपूर्णो भूयादित्येवमर्थमित्यर्थः। अन्यथा सचित्तादीनामननुज्ञापने अदत्तादानं स्याद्, **द्वितीयमपि वारमवग्रहो अनुज्ञापयितव्यः** एष द्वितीयस्यापि सूत्रस्यार्थः॥ साम्प्रतमेनामेव व्याख्यां भाष्यकृदप्याह—

**संथड मो अविलुत्तं, पडिवक्खो वा न विज्जते जस्स ।**
**अणहिट्ठियमन्नेण व, अव्वोगड दाइ सामन्नं ॥ ३३३५॥**

**संस्तृतं** नाम राज्यं यद् **अविलुप्तं, मो** इति पादपूरणे, **यस्य** वा **प्रतिपक्षो न विद्यते, नाप्यन्येन** केनाप्यधिष्ठितम्,**अव्याकृतं** नाम **दायिनां सामान्यं** न पुनस्तैर्विभक्तम् ॥ ३३३५॥

**अव्वोगडं अविगडं, संदिट्ठं वा वि जं हवेज्जाहि ।**
**अव्वोच्छिन्न परंपरमागय तस्सेव वंसस्स ॥ ३३३६॥**

**अव्याकृतं** नाम-यद**विकृतं** न केनापि विकारमापादितं, यदि **वा यद् भवेत्** पूर्वराजेन **संदिष्टं** यथा-एतस्मै राज्यं देयमिति तद् अव्याकृतम्, **अव्यवच्छिन्नं** नाम यत् **तस्यैव वंशस्य परम्परया समागत**मिति ॥ ३३३६॥

**पुव्वाणुण्णा जा पुव्वएहि राईहि इह अणुण्णाया ।**
**लंदं तु होइ कालो, चिट्ठइ जावुग्गहो तेसिं ॥ ३३३७॥**

**पूर्वानुज्ञा नाम या तु पूर्वकैः राजभिरनुज्ञाता** अहालन्दमवि इत्यत्र **लन्दो** नाम **भवति**

**कालः**,ततोऽयमर्थः **यावन्तं** कालं **तेषामवग्रह**स्तावन्तमपि कालं सैवाऽवग्रहे पूर्वानुज्ञा ॥३३३७॥ तदेवं प्रथमसूत्रव्याख्या कृता, सम्प्रति द्वितीयसूत्रव्याख्यानार्थमाह—

**जं पुण असंथडं वा, सगडं व तह वोगडं व वोच्छिन्नं ।**
**नंद मुरियाण जहा, वोच्छिन्नो तत्थ वंसो उ ॥ ३३३८॥**

**यत् पुनरसंस्तृतं शकटमिव** विशरारुतया संस्तरीतुमशक्नुवत्, **तथा व्याकृतं** दायादैरन्यवंशजैर्वा विभज्य ममीकृतम्, **व्यवच्छिन्नं** यत्र **नन्द-मौर्याणा**मिव **वंशो व्यवच्छिन्नः** ॥ ३३३८ ॥

**तत्थ उ अणुन्नविज्जइ, भिक्खुब्भावट्ठमोग्गहो निययं ।**
**दिक्खादि भिक्खुभावो, अहवा तईयव्वयादीउ ॥ ३३३९॥**

**तत्र नियतम्** अवश्यंभावेन **भिक्षुभावार्थं** यथाऽवस्थितभिक्षुभावसम्पादनाय [ **अवग्रहो** ]**ऽनुज्ञाप्यते** अथ कोऽसौ भिक्षुभावः इत्याह-**दीक्षादिः** आदिशब्दात् सम्यग्ज्ञानादिपरिग्रहो **भिक्षुभावः**, **अथवा तृतीयव्रतादिकं** भिक्षुभावः। तत्रैव भिक्षुशब्दस्य परमार्थतो रूढत्वात् ॥ ३३३९ ॥

तदेवं कृता सूत्रव्याख्या, सम्प्रति **निर्युक्तिविस्तरः**—

**रण्णा कालगतम्मी, अथिर गुरुगा अणुन्नवेंतम्मि ।**
**आणादिणो य दोसा, विराहणा इमेसु ठाणेसु ॥ ३३४० ॥**

**राज्ञि कालगते** ये द्वौ वा त्रयो वा दायिनस्तेषां मध्ये यः स्थिरः सोऽनुज्ञापयितव्यः। यदि पुन**रस्थिरमनुज्ञापयन्ति** तदा तेषां प्रायश्चित्तं चत्वारो **गुरुकाः आज्ञादयश्च दोषाः**। तथा **विराधना** आत्मविराधना संयमविराधना वा **एषु** वक्ष्यमाणेषु **स्थानेषु** ॥३३४०॥

तान्येवाह—

**धुवमण्णे तस्स मज्झे व, तह एक्केव मुक्कसन्नाहो ।**
**दोन्नेगयरपदोसो, अणणुण्णवणे थिरे गुरुगा ॥ ३३४१ ॥**

**धुवमन्यस्मिन्** अन्यवंशजे अस्थिरे तस्य वा पूर्वराजस्य सम्बन्धिनां दायिनामेकस्मिन् अस्थिरे संयतैरनुज्ञापिते स चिन्तयति– 'एते भट्टारका जानन्ति यो राजा भविष्यति ततोऽहमनुज्ञा-

पितः, यदि पुनरितरस्यापि राज्यमभविष्यत् ततो नाऽहमनुज्ञापयिष्ये' इति स तथा विचिन्त्य नास्ति तथा भावस्यान्यथाभाव इति स **एको मुक्तसन्नाहो** वर्त्तते। तं च विश्वस्तं ज्ञात्वा अन्यदा सोऽन्येन दायादादिना मारितो राज्यमधिष्ठितम्। ततः स राजा चिन्तयति- 'संयतैर्ममाऽमित्रः परिगृहीतो येन कारणेन सोऽवग्रहमनुज्ञापितः।' ततः स प्रद्विष्टो **द्वयोरेकतरं[1] प्रद्वेषं** कुर्यात्। किमुक्तं भवति? निर्विषयत्वादि कुर्यात् जीवित-चारित्रयोर्वा भेदं कुर्यात्। तस्मात् यः स्थिरः सोऽनुज्ञापयितव्यः। **अननुज्ञापने स्थिरस्य** प्रायश्चित्तं चत्वारो **गुरुकाः**॥ ३३४१ ॥

**अणणुण्णविए दोसा, पच्छा वा अप्पितो अवण्णा वा ।**
**पत्ते पुव्वममंगल, निच्छुभण पदोस पत्थारो ॥ ३३४२॥**

यदि स्थिरो नाऽनुज्ञाप्यते तदा तस्मि**न्ननुज्ञापिते दोषाः**-सर्वे सामान्येन पाषण्डाः समीपमागताः, निर्ग्रन्थाः पुनरवज्ञां कृत्वा स्थिताः, ततः प्रद्वेषतो निष्काशनादि कुर्यात् । तस्माद् व्यवच्छिन्ने वंशे सोऽवश्यमवग्रहमनुज्ञापयितव्यः। किं पूर्वं पश्चान्मध्ये वा? तत्र यदि



---
१. ०कतरस्य प्र० पु. प्रे.॥

सर्वैरन्यैः पाषण्डैरनुज्ञापिते स **पश्चाद**नुज्ञाप्यते ततः स चिन्तयति अहमेतेषा**मप्रियोऽवज्ञा** वा ममैतैः क्रियते तेन पश्चादागताः। अथ **प्राप्ते** राज्ये **पूर्व**मनुज्ञाप्यते तदा कदाचि**दमङ्गलं** मन्येत ततो **निच्छुभणं** निष्काशनं कुर्यात्, **प्रद्वेषतः प्रस्तारो** जीविताद् व्यपरोपणं क्रियते। तस्मान्मध्येऽनुज्ञापयितव्यः। यदि पुनर्भद्रक इति ज्ञातो भवति पूर्वं चानुज्ञाप्यमानो मङ्गलमिति मन्यते तदा पूर्वमनुज्ञापनीयः। ॥ ३३४२॥ अथ कथं स स्थिरो ज्ञातव्यः, कथं वा भद्रकः कथं वा पूर्वमनुज्ञाप्यमानो मङ्गलं मन्यते, इति [चेत् ?]

तत आह—

**ओहादी आभोगण, निमित्तविसएण वा वि नाऊणं ।**
**भद्दगपुव्वाणुण्णा, पंतमणायमज्झम्मि ॥ ३३४३॥**

**अवध्यादिना** अतिशयेन आदिशब्दान्मनःपर्यवज्ञानश्रुतातिशयविशेषपरिग्रहः। अथवा **निमित्तविशेषेणा** अथाऽऽत्मनोऽवध्याद्यतिशयो निमित्तविशेषो वा न विद्यते तदा अन्यान-वध्यातिशयिनो पृष्ट्वा **[ नैमित्तिकेन वा ]** निमित्तविशेषं **ज्ञात्वा भद्रकं पूर्वानुज्ञापनां** च

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञात्वा पूर्वमनुज्ञापयेत् **प्रान्तमज्ञातं** वा **मध्ये** ॥ ३३४३ ॥

**एएणं विहिणा ऊ, सोऽणुन्नवितो जया वएज्जाहि ।**
**राया किं देमि? त्ति य, जं दिन्नं अण्णरादीहिं ॥ ३३४४॥**

**एतेनाऽ**नन्तरोदितेन **विधिना सोऽनुज्ञापितो राजा यदा वदेत् 'किं ददामि?'** इति, तदा वक्तव्यम्- 'यद्दत्तमन्यै **राजभि**स्तद्देहीति' ॥ ३३४४ ॥

**जाणंतो अणुजाणति, अजाणतो भणति तेहिं किं दिन्नं? ।**
**पाउग्गं ति य भणिए, किं पाउग्गं? इमं सुणसु ॥ ३३४५॥**

एवमुक्ते **जानानः** सर्व**मनुजानाति अज्ञायको ब्रूते**- '**एतैरन्यै** राजभिः **किं दत्तं**?' तत्र '**प्रायोग्यमिति**' भणितव्यम्। तस्मिन् **भणिते** पुनः ब्रूते '**किं प्रायोग्य**मिति,' ततो वक्तव्यं '**शृणुत इदं** प्रायोग्यम्' ॥ ३३४५ ॥

तदेवाह—



For Private And Personal Use Only

**आहार-उवहि-सेज्जाठाण-निसीयण-तुयट्ट-गमणादी ।**
**थीपुरिसाण य दिक्खा, दिन्ना णो पुव्वराईहिं ॥ ३३४६ ॥**

**णो** अस्माकं **पूर्वराज्ञैराहारः उपधिः शय्यास्थानमूर्द्ध्वस्थानं निषीदनं त्वग्वर्त्तो गमनादि** आदिशब्दादागमनपरिग्रहः । तथा **स्त्रीपुरुषाणां दीक्षा** अनुज्ञाद्वारेण **दत्ता** ॥ ३३४६ ॥

**भद्दो सव्वं वियरइ, पंतो पुण दिक्खवज्जमियराणि ।**
**अणुसट्ठाइमकाउं, निंते गुरुगा य आणादी ॥ ३३४७ ॥**

एवं कथिते सति यो **भद्रकः** स **सर्वं वितरति** अनुजानाति, **प्रान्तः पुनर्दीक्षावर्जमितराणि** सर्वाण्यप्याहारादीनि अनुजानाति, प्रव्रज्यां पुनर्नाऽनुजानाति। तत्र यदि तस्य प्रान्तस्य राज्ञोऽनु-**शिष्टिमकृत्वा,** आदिशब्दाद् विद्यादि वा प्रभुकरणं वा अकृत्वा यदि तद्विषयाद् **निर्गच्छति** तदा तेषां प्रायश्चित्तं चत्वारो **गुरुकाः आज्ञादयश्च** दोषाः ॥ ३३४७ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**चेइय सावग पव्वइउकाम अतरंत-बालवुड्ढा य ।**
**चत्ता अजंगमा वि य, अभत्ति तित्थस्स परिहाणी ॥ ३३४८॥**

अन्यच्च **चैत्यानि** तेन परित्यक्तानि, श्रावका ये च **प्रव्रजितुकामाः**,तथा **अतरन्तो** ग्लाना **बाला वृद्धा अजङ्गमाश्च** ते सर्वेऽपि **त्यक्ताः अभक्ति**स्तीर्थकराणां कृता आज्ञाखण्डनात् **तीर्थस्य** च **परिहानि**रापादिता। तथाहि-ये तत्र विषये प्रव्रजितुकामास्ते न प्रव्रजिष्यन्ति, श्रावका अपि सम्यक्त्वमणुव्रतानि च गृह्णन्तो न ग्रहीष्यन्ति। ततो भवति तीर्थस्य व्यवच्छेदः॥ ३३४८॥

यद्येवं तर्हि तत्रैव तिष्ठन्तु । तत्राप्याह—

**अच्छंताण वि गुरुगा, अभत्तितित्थस्स हाणि जा वुत्ता ।**
**भणमाण भणावेता, अच्छंति अणिच्छ वच्चंति ॥ ३३४९॥**

तत्र **तिष्ठतामपि** तेषां प्रायश्चित्तं चत्वारो **गुरुका** मासाः, देशान्तरे भव्यपौण्डरीकप्रतिबोधनलाभतो भ्रष्टत्वात्, तथा तीर्थकराणाम**भक्ति**स्तिष्ठद्भिः कृता तदाज्ञाखण्डनात्, **तीर्थस्य हानि**रापादिता स्वयमेव तेन प्रान्तेन राज्ञोक्ता स्त्रीपुरुषा न दीक्षितव्या इति, यद्येवं तर्हि किं



For Private And Personal Use Only

कर्त्तव्यम्? अत आह-स्वयं **भणन्तः** प्रज्ञापयन्तोऽन्यैः **भणयन्तस्तिष्ठन्ति** तथाऽपि चेत् स **नेच्छेत्** तर्हि ततो देशाद् **व्रजन्ति** ॥३३४९॥

**अह पुण हवेज्ज दोन्नी, रज्जाइं तस्स नरवरिंदस्स ।**
**तहियं अणुजाणंतो, दोसु वि रज्जेसु अप्पबहुं ॥ ३३५०॥**

**अथ पुनस्तस्य नरवरेन्द्रस्य** स्वयमन्यैर्वा प्रज्ञाप्यमानस्य कदाचिद् **द्वे राज्ये भवतस्तत्र** तयो**र्द्वयो राज्ययो**र्मध्ये एकत्र क्वा**प्यनुजानाति** यथा मम द्वे राज्ये, तत्र तयोर्द्वयोर्मध्ये यत्रैकत्र भवद्भ्यो रोचते तत्र प्रव्राजयत द्वितीये नाऽनुजानामि । एवमुक्ते **अल्पबहु** परिभाव्य यत्र भूयान् तीर्थप्रवृद्ध्यादिलाभस्तत्र स्थातव्यम्॥ ३३५०॥

एतदेव स्पष्टतरमाह—

**एक्कहि विदिन्न रज्जे, रज्जे एगत्थ होइ अविदिन्नं ।**
**एगत्थ इत्थियातो, पुरिसज्जाया य एगत्थ ॥ ३३५१॥**

**एकत्र** एकस्मिन् **राज्ये वितीर्ण**मनुज्ञातं भवति । **एकस्मिन्** राज्ये **न वितीर्णम्,** यत्रानुज्ञातं तत्र स्त्रियः पुरुषा वा अनुज्ञाताः। अथवा **एकत्र** राज्ये **स्त्रियो**ऽनुजानीते **एकत्र पुरुष**[१]**जातान्** ॥ ३३५१ ॥

**थेरा तरुणा य तहा, दुग्गयया अड्ढया य कुलपुत्ता ।**
**जाणवया नागरया, अब्भंतरया कुमारा य ॥ ३३५२ ॥**

अथवा एकत्र राज्ये **स्थविरा**ननुजानाति,एकत्र **तरुणान्,** अथवा एकत्र **दुर्गतकान्** परत्र, **आढ्यान्,** यदि वा एकत्र **कुलपुत्रान्** परत्राऽऽभीरान्। एवमेकत्र **जानपदान्** अन्यत्र **नागरकान्,** अथवा एकत्र **अभ्यन्तरकान्** अपरत्र **कुमारान्,** अभ्यन्तरको नाम ये राजानमतिप्रत्यासन्नी-भूयावलगन्ति, कुमारा राज्ञो दायादाः ॥ ३३५२ ॥

एवमनुज्ञाते किं कर्त्तव्यमित्याह—

---

१. ०षजनान् - मु. ।

**ओहिमादी णाउं, जे बहुतरया उ पव्वयंति तहिं ।**
**ते बिंति समणुजाणसु, असती पुरिसेव जे बहुगा ॥ ३३५३ ॥**

**अवध्यादिना,** आदिशब्दात् श्रुतातिशयविशेषेण निमित्तविशेषेण वा **ज्ञात्वा यत्र बहुतरकाः प्रव्रजन्ति तत्र ते ब्रुवते** 'राजन्! अत्र **अनुजानीहि'। असति** अवध्यादेर्निमित्तविशेषस्य वा अभावे **ये बहवः पुरुषा**स्तानेवानुज्ञापयति, न शेषान् स्तोकानष्टप्रभृतीन् इति॥ ३३५३ ॥

**एयाणि वियरइ तहिं, कम्मघणो पुण भणेज्ज तत्थ इमं ।**
**दिट्ठा वि अमंगल्ला, मा व दिक्खेज्ज अच्छंता ॥ ३३५४ ॥**

**एतानि** अनन्तरोदितानि प्रान्तोऽपि मनाक् भद्रकस्सन् **तत्रा**त्मीये राज्ये **वितरति,** यः **पुनः कर्मघनो** निबिडपापकर्मा स तत्रानुज्ञापनायां क्रियमाणाया**मिदं ब्रूयात्** '**दृष्टा अपि** सन्तो यूयम् **अमङ्गलाः**,तस्मादत्र **तिष्ठन्तो मा** कञ्चन **दीक्षयेयुः** इति' **वाशब्दो** वक्तव्यापेक्षया विकल्पने ॥३३५४ ॥

**मा वा दच्छामि पुणो, अभिक्खणं बेंति कुणाति निव्विसए ।**
**पभवंतो भणति ततो, भरहाहिवती न सि तुमं ति ॥ ३३५५॥**

यदि **वा मा पुनर्भूयो द्रक्ष्याम्येतान्** । **अभीक्ष्णं** वा **ब्रुवन्ति** स्वयमन्यैर्वा पुनः पुनः विज्ञपयन्तीति कृत्वा **निर्विषयान् करोति**। ततो यः **प्रभवन्** वक्ष्यमाणगुणोपेतो [भवति, स] **ब्रूते 'नासि त्वं** सकलस्य **भरतस्याधिपतिर्येन** निर्विषयत्वाज्ञापनेऽस्माकं भयं स्याद् अत्र स्थातुं न दास्यसि ततोऽन्यत्र यास्यामः'॥ ३३५५ ॥

तथा इदमपि ब्रूते-

**केवइयं वा एयं, गोप्पयमेत्तं इमं तुहं रज्जं ।**
**जं पेल्लिउं व नामिय, गम्मति उ मुहुत्तमेत्तेणं ॥ ३३५६॥**

**'कियद्वा एतत् गोष्पदमात्रमिदं तव राज्यं यत् प्रेर्य मुहूर्त्तमात्रेण नंष्ट्वा गम्यते'**॥ ३३५६॥

एवमुक्ते स राजा प्राह—

**जं होऊ तं होऊ, पभवामि अहं तु अप्पणो रज्जे ।**
**सो भणइ नीह मज्झं, रज्जातो किं बहुणा उ ॥ ३३५७॥**

**स राजा ब्रूते यद्** यावन्मात्रं **भवतु** तावन्मात्रं **भवतु आत्मनो राज्ये** तावदहं **प्रभवामि,** तस्मात् किमत्र बहुना? **मम राज्याद्** यूयं **निर्गच्छतेति**॥ ३३५७॥

एवमुक्ते यत् कर्त्तव्यं तदाह—

**अणुसट्ठी धम्मकहा, विज्जनिमित्तादिएहि आउट्टे ।**
**अठिते पभुस्स करणं, जहा कयं विण्हुणा पुव्वं ॥ ३३५८॥**

**अनुशिष्ट्या** अनुशासनेन **धर्मकथया विद्यया निमित्तेन, आदिशब्दाद्** मन्त्रेण चूर्णयोगैर्वा राजान**मावर्त्तयेद्** अनुकूलं कुर्याद्। अथैवमपि **न तिष्ठति** तर्हि तस्मिन् **अस्थिते प्रभोरन्यस्य करणं** कर्तव्यं, **यथा कृतं विष्णुना** विष्णुकुमारेण॥३३५८॥

अथ कीदृशस्तं राजानमन्यप्रभुकरणेन प्रेरयति? इत्यत आह—

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वेउव्वियलद्धी वा, ईसत्थे विज्जाओरसबली वा ।**
**तवलद्धिपुलागो वा, पल्लेति तम्मितरे गुरुगा ॥ ३३५९ ॥**

यो **वैक्रियलब्धिमान्** यो **वा इषुशास्त्रे** निर्मातोऽनेकैरपि पुरुषसहस्त्रैः दुर्जयः। अथवा **विद्याबलवान्** यदि वा **औरसबली** साहसिकः। अथवा **तपोलब्धिपुलाकः** स तमन्यप्रभुकरणेन **प्रेरयति**। यस्तु सत्यामपि शक्तौ प्रभुमन्यं न करोति **तस्मिन्नितरस्मिन्** प्रायश्चित्तं चत्वारो **गुरुकाः** ॥ ३३५९ ॥

कथमन्यं प्रभुं करोति? इत्यत आह—

**तं घेत्तु बंधिऊणं, पुत्तं रज्जे ठवेति उ समत्थो ।**
**असती अणुवसमंते, निग्गंतव्वं ततो ताहे ॥ ३३६० ॥**

तं राजानं **गृहीत्वा** बन्धनेन च **बद्ध्वा समर्थस्तस्य पुत्रं राज्ये स्थापयति । असति** सामर्थ्ये अनुशिष्ट्यादिभिरुपशमयति। स च तथोपशम्यमानोऽपि **नोपशाम्यति** तर्हि **ततो** देशाद् **निर्गन्तव्यम्** ॥ ३३६० ॥



For Private And Personal Use Only

तत्राध्वनि यतनामाह—

**भत्तादि फासुएणं, अलब्भमाणे य पणगहाणीए ।**
**अद्धाणे कायव्वा, जयणा तू जा जहिं भणिया ॥ ३३६१ ॥**

अध्वनि मार्गे **प्रासुकेन भक्तादावलभ्यमाने पञ्चकहान्या यतना कर्त्तव्या। या यत्र** ग्रामे नगरे अरण्ये वा पूर्वं **कल्पाध्ययने भणिता** ॥ ३३६१ ॥

***इति श्री मलयगिरिविरचितायां व्यवहारटीकायां सप्तम उद्देशः समाप्तः ॥छ॥***

सप्तमोद्देशके ग्रन्थाग्रं ३११६ ॥ छ ॥



KIRIT GRAPHICS
09898490091